श्रीहर्षपुष्पामृत जैन ग्रन्थमाला ग्रन्थाङ्क-९१

श्री महावीरजिनेन्द्राय नमः ।

पू. आ श्रीविजयामृतसूरिभ्यो नमः ।

श्री

अनेकार्थ-सङ्ग्रहः

कैरवाकरकौमुदीटीकालङ्कृतः

(द्वितीयो विभागः)

卐

ग्रन्थकारः

कुमारपालनृपप्रतिबोधक-पञ्चाङ्गव्याकरणादिविपुल साहित्य-
सर्जक-कलिकालसर्वज्ञ-

पूज्याचार्यदेव श्रीमद्‌हेमचन्द्रसूरीश्वरः

टीकाकारः

कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्य-पट्टधर-विद्वन्मूर्धन्य-

पूज्याचार्यदेव श्रीमन्महेन्द्र सूरीश्वरः

卐

संशोधक : संपादकश्च

तपोमूर्ति-पूज्याचार्यदेव श्रीमद्‌विजयकर्पूरसूरीश्वर-पट्टालङ्कार-
हालारदेशोद्धारक-कविरत्न-
पूज्याचार्यदेव श्रीमद्‌विजयामृतसूरीश्वर विनेय-
पन्न्यास-श्री जिनेन्द्रविजय-गणिवरः ।

प्रकाशिका :— श्री हर्षपुष्पामृत जैन ग्रन्थमाला
लाखाबावल—शांतिपुरी (हालार) (गुजरात)

प्रथमावृति प्रतयः २०००

वीरसम्वत्	विक्रमसम्वत्	सन
२५०७	२०३७	१९८०

मूल्यं
रु० ३०-००

प्राप्तिस्थान :—

(१) महेता मगनलाल चत्रभुज
शाकमारकेट सामे निशाल फली जामनगर

(२) सरस्वती पुस्तक भंडार
हाथीखाना रतनपोल अमदावाद

(३) सोमचंद डी. शाह
जीवननिवास सामे पालीताणा

(४) सेवन्तोलाल वी. जैन
२० महाजन गली मुंबइ—२

मुद्रक :

१९ फार्म प्रमाणग्रन्थस्य
कीरचंद जगजीवन शेठ
प्रिन्टलेन्ड—वढवाण शहेर

अन्यत्परिपूर्णग्रन्थस्य
रामानन्द प्रिन्टिंग प्रेस
अमदावाद

પ્રકાશકના બે બોલ

અમારી **શ્રી હર્ષપુષ્પામૃત જૈન ગ્રંથમાલા** તરફથી શ્રુતજ્ઞાનની ભક્તિ રૂપે જે સાહિત્ય પ્રકાશન થઈ રહેલ છે તેમાં આ **શ્રી અનેકાર્થ સંગ્રહ સટીક ભાગ ૨ જો** પ્રગટ કરીને અમે આનંદિત બનીએ છીએ.

આ ગ્રન્થનો પહેલો ભાગ સં. ૨૦૨૮માં પ્રગટ થયો હતો અને ત્યાર પછી છપાવવાની અનેક મુશ્કેલીઓને કારણે આ બીજો ભાગ અત્યારે પ્રગટ થાય છે.

પૂજ્યપાદ **કલિકાલ સર્વજ્ઞ શ્રી હેમચંદ્રસૂરીશ્વરજી મહારાજા** જૈન શાસનના મહાન પ્રભાવક પુરુષ હતા. તેમણે જૈન ધર્મની મહાન પ્રભાવના કરવા આદિ સાથે સાહિત્ય પણ વિપુલ પ્રમાણમાં રચ્યું છે.

શ્રી અનેકાર્થ સંગ્રહ એ પણ તેઓશ્રીના રચેલ સાહિત્યમાં મહાન કૃતિ છે. આ મહાન ગ્રંથ ઉપર તેઓશ્રીજીના જ વિદ્વાન પટ્ટધર રત્ન **પૂજ્ય શ્રી મહેન્દ્રસૂરીશ્વરજી મહારાજે કૈરવાકર કૌમુદી** નામની **ટીકા** રચી છે. જે આ ગ્રન્થમાં પ્રગટ થાય છે.

આ મૂળ ગ્રન્થ પૂર્વે પ્રગટ થયેલ પણ ટીકા પ્રગટ થયેલ નહિ. આ મહા મૂલ્યવાન ગ્રન્થ ટીકા સહિત પ્રગટ થાય તો બહુ ઉપયોગી થાય તે માટે સ્વ. **હાલારદેશોદ્ધારક પૂજ્ય આચાર્ય દેવ શ્રી વિજયઅમૃતસૂરીશ્વરજી મહારાજા** તથા **સ્વ. પૂજ્ય મુનિરાજ શ્રી પાર્શ્વવિજયજી મહારાજે** સં. ૨૦૦૩ માં હસ્તપ્રતો ઉપરથી લખાવેલ. પરંતુ અન્યાન્ય સંયોગને કારણે પ્રગટ થઈ શકેલ નહિ. સ્વર્ગસ્થ બંને પૂજ્યોએ આ ગ્રંથ સંશોધન કરીને પ્રગટ થાય તે માટે પૂજ્ય પન્ન્યાસશ્રી **જિનેન્દ્રવિજયજી** ગણિવર (તે વખતે મુનિશ્રી)ને માર્ગદર્શન અને પ્રેરણા આપી ગયેલા.

પૂજ્ય પન્ન્યાસશ્રી જિનેન્દ્રવિજયજી ગણિવરે સં. ૨૦૨૩ જામનગર પ્લોટ ચાતુર્માસ દરમ્યાન આ ગ્રન્થનું સંશોધન શરૂ કર્યું અને જામનગર પ્લોટ આદિના **પ્રાથમિક સહકારથી** મુદ્રણ ચાલુ થયેલ, પરંતુ પ્રેસની અગવડતા આદિને કારણે **પહેલો** ભાગ સં. ૨૦૨૮ માં પ્રગટ થયેલો અને આ બીજો ભાગ પણ પ્રેસની અગવડતાને કારણે સં. ૨૦૩૭માં પ્રગટ થાય છે.

વઢવાણ, પીંડવાડા, બ્યાવર અને અમદાવાદ એમ અનેક જગ્યાએ આ કાર્ય મેટર અને કાગળ ફેરવવા પડ્યા છે અને છેવટે આ ગ્રન્થ પ્રગટ થતાં એક ન કાર્ય આ ગ્રંથમાલા દ્વારા પૂર્ણ થાય છે.

આ ગ્રન્થના સંશોધન તથા સંપાદનમાં પૂજ્ય પન્યાસજી શ્રી જિનેન્દ્ર-વિજયજી ગણિવરે સ્વ. પૂજ્ય ગુરુદેવ આચાર્ય દેવશ્રી વિજય અમૃત-સૂરીશ્વરજી મહારાજની કૃપાથી તેઓશ્રીની ભાવના મુજબ ખૂબ ખંત રાખીને યનો ભોગ આપી સંશોધન કર્યું છે.

ઉપરાંત પૂજ્ય પન્યાસજી મહારાજે આ અનેકાર્થ સંગ્રહ મૂળનું ષાંતર પણ મહાપરિશ્રમ લઈને તૈયાર કર્યું છે અને તે ભાવિમાં પ્રગટ કર-ી અમારી અભિલાષા છે.

આ ગ્રન્થના પ્રકાશનમાં પૂજ્યપાદ આચાર્યદેવાદિ પૂજ્ય મુનિરાજોના પદેશથી જુદા જુદા સંઘો તથા ભાવિકોએ ઉદારતાથી રકમ આપીને તથા ક બનીને જે સહકાર આપ્યો છે તે માટે પૂજ્ય પ્રેરક મુનિરાજો તથા દાતા-નો ખૂબ આભાર માનીએ છીએ. તેમની નામાવલી આ ગ્રન્થમાં અન્યત્ર પેલી છે. સહકાર મળવાથી આ ગ્રન્થની ૧લા ભાગની નકલો ભંડારો તથા પૂ. ્રુ સાધ્વીજી મહારાજોને સારા પ્રમાણમાં ભેટ મોકલી હતી. તે જ રીતે બીજા ગની નકલો પણ મળેલ સહકાર મુજબ પૂ. સાધુ સાધ્વીજી મહારાજો તથા ન ભંડારોને ભેટ મોકલી આપવાનું રાખ્યું છે.

આ ગ્રન્થના મુદ્રણ માટે શ્રી કીરચંદભાઈ જગજીવનભાઈ શેઠે (પ્રિન્ટ-ક મુદ્રણાલય), તથા જ્ઞાનોદય પ્રેસ (પીંડવાડા) તથા રામાનંદ પ્રેસ મદાવાદ)ના માલિકોએ જે મુદ્રણ કરી આપ્યું છે તે માટે તથા અમદાવાદ ા ભાઇ બાબુલાલ હાલચંદે થોડા ફર્મા ખંતથી છપાવી આપેલ તથા ે સરસ્વતી પુસ્તક ભંડાર અમદાવાદવાળા ભાઈશ્રી અશ્વિનભાઈએ ત રાખીને આ કાર્ય પૂર્ણ કરવામાં સહકાર આપ્યો છે તે માટે તેઓનો ભાર માનીએ છીએ.

આવા અપ્રગટ સાહિત્યને પ્રગટ કરવાની તક અમારી ગ્રન્થમાલાને પ્રાપ્ત તે માટે આનંદ વ્યક્ત કરીએ છીએ.

લિ.

મહેતા મગનલાલ ચત્રભુજ

પ્રસ્તાવના

જ્ઞાનની ઉપાસના :

માનવ જીવન પામ્યા પછી આત્માનું લક્ષ ધર્મની ઉત્તમ આરાધના કરી જન્મ મરણથી મુક્તિ મેળવવાનું હોવું જોઈએ. એ લક્ષવાળા આત્માઓ જ ધર્મનું જ્ઞાન મેળવવાની તમન્ના જાગે અને તે જ્ઞાન મેળવીને ધર્મના આદર્શોને જીવનમાં અપનાવવા ઉદ્યમશીલ બને.

શ્રુતજ્ઞાનોપાસના માટે ધર્મ ગ્રન્થોનો અભ્યાસ ગુરુની આજ્ઞા મુજબ કરવો જોઈએ. શ્રી મહાવીર પરમાત્માએ શ્રી ગૌતમસ્વામી આદિ ગણધરોની ત્રિપદી આપી અને તેમણે તે ત્રિપદી પામી દ્વાદશાંગીની રચના કરી. તેમા ૧૧ અંગ પ્રાકૃત અર્ધમાગધિ ભાષામાં રચાયા અને ચૌદપૂર્વ સ્વરૂપ બારમું અંગ સંસ્કૃતમાં રચાયું.

આ આગમો ઉપર નિર્યુક્તિ, ભાષ્ય, ચૂર્ણિ, ટીકાઓની રચનાઓ થઈ અને એ રીતે આગમ પંચાંગીની ઉપાસના શિવસુખના અર્થી મુનિમહારાજો કરે છે.

અધ્યાત્મ શાસ્ત્રો પ્રાકૃત અને સંસ્કૃત ભાષામાં ગુંથાએલા છે. તે સમજવા આદિ માટે હિતસ્વી આત્માઓ તે ભાષાઓનું અધ્યયન કરે છે. એથી ભાષાનું અધ્યયન પણ તેમને માટે અધ્યાત્મ સ્વરૂપે પરિણમે છે. આત્મહિતની ભાવના વિનાનું માત્ર ભાષાનું જ્ઞાન તે અધ્યાત્મ ન ગણાય. ભાષાના જ્ઞાન દ્વારા તત્ત્વના રહસ્યો પામીને પૂર્વના મહાપુરુષોએ વિવિધ કક્ષાના જીવોને ઉપયોગી નવનવાં ધર્મશાસ્ત્રો રચ્યાં છે.

સંસ્કૃત ભાષા બીજી ભાષાઓની માતા ગણાય છે. એ ભાષા સુદઢ, અલ્પ-શબ્દ અને મહાઅર્થની દ્યોતક છે. સંસ્કૃત ભાષામાં આર્ય ધર્મોના મોટા ભાગના શાસ્ત્રો લખાએલાં છે. આમ ધર્મશાસ્ત્રોના આધારને કારણે સંસ્કૃત ભાષા ભારતમાં ધર્મભાષા પ્રાયઃ ગણાય છે.

સંસ્કૃત ભાષામાં પૂજ્ય હેમચન્દ્ર સૂરીશ્વરજી મ.નું ભવ્ય પ્રદાન :

જૈન મુનિઓ પ્રાકૃત અને સંસ્કૃત ભાષામાં લબ્ધલક્ષ્ય હોય છે. અને તેમનું જીવન તે દ્વારા ધર્મશાસ્ત્રોના રહસ્યોની પ્રાપ્તિ, તેની આરાધના અને અધ્યાત્મ પ્રાપ્તિ કરે છે.

કલિકાલ સર્વજ્ઞ પૂજ્ય આચાર્યદેવ શ્રી હેમચન્દ્રસૂરીશ્વરજી મહારાજા વિક્રમના બારમાં સૈકામાં થયેલ મહાન પ્રભાવક પુરુષ હતા. તેઓ જૈનધર્મના શાસ્ત્રો, વ્યાકરણ, સાહિત્ય, ન્યાય આદિ શાસ્ત્રોના પ્રકાંડ બિદ્વાન હતા. તેમની પ્રતિભાથી ગુર્જરેશ્વર શ્રી સિદ્ધરાજ જયસિંહે વ્યાકરણ બનાવવાની તેમને વિનંતિ કરી અને પૂજ્ય આચાર્યદેવશ્રીએ શ્રી સિદ્ધહેમ મહાવ્યાકરણની રચના કરી તે અને વ્યાકરણ કાવ્ય, કોષ, લિંગાનુશાસન, છન્દોનુશાસન વિ. વ્યાકરણના અંગો વડે સંસ્કૃત સાહિત્યને સર્વાંગ સુંદર બનાવ્યું.

પૂજ્ય હેમચંદ્રસૂરીશ્વરજી મહારાજનો જન્મ વિ. સં. ૧૧૪૫ કારતક સુદ ૧૫, આચાર્યપદ વિ. સં. ૧૧૬૬ વૈશાખ સુદ-૩ અને સ્વર્ગારોહણ વિ. સં. ૧૨૨૯માં થયેલ.

શ્રી સિદ્ધહેમ શબ્દાનુશાસન વિ. સં. ૧૧૯૩માં શરૂ કરેલ અને ત્યારબાદ કાવ્ય કોષો વિગેરે રચેલા છે. સિદ્ધહેમમાં સંસ્કૃત પ્રાકૃત બંને વ્યાકરણ રચ્યાં છે.

મહારાજ સિદ્ધરાજને તેઓ બહુમાન્ય હતા અને મહારાજ કુમારપાલના પ્રતિબોધન કરનારા તેઓ ગુરુ હતા. સિદ્ધરાજ જયસિંહનો જન્મ ૧૧૪૩ અને મૃત્યુ ૧૧૯૯માં થયેલ. કુમારપાલ મહારાજાનો જન્મ ૧૧૪૯ અને મૃત્યુ ૧૨૨૯માં થયેલ.

વિપુલ સાહિત્ય સર્જન

તેઓશ્રીએ સંસ્કૃત ભાષામાં વિપુલ શ્રેષ્ઠ સાહિત્ય રચીને એક ભવ્ય યુગ સર્જ્યો છે. તેમની આ કૃતિઓનો અનુભવ કરનારા તેમને ૯૭વી અંશથી પ્રભાવિત માનવા પ્રેરાય છે.

તેમણે રચેલ ગ્રન્થોમાં નીચે મુજબ ગ્રન્થો પ્રસિદ્ધિમાં છે :

(૧) યોગશાસ્ત્ર સટીક (શ્લોક ૧૨૫૭૦) (૨) ત્રિષષ્ટિ શલાકા પુરુષ ચરિત્ર (૩૨૦૦૦) (૩) પરિશિષ્ટ પર્વ (૩૫૦૦) (૪) દ્વયાશ્રય કાવ્ય સંસ્કૃત (૨૮૨૮) (૫) દ્વયાશ્રય કાવ્ય પ્રાકૃત (૧૫૦૦) (૬) અભિધાન ચિંતામણિ શબ્દકોષ સટીક (૧૦૦૦૦) (૭) શેષ નામમાલા (૨૭૪) (૮) અનેકાર્થસંગ્રહ (૧૮૨૮) (૯) દેશી નામમાલા (મૂ. ૭૮૩ ટીકા ૩૫૦૦)(૧૦)પ્રમાણમીમાંસા સટીક અપૂર્ણ (૨૫૦૦) (૧૧) સિદ્ધહેમશબ્દાનુશાસન લઘુવૃત્તિ (૬૦૦૦) (૧૨) સિદ્ધહેમ૦ બૃહદ્વૃત્તિ (૧૮૦૦૦)(૧૩) સિદ્ધહેમ૦ ન્યાસ પ્રાકૃતવ્યાકરણ ઉણાદિ વિવરણ સાથે (૮૪૦૦૦) (૧૪) પ્રાકૃત વ્યાકરણ બૃહદ્વૃત્તિ (૨૨૦૦)(૧૫) ઉણાદિ વિવરણ સહિત (૩૨૫૦) (૧૬) વીતરાગ સ્તોત્ર (૧૮૮) (૧૭) લિંગાનુશાસન સટીક (૩૬૮૪) (૧૮) ધાતુપારાયણ વિવરણ (ધાતુપાઠ) (૫૬૦૦) (૧૯) છન્દોનુશાસન છન્દચૂડામ વૃત્તિ સાથે (૩૦૦૦) (૨૦) નિઘંટુકોષ (૩૯૬) (૨૧) અન્યયોગ વ્યવ દ્વાત્રિંશિકા (૩૨) (૨૨) અયોગ વ્યવચ્છેદ દ્વાત્રિંશિકા (૩૩) (૨૩) કાવ્યાનુશા અલંકાર ચૂડામણિ લઘુવૃત્તિ–વિવેક બૃહદ્વૃત્તિ (૬૦૦૦) (૨૪) મહાદેવ સ્તોત્ર (૪

પૂજ્ય આચાર્યદેવશ્રીની રચનાઓ ગણાય છે તેમ છતાં સંદિગ્ધ છે કૃતિઓ પ્રો. હીરાલાલ કાપડીઆએ નીચે મુજબ જણાવી છે.

(૧) અર્હન્નામ સમુચ્ચય (૨) અર્હન્નીતિ (૩) ચંદ્રલેખા વિજયપ્રક (૪) દ્વિજવદન ચપેટા (વેદાંકુશ) (૫) નાભેયનેમિ દ્વિસંધાન કાવ્ય (૬) ન્ય બલાબલ સૂત્ર (૭) તેની બૃહદ્વૃત્તિ (૮) બાલભાષા વ્યાકરણ વૃત્તિ.

પૂજ્ય હેમચંદ્રસૂરીશ્વરજી મહારાજાના લખેલા ગ્રન્થોના ઉલ્લેખ મળે છે પ તે ગ્રન્થો મળતા નથી તેની યાદી પણ પ્રો. હીરાલાલ કાપડીઆએ નીચે મુજ જણાવી છે :

(૧) અનેકાર્થ શેષ (૨) દ્વાત્રિંશદ્ દ્વાત્રિંશિકા (૩) નિઘંટુ (૪) પ્રમા મીમાંસા બાકી ભાગ (૫) પ્રમાણ મીમાંસાની બાકી બૃહદ્વૃત્તિ. (૬) અ અધ્યાય લઘુવૃત્તિ (૭) સિદ્ધહેમ બૃહન્ન્યાસ બાકી ભાગ (૮) વાદાનુશાસન (શેષ સંગ્રહ નામમાલા (૧૦) શેષસંગ્રહ નામમાલા સારોદ્ધાર (૧૧) સપ્તસંધ મહાકાવ્ય.

પ્રભાવકચરિત્રમાં પણ ઘણી કૃતિઓ મળતી નથી તેમ જણાવેલ છે. અ ચિંતામણિમાં તેમણે ત્રણ કરોડ શ્લોક રચ્યાનું જણાવ્યું છે. ખંભાત, જેસલ પાટણના તાલપત્રના ભંડારોમાંથી પ્રભાવક ચરિત્રમાં બતાવેલી કૃતિઓ સિવા નવીકૃતિઓ ઉપલબ્ધ થઈ નથી. શ્રી કુમારપાળ મહારાજાએ અલભ્ય તાલપ મેળવીને તેઓની કૃતિઓ લખાવેલ છે તે તાલપત્રીય પ્રતો પણ ઉપલબ્ધ થતી ન

તેઓશ્રીએ આવું મહાન સાહિત્ય સર્જન કરીને કલિકાલસર્વજ્ઞ બિરુ યથાર્થ બનાવ્યું છે. તેઓશ્રીને આ ભવ્ય સર્જન માટે કોટિકોટિ નમસ્કાર

અનેકાર્થ સંગ્રહ :

તેમણે કંડારેલા આ સાહિત્ય સંગમમાં નીચે મુજબ છ શબ્દકોષો ઉપલબ્ધ

(૧) અભિધાન ચિંતામણિ સટીક (૨) શેષ નામમાલા (૩) અનેક સંગ્રહ (૪) દેશી નામમાલા (૫) નિઘંટુ શેષ (૬) લિંગાનુશાસન.

આ બધા શબ્દ કોષો પ્રકટ થઈ ચૂક્યા છે.

અનેકાર્થ સંગ્રહ સને ૧૮૮૯માં જર્મન ડો. પ્રો. થિયોડોર જાચારીએ સંપાદન કરી પ્રગટ કરેલ પરંતુ તે પુસ્તક પ્રાયઃ અપૂર્ણ અને ઘણી જગ્યાએ અપૂર્ણ અને અશુદ્ધ પાઠોવાળું છે.

સને ૧૮૯૬માં શ્રી નિર્ણયસાગર પ્રેસ–મુંબઈ તરફથી પંડિતવર્યશ્રી શિવદત્ત અને પં. કાશીનાથ પાંડુરંગ પરબ દ્વારા સંપાદન કરાવીને પ્રગટ કરાવામાં આવેલ છે.

વિ. સં. ૧૯૮૫ સને ૧૯૨૯માં ચોખમ્બા સંસ્કૃત સિરીઝ (બનારસ) તરફથી પં. શ્રી જનાર્દન તારાદત્તિ અને પં. શ્રી ધનાનંદ પાંડેય દ્વારા સંપાદન કરાવીને પ્રગટ થયેલ છે. તેમણે રસથી સંશોધન કર્યું છે. પરંતુ પૂર્ણ પ્રત ન મળવાથી તેમજ જર્મનનું સંપાદિત પુસ્તક તેમને મળ્યું પણ તે અશુદ્ધ હોવાથી કાર્યમાં ઘણી પ્રતિકૂળતા રહી અને બીજા કોશો મેળવી તેના પાઠો મેળવીને સંપાદન કર્યું છે. જેથી અસલ અનેકાર્થ સંગ્રહ અને ટીકાથી સમર્થન પામતા શ્લોકો કરતાં તેમાં ઘણા શ્લોકો ફેરફારવાળા છે. નમુના માટે તેવા કેટલાક શ્લોકો આ ગ્રન્થની ટીપ્પણીમાં બતાવ્યા છે.

તેમની પાસે પ્રકાશિત નિર્ણય સાગરનું પ્રકાશન ઉપલબ્ધ થયું નથી. આમ ઘણી મહેનત છતાં કામમાં ખામી રહી ગઈ છે. આ બંને વિદ્વાનોએ વિશ્વપ્રકાશ, મેદિની, (ત્રિકાંડશેષ), શાશ્વત, મંખ, વૈજયન્તી, હારાવલી વિગેરે શબ્દ કોષોનું સંપાદન કરેલું છે.

આ પ્રકાશનોમાં અનેકાર્થ મૂલમાત્ર છપાયેલ છે. જર્મન પુસ્તકમાં ક્યાંક ટીપ્પણીઓ છે. બાકી કોઈએ અનેકાર્થ સંગ્રહની ટીકા છપાવી નથી.

અનેકાર્થ સંગ્રહની આ કૈરવાકર કૌમુદી ટીકા પ્રગટ થાય છે તેની નકલ પાટણ, ખંભાત, અમદાવાદ અને અમારા હસ્તલિખિત ગ્રન્થોના સંગ્રહની પ્રતોમાંથી કરાવેલ છે તેનું સંશોધન કરતી વખતે મૂળ તેમજ ટીકાના પાઠોની ખૂબ કાળજી રાખવામાં આવી છે.

મૂળ શ્લોકો ટીકા દ્વારા સમર્થન પામ્યા તે રીતે રાખ્યા છે જેથી પૂર્વની કોઈ પણ પ્રત કે પુસ્તક કરતાં આ અનેકાર્થ સંગ્રહના શ્લોકો વધુ સ્પષ્ટ અને પ્રમાણભૂત છે. ટીકાના સમર્થિત પાઠ સિવાયના પાઠો મુદ્રિત મૂલ આદિમાંથી પ્રાપ્ત થયા તે ટીપ્પણીમાં આપ્યા છે. ખંભાતના શ્રી જ્ઞાનવિમલ સૂરિ જૈન

જ્ઞાન ભંડારની મૂળ પ્રત ઉપરથી મૂળ શ્લોકની પ્રેસકોપી પણ અમારી પાસે છે જે ઉપયોગમાં લીધી છે.

આ હૈમી અનેકાર્થ સંગ્રહ બીજા કોષો કરતાં વિશિષ્ટ છે. જેમાં શબ્દો વધુ છે અને અત્યારે અનુપલબ્ધ એવા કોષોનો પણ તેમાં આધાર લીધો છે તેમ ટીકામાં આપેલા પ્રમાણોથી જાણી શકાય છે.

આ ગ્રન્થની રચના ત્રણ ક્રમથી છે : (૧) એક સ્વર આદિ ક્રમથી કાંડ છે. (૨) દરેક કાંડમાં કાન્ત આદિ ક્રમથી શબ્દ ક્રમ છે (૩) એ કાન્ત આદિ શબ્દ ક્રમમાં અકાર આદિના ક્રમથી શબ્દો આપેલ છે તેથી આ કોષમાંથી શબ્દ (૧) કાંડ (૨) અંત (૩) આદિ–એમ ત્રણ મથી જોવામાં આવે તો તરત શબ્દ પ્રાપ્ત થશે. ગ્રન્થની અંતે શબ્દક્રમ આપેલ છે તેમાં એજ ક્રમથી શબ્દોનો અનુક્રમ આપેલ છે.

કૈરવાકરકૌમુદી ટીકા :

ગ્રન્થકાર પૂજ્ય શ્રી હેમચન્દ્રસૂરીશ્વરજી મહારાજાના પટ્ટધર પૂજ્ય આચાર્ય શ્રી મહેન્દ્રસૂરીશ્વરજી મહારાજાએ આ અનેકાર્થ સંગ્રહની ટીકા રચી છે. જેનું નામ કૈરવાકરકૌમુદી આપેલ છે. ગુરુભક્તિથી તેમણે આ ટીકા ગ્રન્થકર્તા પોતાના ગુરુદેવ પૂજ્યશ્રી હેમચન્દ્રસૂરીશ્વરજી મહારાજને નામે સ્થાપી છે.

ટીકા ૧૪૦૦૦ શ્લોક પ્રમાણ વિસ્તૃત છે. ટીકાની રચના જોતાં ટીકાકાર મહર્ષિ સમર્થ વિદ્વાન છે. ટીકાની રચના માટે તેમણે ૨–૩ શ્લોકમાં તે કાલના કોષોની યાદી પણ જણાવી છે જેમાં વિશ્વપ્રકાશ, શાશ્વત, રભસ, અમરસિંહ, મંખ, હુગ્ન, વ્યાડિ, ધનપાલ, ભાગુરિ, વાચસ્પતિ, યાદવ, ધન્વન્તરિ આદિ કોષો જોયા છે તેમજ બીજા સેંકડો ગ્રન્થો દ્વારા ટીકામાં દૃષ્ટાંતો મૂકીને ટીકાને સુદૃઢ બનાવી છે. આ બૃહદ્ટીકા સિવાય અનેકાર્થ સંગ્રહની અવચૂરિ પણ છે જેની પ્રાચીન પડિમાત્રાની પંચપાટી પ્રતિ અમારી પાસે છે.

ટીકાની વિશિષ્ટતા :

ટીકામાં શબ્દના લિંગની વ્યવસ્થા માટે પ્રત્યય વડે જાણી લેવા જણાવ્યું છે અને વિશેષ હોય ત્યાં ખુલાસા કરેલ છે. વળી દરેક શબ્દ માટે તેમણે ચાર ચાર વાતની અપેક્ષા જણાવી છે : (૧) શબ્દની વ્યુત્પત્તિ (૨) લિંગ નિર્ણય (૩) વિષમ અર્થનું પ્રકટીકરણ (૪) તે તે શબ્દના ઉપયોગના વાક્ય પ્રયોગો–દૃષ્ટાંતો. મૂળ શ્લોકમાં શબ્દના અન્ય અર્થો જ્યાં કહ્યા નથી ત્યાં અપિ– શબ્દ વડે અન્ય

કોષકારો આદિના આધારે નવા નવા અર્થો જણાવ્યા છે. તેમજ અનેકાર્થ સંગ્રહ કરતાં બીજા ગ્રન્થોમાં કંઈ લિંગ વ્યુત્પત્તિ આદિ ફેરફાર હોય અગર તેવા દૃષ્ટાંતો હોય તો તે પણ તે તે ગ્રન્થો કે ગ્રન્થકારોના ઉલ્લેખ સાથે જણાવ્યું છે. આવા ઉલ્લેખો– નીચે મુજબ ગ્રન્થ કે ગ્રન્થકારો આદિના છે :– મંખ, ગૌડ, વૈજયન્તી, વ્યાડિ, અજય, શાશ્વત, કાન્ત્ય, વાત્સ્યાયન, શ્રુતિ, વાચસ્પતિ, મય, કૌટિલ્ય, મનુ, અમરકોષ, ભરત, વલ્લભી ટીકા વિગેરે.

ટીકામા નિર્દેશ કરાએલા કોષોમાં ધન્વંતરિ, વ્યાડિ, અને ધનપાલ કોષ નષ્ટ થયા છે તેમ હેમસમીક્ષામાં જણાવ્યું છે જ્યારે ચૌખમ્બા પ્રકાશનમાં વ્યાડિના કોષની શોધ કરીએ છીએ તેમ જણાવ્યું છે.

સંશોધન સંપાદન :

આ ગ્રન્થનું લખાણ પૂજ્ય પરમ ઉપકારી ગુરુદેવ આચાર્યદેવ શ્રી વિજય અમૃતસૂરીશ્વરજી મહારાજ તથા પૂ. મુનિરાજશ્રી પાર્શ્વવિજયજી મહારાજે રાજસ્થાનમાં ૧૯૯૬માં પ્રાયઃ શરૂ કરાવેલ અને સં. ૨૦૦૩માં પુરૂં થએલ. પૂ. ગુરુદેવ આદિ આ ગ્રંથ પ્રગટ થાય તે માટે પ્રેરણા કરતા અને સં. ૨૦૦૯માં જામનગર પ્લોટ શાંતિભવનમાં ચાતુર્માસ તેઓશ્રીએ કરેલ તે વખતે શ્રેષ્ઠિવર્યશ્રી પ્રેમચંદ વ્રજપાલભાઈ સાથે આ ગ્રન્થ પ્રગટ કરવા વાતચીત થએલ–તે વખતે હું સામે શ્રી હાલારી વીશા ઓસવાળ જૈન બોર્ડિંગમાં ભણતો અને પૂજ્યશ્રી પાસે આવતો. તેમણે આ ગ્રન્થની મહત્તા સમજાવી હતી. પરંતુ તે વખતે પ્રકાશિત થઈ શક્યું નહિ. પરંતુ ૨૦૨૪માં અમે જામનગર પ્લોટમાં ચાતુર્માસ કર્યું ત્યારે શ્રી હાલારી વીશા ઓસવાળ તપગચ્છ ઉપાશ્રય અને ધર્મ સ્થાનક ટ્રસ્ટના પ્રાથમિક સહકારથી મુદ્રણ કરાવવાનું ચાલુ થયું. દોઢેક વર્ષમાં આખા ગ્રન્થનું સંશોધન કરીને તૈયાર કર્યો. સં. ૨૦૨૮માં બે કાંડ સુધીનો પહેલો ભાગ પ્રગટ થયો અને આ ૨૦૩૭માં બીજો ભાગ પ્રગટ થાય છે.

ગ્રન્થના મૂળ શ્લોકોના પાઠાંતરો ટીપ્પણીમાં અને ટીકાના પાઠાંતરો ત્યાંજ ટીકામાં આપ્યા છે. ટીકામાં નિર્દેશ કરેલ સિદ્ધહેમ તથા ઉણાદિના સૂત્રોના અંક મેળવીને તે સૂત્રની જોડે કૌંસમાં આપ્યા છે. મૂળ શ્લોકના પાઠો પુનઃ ટીકામાં પણ આપ્યા છે તથા ટીકા વાંચનારને ક્યા શબ્દની વ્યુત્પત્તિ આદિ ચાલે છે વિ. ખ્યાલ તરત આવે.

ટીકાકાર મહર્ષિએ ટીકામાં આપેલ દૃષ્ટાંતોના મૂળ ગ્રન્થો શોધીને ત્યાં તે તે ગ્રન્થનો નામ નિર્દેશ કરવાની ભાવના હતી અને પ્રયત્ન પણ કર્યો પરંતુ

ટીકાકાર મહર્ષિના વિશાળ અગાધ જ્ઞાનની દૃષ્ટિએ મેળવેલા બધા દૃષ્ટાંતોના મૂળ ગ્રન્થો સેંકડો ગ્રન્થો જોતાં પણ મળવા કઠીન હતા જેથી એ કાર્ય મુલત્વી રાખ્યું. થોડી નોંધ કરી છે પણ તે પણ વચ્ચે વચ્ચે અપૂર્ણ હોવાથી આ પ્રકાશનમાં મૂકી નથી.

પ્રથમ જ પ્રકાશન પામતા આ સટીક ગ્રન્થમાં ઘણી ક્ષતિઓ રહી ગઈ છે તે વિબુધજનો ક્ષન્તવ્ય ગણીને આ કાર્યને વધાવી લેશે એવી આશા છે. અને ભવિષ્યમાં વધુ સંશોધન અધ્યયનમાં ઉપયોગી થ.ય તે રીતે આ દિશામાં આગળ વધશે એવી અભિલાષા છે.

અનેકાર્થ સંગ્રહ મૂળનું ભાષાંતર મુંબઈમાં સં. ૨૦૩૦–૩૧માં કર્યું છે અને તે પણ મુદ્રણ થાય તે માટે ભૂમિકા રચાઈ છે. જેથી મૂળ શ્લોકો કંઠસ્થ કરનાર માટે તથા સરળતાથી તેનો ઉપયોગ થાય તે માટે આદરણીય બનશે.

આ ગ્રન્થના પ્રકાશનમાં મારા પરમ ઉપકારી ગુરુદેવ આચાર્યદેવ શ્રીમદ્ વિજયઅમૃતસૂરીશ્વરજી મહારાજા તથા પૂજ્યપાદ મુનિરાજશ્રી પાર્શ્વવિજયજી મહારાજનો સૌ પ્રથમ ઉપકાર છે અને આ પ્રકાશન પ્રથમ પ્રકાશિત થાય છે તે તેઓશ્રીને જ આભારી છે.

આ ગ્રન્થના મહાન કાર્ય માટે જે જે પૂજ્ય આચાર્યદેવાદિ મુનિરાજોએ પ્રેરણા આપી છે તથા જે જે સંઘો એ જ્ઞાનખાતાથી તથા ભાવિકોએ ભક્તિથી રકમ આપી છે તે સર્વની લાગણીની અનુમોદન કરું છું.

ગ્રન્થના ૧૭ ફરમા ફીરચંદભાઈ શેઠ વઢવાણા શહેરવાળાએ, એક ફાર્મ જ્ઞાનોદય પ્રેસ પીંડવાડા અને બાકીના ફાર્મ રામાનંદ પ્રેસ અમદાવાદમાં શ્રી બાબુલાલ હાલચંદભાઈ તથા શ્રી સરસ્વતી પુસ્તક ભંડારવાળા શ્રી અશ્વિનભાઈની ખાસ કાળજીથી છપાયા છે. તેમણે આ કાર્યમાં રાખેલ કાળજી માટે નોંધ લઉં છું.

ગ્રન્થકાર ટીકાકાર :

ગ્રન્થકાર પૂજ્ય કલિકાલ સર્વજ્ઞ શ્રી હેમચંદ્રસૂરીશ્વરજી મહારાજાએ આ ગ્રન્થ દ્વારા સંસ્કૃત ભાષાને સમૃદ્ધ બનાવી છે. તેઓશ્રીજીના જીવન અંગે પ્રભાવક ચરિત્ર, પ્રબંધ ચિંતામણિ, કુમારપાળ ચરિત્ર વિગેરે ગ્રન્થોમાં સારી સામગ્રી છે તેમજ ડો. બુહ્લર નિબંધ, શ્રી પીટર્સન રિપોર્ટ, હેમસમીક્ષા, શ્રી હેમચન્દ્રાચાર્ય વિગેરે પુસ્તકો પણ પ્રગટ થયેલા છે. મેં પૂજ્ય શ્રી હેમચન્દ્રસૂરીશ્વરજી મહારાજાનું જીવન ચરિત્ર ચિત્રમય બનાવવા આર્ટીસ્ટ પાસે ચિત્રો આલેખાવ્યા છે પરંતુ

પૂર્ણ તૈયાર નથી તેમ અહીં મુકતાં દળ વધી જાય તેથી મુકેલ નથી પરંતુ ભવિષ્યમાં સ્વતંત્ર પ્રકાશન પ્રગટ કરાય તેવી ધારણા છે.

ટીકાકાર મહર્ષિશ્રી મહેન્દ્રસૂરીશ્વરજી મહારાજ પૂજ્ય હેમચન્દ્રસૂરીશ્વરજી મહારાજના છઠ્ઠા શિષ્યરત્ન છે. ગ્રન્થકારના મુખ્ય શિષ્યોમાં પૂ. શ્રી રામચંદ્ર-સૂરીશ્વરજી મ., પૂ. શ્રી ગુણચંદ્રસૂરીશ્વરજી મહારાજ, પૂ. શ્રી. યશશ્ચંદ્રસૂરીશ્વરજી મ., પૂ. શ્રી બાલચંદ્રસૂરીશ્વરજી મહારાજ, પૂ. શ્રી ઉદયચંદ્રસૂરીશ્વરજી મહારાજ, પૂજ્યશ્રી મહેન્દ્રસૂરીશ્વરજી મહારાજ મુખ્ય છે. કુમારવિહારની પ્રશસ્તિમાં વર્ધ-માન ગણિ નામના સાતમા મુખ્ય શિષ્ય પણ જણાવાયા છે.

ગ્રન્થકાર શ્રી હેમચંદ્રસૂરીશ્વરજી મહારાજ જગપ્રસિદ્ધ મહાન પુરુષ હતા તે સાથે ટીકાકાર પૂજ્ય શ્રી મહેન્દ્રસૂરીશ્વરજી મહારાજ પણ મહાન વિદ્વાન, પરમ ગુરુભક્ત અને સમર્થ આચાર્યપ્રવર હતા. આ મહાન સર્જન દ્વારા તેઓશ્રીએ વિશ્વ ઉપર મહાન ઉપકાર કર્યો છે તેઓશ્રીને કોટિકોટિ નમસ્કાર કરી ધન્ય બનું છું.

આજે આઠસો વર્ષ બાદ તેઓશ્રીના આ અમૂલ્ય ગ્રન્થરત્નનું સંશોધન તથા સંપાદન કરવાનો મને અવસર પ્રાપ્ત થયો તે માટે ધન્યતા અનુભવું છું.

શ્રી હા. વી. ઓ.
તપગચ્છ જૈન ઉપાશ્રય,
૪૫ દિગ્વિજય પ્લોટ જામનગર
વિ.સં. ૨૦૩૭ કારતક સુદ–૧૫
શનિવાર તા. ૨૨–૧૧–૮૦

પરમોપકારી ગુરુદેવ આચાર્યદેવ
શ્રીમદ્વિજયઅમૃતસૂરીશ્વર
ચરણ કિંકર
પં. જિનેન્દ્ર વિજય ગણી

અનેકાર્થસંગ્રહ સટીક ભા. ૧ તથા ૨ માં અત્યાર સુધી મળેલ સહકારની શુભ યાદી

રકમ	દાતા	ગામ
૫૦૦૧	શેઠ ધર્મદાસ શાંતિદાસની પેઢી પૂ.પં. શ્રી જિનેન્દ્ર-વિજયજી ગણિવરના ઉપદેશથી	સાવરકુંડલા
૪૦૦૧	શ્રી હાલારીવીશા ઓસવાળ તપગચ્છ ઉપાશ્રય અને ધર્મસ્થાનક ટ્રસ્ટ પૂ. પં શ્રી જિનેન્દ્ર વિજયજી ગણિવરના ઉપદેશથી	જામનગર
૩૭૫૦	શ્રી શ્રુતજ્ઞાન અમીધારા જ્ઞાનમંદિર પૂ.પં. શ્રી માણેક વિજયજી ગણિવરના સદુપદેશથી	ખેડા
૨૨૫૦	શ્રી વીશા શ્રીમાળી તપગચ્છ જૈન સંઘ જ્ઞાનખાતેથી પૂ. પં. શ્રી જિનેન્દ્રવિજયજી ગણિવરના ઉપદેશથી	જામનગર
૨૦૦૦	શેઠ મોતીશા લાલબાગ જૈન ચેરીટીઝ જ્ઞાનખાતેથી પૂ. આ.શ્રી વિજયજિતમૃગાંકસૂરીશ્વરજી મહારાજના સદુપદેશથી	મુંબઈ
૨૦૦૧	શ્રી મુનિસુવ્રતસ્વામી શ્વે.મૂ.જૈનસંઘ વેલાણી એસ્ટેટ મલાડ પૂ. પં. શ્રી જિનેન્દ્ર વિજયજી ગણિવરના સદુપદેશથી.	મુંબઈ
૧૫૦૦	શ્રી શ્વે. મૂ. જૈન સંઘ (પ્રહલાદ પ્લોટ) પૂ. પં. શ્રી જિનેન્દ્ર વિજયજી ગણિવરના સદુપદેશથી	રાજકોટ
૧૦૦૦	શ્રી. શ્વે. મૂ. જૈન સંઘ પૂ.પં. શ્રી જિનેન્દ્રવિજયજી ગણિવરના સદુપદેશથી	નવાગામ
૫૦૧	શ્રી શાંતિભવન જૈન ઉપાશ્રય પૂ. પં. શ્રી રાજેન્દ્ર વિજયજી ગણિવરના સદુપદેશથી	જામનગર
૫૦૧	એક સદ્‌ગૃહસ્થ પૂ. મુ. શ્રી મૃગાંક વિજયજી મહારાજના સદુપદેશથી.	અમદાવાદ
૫૦૧	શ્રી શ્વે.. મૂ. જૈનસંઘ જ્ઞાન ખાતેથી પૂ. શ્રી મહેન્દ્ર પ્રભાશ્રીજી મ. ના ઉપદેશથી	રાસંગપુર
૩૭૫	શ્રી શ્વે. મૂ. જૈનસંઘ પૂ. આ. શ્રી દેવેન્દ્ર સાગર-સૂરીશ્વરજી મહારાજના સદુપદેશથી.	પોરબંદર

૩૦૧	શ્રી. શ્વે. મૂ. જૈન સંઘ પૂ. આ શ્રી વિજયજયન્તશેખર સૂરીશ્વરજી મહારાજના સદુપદેશથી	રાજપીપળા
૩૦૧	શ્રાવિકા બહેન પૂ. સા.શ્રી ચંદ્રપ્રભાશ્રીજી મ. ના. સદુપદેશથી.	અમદાવાદ
૨૮૫	શ્રી હા. વી. ઓ. શ્વે. મૂ. તપગચ્છ જૈનસંઘ	ડભાસંગ
૨૫૧	શ્રાવિકા બહેનો પૂ.સા. શ્રી મૃગેન્દ્રપ્રભાશ્રીજી મ. ના સદુપદેશથી	જેસર
૧૬૧	શ્રી. શ્વે. મૂ. જૈન સંઘ ખાતેથી	અલાઉ
૧૫૧	શ્રી જૈનસંઘ પૂ. સા. શ્રી અનંતપ્રભાશ્રીજી મ. ના સદુપદેશથી	ઢીમા
૧૦૫	શાહ પ્રભાશંકર સુંદરજીભાઈ તથા માતુશ્રી અમૃતબેનના શ્રેયાર્થ તેમના સુપુત્રો તરફથી	રાજકોટ
૧૦૧	જૈનસંઘ જ્ઞાનખાતેથી પૂ. સા. શ્રી મહેન્દ્રપ્રભાશ્રીજી મ. ના. સદુપદેશથી	ભાડલા
૧૦૧	શ્રાવિકા બહેનો પૂ. સા. શ્રી અનંતપ્રભાશ્રીજી મ. તથા પૂ. સા. શ્રી સુવર્ણપ્રભાશ્રીજી મ. ના વરસીતપ નિમિત્તે.	પાલીતાણા

સહકાર માટે પ્રેરણાદાતા તથા દાતાઓનો આભાર માનીએ છીએ.

સાદર સમર્પણ

પરમ આરાધ્યપાદ પૂ. પાદ પં. શ્રી બુદ્ધિવિજયજી ગણિવર (બુટેરાવજી મા.)ના શિષ્યરત્ન વિદ્વદ્વર્ય પૂ. પં. શ્રી આણંદવિજયજી ગણિવરના શિષ્યરત્ન મુનિસરદાર

પૂ. મુનિરાજ શ્રી હર્ષવિજયજી દાદાના

શિષ્યરત્ન તપોમૂર્તિ નિસ્પૃહી શિરોમણિ

પૂ. આચાર્યદેવ શ્રીમદ્વિજય-કર્પૂરસૂરીશ્વરજી મહારાજના

પટ્ટધર

જાલારદેશોદ્ધારક કવિરત્ન, પરમ ઉપકારી પ્રકૃષ્ટવકતા શાસનસંરક્ષક

પૂજયપાદ આચાર્યદેવ શ્રીમદ્

વિજયઅમૃતસૂરીશ્વરજી મહારાજના

કરકમલોમાં તેઓશ્રીજીના અનંત ઉપકારોની સ્મૃતિમાં

આ ગ્રન્થ સમર્પણ કરી ધન્ય બનું છું.

ગુરુદેવકૃપાકાંક્ષી
જિનેન્દ્રવિજય

अनुक्रमणिका

॥ अथ तृतीयः काण्डः ॥

अणुको निपुणेऽल्पे चाशोकौ कङ्केल्लिवञ्जुलौ ।
निःशोकपारदौ चाऽप्यशोका तु कटुरोहिणी ॥१॥

अभीको निर्भये कम्रेऽप्यनीकं रणसैन्ययोः ।
अलीकमप्रिये भाले वितथेऽनूकमन्वये ॥२॥

अर्हम् । अथ तृतीयं त्रिस्वरकाण्डमारभ्यते । तत्रादौ कान्ताः । अणुको निपुणेऽल्पे च । निपुणोऽणुरणुकः । "तनुपुत्राणुवृहती" ७–३–२३ । इति कः । अणुप्रकारो वा "कोऽण्वादेः" ७-२-७६ । इति कः । वाच्यलिङ्गः । द्वयोर्यथा–पर्याणमश्वेष्वणुका विदन्ति । अशोकौ कंकेल्लिवञ्जुलौ । निःशोकपारदौ चापि । न शवति अशोकः । "भीण्शलि" (उणादि २१) इति कः । नास्ति शोकोऽस्येति वा । निःशोके वाच्यलिङ्गः । कङ्केल्लौ निःशोके च यथा – वरसहकार(वरसहायः)करञ्जकवीर(वीरनामा तरुः अन्यत्र वीरवलः)तशेऽशोकमदनपुन्नागसर्वद्रुममयराजन् कथ–मसि न बिभितकः क्वापि । वञ्जुलो वेतसः पारदः सूतः । तत्र क्लीबे इत्यन्यः । अशोका तु कटुरोहिणी । कटुरोहिणी ओषधिः ॥१॥ अभीको निर्भये कम्रेऽपि । न विद्यते भीरस्य अभीकः । "शेषाद्वा" ७–३–१७५ । इति कच् । अभिकामयते वा । "अभेरीश्च वा" ७–१–१८९ । इति कः । निर्भये वाच्यलिङ्गः । तत्र यथा–मेदस्विनः सरभसोपगतानभीकान् । कम्रे कामुके यथा–अभीकपीतान्तिकधूसरेभ्यो गर्भस्थताम्बूलरसारुणेभ्यः । पश्य श्रियं कर्षति काञ्चनारं पञ्चालनारीदशनच्छदेभ्यः । अनीकं रणसैन्ययोः । अनिति अनेन अनीकम् । "स्यमि कषि" (उ० ४६) इति ईकः ।

शीलेऽनूको गतजन्मन्यंशुकं श्लक्ष्णवाससि ।
उत्तरीये वस्त्रमात्रेऽप्यलकाश्चूर्णकुन्तलाः ॥३॥
अलका तु कुबेरस्य नगर्य्यामन्तिकं पुनः
पार्श्वेऽन्तिका तु चुल्ल्यां स्यात्सातलाख्यौषधेऽपि च ॥४॥

पुंक्लीबः । रणे युद्धे यथा–सहस्रगोरिवानीकं दुःसहं भवतः परैः । सैन्ये चम्वां यथा–तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः । अलीकमप्रिये भाले वितथे । अल्यते वार्यते भूष्यते वा अलीकम् (अलिकमपि) । "स्यमि कषि" इति ईकः । सर्वेषु यथा–ते दृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलकाः खलाश्च । नीचाः सदैव सविलासमलीकलग्ना ये कालतां कुटिलतामिव न त्यजन्ति । अनूकमन्वये । शीले । अन्वव्यति समवैति अनूकम् । अचि न्यङ्क्वादित्वात् कत्वम् । द्वयोर्यथा–वरस्यानूकवित्तानि प्रेक्ष्य कन्या प्रदीयते ॥२॥ अनूको गतजन्मनि । गतजन्मापरिणतवया यथा–स्पृशन्ति शूकयानूकं नो कामिन्यः सयौवनाः । अंशुकं श्लक्ष्णवाससि । उत्तरीये वस्त्रमात्रेऽपि । अश्नुते अंशुकम् । "कन्त्वुकांशुक" (उ० ५७) इति साधुः । श्लक्ष्णवाससि यथा–श्वासाः संवृततारहाररुचयः सम्भिन्नचीनांशुकाः । उत्तरीये यथा–नवनखपदमङ्गं गोपयस्यंशुकेन । वस्त्रमात्रे यथा–शुक्लांशुकोपरिचितानि निरन्तराभिर्वेश्मानि रश्मिविततानि नराधिपानाम् । अलकाश्चूर्णकुन्तलाः । अल्यन्ते अलकाः । "दृ कृ न" इति अकः । पुंक्लीबः । प्रायो भूम्नि यथा–विलुलितालकसंहतिरामृशन् मृगदृशां श्रमवारि ललाटजम् ॥३॥ अलका तु कुबेरस्य नगर्याम् । यथा–गन्तव्या ते वसतिरलकानाम यक्षेश्वराणां । अन्तिकं पुनः । पार्श्वे । अन्तोऽस्ति अस्य अन्तिकम् । "अतो-

***अलर्को धवलार्के स्याद्योगोन्मादितशुन्यपि ।**
अम्बिकोमापाण्डुमात्रोर्देवताभिदि मातरि ॥५॥
अन्धिका तु कैतवे स्यात्सर्षपीमिद्धयोरपि ।
अम्लिका तिन्तिडीकाम्लोद्गारचाङ्गेरिकासु च ॥६॥

ऽनेकस्वरात्" ७–२–६ इति इकः । धर्ममात्रे क्लीबे तद्वति वाच्यलिङ्गः । यथा–तामन्तिकन्यस्तबलिप्रदीपाम् । अन्तिका तु चुल्ल्यां स्यात् सातलाख्यौषधेऽपि च । चुल्ल्यां यथा–न दुष्येदन्तिकास्थितम् ॥४॥ अलर्को धवलार्के स्याद् योगोन्मादितशुन्यपि । अल्यतेऽलर्कः । "निष्कतुरुष्क" (उ० २६) इति साधुः । धवलः श्वेतः । अर्को वृक्षविशेषः । तत्र यथा–कुर्यादर्कमलर्केण योगेन कर्मणादिना । उन्मादिते शुनि यथा–अलर्कविषवत्कालं प्राप्यावश्यं विकुर्वते विजातयः । अम्बिकोमापाण्डुमात्रोर्देवताभिदि मातरि । अम्बैव अम्बिका । उमायां यथा–योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिका केशरी । पाण्डुमातरि यथा–अम्बिकायामभूत्पाण्डुः । देवताभिद् द्वाविंशस्य जिनपतेरुपासिका कूष्माण्डिकानाम । तत्र यथा–भूयादिबम्बच्छिदेऽम्बिका । मातरि जनन्यां यथा–अभ्यषेचि शिरो येषामम्बिका चरणाम्बुभिः ॥५॥ अन्धिका तु कैतवे स्यात्सर्षपीमिद्धयोरपि । अन्धयति अन्धिका । कैतवं द्यूतम् । सर्षपी ओषधिः मिद्धं निद्रा । कैतवमिद्धयोर्यथा–अन्धिकान्धाविधास्यन्ति कुतो धर्मं नराधमाः । अम्लिका तिन्तिडीकाम्लोद्गारचाङ्गेरिकासु च । अम्लो रसोऽस्त्यस्यामम्लिका । तिन्तिडीका चिञ्चा । तत्र यथा–गुडूची कोमलाम्लिका । अम्लोद्गारश्चाङ्गेरिका च ओषध्यौ ॥६॥ आलोको दर्शने बन्दिघो(भा)

* प्र० अलर्को नृपे श्वेतार्के रोगोन्मादितशून्यपि ।

आलोको दर्शने बन्दिघोषणोद्योतयोरपि ।
आनकः पटहे भेर्यां ध्वनन्मेघमृदङ्गयोः ॥७॥
आतङ्को रुजि शङ्कायां सन्तापे मुरजध्वनौ ।
आह्निकं स्यात्पुनरहर्निर्वर्त्ये नित्यकर्मणि ॥८॥

षणोद्योतयोरपि । आलोकनम् आलोक्यतेऽनेन वा आलोकः । दर्शने यथा—आलोके ते निपतति पुरा सावलिव्याकुला वा । बन्दिघोषणे यथा—विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृतासमस्य । उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः । उद्योते यथा—तडिद्दीपालोकैर्दिशि दिशि चरन्तीव जलदाः । आनकः पटहे भेर्यां ध्वनन्मेधमृदङ्गयोः । "अणति शब्दायते आनकः । "अणेर्डित्" (उ० ७२) इति आनकः । पटहे भेर्यां मृदङ्गे च यथा—प्रतिनादिताम्बरविमानमानकैर्नितरां मुदा परमयेव दध्वने ध्वनन्(नदन्)मेघो गर्जन्पर्जन्यः ।।७।। आतङ्को रुजि शङ्कायां सन्तापे मुरजध्वनौ । आतङ्कनमातङ्कयस्माद्वा आतङ्कः । सन्तापे पुंक्लीबः । रुजि शङ्कायां सन्तापे च यथा—पुरुषायुषजीविन्यो निरातङ्का निरीतयः । मुरजध्वनौ-मृदङ्गनादः । आह्निकं स्यात्पुनरहर्निर्वर्त्ये नित्यकर्मणि भोजने ग्रन्थभागे च । अह्ना निर्वृत्तम् अह्निकम् । "तेन निर्वृत्ते" ६-२-७१ । इति इकण् । अह्नि भवं वा "वर्षाकालेभ्यः" ६-३-८० । इति इकण् । "अनीनाऽदटचह्नोऽतः" ७-४-६७ । इत्यह्नोऽकारलोपः । चतुर्ष्वर्थेषु । अहर्निर्वर्त्ये वाच्यलिङ्गः । अन्यत्र क्लीबे । अहर्निर्वर्त्ये एकाहनिष्पाद्ये । यथा—यस्याह्निकैः प्रबन्धैर्विदुषामह्नाय विस्मितं चेतः । नित्यकर्मणि यथा—महर्षिहर्षविहितस्नानाह्निकाह्नाय वः ।।८।। भोजने यथा—मध्याह्ने-

भोजने ग्रन्थभागे चाऽऽढकः प्रस्थचतुष्टये ।
आढकी तुवरीक्ष्वाकुः कटुतुम्ब्यां नृपान्तरे ॥९॥
***उदर्कस्तूत्तरकालफले मदनकण्टके ।**
उष्णको धर्म उद्युक्तातुरयोरूर्मिका पुनः ॥१०॥

देयमाह्निकम् । ग्रन्थभागो ग्रन्थावयवः । यथा—अवान्तरप्रकरणविश्रामे शीघ्रं पाठत आह्निकम् । आढकः प्रस्थचतुष्टये । आढौकते आढकः । "कीचक" (उ० ३३) इति अके साधुः । त्रिलिङ्गः । यथा—शाणं पाणितलं मुष्टं कुडवं प्रस्थमाढकम् । द्रोणवहं चक्रमशो विजानीयाच्चतुर्गुणम् । आढकी तुवरी । गौरादित्वाद् ङीः। तुवरी धान्यभेदः । तत्र यथा—आढकी कफपित्तघ्नी किञ्चिन्मारुतकोपिनी । इक्ष्वाकुः कटुतुम्ब्यां नृपान्तरे ।। "इष्यते इक्ष्वाकुः । "इषेः स्वाकुक् (उ० ७५७) कटुतुम्ब्यां स्त्रीलिङ्गः । नृपान्तरे नृपविशेषे पुंसि । तत्र यथा—इक्ष्वाकुवंशप्रभवो यदाते भेत्स्यत्यजः कुम्भमयोमुखेन ।।९।। उदर्कस्तूत्तरकालफले मदनकण्टके । उदियर्ति उदर्कः । "निष्कतुरुष्क" (उ० २६) इति के साधुः । उत्तरकालफले यथा—शुभोदर्काय वैकल्यमपि पापेषु कर्मसु । मदनेन कामेन कृतः कण्टको रोमाञ्चो मदनकण्टकः । उत्तरकालेऽपि । उष्णको धर्म उद्युक्तातुरयोः । उष्ण एव उष्णकः । उष्णंकारी वा "शीताच्च कारिणि" ७-१-१८६ । इति कः । उद्युक्तातुरयोर्वाच्यलिङ्गः । घर्मो निदाघः । उद्युक्त उद्यमी । तत्र यथा—पुष्णन्ति भर्तुर्मुदमुष्णका जनाः । आतुरो रोगी । ऊर्मिका पुनः । उत्कण्ठायां भृङ्गनादे वस्त्रभङ्गेऽङ्गलीयके । वीच्याञ्च । ऊर्मिरेव

* प्र० स्यादुलूकः काकशत्राविन्द्रे भारतयोधिनि ।
उष्णिका मृद्भाण्डभेदे करभस्य च योषिति ।। उदर्क० ।

उत्कण्ठायां भृङ्गनादे वस्त्रभङ्गऽगुलीयके ।
वीच्यां च कनकं हेम्नि कनको नागकेशरे ॥११॥
धत्तूरे पञ्चके काञ्चनारकिंशुकयोरपि ।
करको दाडिमे पक्षिभेदे कमण्डलौ ॥१२॥

ऊर्मिका । स्वार्थेकः । ऊर्मिप्रतिकृतिर्वा । "तस्य तुल्ये कः संज्ञाप्रतिकृत्योः" ७–१–१०८ । इति कः ॥१०॥ पञ्चस्वर्थेषु अङ्गुलीयके यथा–क्षतोर्मिकाकनकपरागपङ्क्तिवतम् । शेषेषु यथा–ऊर्मिकाभिर्विभान्त्येता नदीवध्वो लता इव । कनकं हेम्नि । कनति कनकम् । "दृ कृ नृ" इति अकः । यथा–दंष्ट्र्या कनक–भङ्गपिशङ्ग्या । कनको नागकेसरे ॥११॥ धत्तूरे पञ्चके *काञ्चनारकिंशुकयोरपि । पञ्चापि वृक्षभेदाः । करको दाडिमे पक्षि-भेदे करे कमण्डलौ लट्वाकरङ्क(ञ्ज)योर्वर्षोपले च । कीर्यते किरति वा करकः । "दृ कृ नृ" इति अकः । कर एव वा । सप्तस्वर्थेषु वर्षोपले त्रिलिङ्गः । कमण्डलुकरङ्कयोः पुंक्लीबः । शेषेषु पुंसि ॥१२॥ लट्वा कुसुम्भं तत्र दाडिमे च यथा–करककुसुमताम्रश्चन्द्रमानम्रमूर्तिः । करे मण्डलौ च यथा–करकं करके न्यस्य मस्करी भास्करोदये । करङ्को जलादीनां स्थानम् । तत्र यथा–यस्यां विद्रुमवर्णवर्ण्यकरकप्रोद्गीर्ण–मर्णश्चिरात् । वर्षोपले यथा–तान् कुर्वीथास्तुमुलकरकावृष्टि-हासावकीर्णान् । कटुकं कटु । कटुरोहिणी व्योषं च । कट्वेव कटुकम् । कटौ गुणे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा–आतपः कटुकोरुक्षश्छायामधुरशीतला । कटुरोहिणी ओषधिः ।

* यद्यपि केषुचिदनेकार्थेषु कांचनारादिष्वर्थेषु क्लीबत्वमुक्तं तथापि मखादिषु पुंस्त्वम् ।

लट्वाकरङ्कयोर्वर्षोपले च कटुकं कटु ।
कटुरोहिणी व्योषं च कञ्चुकश्चोलवर्मणोः ॥१३॥
वर्धापकगृहीताङ्गवसने वारबाणके ।
निर्मोके कटकस्त्वद्रिनितम्बे बाहुभूषणे ॥१४॥

व्योषं त्र्यूषणम् । कञ्चुकश्चोलव(च)चर्मणोः वर्धापकगृहीताङ्ग-वसने वारवाणके । निर्मोके । कच्यते कञ्चुकः । "कञ्चुकांशुक" (उ० ५७) इति साधुः । पुंक्लीबः । चोलः कञ्चुलिका । तत्र निर्मोके च यथा–आभोगिनौ मण्डलिनौ तत्क्षणोन्मुक्तकञ्चुकौ । वरमाशीविषौ स्पृष्टौ न तु तन्व्याः पयोधरौ । वर्मणि कवचे यथा–वलानि शूराणि घनाश्च कञ्चुकाः ॥१३॥ वर्धापकगृहीताङ्ग-वसने यथा–नृत्यन्ति कञ्चुकैर्लब्धैः सौविदल्लाः सुतोत्सवे । वारवाणके नृनिचोले च यथा–अन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादसौ वामनः । कटकस्त्वद्रिनितम्बे बाहुभूषणे । सेनायां राजधान्यां च । कटति कटकः । "दृ कृ नृ" (उ०२७) इति अकः । पुंक्लीबः । अद्रिनितम्बे यथा–स्फटिककटकभूमि–र्नटयत्येषशैलः । बाहुभूषणे यथा–पद्मरागकटकाङ्कितहस्ताः ॥१४॥ सेनायां यथा–मुक्तास्तृणाणि परितः कटकं चरन्तः । राजधान्यां यथा–भ्रातः क्वच्चलितोऽसि यामि कटकं किं तत्र सेवाशया । क्रमुको भद्रमुस्तके । गूवाके(ले) पट्टिकालोध्रे । क्रामति क्रमुकः । "क्रमेः क्रम च व" (उ० ५३) इति उकः । भद्रमुस्तको मुस्ताभेदः । गूवाके पूगे यथा आयातः क्रमुकत्वचा विरचितां भिक्षा पुटीमुद्वहन् । पट्टिकालोध्रो रक्त-लोध्रः । कण्टकः क्षुद्रवैरिणि । वेणौ द्रुमाङ्गे रोमाञ्चे । कण्टति कण्टकः । "दृ कृ नृ" (उ० २७) इति अकः । द्रुमाङ्गे

सेनायां राजधान्यां च क्रमुको भद्रमुस्तके ।
गुवाले पट्टिकालोध्रे कण्टकः क्षुद्रवैरिणि ॥१५॥
वेणौ द्रुमाङ्गे रोमाञ्चे कलङ्कोऽङ्कापवादयोः ।
कालायसमले चापि कर्णिका कर्णभूषणे ॥१६॥

रोमाञ्चे च पुंक्लीबः । अन्यत्र पुंसि । क्षुद्रवरिणि द्रुमाङ्गे च यथा—कटकः कण्टकान् सर्वान् मर्दयामास निर्दयम् । सहि न क्षमते यस्माद् बिन्दुनाप्यात्मनोऽधिकम् ॥१५॥ वेणुर्वंशः । रोमाञ्चे यथा—लक्ष्मीकरग्रहणकण्टकितप्रकोष्ठः । कलङ्कोऽङ्कापवादयोः । कालायसमले चापि । कीर्यते कलङ्कः । "किरोऽङ्कोरोलश्च वा" (उ० ६२) इति अङ्कः । अङ्के लाञ्छने यथा—कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीम् । अपवादे यथा—दिनकर कुलास्कन्दी कोऽयं कलङ्कनवाङ्कुरः । कालायसमले यथा—निष्कलङ्कः कृपाणः । कर्णिका कर्णभूषणे बीजकोशे सरोजस्य करमध्याङ्गुलावपि कुट्टन्यां हस्तिहस्ताग्रे । कर्णभवा कर्णिका । "कर्णललाटात्कल्" ६—३—१४१ । कर्णयति वा । कर्णभूषणे यथा—कर्णिकाकिरणकर्बुरितास्याम् ॥१६॥ सरोजबीजकोशे हस्तिहस्ताग्रे च यथा—गजे स्थिता श्रीपद्मे च भ्राम्यन्मधुपकर्णिके । कर मध्याङ्गुलौ कुट्टन्यां च यथा—कर्णिका स्वर्णवर्णाऽपि वर्ण्या नव विभूषणा (विगतभूषणा) । कणिका सूक्ष्मवस्तुनि । अग्निमन्थे । सूक्ष्मः कणः कणिका । कणाः स्फुलिङ्गाः सन्त्यत्र वा । सूक्ष्मवस्तुनि यथा—ते ग्रस्ताः पुनरभ्रतोयकणिका तीव्रव्रतैर्बर्हिभिः ॥१७॥ अग्निमन्थोऽरणिः । गोधूमपिष्टेऽपि यथा—कणिकाखण्डाज्यकृतो लड्डुको मोदकश्च सः (मोदको लड्डुकश्च सः) । कामुकास्तु काम्यशोकातिमुक्तकाः ।

बीजकोशे सरोजस्य करमध्याङ्गुलावपि ।
कुट्टन्यां हस्तिहस्ताग्रे कणिका सूक्ष्मवस्तुनि ॥१७॥
अग्निमन्थे कामुकास्तु काम्यशोकातिमुक्तकाः ।
कारकं कर्तृकर्माद्योः कारिका यातना नटी ॥१८॥

कमनशीलः कामुकः । "शृकमि" ५—२—४० । इति उकण् । कामिनि वाच्यलिङ्गः । तत्र यथा—परिव्राट् कामुकशुनामेकस्यां प्रमदातनौ । अशोकातिमुक्तकौ वृक्षौ । कारकं कर्तृकर्माद्योः । करोति कारकम् । कर्तरि वाच्यलिङ्गः । कर्मादौ क्लीबे । कर्तरि यथा—खनितेव हि कूपस्य प्रासादस्येव कारकः । कर्मादौ यथा—षट् कारकाणि सम्बन्ध उक्तानुक्ततया द्विधा । कारिका यातना नटी । कृतिविवरणश्लोका नापितादिककर्म च । करणं कारिका । भावे णकः । यातना पीडा तत्र यथा—सह्या कथं नरकभूमिषु कारिका स्यात् । नट्यां विवरणश्लोके च यथा—कारिका कारिकेवेयं करोति क्रमनिर्णयम् ॥१८॥ कृतौ नापितादिक कर्मणि च यथा—अकार्षीः कारिकां कां त्वम् । कावृकः कुक्कुटे कोके पीतमुण्डे । कु ईषत् वृक इव कावृकः । "अल्पे" ३—२—१३६ । इति कोः कादेशः । कुक्कुटस्ताम्रचूडः । कोकश्चक्रवाकः । पीतमुण्डः सुगृहाख्यः पक्षी (सुघरी) । अथ कार्मुकः । वंशे । कर्मणे शक्तः कार्मुकः । "योगकर्मभ्यां योकञौ" ६—४—९४ । इति उकञ् ॥१९॥ वंशस्त्वचि सारः । कार्मुकमिष्वासे कर्म्मठे । कर्मठः कर्मशूरः, तत्र वाच्यलिङ्गः । इष्वासे धनुषि यथा—कार्मुकेणैव गुणिना बाणः सन्धानमेष्यति कर्मठे यथा— कार्मुकः शर्म्मकारणम् । क्षारको रसे । कोरके पक्ष्यादिपाशे । क्षरति क्षारकः । कोरके पुंक्लीबः । रसे

कृतिविवरणश्लोका नापितादिककर्म च ।
कावृकः कुक्कुटे कोके पीतमुण्डेऽथ कार्मुकः ॥१९॥
वंशे कार्मुकमिष्वासे कर्म्मठे क्षारको रसे ।
कोरके पक्ष्यादिपाशे कालिका योगिनी भिदि ॥२०॥

यथा--कः क्षते क्षारकं क्षिपेत् । कोरके यथा--क्षारकैः कुसुमचापसायकैः । पक्ष्यादीनां पाशे बन्धने यथा--क्षारकाङ्कितकूर्परः । कालिका योगिनी भिदि स्वर्णादिदोषे मेघाल्यां सुरागौर्योर्नवाम्बुदे । क्रमदेयवस्तुमूल्ये कार्ष्ण्ये वृश्चिकपत्रयोः । रोमाल्यां धूमरीमांस्योः काकीपटोलशाखयोः । काल्येव कालिका । कालो वर्णोऽस्त्यस्या इति वा । "अतोऽनेकस्वरात्" ७--२--६ । इति इकः । कालयति वा । कालस्य भावो वा । चौरादित्वादकन्_ । चतुर्दशस्वर्थेषु । योगिनि भिदि यथा--हरसिद्धैः प्रतीहारी कालिकानाम योगिनी ॥२०॥ स्वर्णादिदोषे यथा--निकषेण विना हेम्नः कालिका नहि लक्ष्यते । मेघाली सामान्येन मेघपङ्क्तिः । तत्र यथा--व्यभाव्यत प्रलयजकालिकाकृतिर्विद्रतः प्रतिबलकेतनावली । सुरायां मदिरायां यथा--याति कालिकया द्रव्यं कारूणां पापकर्मणाम् । गौर्यां यथा--विज्ञेयं कालिकामतम् । नवाम्बुदः कादम्बिनी तत्र यथा--कालिकेव निबिडा बलाकिनी । क्रमदेयवस्तुमूल्यं यद् व्ययकरणादौ व्यवहारिभिर्घृतादिवस्तुप्रवेशना।य द्रव्यं गृह्यते । कलान्तरेऽपि मंखः । द्वयोर्यथा--दुःखेन दीयते वालैः कालिका कालजलिपता । कार्ष्ण्ये यथा--शौर्योष्मभाजां भजतां मुखानि स्वबाहुमौर्वीकिणकालिकैव । वृश्चिकपत्रं पटोलशाखा च ओषधी ॥२१॥ रोमाल्यां यथा--दूर्वाल्येव नवा कुल्या वाला कालिकया बभौ ।

स्वर्णादिदोषे मेघाल्यां सुरागौर्योर्नवाम्बुदे ।
क्रमदेयवस्तुमूल्ये कार्ष्ण्ये वृश्चिकपत्रयोः ॥२१॥
रोमाल्यां धूमरीमांस्योः काकीपटोलशाखयोः ।
किम्पाको वृक्षभिद्यज्ञे कीटको निष्ठुरे कृमौ ॥२२॥

धूमर्य्यां यथा--विकृत्य कालिकाम्भोजे मुनिः कैवर्त्तवालिकाम् । मांसी गन्धद्रव्यम् । काक्यां यथा--पुष्णाति कालिका पूर्वं पश्य कोकिलबालकान् । किम्पाको वृक्षभिद्यज्ञे । कुत्सितः पाकः परिणामोऽस्य किंपाकः । कुत्सितः पाको वा ल इति वा । वृक्षभिदि यथा--किम्पाकफलसंकाशाः । अज्ञो मूर्खः । वाच्यलिङ्गः । कीटको निष्ठुरे कृमौ । कीटयतीति कीटकः । कीट एव वा कीटकः । निष्ठुरे वाच्यलिङ्गः । कृमौ यथा--स मृत्वा जायते पापः पङ्के प्रकटकीटकः ॥२२॥ कीचको ध्वनिमद्वंशे दैत्यभेदे द्रुमान्तरे कच्यते कीचकः । "कीचकपेचक" (उ० ३३) इति साधुः ध्वनिमति वंशे यथा--सकीचकैर्मारुतपूर्णरन्ध्रैः रणद्भिरापादित वंशकृत्यम् । दैत्यभेदे विराटश्याले यथा--भीमो भीषयते सैषमेन्नकः कीचकासृजा । कुलकं पञ्चादि श्लोकसमन्वये पटोलके कोलति कुलकम् । "धृ धून्दि" (उ० २९) इति किदकः । कुलं कायति वा पञ्चादिश्लोकानां समन्वय एकवाक्यतयाऽर्थसङ्गतिः । यदाह--पञ्चादिभिश्चतुर्दशान्तैः कुलकम् । तत्र यथा--मुक्तकं कुलकं कोशः ॥२३॥ कुलकः कुलप्रधाने वल्मीके काकतिण्डुके । कुलप्रधाने यथा--क्रियेत यद्वा कुलकैः कुलोन्नतिः । वल्मीको वामलूरः । काकतिण्डुको वृक्षः । कुलिकस्तु कुलश्रेष्ठे द्रुमनागविशेषयोः । प्रशस्तं कुलमस्यास्ति कुलिकः । "अतोऽनेकस्वरात्" ७--२--६ । इति इकः ।

कीचको ध्वनिमद्वंशे दैत्यभेदे द्रुमान्तरे ।
कुलकं पञ्चादिश्लोकसमन्वये पटोलके ॥२३॥
कुलकः कुलप्रधाने वल्मीके काकतिण्डुके ।
कुलिकस्तु कुलश्रेष्ठे द्रुमनागविशेषयोः ॥२४॥

त्रिष्वर्थेषु । नागविशेषे यथा— कर्कोटः कोटिकृत्वः प्रणमति पुरतस्तक्षके देहि चक्षुः सज्जः सेवाञ्जलिस्ते कपिलकुलिकयोः स्तौति च स्वस्तिकस्त्वाम् ॥२४॥ कुशिको मुनिभेदे स्यात् फाले सर्जे विभीतके । कुष्णाति कुशिकः "कुशिक हृदिक" (उ० ४५) इति साधुः । चतुर्षु अर्थेषु । मुनिभेदे यथा— यूपवत्यवसिते क्रियाविधौ कालवित्कुशिकवंशवर्द्धनः । फाले यथा—दारयन् कुशिके नोर्वी सर्जविभीतकौ वृक्षौ । क्षुल्लकः पामरे स्वल्पे कनिष्ठे दुःस्थिते खले । क्षुणत्ति क्षुद्यते वा क्षुल्लकः । "कीचक पेचक" (उ० ३३) इति साधुः । क्षुधं लाति वा क्षुल्लः । स्वार्थे के क्षुल्लकः । पञ्चस्वर्थेषु वाच्यलिङ्गः । सर्वेषु यथा—राजन्ना जगत्त्रयीमल्ल त्वत्तोऽन्ये क्षुल्लका नृपाः । क्षुद्रशङ्खेऽपि ॥२५॥ कूचि(चि)काक्षीरविकृतौ कुञ्चिकायां च कुड्मले । आलेख्यकूचिकासूच्योः । कोचति कूचिका । "कुशिक"--इति साधुः । पञ्चस्वर्थेषु । क्षीरविकृतौ यथा—कुचिका पित्तनाशिका । कुञ्चिकायां यथा—कूचिका रन्ध्रसम्बन्धे यथा किलकपाटयोः । कुड्मलं मुकुलम् । आलेख्यकूचिका चित्रतूलिका । सूचि केतकाद्यग्रभागः । सीवनी च । कृषकौ फालकर्षकौ । कृषति कृषकः । "कृषेर्गुणवृद्धी च वा" (उ० ३१) इति किदकः । फालः कुशिकः । कर्षकः कुटुम्बी । द्वयोर्यथा—कृषन्ति कृषकाः क्षेत्रं कर्षोत्कर्षपवित्रितम्

कुशिको मुनिभेदे स्यात्फाले सर्जे विभीतके ।
क्षुल्लकः पामरे स्वल्पे कनिष्ठे दुःस्थिते खले ॥२५॥
***कूचिका क्षीरविकृतौ कुञ्चिकायां च कुड्मले ।**
आलेख्यकूचिकासूच्योः कृषकौ फालकर्षकौ ॥२६॥
कोरकं तु कुड्मले स्यात्कत्कोलकमृणालयोः ।
कौतुकं नर्मणीच्छायामुत्सवे कुतुके मुदि ॥२७॥

॥२६॥ कोरकं तु कुड्मले स्यात्कत्कोलकमृणालयोः । कुरति कोरकम् । "दृ कृ नृ" (उ० २७) इति अकः । पुंक्लीबः । कुड्मले यथा—मरुदवनिरुहांरजो वधूभ्यः समुपहरन् विचकार कोरकाणि । कत्कोलको वृक्षः । मृणालं बिसम् । कौतुकं नर्मणीच्छायामुत्सवे कुतुके मुदि । पारम्पर्यगतख्यात (स्थाने) मङ्गलोद्वाहसूत्रयोः । गीतादौ भोगकाले च । कूयते कौतुकम् । "कञ्चुकांशुक" (उ० २७) इति साधुः । कुतुकमेव वा प्रज्ञादित्वादण् । कुतुकस्य भावो वा युवादित्वादण् । नवस्वर्थेषु । नर्मणि यथा—गङ्गां सपत्नीमिव कौतुकेन सन्दर्शयन्मूर्द्धिन शिवः शिवायाः । इच्छायां यथा—बाहुर्मे रणकौतुकी । उत्सवे यथा—विवाहकौतुके ताभ्यां यौतकं नृपतिर्ददौ । कुतुके कौतूहले यथा—निजकरतलरङ्गे नर्त्तितः कौतुकेन । मुदि हर्षे यथा—कौतुकोत्फुल्ललोचनाः ॥२७॥ पारम्पर्यागत ख्यात मङ्गले यथा--वैवाहिकैः कौतुकसंविधानैर्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम् । उद्वाहसूत्रे यथा—अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः । गीतादौ यथा--नार्यो जगुर्मङ्गलकौतुकानि । भोगकाले यथा—अङ्गनाकौतुकेऽनङ्गः प्रत्यङ्गं संचचार सः । कौशिकः

* प्र० कूपको गुणवृक्षे स्यात्तैलपात्रे ककन्दरे । कुचिका० ।

पारम्पर्य्यागतख्यातमङ्गलोद्वाहसूत्रयोः ।
गीतादौ भोगकाले च कौशिकः शक्रघूकयोः ॥२८॥

कोशज्ञे गुग्गुलावाहितुण्डिके नकुले मुनौ ।
कौशिकी चण्डिकानद्योः खनकः सन्धितस्करे ॥२९॥

मूषिके भूमिवित्तज्ञे खट्टिको मांसविक्रयी ।
महिषीक्षीरफेनश्च खुल्लकः स्वल्पनीचयोः ॥३०॥

शक्रघूकयोः । कोशज्ञे गुग्गुलावाहितुण्डिके नकुले मुनौ । कुशिकस्यापत्यं कौशिकः । विदादित्वादञ् । कौशेते वा "कुशिक हृदिक" (उ० ४५) इति साधुः । कोशो भाण्डागारं प्रयोजनमस्येति वा "प्रयोजनम्" ६/४/११७ । इति इकण् । शक्रे घूके च यथा—प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः ॥२८॥ कोशज्ञे भाण्डागारज्ञे यथा—कोशिनीयानकौशिकाः । गुग्गुलौ यथा—अगुरुतुरुष्ककौशिकवररोचना धूपामोदप्रियः । आहितुण्डिके नकुले च यथा—तुरग इव कौशिकात्स बिभ्यत् । मुनौ विश्वामित्रे यथा—कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये । कौशिकी चण्डिकानद्योः । द्वयोर्यथा—कौशिकी श्रेयसेऽस्तु वः । खनकः सन्धितस्करे ॥२९॥ मूषिके भूमिवित्तज्ञे । खनति खनकः । "नृत्खन्रञ्जः शिल्पिन्यकट्" । ५/१/६५ । सन्धितस्करः सुरङ्गाचौरः ॥२९॥ मूषिक आखुः । भूमिवित्तज्ञो निधानवेत्ता । त्रिष्वपि यथा—खन्यन्ते खनिकैर्भुवः । जलाधारेऽपि मंखः । तत्र च स्त्रियां यथा—वनिका खनिका रथ्या प्रपा सत्रावरोहणम् । खट्टिको मांसविक्रयी । महिषीक्षीरफेनश्च । खट्टंण् सम्वरणे । खट्टयति खट्टिकः । "कुशिक" (उ० ४५) इति साधुः । मांस-

खोलकः पूगकोशे स्याच्छिरस्त्रे नाकुपाकयोः ।
ग्रन्थिकं पिप्पलीमूले ग्रन्थिपर्णकभेषजे ॥३१॥

ग्रन्थिको गुग्गुलौ दैवज्ञे माद्रेयकरीरयोः ।
गण्डको विघ्ने विद्यायां सख्यावच्छेदखड्गिषु ॥३२॥

विक्रयिणि यथा—सेयं खट्टिकहट्टिका परिलुठत्पापिष्ठवण्ठाकुला । खुल्लकः स्वल्पनीचयोः । खद् हिंसायां च खद्यते खुल्लकः । "कीचक" (उ० ३३) इति साधुः । वाच्यलिङ्गः । द्वयोर्यथा—क्षीवः खेलति खुल्लकः ॥३०॥ खोलकः पूगकोशे स्याच्छिरस्त्रे नाकुपाकयोः । खलति खोलकः । "कीचक" (उ० ३३) इति साधुः । पूगकोशः पूगपुटम् । शिरस्त्रं शिरस्त्राणम् । नाकुर्वल्मीकः। पाको डिम्भः । सर्वेषु यथा—नरोऽयं नगवद्भाति मौलिलालितखोलकः । ग्रन्थिकं पिप्पलीमूले ग्रन्थिपर्णकभेषजे । ग्रन्थिरत्रास्ति ग्रन्थिकम् । ब्रीह्यादित्वादिकः । ग्रन्थिरेव वा । ग्रन्थोऽस्यास्ति वा । "अतोऽनेकस्वरात्" ७/२/६ । इति इकः ॥३१॥ ग्रन्थिको गुग्गुलौ दैवज्ञे माद्रेयकरीरयोः । गुग्गुलकरीरौ वृक्षौ । दैवज्ञो गणकः । माद्रेयः (नकुलोऽपि) सहदेवः । गण्डको विघ्ने विद्यायां संख्यावच्छेदखड्गिषु । गण्डति गण्डकः । पञ्चस्वर्थेषु । विघ्ने यथा—चण्डि खण्डय गण्डकान् । विद्या विद्याविशेषः । संख्याविशेषश्चत्वारः कपर्दकाः । अवच्छेदे पर्वणि तु स्त्रियाम्, लक्ष्यं यथा—इक्षोः क्षेत्रे द्विपेन्द्रावलिकवलकृते गण्डिकाः खण्डयन्ति । उपधानेऽपि मंखः । तत्र खड्गिनि एकशृङ्गे च यथा—शय्येव विन्ध्यवसुधागरुगण्डकाद्या ॥३२॥ गण्डकी तु सरिद्भेदे । गौरादित्वाद् ङीः । यथा—सिप्रावेत्रवती महासरिदिति ख्याता च या गण्डकी । गणको ग्रहवेदिनि । गणयति गणकः ।

गण्डकी तु सरिद्भेदे गणको ग्रहवेदिनि ।
गणिकेभ्यां यूथिकायां तर्कार्यां पण्ययोषिति ॥३३॥

ग्राहको ग्रहीतरि स्याद् व्याधानां घातिपक्षिणि ।
गान्धिको लेखके गन्धवाणिजे गुण्डकः पुनः ॥३४॥

कलोक्तौ मलने धूलौ स्नेहपात्रेऽथ गैरिकम् ।
स्वर्णे धातौ गोलकस्तु जारतो विधवासुते ॥३५॥

वाच्यलिङ्गः । यथा—गणयति गगने गणकश्चन्द्रेण समागमं विशाखायाः । गणिकेभ्यां यूथिकायां तर्कार्यां पण्ययोषिति चतुर्ष्वर्थेषु स्त्रियाम् । इभ्यां हस्तिन्यां यथा—आरुह्य सप्रगुणितां गणिकां नरेन्द्रः । यूथिका पुष्पलता । तर्कारी ओषधिः । पण्ययोषिति यथा—स्वगुणैराफलप्राप्तेराकृष्य गणिका इव ॥३३॥ ग्राहको ग्रहीतरि स्याद् व्याधानां घातिपक्षिणि गृह्णाति ग्राहकः । ग्रहीतरि वाच्यलिङ्गः । तत्र यथा— न गुणग्राहको जनः । व्याधसम्बन्धे निहिंस्रे पक्षिभेदे श्येनादौ यथा—नाहं ग्राहकपञ्जरं पुनरिदं गृह्णाति जीवन्नहो । गान्धिको लेखके गन्धवाणिजे । गन्धो बालः प्रयोजनमस्य गान्धिकः । "प्रयोजनम्" ६/४/११७ । इति इकण् । गन्धः पण्यमस्येति वा । "तदस्य पण्यम्" ६/४/५४ । इति इकण् । द्वयोर्यथा—नानापत्रौघमेते मुकुलितनयना गान्धिकाः शोधयन्ति । गुण्डकः पुनः कलोक्तौ मलने धूलौ स्नेहपात्रे । गुण्ड्यतेऽनेन गुण्डकः । "नाम्नि पुंसि च" ५/३/१२१ । इति णकः । चतुर्ष्वर्थेषु ॥३४॥ कलोक्तिर्मधुरभणितिः । मलनं धारणम् । धूलिः पांसुः । स्नेहपात्रं कुतुपादि । अथ गैरिकम् ॥ स्वर्णे धातौ । गिरौ भवं गैरिकम् । गिरिणा विग्रहो गिरिका तु "भवे" ६/३/१२३ । इत्यण् । अव्यधिकन्याधिन

अलिञ्जिरे गुडे चापि गोरङ्कुर्नग्नबन्दिनोः ।
खगे च चषको मद्ये सरके मद्यभाजने ॥३६॥

चलुकः प्रसृतौ भाण्डप्रभेदे चुलुको यथा ।
चारकोऽश्वादिपाले स्याद्बन्धे संचारिकेऽपि च ॥३७॥

अध्यात्मादित्वाद् वा इकण् । स्वर्णे यथा—गैरिकाद्रौ ययाविन्द्रः । धातौ यथा— क्रुधा दधत्तनुमतिलोहिनीमभूत्प्रसेनजिद्गज इव गैरिकारुणः । गोलकस्तु जारतो विधवासुते । अलिञ्जिरे गुडे चापि । गुडति गोलकः । गोल एव वा स्वार्थेकः । जारेण यो विधवायां जातः स गोलकः । यत्स्मृतिः अमृते जारजः कुण्डो मृते भर्तरि गोलकः ॥३५॥ अलिञ्जरो मणिकः । तत्र यथा—घोलं गोलकगह्वरेषु परतो न्यस्यन्ति गोष्ठाङ्गनाः । गुडः सर्वतो वृत्तः । तत्र यथा—कदम्बगोलकाकारम् । गोरङ्कुर्नग्नबन्दिनोः । खगे च । गोभिर्वचनैर्जलैर्वा रमते गोरङ्कुः । "कैशीशमि" (७४९ उ०) इति कुः । नग्नो विवस्त्रः । तत्र वाच्यलिङ्गः । शेषयोः पुंसि । बन्दीसूतः । खगः पक्षिविशेषः । चषको मद्ये सरके मद्यभाजने । चषन्ति अनेन चषकः । "दृ कृ नृ" (उ० २७) इत्युकः । पुंक्लीबः । मद्यं धान्यपिष्टोद्भवम् । सरक ऐक्षवः । तयोर्यथा—चषकपानकलालसमानसः । मद्यभाजने यथा — फुल्लदृष्टिवदनं वनितानामब्जचारुचषकं च षडङ्घ्रिः । चलुकः प्रसृतौ भाण्डप्रभेदे चुलुको यथा । चलति चुलुम्पति च चलुकः । चुलुकः । "कञ्चुकांशुक" (उ० ५७) इति साधुः । प्रसृतौ चुलुकः । स्त्रीपुंसः । प्रसृतौ यथा—अगस्ति चुलुकोत्क्षिप्त—सप्तवारिधिवारिणि । भाण्डप्रभेदो भाजनविशेषः । चुलुकशब्द आदिपुरुषेऽपि । यथा चुलुकस्यापत्यं

चित्रकस्तु चित्रकाये द्रुमौषधविशेषयोः ।
चुम्बकः कामुके धूर्त्ते बहुगुर्वश्मभेदयोः ॥३८॥
चुलुकी कुण्डिकाभेदे शिशुमारे कुलान्तरे ।
चूतकः कूप आम्रे च चूलिका नाटकाङ्गके ॥३९॥

वृद्धं चौलुक्यः । चारकोश्वादिपाले स्याद्बन्धे संचारकेऽपि च । चारयति चारकः । बन्धे कारायां पुंसि । शेषयोर्वाच्यलिङ्गः । अश्वादिपाले यथा हरिर्गोवृन्दचारकः । बन्धे यथा—संचारश्चारके कुतः । संचारके यथा—सारणीवारिचारकः ॥३७॥ चित्रकस्तु चित्रकाये द्रुमौषधविशेषयोः । चित्र एव चित्रकः । तिलकेऽपि । तत्र तु क्लीबे । तत्र चित्रकाये श्वापदे च यथा—नियतं दधते च चित्रकैरवियोगं पृथुगण्डशैलतः । औषधविशेषे यथा—मुमूर्षोः किन्तवामीभिश्चव्यचित्रकनागरैः । औषधविशेषे नपुंसकोऽप्यमितिलिङ्गविदः । चुम्बकः कामुके धूर्ते बहुगुर्वश्मभेदयोः । चुम्बती चुम्बकः । चतुष्वर्थेषु । अश्मभेदे पुंसि । शेषेषु वाच्यलिङ्गः । कामुकेऽश्मभेदे च यथा—वेश्या लोहशलाकेव जवाच्चुम्बति चुम्बकम् । धूर्तो वञ्चकः । बहवो गुरवो यस्य स बहुगुरुः ॥३८॥ चुलुकी कुण्डिकाभेदे शिशुमारे कुलान्तरे । चुलुम्पति चुलुकी । "कञ्चुकांशुक" (उ० ५७) इति साधुः । गौरादित्वाङ्ङीः । कुण्डिकाभेदो जलभाजनविशेषः । शिशुमारो जलजन्तुविशेषः । कुलान्तरम् अन्वयभेदः । चूतकः कूप आम्रे च । चत्यते चूतकः । "कीचक पेचक" (उ० ३३) इति साधुः । चूत एव वा स्वार्थेकः द्वयोर्यथा—चूतकानां रसं पीत्वा पान्थाः पथि सुखं ययुः । चूलिका नाटकाङ्गके । करिणः कर्णमूले च । चूलैव चूलिका स्वार्थेकः । नाटकाङ्गके यथा—

करिणः कर्णमूले च जनकः पितृभूपयोः ।
जम्बुके वरुणे फेरौ जतुकं हिङ्गुलाक्षयोः ॥४०॥
जतुका चर्मचटका जीविको वृद्धजीविनी ।
क्षपणे प्राणके पीतसालसेवकयोर्द्रुमे ॥४१॥

विष्कम्भचूलिकाकास्यांकावतारप्रवेशकैः ॥३९॥ करिणः कर्णमूले यथा—रेजे व्यालावली लोला चूलिका चुम्बिचामरा । जनकः पितृभूपयोः । जनयति जनकः पितरि यथा—जनकोऽसि जनार्दन स्फुटं धर्मार्थतया मनोभुवः । भूपे भूपविशेषे यथा—जनकतनया स्नान पुण्योदकेषु । जम्बुके वरुणे फेरौ । जमति जम्बुकः । "कञ्चुकांशुक" (उ० ५७) इति उके साधुः । नीचेऽपि । सर्वेषु यथा—सत्यं पौलस्त्यसिंहस्यजम्बुकः पश्चिमापतिः । जतुकं हिङ्गुलाक्षयोः । जतु एव जतुकम् हिङ्गुरामठम् । तत्र यथा—उपयुज्यते हि शाकेषु जतुकं न तु मूर्द्धनि । लाक्षायां यथा—सन्धानं सज्जनेनेव जतुके नैव जन्यते ॥४०॥ जतुका चर्मचटका । जतुप्रतिकृतिर्जतुका । "तस्य तुल्ये" ७–१–१०८ । इति कः । जीवको वृद्धजीविनि । क्षपणे प्राणके पीतसालसेवकयोर्द्रुमे । व्यालग्राहे । जीवति जीवयति जीवकः । द्रुमक्षपणकपीतसालेषु पुंसि । शेषेषु वाच्यलिङ्गः । वृद्धिजीवी कलान्तरजीवी । क्षपणः श्रमणः । प्राणकः प्राणिता । प्राणदायको वा । पीतसालोऽसनः । सेवकोऽनुजीवी । द्रुमो बन्धूकद्रुमः ॥४१॥ व्यालग्राह आहितुण्डिकः । तत्र यथा—विषयविषहतानां जीवकस्त्वं पुरारे । शेषेषु यथा—जीवकस्येदृशी गतिः । जीविका तु जीवन्त्यां वर्तनेऽपि च । जीवनं जीविका भावे णकः । जीवन्ती मधुस्रवा । वर्तने यथा—बुद्धिपौरुषहीनानां जीविकेति

व्यालग्राहे जीविका तु जीवन्त्यां वर्तनेऽपि च ।
झिल्लिका झिलिकेव स्याच्चीर्यां रुच्यातपस्य च ॥४२॥
विलेपनस्य च मले तक्षकस्तक्षिण पन्नगे ।
द्रुमभेदे तण्डकस्तु समस्तपदजातके ॥४३॥
तरुस्कन्धे वेश्मदारु मायाबहुलयोरपि ।
फेनखञ्जनयोश्चापि तारकः कर्णधारके ॥४४॥

बृहस्पतिः । झिल्लिका झिलिकेव स्याच्चीर्यां रुच्यातपस्य च । विलेपनस्य च मले । झमति ज्वलति वा झिल्लिका झिलिका च । "कुशिक हृदिक" (उ० ४५) इति साधुः । चीरी पक्षि-भेदः । आतपस्यरुक् अतिशयेन दीप्यतेत्यर्थः ॥४२॥ विलेपनस्य मल उद्वर्तनिका । तक्षकस्तक्षिण पन्नगे । द्रुमभेदे । तक्षति तक्षकः । तक्षिणवर्द्धकौ यथा–तक्ष्णोति तक्षक इव दुर्वाक्यैर्दुर्जनो जनम् । पन्नगे पन्नगभेदे यथा–कर्कोटः कोटिःकृत्वः प्रणमति पुरतस्तक्षके देहि चक्षुः । द्रुमभेदो वृक्षविशेषः । तण्डकस्तु समस्त-पदजातके । तरुस्कन्धे वेश्मदारुमायाबहुलयोरपि । फेनखञ्ज-नयोश्चापि । तडुड् ताडने तण्डते तण्डकः । पञ्चस्वर्थेषु । समस्त-पदजातके पुंक्लीबः । समस्तं कृतसमासं पदानां जातकं समूहः समस्तपदजातकम् ॥४३॥ तरुस्कन्धस्तरुसमूहः । वेश्मार्थं दारु काष्ठं वेश्मदारु । मायावहुलो मायाप्रधानः । तत्र वाच्य-लिङ्गः । फेनो डिण्डीरः । खञ्जनः खञ्जरिटः । सर्वेषु यथा–समुद्रवेला वनालीव अनेकतण्डकाकुला दमयन्तीकथा । तारकः कर्णधारके । दैत्ये च । तरति तारयति वा तारकः । कर्णधारके यथा–भ्रान्तस्तीर्थानि दृष्टस्त्वं मयैकस्तेषु तारकः ॥४४॥ दैत्ये यथा–तस्मिन् विप्रकृताः काले तारकेण दिवौकसः । तारकमुडौ

दैत्ये च तारकमुडौ नेत्रतन्मध्ययोरपि ।
तिलकोऽश्वद्रुमभिदोः पुण्ड्रके तिलकालके ॥४५॥
तिलकं रुचके क्लोम्नि त्रिशङ्कुः शलभे नृपे ।
मार्जारे च तुरुष्कस्तु देशे श्रीवाससिह्लयोः ॥४६॥

नेत्रतन्मध्ययोरपि । उडौ त्रिलिङ्गः । नेत्र *मध्ये स्त्रीक्लीबः नेत्रे क्लीबे । त्रिष्वपि यथा–निशाकरकरस्पर्शहर्षोन्मीलित-तारका । अहो रागवतीसंध्या मुञ्चति ×स्वयमम्बरम् । तिलकोऽश्व-द्रुमभिदोः पुण्ड्रके तिलकालके । तिलति स्निह्यति तिलकः । "धुधून्दि" (उ० २९) इति किदकः । पुण्ड्रके पुंक्लीबः । अश्वभित् तिलकितो हयः । द्रुमभिदि पुण्ड्रके च यथा–न खलु शोभयति स्म वनस्थलीं न तिलकस्तिलकः प्रमदामिव । तिलकालको देहे कृष्णं लक्ष्म ॥४५॥ तिलकं रुचके क्लोम्नि । रुचकं सौवर्चलम् । क्लोम हृदयस्य दक्षिणे उदर्यो जलाधारः । त्रिशङ्कुः शलभे नृपे । मार्जारे च । त्रयः शङ्कवोऽस्य त्रिशङ्कुः । पुंसि । शलभः पतङ्गः । नृपे नृपभेदे यथा–त्रिशङ्कोरुपभोगाय न द्यौरपि न भूरपि । मार्जारो बिडालः । तुरुष्कस्तु देशे श्रीवाससिह्लयोः । तूर्यते तुरुष्कः । "निष्क तुरुष्क" (उ०२६) इति साधुः । सिह्ले स्त्रीपुंसः । देशे यथा–शुष्कमुष्कस्तुरुष्केशो भीत्या तव धराधव । श्रीवाससिह्लौ धूपौ ॥४६॥ तूलिका तूलशय्या स्यादालेख्यस्य च लेखनी । तूलति तूलिका तूलं निरस्थि-कर्पासादि तस्य शय्या । तत्र यथा–सुखेन सुप्तोऽपि स तूलि-कायाम् । आलेख्यस्य चित्रस्य लेखन्यां यथा–उन्मीलितं तूलिकयेव

* यद्यापि प्रतिपदपदपाठेन स्त्रीक्लीबत्वंनोक्त तथापि अनेकार्थेषु दृष्टम् ।
× वस्त्रं खञ्च ।

तूलिका तूलशय्या स्यादालेख्यस्य च लेखनी ।
दर्शको दर्शयितरि प्रतिहारप्रवीणयोः ॥४७॥

द्रावकस्तु शिलाभेदे स्याद्घोषकविदग्धयोः ।
दारको भेदके पुत्रे दीपकंस्यादलङ्कृतिः ॥४८॥

दीपकौ दीप्तिकृद्दीपौ दीप्यकं त्वजमोदके ।
मयूरशिखायवान्योर्धनिको धान्यके धवे ॥४९॥

चित्रम् । शलाकायामपि मङ्गः । यथा—गृहीतवाञ्जनतूलिकाम् । दर्शको दर्शयितरि प्रतीहारप्रवीणयोः । दर्शयति पश्यति वा दर्शकः । दर्शयितृ प्रवीणयोर्वाच्यलिङ्गः । दर्शयितरि यथा—यथा—गुरवो मार्गदर्शकाः । प्रतीहारे प्रवीणे च यथा—दर्शक-जननिवार्यमाणकलकलमास्थानम् ॥४७॥ द्रावकस्तु शीलाभेदे स्याद्घोषकविदग्धयोः । द्रावयति द्रवति वा द्रावकः । घोषक विदग्धयोर्वाच्यलिङ्गः । शिलाभेदः औषधम् । धोषकः पुनः पुन-र्वाक्यावर्त्तकः । विदग्धे यथा—द्रावयन्ति मनोभर्त्तुर्द्रावकाः केऽपि सेवकाः । दारको भेदके पुत्रे । दारयति दारकः । भेदके वाच्य-लिङ्गः । द्वयोर्यथा—नरेन्द्रदारकः सोऽयं मानिनीमानदारकः । दीपकं स्यादलङ्कृतिः । दीपयति दीपकम् । अलङ्कृतिरर्थालङ्कार विशेषः । यदाह—सकृद्वृत्तिस्तु धर्मस्य प्रकृता प्रकृतात्मनाम् । सैवक्रियासु बह्वीषु कारकस्येति दीपकम् । दीपकौ दीप्तिकृद्दीपौ । दीप्तिकृति वाच्यलिङ्गः । द्वयोर्यथा—शरणमात्मभये निशि दीपकः । पक्षिभेदेऽपि । यदाह—पक्षिणा येन गृह्यन्ते पक्षिणोऽन्ये स दीपकः । दीप्यकं त्वजमोदके । मयूर शिखायवान्योः । दीप्यते दीप्यकम् । "कीचक" (उ० ३३) इत्यके साधुः । त्रयोऽप्यौषधभेदाः । धनिको धान्यके धने धनाढ्ये । धनमस्त्यस्य

धनाढ्ये धनिका वध्वां धेनुका धेनुरिभ्यपि ।
धैनुकं धेनुसंहत्यां करणेऽपि च योषिताम् ॥५०॥
नरकौ दैत्यनिरयौ नन्दकः कुलपालके ।
हर्षके विष्णुखड्गे च नर्तकः केलके नटे ॥५१॥

धनिकः । धान्यकं कुस्तुम्बुरु । धवो भर्त्ता ॥४९॥ धनाढ्ये धनवति वाच्यलिङ्गः । तत्र यथा—धनिकेन धनं दत्तमधमर्णाय वर्द्धते । धनिका वध्वाम् । वधूः पत्नी । धेनुका धेनुरित्यपि । धेनुरेव धेनुका । धेनुर्नवप्रसूता । तत्र यथा—सा धेनुका दुग्धनिधान-भूमिः । इभी हस्तिनी तस्यां यथा—आरुह्य वरधेनुकाम् । क्षुरिकायामपि मङ्गः । यथा—यौधैर्बद्धासि धेनुकैः । दैत्य-विशेषेऽपि । तत्र पुंलिङ्गः । धैनुकं धेनुसंहत्यां करणेऽपि च योषिताम् । धेनूनां समूहो धैनुकम् । धेनोरनञः । ६-२-१५ । इति इकण् धेनुकाया इदं वा । "तस्येदम्" ६-३-१६० । इति अण् । धेनुसंहत्यां यथा—तद्धैनुकं ध्यायति माधवस्य । योषितां करणं वात्स्यायनप्रसिद्धम् ॥५०॥ नरकौ दैत्यनिरयौ । नृणाति नरकः । "दृ कृ नृ" (उ० २७) इति अकः । द्वयोर्यथा—सत्यानुरक्तं नरकस्य जिष्णवो गुणैर्नृपाः शार्ङ्गिणमन्वयासिषुः । नन्दकः कुलपालके । हर्षके विष्णुखड्गे च । नन्दयतीति नन्दकः । कुलपालकहर्षयोर्वाच्यलिङ्गः । हर्षके विष्णुखड्गे च यथा—नाम्नाऽपि तस्यैव स नन्दकोऽभूत् । नर्तकः केलके नटे । द्विपे पोटगले चापि । नृत्यति नर्तकः । णकः । नटे तु "नृत्खन्रञ्जः शिल्पिन्यकट्" ५-१-६५ । केलके क्रीडके वाच्यलिङ्गः । नटे यथा—नर्तकेनैव नर्तिताः ॥५१॥ द्विपो हस्ती । पोटगलः काशः । नर्तकी लासिका द्विपी । लासिकायां यथा—द्वौ सङ्कीर्णौ रचयति

द्विपे पोटगले चापि नर्तकी लासिका द्विपी ।
नालीकोऽब्जे शरे शल्ये नालीकं पद्म तद्वने ॥५२॥
नायको मणिभिन्नेतृ प्रधानेष्वथ नालिका ।
नाले काले चुल्लिरन्ध्रे विवरे वेणुभाजने ॥५३॥
निपाकः पचने स्वेदासत्कर्मफलयोरपि ।
निर्मोको व्योम्नि सन्नाहे मोक्षके सर्पकञ्चुके ॥५४॥

रसौ नर्त्तकीव प्रगल्भा । नालीकोऽब्जे शरे शल्ये । णल् गन्धे । नलति नालीकः । "सृणीकास्तीक" (उ० ५०) इति साधुः । अब्जे वाच्यलिङ्गः । तत्र यथा–विवृतेनापि शास्त्रेण नालीकः किं करिष्यति । शरे शल्ये च यथा–भूपालमौलिना तेन नालीकैः कीलितं बलम् । नालीके पद्म तद्वने । पद्मे पुंक्लीबः । तत्र यथा–नालीकमालां मलते स मौलौ । तेषां पद्मानां वनं तद्वनम् ॥५२॥ नायको मणिभिन्नेतृ प्रधानेषु । नयति नायकः । नेतृप्रधानयो- र्वाच्यलिङ्गः । त्रिष्वपि यथा–एकार्थतन्तुप्रोतायां नायको नायकायते । अथ नालिका । नाले काले चुल्लिरन्ध्रे विवरे वेणुभाजने । नाल्येव नालिका । नलति वा । पञ्चस्वर्थेषु नाले यथा–पीतं नालिकया जलम् । काले यथा–क्षणैः षड्भिश्च नाडिका । वेणुभाजने यथा–धान्यावापं विदधतितरां हालिका नालिकाभिः । निपाकः पचने स्वेदासत्कर्मफलयोरपि । निपचनं निपच्यतेऽनेन वा निपाकः । पचने यथा–जातस्तकः(तः)शाकनिपाककालः । स्वेदो घर्माम्बु । असत्कर्मफलं दुष्कर्मफलम् । निर्मोको व्योम्नि सन्नाहे मोक्षके सर्पकञ्चुके । निर्मुच्यतेऽनेन निर्मोकः । व्योम्नि यथा–निर्मोककोकनदतुल्यमिदं वचस्ते । मोक्ष एव मोक्षकः । तत्र सन्नाहे च यथा–शोकमोहपरोलोकः स्तोको निर्मोक तत्परः ।

***पर्यङ्को मञ्चपर्यस्त्योः प्रतीकोऽङ्गप्रतीपयोः ।**
पताकाङ्कध्वजे केतौ सौभाग्ये नाटकांशके ॥५५॥
पातुको जलमातङ्गे पतयालुप्रपातयोः ।
प्राणको जीवकतरौ सत्वजातीयबोलयोः ॥५६॥

सर्पकञ्चुके यथा–वेल्लनिर्मोकवल्लीनिबिडनिगडितानोकह- क्रोडनीडक्रीडन्निःशङ्कघूकव्यतिकरमुखराभूमयो भीषयन्ति ॥५४॥ पर्यङ्को मञ्चपर्यस्त्योः । पर्यच्यते पर्यंकः । परिगतोऽङ्कम्वा । मञ्चे यथा–नागपर्यङ्कशायी । पर्यस्तौ परिकरे यथा– पर्यङ्कबन्धस्थिरपूर्वकायम् । प्रतीकोऽङ्गप्रतीपयोः "प्रातिप्रतीकः सृणीक" इति साधुः । प्रतीपे वाच्यलिङ्गः । अङ्गम् अवयवः । तत्र यथा–प्रति प्रतीकं प्रविभूषितायाः । प्रतीपे प्रतिकूले यथा–क्षितिधव तव हस्ती सुप्रतीकप्रतीकः । प्रदीपेऽपि यथा– प्रतीकाभीशुनीकाभिस्तमिस्त्रे सकलीकृते । पताकाङ्कध्वजे केतौ सौभाग्ये नाटकांशके । पतति पताका । "शलिवलि" (उ०३४) इति आकः । अङ्कध्वजश्चिन्हध्वजः । तत्र यथा–पताकाभिर्विवित- र्यन्ते निकेताः पृथिवीभुजाम् । केतौ सोभाग्ये च यथा–रम्या इति प्राप्तवतीः पताकां रागं विविक्ता इति वर्द्धयन्ती । नाटकांशके यथा–बीजं बिन्दुः पताका च प्रकरीकार्यलक्षणाः । अर्थप्रकृतयः पञ्च ता एताः परिकीर्त्तिताः ॥५५॥ पातुको जल- मातङ्गे पतयालुप्रपातयोः । पतनशीलः पातुकः । "लषपतपदः" ५–२–४१ । इति उकण् । पतयालौ वाच्यलिङ्गः । जलमातङ्गो जलहस्ती । पतयालौ यथा–भेजेऽभितः पातुकसिद्धिसिन्धोरभूत-

* मु० मू० । नीलिका नीलिनी क्षुद्ररोगशेफालिकास्वपि ।
पराकस्तु व्रते खड्गे प्रसेकः सेचने च्युतौ ॥ पर्यङ्को०

पाटको रोधसि ग्रामैकदेशेऽक्षादिपातके ।
वाद्यभेदे महाकिष्कौ मूल्यस्यापचयेऽपि च ॥५७॥
पालङ्कः शाकभेदे स्यात्सल्लकयां पाजिपक्षिणि ।
पिनाकः शिवकोदण्डे पांसु वृष्टित्रिशूलयोः ॥५८॥

पूर्वां रुचमम्बुराशेः । प्रपातो भृगुः । सौप्तिकं वा । प्राणको जीवकतरौ सत्वजातीयवोलयोः । प्राणिति प्राणकः । प्राण एव वा । जीवकतरुर्वृक्षभेदः । सत्वजातीयः सत्वप्रकारः तत्र वाच्यलिङ्गः । वोलो गन्धरसः ॥५६॥ पाटको रोधसि ग्रामैकदेशेऽक्षादिपातके । वाद्यभेदे महाकिष्कौ मूल्यस्यापचयेऽपि च । पाटयति पटति वा पाटकः । पञ्चस्वर्थेषु । रोधस्तटम् । ग्रामैकदेशे यथा–जलौकः काङ्क्षया याति साधुश्चण्डालपाटकम् । अक्षादीनां द्यूते पातयिता अक्षादिपातकः । वाद्यभेदो वादित्रम् । महाकिष्कुः प्रमाणविशेषः । मूल्यस्यापचये यथा–पाटकेनाप्यते कर्म ॥५७॥ पालङ्कः (पालकं) शाकभेदे स्यात्सल्लक्यां पाजिपक्षिणि । पाल्यते पालङ्कः । "निष्क तुरुष्क" (उ० २६) इति साधुः । शाकभेदे यथा–पालङ्कशाकं सुकृती न भुङ्क्ते । सल्लकी गजप्रिया । पाजिपक्षी पक्षिभेदः । पिनाकः शिवकोदण्डे पांसुवृष्टित्रिशूलयोः । पिनष्टि पिनाकः । "पिषेः पिन् पिण्यौ च" (उ० ३६) इति आकः । पुंक्लीबः । शिवकोदण्डे यथा–कुर्या हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये । पांसुवृष्टिर्धूलिवृष्टिः । त्रिशूलं शैवमेवात्र ॥५८॥ प्रियकस्तु चञ्चरीके नीपे कश्मीरजन्मनि । प्रियङ्गौ चित्रहरिणे पीतसालतगेर(राव)पि प्रियं कायति प्रियकः । प्रीणाति वा । "कीचक" (उ० ३३) इति साधुः । चञ्चरीके भ्रमरे स्त्रीपुंसः । नीपः

प्रियकस्तु चञ्चरीके नीपे कश्मीरजन्मनि ।
प्रियङ्गौ चित्रहरिणे पीतसालतरोरपि ॥५९॥
***पिष्टको नेत्ररोगे स्याद् धान्यादिचमसेऽपि च ।**
पिण्याकः कुङ्कुमे हिङ्गौ सिह्लके तिलचूर्णके ॥६०॥
पुलको गजान्नपिण्डे रोमाञ्चे प्रस्तरान्तरे ।
अश्रुराज्यां मणिदोषे गल्वर्के तालके कृमौ ॥६१॥

कदम्बः । कश्मीरजन्म घुसृणम् । प्रियङ्गुः फलिनी । चित्रहरिणे यथा–प्रचलितैः परितः प्रियकव्रजैः । पीतसालतरुरसनः । तत्र यथा–उन्निद्र प्रियकमनोरमं रमण्याः संरेजे सरसि वपुः प्रकाशमेव ॥५९॥ पिष्टको नेत्ररोगे स्याद्धान्यादिचमसेऽपि च । पिनष्टि पिष्यते वा पिष्टः । पिष्ट एव पिष्टकः । धान्यादेश्चमसे चूर्णविशेषे । यथा–कष्टेन पिष्टकैस्तैलं मौलेरुत्तार्यते तथा । पिण्याकः कुङ्कुमे हिङ्गौ सिह्लके तिलचूर्णके । पिनष्टि पिण्याकः । "पिषेः पिन् पण्यौ च" (उ० ३६) इत्याकः । पुंक्लीबः । कुङ्कुमे हिङ्गौ सिह्लके च यथा– पिण्याकगन्ध इव तुष्टिकृदस्य सोऽभूत् । तिलचूर्णे यथा – पिण्याकान्नाशिनीनांहि पयो गुरुतरं भवेत् । ॥६०॥ पुलको गजान्नपिंण्डे रोमाञ्चे प्रस्तरान्तरे । अश्रुराज्यां मणिदोषे गल्वर्के तालके कृमौ । पोलति पुलकः । "ध्रु धून्दि" (उ० २९) इति किदकः । अष्टस्वर्थेषु । गजान्नपिण्डे यथा–पुलककवललोलः खेलति व्यालराजः । रोमाञ्चे पुंक्लीबः । तत्र यथा–भृशस्विदः पुलकविकासिमूर्त्तयः । प्रस्तरान्तरे श्लक्ष्णपाषाणे यथा–पुलकपृष्टधौताम्बरः । अश्रुराजी नयनाम्बुधारा । मणिदोषे यथा–पुलकत्रासविद्धादिदोषैर्मणिरदूषितः । गल्वर्कश्चषकः । तालकं

*मु० म०–पितकः स्यात्तु विस्फोटे मञ्जुषायामपीष्यते ।

पुलाको भक्तसिक्थे स्यात्संक्षेपासारधान्ययोः ।
पुष्पकं मृत्तिकाङ्गारशकट्यां रत्नकङ्कणे ।।६२।।
कासीसेश्रीदविमाने नेत्ररोगे रसाञ्जने ।
लोहकांस्ये रीरिकायां पुत्रकः शरभे शठे ।।६३।।

हरितालकम् (हरितालम्) (हरितालः)। क्रमौ कीटे यथा–वर्त्मनां पुलकवृश्चिकस्पृशाम् ।।६१।। पुलाको भक्तसिक्थे स्यात्संक्षेपासारधान्ययोः । पोलति पुलाकः । "शुभिगृहि" (उ० ३५) इति किदाकः । भक्तसिक्थे यथा–स्थालीपुलाकन्यायेन कुर्याद् गुण परीक्षणम् । संक्षेपः क्षिप्रं तत्र यथा–पुलाककारी विपुलाशयः स्यात् । असारधान्ये यथा–पुलाका इव धान्येषु । पुष्पकं मृत्तिकाङ्गारशकट्यां रत्नकङ्कणे । कासीसेश्रीदविमाने नेत्ररोगे रसाञ्जने । लोहकांस्ये रीरिकायाम् । पुष्यति पुष्पकम् । पुष्पप्रतिकृतिर्वा अष्टस्वर्थेषु । मृन्मयी अङ्गारशकटी । मृत्तिकाङ्गारशकटी । रत्नखचितं कङ्कणम् रत्नकङ्कणम् ।।६२।। सीसं धातुभेदः । श्रीदविमाने यथा–निरस्तगाम्भीर्यमपास्तपुष्पकः प्रकम्पयामास न मानसं न सः । नेत्ररोगे यथा–असौ रसः पुष्पकनाशहेतुः । रसाञ्जनम् औषधभेदः । लोहेन मिश्रं कांस्यं लोहकांस्यम् । रीरिका पित्तलभेदः । पुत्रकः शरभे शठे शैवे वृक्षप्रभेदे च । पुत्रं कृणाति हिनस्ति पुत्रकः । "कृवचित्" इति डः । पुनाति वा । "कीचक" (उ० ३३) इति साधुः । कृत्रिमः पुत्रो वा । "तनु पुत्र" (७–३–२३) इति कः । शरभोऽष्टापदः । शठोऽनृजौ ।।६३।। शैवे शिवमतदीक्षिते च वाच्यलिङ्गः । शवे यथा–समयी साधकश्चव आचार्यश्चापि पुत्रकः । वृक्षप्रभेदः पुत्रप्रेम्णा सिक्तो वृक्षः । कृत्रिमसुतेऽपि यथा–

शैवे वृक्षप्रभेदे च पुत्रिका यावतूलिके ।
पाञ्चालिकादुहित्रोश्च पूर्णकः स्वर्णचूर्णके ।।६४।।
पूर्णिका नासिकाच्छिन्न्यां पृथुकश्चिपिटेऽर्भके ।
पृदाकुश्चित्रकव्याघ्र–वृश्चिकेषु सरीसृपे ।।६५।।

सा कन्दुकैः कृत्रिमपुत्रकैश्च । पुत्रिका यावतूलिके । पाञ्चालिकादुहित्रोश्च । पुत्र्येव पुत्रिका । यावतूलकम् अलक्तपोलिका पाञ्चालिका काष्ठदन्तादिनिर्मिता स्त्रीप्रतिकृतिः तत्र यथा–तप्तायःपुत्रिकाः क्वापि स्मारितान्यवधूरतम् । दुहिता तनया । पूर्णकः स्वर्णचूर्ण(ड)के । पूर्ण एवेति पूर्णकः । स्वर्णचूडकः पक्षिविशेषः ।।६४।। पूर्णिका नासिकाच्छिन्न्याम् । नासिका छिन्ना यस्याः सा नासिकाच्छिन्नी । "स्वाङ्गादेरकृत" २–४–४६ । इति ङीः । पृथुकश्चिपिटेऽर्भके । पृथुकायति पृथुकः । प्रथते वा । "कञ्चुकांशुक" (उ० ५७) इति साधुः । चिपिट आर्द्रसस्याभ्योषः । तत्र यथा–वृथा पृथुकमर्दनं हलभृता परार्थं कृतम् । अर्भके यथा–क्वचित्क्रीडत्क्रोडप्रतिभयपरित्रस्तपृथुकाः । पृदाकुश्चित्रकव्याघ्रवृश्चिकेषु सरीसृपे । पिपर्त्ति पृदाकुः । "सृपृभ्यां दाकुक्" (उ० ७५६) चतुर्ष्वर्थेषु यथा–सदा पृदाकुः कुरुते हि शङ्काम् ।।६५।। पेचकः करिलाङ्गूलमूले घूके । पच्यते पेचकः । "कीचक पेचक" (उ० ३३) इति साधुः । करिलाङ्गूलमूले यथा–करीन्द्रो मेचकैः (करीन्द्रो वर्णकैः) सान्द्रैर्मेचकीभूतपेचकः । घूके यथा–खं पेचकैः कञ्चुकितं रणेषु । अथ पेटकम् । मञ्जूषायां समूहे च । पेटति पेटकः । "छिदिभिदिपिटेर्वा" (उ० ३०) इति अकः । पेट एव वा । स्वार्थिककप्रत्ययान्तस्तु समूहे त्रिलिङ्गः । मञ्जूषायां क्लीबे । पुल्लिङ्गोऽयमिति

पेचकः करिलाङ्गूलमूले घूकेऽथ पेटकम् ।
मञ्जूषायां समूहे च बहुको जलखादके ॥६६॥
दात्यूहे कर्कटेऽर्के च बन्धूकः पीतसालके ।
बन्धूजीवे बन्धकस्तु सत्यङ्कारेऽथ बन्धकी ॥६७॥
स्वैरिण्यां च करिण्यां च बालिकाकर्णभूषणे ।
पञ्छोलायां वालुकायां बालायां *भस्मकं रुजि ॥६८॥

लिङ्गविदः । तत्र यथा—न्यधत्त वटपृष्ठतः कनकपेटकं तस्करः । समूहे यथा—घटितषट्पदपेटकपाटला । बहुको जलखादके दात्यूहे कर्कटेऽर्के च । बहु भक्ष्यं कं जलमस्य बहुकः । बहुः कायति वा । चतुर्ष्वर्थेषु । जलखादकदात्यूहौ पक्षिविशेषौ ॥६६॥ कर्कटः कुलीरः । अर्को रविः । बन्धूकः पीतसालके । बन्धूजीवे । बध्यते बन्धूकः । "मृमन्यञ्जि" इति कुकः (उकः)। पीतसालोऽसनः, बन्धुजीवे यथा—नीलेन्दीवरशङ्कया नयनयोर्बन्धूक-बुद्ध्याधरे । बन्धकस्तु सत्यङ्कारे× । बध्नाति बन्धकः । "दृ कृ नॄ" (उ० २७) इत्यकः । पुंसि । मङ्खस्तु कुलटेभी च बन्धकी । आधावस्त्री बन्धिकानुबन्धकारिणि वाच्यलिङ्गा इति पुंक्लीबत्वमाह । सत्यंङ्कारे आधौ यथा—न वृद्धिबन्धके नष्टे सर्वनाशेन तद्धनम् । अथ बन्धकी । स्वैरिण्यां च करिण्यां च । गौरादित्वाद् ङीः ॥६७॥ स्वैरिण्यां यथा—बन्धक्यो यं प्रशंसन्ति स राजन् पुरुषोऽधमः । करिण्यां यथा—बन्धकी निकटमभ्रभूपतिः । बन्धकारिण्यपि संसारबन्धिका माया । बालिका कर्णभूषणे । पिञ्छोलायां वालुकायां वालायाम् । बाल्येव बालिका बलते

* बालकः पुनः शिशोमुर्खेऽश्वगजयोर्वालिधौ भस्मकं रुजि० ।
× अत्र आधिपर्य्यायः सत्यंकारो न तु लोकप्रसिद्धे सत्यंकारे ।

विडङ्गे कलधौते च भ्रामकः फेरुधूर्तयोः ।
सूर्य्यावर्त्तेऽश्मभेदे च भालाङ्कः कच्छपे हरे ॥६९॥
महालक्षणसम्पूर्णपुरुषे करपत्रके ।
रोहिते शाकभेदे च भूतीकं कटफलौषधे ॥७०॥

वा बालैव वा । कर्णभूषणे यथा—बिभ्रती तिलकं भाले श्रवसोः स्वर्णबालिकाम् (कर्णभूषणेऽङ्गुलीये च पुंक्लीब इति लिङ्गविदः मङ्खाद्यनेकार्थेषु स्त्री ।) पिञ्छोला ओषधिः । अङ्गुलीयेऽपि मङ्खः । तत्र वालुकायां सिकतायां च यथा—सिन्धुर्वीचिकरानुवाहबहल-प्रौढोल्लसद्बालिकान् । बालायां यथा—बालिकारचितवस्त्रपुत्रिका-क्रीडनेन सदृशं तदर्चनम् । कङ्कणेऽपि मङ्खः । यथा—बालिकाङ्कित-प्रकोष्ठः । भस्मकं रुजि । विडङ्गे कलधौते च । भस्मयतीति भस्मकम् । भस्मप्रतिकृतिर्वा । रुजि रोगे यथा—भस्मके भस्मतां याति समस्तं भक्षितं यतः ॥६८॥ विडङ्गमौषधम् । कलधौतं रूप्यम् । ग्रहविशेषेऽपि । तत्र पुंसि । यथा—प्रतिपालय नाथ नाडिकाद्वितयं सम्प्रति भस्मकोदयः । भ्रामकः फेरुधूर्त्तयोः । सूर्य्यावर्त्तेऽश्मभेदे च । भ्रमति भ्रामकः बाहुलकाद् वृद्धिः । फेरुः शृगालः । धूर्त्तो वञ्चकः । तत्र वाच्यलिङ्गः । सूर्य्यावर्त्तो-भेषजभेदः । अश्मभेदे यथा—भ्रामको भ्रमयत्ययः । भालाङ्कः कच्छपे हरे । महालक्षणसम्पूर्णपुरुषे करपत्रके । रोहिते शाकभेदे च । भालेऽङ्कोऽस्यासौ भालाङ्कः, भाल्यते वा । "मवाका" (उ० ३७) इति साधुः । कच्छपः कूर्मः । हरः शम्भुः ॥६९॥ करपत्रकं क्रकचम् । रोहितो मत्स्यभेदः । भूतीकं कटफलौषधे । यवान्यां घनसारे च भूनिम्बे भूस्तृणेऽपि च । भवति भूतीकम् । "सृणीक" (उ० ५०) इति साधुः ।

यवान्यां घनसारे च भूनिम्बे भूस्तृणेऽपि च ।
भूमिका तु रचनायां रूपान्तरपरिग्रहे ॥७१॥
मशकः क्षुद्ररुग्जन्तुभेदयोर्मधुकं त्रपुः ।
मधुयष्टिश्च मधुको बन्दिश्रीवदपक्षिणोः ॥७२॥
मण्डूकी मण्डूकपर्ण्यां मण्डूको भेकशोणकौ ।
मल्लिको हंसभेदे स्यात् मल्लिका कुसुमान्तरे ॥७३॥

पञ्चस्वर्थेषु । कटफलौषधं श्रीपर्णी ॥७०॥ यवानी दुष्टो यवः । घनसार कर्पूरः । भूनिम्बः किराततिक्तः । भूस्तृणं छत्रा । भूमिका तु रचनायां रूपान्तरपरिग्रहे । भूमिरेव भूमिका । रचनायां यथा– आद्या प्रासादभूमिका । रूपान्तरपरिग्रहे यथा–अथोपपत्तिं छलनापरोपरामवाप्य शैलूष इवष भूमिकाम् । ॥७१॥ मशकः क्षुद्ररुग्जन्तुभेदयोः । मशति मशकः । "दृ कृ नृ" (उ० २७) इति अकः । जन्तुभेदे यथा–यामिन्यां यामि स्वपिमि ननु निर्दंशमशके । मधुकं त्रपु मधुयष्टिश्च मचते मधुकम् । "कञ्चुकांशुक" (उ० ५७) इति साधुः । त्रपु वङ्गम् । भधुयष्टिर्मधुकाष्ठम् । तत्र स्त्रीक्लीबः । मधुको बन्दि-श्रीवदपक्षिणोः । बन्दी बन्दिभेदः । यच्छाश्वतः मधुका बन्दिनः कोऽपि । श्रीवदाख्यः पक्षी श्रीवदपक्षी ॥७२॥ मण्डूकी मण्डूक-पर्ण्यां । मण्डति मण्ड्यते वा मण्डूकी । "मृमन्यञ्जि" (उ० ५८) इति उकः । गौरादित्वाद् ङीः । मण्डूकपर्णी ओषधिः । मण्डूको भेकशोणकौ । भेके यथा–तावद्गर्जसि मण्डूकः कूपमाश्रित्य निर्भयः । शोणको नदभेदः । मल्लिको हंसभेदे स्यात् । मल्लति मल्लिकः । "क्रीकल्यलि" (उ० ३८) इति बहुवचनादिकः ।

मधुका बन्दिनः कोऽपि । मण्डुकी०

मीने मृत्पात्रभेदे च मातृका करणेश्वरे ॥
मातृवर्णसमाम्नायोपमातृष्वथ मालिका ॥७४॥
पक्षिमल्ले सरिद्भेदे ग्रैवेये पुष्पदामनि ॥
***मेचकः श्यामले कृष्णे तिमिरेर्बर्हिचन्द्रके ॥७५॥**

हंसभेदो मलिनचञ्चुचरणः । मल्लिका कुसुमान्तरे मीने मृत्पात्रभेदे च । कुसुमान्तरं विचकिलम् । तत्र यथा–उपययौ विदधन्नवमल्लिकाः शुचिरसौ चिरसौरभसम्पदः ॥७३॥ मीनो मीनभेदः । मृत्पात्रभेदः शरावः । तत्र यथा–मल्लिकां-कितकरा विविशुस्ताः । वाद्यभेदेऽपि मङ्गः–यथा–मल्लिका झल्लरीध्वनिः । मातृका करणेश्वरे । मातृवर्णसमाम्नायोपमातृषु । मातृप्रतिकृतिर्मातृका मातैव वा । करणानि इन्द्रियाणि तेषामी-श्वरः, आत्मकरणेश्वरः । तत्र यथा–दुर्ज्ञानं मातृकातत्वम् । शेषेषु यथा-विश्वंमातृकया विश्वं ज्ञापितं सकलाः कलाः। अथ मालिका ॥ पक्षिमल्ले सरिद्भेदे ग्रैवेये पुष्पदामनि । मलते मालिका मालैव वा ॥७४॥ पक्षिमल्लः पक्षिविशेषः । सरिद्भेदो नदीविशेषः । ग्रैवेयं ग्रीवाभरणम् । तत्र यथा–कण्ठस्थितया विमलप्रश्नोत्तर-रत्नमालिकया । पुष्पदामनि यथा–मौलिश्चम्पकमालिकाव-लयितः । मेचकः श्यामले कृष्णे तिमिरे बर्हिचन्द्रके । मच्यते मेचकः । "कीचकपेचक" (उणादि ३३) इति साधुः श्यामल-कृष्णयोर्वर्णविशेषयोः पुंक्लीबः । तद्वति वाच्यलिङ्गः । श्यामलं नीलम् । कृष्णम् असितम् । तयोर्यथा–गजकदम्बकमेचकमुच्चै-(मुच्चकै)र्नभसि वीक्ष्य नवाम्बुदमम्बरम् । तिमिरे बर्हि-चन्द्रके च यथा–जलदमेचककञ्चुकिता दिशोः भृशमवेक्ष्य विनृत्यति

* मामलं तु मदीये स्यान्मामाको मातुले स्मृतः । मेचकः० ।

५

मोचको मोक्तृकदलीशिग्रुद्रुमविरागिषु ॥
मोदको हर्षुलो खाद्ये यमको यमजे व्रते ॥७६॥
यमकं वागलङ्कारे याजको राजकुञ्जरे ।
याज्ञिके च युतकं तु यौतके युग्मयुक्तयोः ॥७७॥

मेचकी ॥७५॥ मोचको मोक्तृकदलीशिग्रुद्रुमविरागिषु । मुञ्चति मोचकः । चतुर्षु अर्थेषु । विरागी मुमुक्षुः । तत्र मोक्तरि च वाच्यलिङ्गः । मोक्तरि यथा— ब्रीडसङ्कोचमोचकः । शेषेषु यथा— मोचकैरञ्चितं वनम् । मोदको हर्षुले खाद्ये । मोदतेऽसौ मोदयति वा मोदकः । हर्षुलो हर्षवान् । हर्षहेतुर्वा । तत्र वाच्यलिङ्गः । खाद्ये लड्डुके पुंक्लीबः । द्वयोर्यथा—मुदिता मोदकमुदितं रवीन्दुकवलैकगृध्नुमतिभीमम् । यमको यमजे व्रते । यम एव यमकः । यमजो युग्मजातः । तत्र वाच्यलिङ्गः । ०द्वयोर्यथा—नकुलः सहदेवश्च यमको यमकस्थितौ ॥७६॥ ०यमकं वागलङ्कारे । यमौ समजातौ तत्प्रतिकृतिर्यमकम् । वागलङ्कारे । शब्दालङ्कृतौ । यथा—अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः । यमकं पादतद्भागवृत्तितद्यात्यनेकताम् । याजको राजकुञ्जरे । याज्ञिके च । यजति याजयति वा याजकः । राजकुञ्जरो भूपश्रेष्ठः । याज्ञिको यज्ञक्रियाज्ञाता । द्वयोर्यथा—याजकः पूज्यते न कैः । युतकं तु यौतके युग्मयुक्तयोः । संशये चलनाग्रे स्त्रीवस्त्रभेदे पटाञ्चले । युतौ कायति युतमेव वा युतकम् । युक्ते वाच्यलिङ्गः । यौतकं युतयोर्वधूवरयोर्देयम् । तत्र युग्मे युक्ते च यथा—हस्त्यश्वरत्नयुतकं युतकाय(युग्माय) देयम् । चलनश्चण्डातकः तस्याग्रं चलनाग्रम् । स्त्रीवस्त्रभेदः परिधानान्तरपटः । रजकौ धावकशुकौ । रजति रजकः ।

संशये चेलनाग्रे स्त्री वस्त्रभेदे पटाञ्चले ।
रजकौ धावकशुकौ रसिकाकटिसूत्रके ॥७८॥
रसनायां रसालायां रात्रकं पंचरात्रके ।
रात्रकस्तु पणवधूगृहान्तर्वर्षवासिनि ॥७९॥

"नृतूवनञ्जः शिल्पिन्यकट्" । धावको निर्णेजकः । तत्र यथा—रजकशिलातलसदृशं यासां जघनं च वदनं च । शुकः शुकविशेषः । रसिका कटिसूत्रके । रसनायां रसालायां । रसयति रसिका रसोऽस्त्यस्यां वा । कटिसूत्रम् मेखला ॥७८॥ रसना जिह्वा । रसाला शिखरिणी । रात्रकं पञ्चरात्रके । पञ्चानां रात्रीणां समाहारः पञ्चरात्रकम् । "संख्यातैक" ७—३—११९ । इति अत् समासान्तः । पञ्चरात्रमेव पञ्चरात्रकम्* । स्वार्थेकः । पञ्चरात्रैकदेशो रात्रकं भामावत् । रात्रकस्तु पणवधूगृहान्तर्वर्षवासिनि । रात्रीराचक्षाणो रात्रकः । णिजन्ताण्गकः ॥७९॥ राजिका पङ्क्तौ रेखायां केदारे राजसर्षपे । राजिरेव राजिका । राजते वा । पङ्क्तौ यथा—परिरराज मतङ्गजराजिका । रेखायां यथा—अराजके भूर्जदले लिलेख । केदारो वप्रः । राजसर्षपे यथा—जुहोति वह्नौ लवणं सराजिकम् । रुचकं तु मातुलिङ्गे निष्के सौवर्चलेऽपि च । रोचते रुचकम् । "धृधून्दि" (उ०२९) इति किदकः । निष्के मातुलिङ्गे च पुंक्लीबः । मातुलिङ्गे यथा पीतवत्यभिमते मधुतुल्यस्वादमोष्टरुचकं चिदिदङ्क्षौ । निष्के ×वक्षोविभूषणे यथा—स्वस्तिकादिसमाकारं रुचकं रुचिमद्विदुः । ललामन्यपि मंखः । ललामरत्नं तत्र यथा—अधररुचकं चन्दन-

* तत्प्रतिपादकोग्रन्थोऽपि पञ्चरात्रकम् ।

× यद्यपि लिङ्गविदो भूषाग्रैवेयकं व्याख्यान्ति तथापि अनेकार्थकृत उरोविभूषणमपि ग्रैवेयकमामनन्तीति कृत्वा निष्केऽपि पुंक्लीबत्वम् ।

राजिका पङ्क्तौ रेखायां केदारे राजसर्षपे ।
रुचकं तु मातुलिङ्गे निष्के सौवर्चलेऽपि च ।।८०।।
***रूपकं नाटकाद्येषु काव्यालङ्कारधूर्तयोः ।**
रेणुका तु हरेण्वां स्याज्जमदग्नेश्च योषिति ।।८१।

पेषणपाषाणेऽपि ।।८०।। रूपकं नाटकाद्येषु काव्यालङ्कारधूर्तयोः । रूप्यते रूपकम् । "कीचक" (उणादि ३३) इति साधुः । रूपयति वा । नाटकाद्येषु यथा—सत्यार्था भारती यस्य दशरूपकसंश्रया । काव्यालङ्कारे यथा—तद्रूपकमभेदो य उपमानोपमेययोः । धूर्त्ते शठे वाच्यलिङ्गः । सुवर्णादिमुद्रायामपि । यथा—तदपि साम्प्रतमाहररूपकम् । रेणुका तु हरेण्वां स्याज्जमदग्नेश्च योषिति।। रेणुप्रतिकृतिः रेणुका, रणति वा ।। "कञ्चुक" (उ०५७) इति साधुः । हरेणुर्गन्धद्रव्यम् । जमदग्नियोषिति यथा—अस्त्येवैतत्किमु कृतवता रेणुकाकण्ठवाधां बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः ।।८१।। लम्पाको लम्पटे देशे । लपति लप्यते वा लम्पाकः । "मवाक श्यामाक" इति साधुः । लम्पटे वाच्यलिङ्गः । तत्र यथा—लम्पाकः पाकशासनः । देशे यथा—लम्पाकीनां किरन्तश्चि कुरविरचनाम् । लासकौ केकिनर्त्तकौ । लसति लासकः । नर्त्तके वाच्यलिङ्गः । द्वयोर्यथा—पयोदमुरजध्वनौ लसति ध्लासको नृत्यति । लूनकस्तु पशौ भिन्ने । लून एव लूनकः । "लूनवियावात्पशौ" (७–३–२१) इत्यनेन यावादित्वाद् वा कः भिन्ने वाच्यलिङ्गः। लोचको नीलवाससि । कज्जले मांसपिण्डेऽक्षितारे स्त्रीभालभूषणे । निर्बुद्धौ कर्णिकामोचाज्यासुभ्रू श्लथचर्म्मणि ।। लोच्यते लोचयति

* मु० रोचनायां विडङ्गे च मङ्गलद्रव्यदन्तयोः ।
अवश्याभरणे लाल्ये प्रोत्कटेऽपि प्रकीर्तितः ।।

लम्पाको लम्पटे देशे लासकौ केकिनर्तकौ ।
लूनकस्तु पशौ भिन्ने लोचको नीलवाससि ।।८२।।
कज्जले मांसपिण्डेऽक्षितारे स्त्रीभालभूषणे ।
निर्बुद्धौ कर्णिकामोचाज्यासुभ्रू श्लथचर्मणि ।।८३।।
वराकः शोच्यरणयोः वर्तकोऽश्वखुरे खगे ।
वञ्चको जम्बुके गेहनकुले खलधूर्तयोः ।।८४।।

वा लोचकः । दशस्वर्थेषु । निर्बुद्धौ वाच्यलिङ्गः । नीलवाससि गोपीनां चतुर्हस्तप्रमाणनीलवस्त्रे यथा पुष्पेक्षणैर्लम्बितलोचकैर्वा मधुव्रतव्रातवृतैर्व्रतत्यः ।।८२।। शेषेषु यथा—लोचकः कस्य रोचकः ।।८३।। वराकः शोच्यरणयोः । वृणीते वराकः । "वृद्भिक्षि" ५–२–७० इति टाकः । वरैरक्यतेऽत्रेति वा । शोच्ये वाच्यलिङ्गः । तत्र यथा—भ्रमति विरहखिन्नश्चक्रवाको वराकः । रणः सङ्ग्रामः । वर्त्तकोऽश्वखुरे खगे । वर्त्तते वर्त्तकः । अश्वखुरे यथा—वर्त्तकक्षुण्णभूगर्त्तः । खगे खगविशेषे यथा—तदन्धकवर्त्तकीयं काकतालीयं यन्मूर्खमिन्त्रेषु क्वचित्कार्यसिद्धिः। अत्र हि अन्धकश्च वर्त्तकश्च अन्धकवर्त्तकं तत्तुल्यमन्धकवर्त्तकीयम् । वञ्चको जम्बुके गेहनकुले खलधूर्त्तयोः । वञ्चयति वञ्चकः । खलधूर्तयोर्वाच्यलिङ्गः । चतुर्ष्वर्थेष्वपि यथा—वञ्चकैरावृतान्तास्ते दुर्गमा वनभूमृतः । वल्मीको नाकुवाल्मीक्यो रोगभेदे । वलने वल्मीकः । "सृणीकास्तीक" (उ० ५०) इति साधुः । नाकौ वामलूरे पुंक्लीबः । तत्र यथा—वल्मीकाग्रात्प्रभवति धनुः खण्डमाखण्डलस्य । वल्मीकौ प्राचेतसे यथा-पीयूषमिव नालीकं वल्मीकस्य कवेर्वचः(गिरः) । रोगभेदे रोगविशेषे यथा—असाध्यः पादवल्मीकः । अथ वर्णकः । विलेपने मलयजे नटे च (वारणे च) वर्णयति वर्णकः ।।८४।। विलेपने मलयजे च पुंक्लीबः । विलेपने

वल्मीको नाकुवाल्मीक्यो रोगभेदेऽथ वर्णकः ।
विलेपने मलयजे नटे च वसुकं पुनः ॥८५॥
रौमके वसुकस्तु स्याच्छिवमल्ल्यर्कपर्णयोः ।
व्यलीकं व्यङ्ग्य वैलक्ष्याप्रियाकार्येषु पीडने ॥८६॥

यथा—अपि रहसिकृतानां वाग्विहीनोऽपि जातः सुरतविलसितानां वर्णको वर्णकोऽसौ । मलयजे यथा—अङ्गंदधिवर्णकलेपशुभ्रम्। (वारण) नटे यथा—वर्णकैर्वर्णितः कर्णः स्वर्ण पूर्णं द्विपं ददौ । वसुकं पुनः ॥ रौमके । वस्यते वसति वा वसुकम् । "कञ्चुकांशुक" (उ०५७) इति साधुः ॥८५॥ रौमकम् रुमाभवं लवणम् । वसुकस्तु स्याच्छिवमल्ल्यर्कपर्णयोः । शिवमल्ली बकपुष्पम् । अर्कपर्णोऽर्कवृक्षः । व्यलीकं व्यङ्ग्यवैलक्ष्याप्रियाकार्येषु पीडने । विशिष्टम् अलीकं यत्र व्यलीकम् । विशेषेण अल्यते वा । "स्यमिकषि" (उ० ४६) इति ईकः। अप्रियेऽकार्ये च पुंक्लीबः। व्यङ्ग्यं ध्वन्यम्, वैलक्ष्ये यथा—न किञ्चिदूचे स किल व्यलीकात्। अप्रिये यथा-मया न तेऽकारि मनाग्व्यलीकम् । अकार्ये यथा—सुजनोऽपि चकार स व्यलीकम् । पीडने यथा—चिरव्यलीकेन जगाम शान्तिम् । कामजदोषविपर्ययोरपि मङ्गः । कामजदोषे यथा—सेहे न गोत्रस्खलितं व्यलीकम् । विपर्यये यथा—पृष्टोऽपि सत्यं वदति व्यलीकम् ॥८६॥ वार्षिकं त्रायमाणायां वर्षाभवे । वर्षासु भवं वार्षिकम् । "वर्षाकालेभ्यः" ६–३–८० इति इकण् । त्रायमाणा ओषधिः । वर्षाभवे वाच्यलिङ्गः । तत्र यथा—वार्षिकं संजहारेन्द्रो धनुर्जैत्ररघुर्ददौ । अथ वाल्हिकः। देशभेदेऽश्वभेदे च वाल्हिकं हिङ्गु कुङ्कुमम् वाल्हिकवत् । वल्हते वाल्हिः । "पदिपठि (उ०६०७) इति इः । बाहुलकात् दीर्घः स्वार्थे के वाल्ही (ल्हि)-कः । "सृणीकास्तीक" (उ० ५०) इति ईके वाल्हीकः ।

वार्षिकं त्रायमाणायां वर्षाभवेऽथ वाल्हिकः ।
देशभेदेऽश्वभेदे च वाल्हिकं हिङ्गु कुङ्कुमम् ॥८७॥
वाल्हिकवद्वार्धकं तु वृद्धत्वे वृद्धकर्मणि ।
वृद्धानां समवाये च वालुकं हरिवालुके ॥८८॥

देशभेदाश्वभेदयोः पुंल्लिगौ । हिङ्गुकुङ्कुमयोर्नपुंसकौ । देशभेदाश्वभेदे च यथा—वाल्हिकेशो निगल्हते । वाल्होकीदशनच्छ्-दारुणतलैः पत्रैरशोकोऽर्चितः वाल्हीकं तुरगं नृपः हिङ्गुकुङ्कुम—योर्यथा-गान्धिका वाल्हिकक्षोदामोदमोदितदिग्मुखाः ॥८७॥ वाल्हीकार्द्रसैन्धवैः। सुरभिता वाल्हीकचन्दनविलेपित वाणलिङ्गः। वार्द्धकं तु वृद्धत्वे वृद्धकर्मणि । वृद्धानां समवांये च । वृद्धस्य भावः कर्म वा वार्द्धकम् । चोरादित्वादकञ् । वृद्धानां समूहो वा । "गोत्रोक्षवत्सोऽकञ् ६–२–१२ इति अकम् । वृद्धत्वे यथा—वार्द्धके मुनिवृत्तीनाम् । वृद्धकर्मणि यथा—वार्द्धकं हास्यवर्द्धकम् । वृद्धसमवाये यथा—वार्द्धकं सेवमानस्य पुंसो बुद्धिर्विवर्द्धते । वालुकं हरिवालुके । वलते वालुकम् । "कञ्चुक" (उ० ५७) इति साधुः । हरिवालुकं भेषजभेदः ॥८८॥ वालुका तु सिकतासु । यथा—क्रीडन्त्येता विपुलपुलिने बालिका वालुकाभिः । वितर्कः संशयोहयोः । वितर्कणं वितर्कः । स्थाणुर्वा पुरुषो वेति संशयः तत्र यथा—समालोक्याजौ त्वां विदधति वितर्कान् प्रतिभटाः । ऊह उन्नयनम् । तत्र यथा—त्वय्यायाते वितर्कानि निदधत्त इवाभाति कम्पः पयोधेः । विपाकः परिणामे स्याद्दुर्गतिस्वादुनोरपि । विपचनं विपच्यतेऽस्मिन् वा विपाकः । स्वादुनि गुणे पुंसि । तद्वति वाच्यलिङ्गः । परिणामे यथा—हतविधिललितानां हा विचित्रो विपाकः । दुर्गतौ यथा—ते विपाके विपद्यन्ते दुरसहे दुःखकोटिभिः । स्वादुनि यथा—त्वद्वचः पक्वमाकन्दविपाकं नाकनायिके । पचन-

वालुका तु सिकतासु वितर्केसंशयोहयोः ।
विपाकः परिणामे स्याद्दुर्गतिस्वादुनोरपि ॥८९॥
विवेकः पुनरेकान्ते जलद्रोणीविचारयोः ।
वृषाङ्कः साधुभल्लात शंकरेषु महल्लके ॥९०॥
वृश्चिकस्तु द्रुणे राशावौषधिशूककीटके ।
वैजिकं कारणे शिग्रुतैले च वैजिकोऽङ्कुरे ॥९१॥

स्वेदयोरपि मङ्क्षः । पचने यथा—विपाके कटुशीतश्च । स्वेदे यथा—आमज्वरे विपाकं प्रयुञ्जीत ॥८९॥ विवेकः पुनरेकान्ते जलद्रोणी-विचारयोः। विविच्यते विवेचनं वा विवेकः । पृथगात्मतायामपि । तत्रैकान्ते विचारे च यथा—रतिर्विवेके हि सदैव योगिनः । जलद्रोणी अवगाहस्थानम् । वृषाङ्कः साधु भल्लातशंकरेषु (वृषाङ्कौ शिवभल्लातौ रभसः) महल्लके । वृषो धर्म्मो महोक्षो वाङ्को यस्य वृषाङ्कः । वृश्चयते वर्षति वा । "मवाक" (उ० ३७) इति साधुः । साधौ सदाचारे वाच्यलिङ्गः । भल्लातो वृक्षविशेषः । शङ्करे यथा—पायाद्देवो वृषाङ्कः । महल्लकः सौविदल्लः ॥९०॥ वृश्चिकस्तु द्रुणे राशावौषधिशूककीटके । वृश्चति वृश्चिकः। "पापुलि" (उ० ४१) इति किदिकः । द्रुणे स्त्रीपुंसः । द्रुणे राशिभेदे च-यथा—तुलामारुह्य सूर्येण वृश्चिके निहितं पदम् । औषधे मदनकाख्ये यथा—एता वृश्चिकरागरक्तचरणाः । शूकप्रधानः कीटः कण्टकी कृमिः शूककीटः । तत्र यथा—गर्द्दभकवृश्चिकाकुलपङ्क्तिलवसुधातलासु बर्षासु । वैजिकं कारणे शिग्रुतैले च । वीजं प्रयोजनमस्य वजिकम् । कारणं हेतुः। शिग्रुः शोभाञ्जनस्तस्य तैलम्, शिग्रुतैलम् । वैजिकोऽङ्कुरे । अङ्कुरः प्ररोहः ॥९१॥ शङ्खकं वलये कम्बौ । शङ्ख एव शङ्खकम् । द्वयोर्यथा—सुमुख्यो मङ्गलं चक्रुः शङ्खकाङ्कित-

शङ्खकं वलये कम्बौ शङ्खकस्तु शिरोरुजि ।
शम्पाकस्तु वियाते स्याद्याचके चतुरङ्गुले ॥९२॥
शम्बूको दैत्यविशेषे करिकुम्भान्तशङ्खयोः ।
शलाका शारिका शल्यं श्वाविदालेख्यकूर्चिका ॥९३॥

पाणयः । शङ्खकस्तु शिरोरुजि । शङ्खं भालैकदेशं कृणोति शङ्खकः। "क्वचित्" इति डः । शम्पा(या)कस्तु वियाते (विपाके) स्याद्याचके चतुरङ्गुले । शाम्यति शम्याकः । "मवाक श्यामाक" (उ० ३७) इति साधुः । वियातो धृष्टः । याचको मार्गणः । तयोर्वाच्यलिङ्गः । चतुरङ्गुलः कृतमालतरुः ॥९२॥ शबूको दैत्यविशेषे करिकुम्भान्तशङ्खयोः । शाम्यति शम्बूकः । "शम्बूक शाम्बूक" (उ० ६१) इति साधुः । दैत्यविशेषे यथा—ब्रूत ब्रूत भटाः क्व स क्व स नरः शम्बूकजीवाहरः । करि-कुम्भान्तो हस्तिकुम्भपर्यन्तः । शङ्खः कम्बुः । शलाका शारिका शल्यं श्वाविदालेख्यकूर्चिका छत्रपञ्जरकाष्टीषु । शलति शलाका । "शलिवलि" (उ० ३४) इत्याकः । षट्स्वर्थेषु । शारिका पक्षि-विशेषः । शल्यम् आयुधविशेषः श्वावित् मृगविशेषः । आलेख्य-कूर्चिका चित्रकरलेखनी । छत्रपञ्जरयोः काष्ठीछत्रपञ्जर काष्ठी इषुर्वाणविशेषः शारिकायां पञ्जरकाष्ट्यां च यथा—शलाकापञ्जरस्थेयं शलाकामञ्जु गुञ्जति । आलेख्यकूर्चि-कायां यथा—तस्याशलाकाञ्जननिर्मितेव ॥९३॥ छत्रकाष्टयां-यथा—छत्रं रत्नशलाकाभिर्मेघनीलं विराजते । इषौ यथा—क्षितिपालः शलाकाभिः संकीलयति शात्रवम् । रत्नस्वरूपभित् परीक्षयोरपि मंखः । क्रमेण यथा—वडूर्यभूमिर्नवभेघशब्दादुद्भि-न्नया रत्नशलाकयेव । शलाकया कोऽपि भिनत्ति पत्रम् । शल्लकी

छत्रपञ्जरकाष्टीषु शल्लकी श्वाविधिद्रुमे ।
शार्ककः स्याद्दुग्धफेने शर्करायाश्च पिण्डके ॥९४॥
शिशुकः पादपे बाले शिशुमारेऽथ शीतकः ।
शीतकालेऽलसे सुस्थे शूशकः प्रावटे रसे ॥९५॥
स्वस्तिको मङ्गलद्रव्ये गृहभेदचतुष्कयोः ।
स्यमीकः पादपे नाकौ स्यात्स्यमीका तु नीलिका ॥९६॥

श्वाविधिद्रुमे । शलश्चल्ल आशुगतौ । कीचकादित्वात् शल्लकी । द्रुमे यथा-रेवाजलं किसलयानि च शल्लकीनाम् । अयं दन्त्यादिरपि । शार्ककः स्याद्दुग्धफेने शर्करायाश्च पिण्डके । शृणाति पित्तमिति शार्ककः । "कीचक" (उ० ३३) इति साधुः ॥९४॥ शिशुकः पादपे बाले शिशुमारे । शिशुरेब शिशुकः। शिशुं क्रन्तति वा "क्वचित्" इति डः । बाले यथा–विविशुः शिशुकाः क्रोडे । अथ शीतकः शीतकालेऽलसे सुस्थे । शीत एव शीतकः । शीतं करोति वा । "शीताच्च कारिणि" इतिकः । अलससुस्थयोर्वाच्य-लिङ्गः सर्वेषु यथा–शीतको दुर्गद्वेष्यः। शूककः प्रावटे रसे । शुक्-गतौ शूककः । कीचकादित्वात् अके साधुः । प्रवृद्धो वटः कूपः प्रावटः । रसः पारदः ॥९५॥ स्वस्तिको मङ्गलद्रव्ये गृहभेद-चतुष्कयोः । स्वस्तिकायति करोति वा स्वस्तिकः । 'क्वचित्" इति डः । मङ्गलद्रव्ये यथा–मुक्तास्वस्तिकमातनुध्वमुडुपत्वं पूर्णकुम्भी भव । गृहभेदो गृहविशेषः । तत्र यथा–स्वस्तिकः सर्वतोभद्रो-रुचको वर्द्धमानकः । नन्द्यावर्त्तादयश्चान्ये द्वारालिंदादिभेदतः । चतुष्कं चतुष्पथम् । स्यमीकः पादपे नाकौ स्यात् । स्यमू शब्दे । स्यम्यते स्यमीकः । "स्यमिकषि" (उ० ४६) इतिईकः। नाकु-र्वल्मीकः । स्यमीका तु नीलिका ॥ नीलिका ओषधिभेदः ।

सरको मदिरापात्रे मदिरापानमद्ययोः ।
सस्यको नालिकेरान्तः सस्याभमणिखड्गयोः ॥९७॥
सम्पर्कः सुरते पृक्तौ सायको बाणखड्गयोः ।
स्थासको हस्तबिम्बे स्यात्स्फुरकादेश्च बुद्बुदे ॥९८॥

॥९६॥ सरको मदिरापात्रे मदिरापानमद्ययोः । सरति सरकः । "दृकृनू" (उ०२७) इति अकः । मदिरापाने त्रिलिङ्गः, शेषयोः पुंक्लीबः । मद्यं मद्यविशेष इक्षुशीधु । सर्वेषु यथा–प्रापिचेलसिस-विप्रतिसारे योषितामवसरः सरकेण । सस्यको नालिकेरान्तः सस्याभमणिखड्गयोः । सस्यप्रतिकृतिः सस्यकः । "तस्य तुल्ये" ७/१/१०८ समन्तात्स्यति वा "कीचक" (उ०३३) इति साधुः । सस्येन परिजातो वा । "सस्याद्गुणात्परिजाते" ७/१/१७८ इति कः । नालिकेरस्य अन्तः सस्यं मध्यं बीजं तत्सदृशो मणिः । कश्चित्तु सस्यकः स्यान्मणौ खड्गे नालिकेरस्य चान्ते इत्याह । सम्पर्कः सुरते पृक्तौ । सम्पर्चनं सम्पर्कः । सुरते यथा–सम्पर्कस्तर्क्यते यूनोः श्लथधम्मिल्लभूषणैः । पृक्तौ सम्बन्धे यथा–प्राप्यतां विद्युतः सम्पत्सम्पर्कादर्करोचिषाम् । सायको बाणखड्गयोः । स्यति सायकः । णकः । बाणे यथा–युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः । खड्गे यथा–सायक-सहायवाहोर्मकरध्वजनियमितक्षमाधिपतेः । स्थासको हस्तबिम्बे स्यात्स्फुरकादेश्च बुद्बुदे तिष्ठति स्थासकः । "कीचक" (उ० ३३) इतिसाधुः । हस्तबिम्बे यथा–सीताहस्ताम्बुजन्मार्पित–मलय-भवस्थासकानर्च्चनेषु । स्फुरकादीनां बुद्बुदाकारे पित्तलादिमये भूषणे यथा–रौक्मा रेजुः (सौवर्णाः) स्थासका मूर्त्तिभाजो दर्पस्येव व्याप्तदेहस्य शेषः ॥९८॥ सूतकं जन्मनि रसे । सूत शब्दात्स्वार्थे-

सूतकं जन्मनि रसे सूचकः शुनि दुर्जने ।
कथके सीवनद्रव्ये मार्जारे वायसेऽपि च ॥९९॥
सृदाकुर्वज्रे दावाग्नौ प्रतिसूर्ये समीरणे ।
सेवकोऽनुगे प्रसेवे सेचकः सेक्तृमेघयोः ॥१००॥
हारको गद्यविज्ञानभिदोः कितवचोरयोः ।
हुड्को मदमत्ते स्याद्दात्यूहे वाद्यभिद्यपि ॥१०१॥

के सूतकम् । रसे पारदे पुंक्लीः । जन्मनि यथा—न ग्राह्यं सुतसूतके । रसे यथा—कुष्ठिने भस्मसूतकम् । सूचकः शुनि दुर्जने । कथके सीवनद्रव्ये मार्जारे वायसेऽपि च सूचयति सूचकः । कथकदुर्जनयोर्वाच्यलिङ्गः । शुनि दुर्जने मार्जारे वायसे च यथा—सूचको नीचवृत्तिः । कथके यथा—श्रुतं न शुभसूचकम् । सीवनद्रव्ये यथा—सूचकैः सीव्यते गोणी ॥९९॥ सृदाकुर्वज्रे दावाग्नौ प्रतिसूर्ये समीरणे । सरति सृदाकुः । "सृपृभ्यांदाकुक्" (उ० ७५६) चतुर्ष्वर्थेषु पुंसि । प्रतिसूर्यः कृकलासः । सेवकोऽनुगे प्रसेवे। सेवते सेवकः । सीव्यते वा । "नाम्नि पुंसि च" इति णकः । अनुगे वाच्यलिङ्गः । तत्र यथा—प्रणमत्युन्नति हेतोर्जीवितहेतोर्विमुञ्चति प्राणान् । दुःखीयति सुखहेतोः को मूढः सेवकादन्यः । प्रसेवो वस्त्राद्यावपनम्, तत्र यथा-वीणापि सेवकवियोगवशाद्विषीदेत् । सेचकः सेक्तृमेघयोः । सिञ्चति सेचकः । सेक्तरि वाच्यलिङ्गः । द्वयोर्यथा—वनं सिञ्चति सेचकः ॥१००॥ हारको गद्यविज्ञानभिदोः कितवचौरयोः । हरति चित्तं वित्तं वा हारकः । चतुर्ष्वर्थेषु । गद्यं छन्दोरहितो वाक्यबन्धस्तस्यभिद्विशेषः विज्ञानभित् कलाविशेषः । कितवो धूर्तः । चौरस्तस्करः । हुड्को मदमत्ते स्याद्दात्यूहे वाद्यभिद्यपि । हुड्गतौ होडति हुडुकः । "निष्कतुरुष्क"

हेरुकस्तु महाकालगणबुद्धविशेषयोः ।
गोमुखं वाद्यभाण्डे स्याल्लेपने कुटिलौकसि ॥१०२॥
त्रिशिखो रक्षः त्रिशिखं स्यात्किरीटत्रिशूलयोः ।
दुर्मुखो मुखरे नागराजे वाजिनि वानरे ॥१०३॥
प्रमुखं प्रथमे मुख्ये मयूखा जालरुक् त्विषः ।
विशिखा खनित्रिकायां रथ्यायां विशिखः शरे ॥१०४॥

(उ० २६) इति साधुः । वाद्यभिदि स्त्री पुंसलिङ्गः । मुक्तहिक्का हुडुका ॥१०१॥ हेरुकस्तु महाकालगणबुद्धविशेषयोः । हिनाति हेरुकः । "कञ्चुकः" (उ० ५७) इति साधुः । महाकालस्य ईश्वरस्य गणः प्रमथस्तस्य बुद्धस्य च विशेषे । अथ खान्ताः । गोमुखं वाद्यभाण्डे स्याल्लेपने कुटिलौकसि । गोरिवमुखमस्य गौर्जलं मुखं प्रधानमस्येति वा । गोमुखं वाद्यभाण्डे यथा—प्रहतानेकगोमुखे । लेपने यथा—यस्यामलिन्देषु न चक्रुरेव मुग्धाङ्गना गोमयगोमुखानि । कुटिलं गोमुखाकारम् । ओको गृहम् । तत्र यथा—गोमुखं श्रीपराङ्मुखम् । वैजयन्ती तु गोमुखोऽस्त्री वाद्यभेदे नक्रे नालेपने न पुमित्याह ॥१०२॥ त्रिशिखो रक्षः । तिस्रः शिखा यस्य त्रिशिखः । रक्षसि पलादे यथा—त्रिशिखो विशिखैर्हतः । त्रिशिखं किरीटत्रिशूलयोः । द्वयोर्यथा—उच्छिखं त्रिशिखं यस्य मौलौ पाणौ च वल्गति । दुर्मुखो मुखरे नागराजे वाजिनि वानरे । दुष्टं मुखं यस्य दुर्मुखः । मुखरे वाच्यलिङ्गः । तत्र यथा—उत्फुल्लगल्लैरालापाः क्रियन्ते दुर्मुखैः सुखम् । वाजिनि यथा—हर्तुं वक्त्रं नाशकद्दुर्मुखोऽपि ॥१०३॥ प्रमुखं प्रथमे मुख्ये । प्रगतं मुखम् आदिभावं प्रधानत्वं वा प्रमुखम् । वाच्यलिङ्गः । द्वयोर्यथा—वासव-

विशाखो याचके स्कन्दे विशाखा भे कटिल्लके ।
वैशाखः खजके राधे सुमुखो गरुडात्मजे ॥१०५॥

प्रमुखा देवाः । मयूखा ज्वालरुक्त्विषः । मयते मयूखः । मयेधिभ्यामुखे खौ (उ० ९१) इति ऊखः ज्वालोऽग्नेरर्चिः । रुक् शोभा त्विट् किरणः । ज्वाले ज्वालायां यथा—अभ्युद्गता अग्निभिरुन्मयूखैः । रुचि यथा—मुखमयूखपरजितमम्बुजम् त्विषि यथा—विततपृथुवरत्रातुल्यरूपैर्मयूखैः । विशिखा खनित्रिकायां रथ्यायां । विशेषेण श्यति विशिखा । "श्यतेरिच्च वा" (उ०८५) इति खः । विशिष्टा शिखाऽत्रेति वा । खनित्री मुनीनां मृदवदारणभाण्डं शस्त्रीप्रायम्, तत्र यथा—मुनयो विशिखोत्खातमृद्भिर्लिम्पति वेदिकाम् । रथ्या प्रतोली । यत्कौटिल्यः । विशिखायां सौवर्णिकप्रचारः । विशिखः शरे । शरे बाणे यथा—मनोभेद्यं शब्दप्रभृतय इमे पञ्चविशिखाः ॥१०४॥ विशाखो याचके स्कन्दे । विशखति विशाखः । याचकः प्रार्थयिता । तत्र वाच्यलिङ्गः । स्कन्दे यथा—दिश्याद्विशाखः शतशाखमायुः । विशाखा भे कटिल्लके । भे नक्षत्रे प्रायेण बहुवचनान्तः । तत्र यथा—कृत्तिकासु विशाखासु मघासु भरणीसु च । कटिल्लकः पुनर्नवः (कखेल्लकः) । यदाह—पुनर्नवो विशाखा च कटिल्लकः स शिलाटकः । वैशाखः खजके राधे । विशाखाः प्रयोजनमस्य वैशाखः । "विशाखाषाढ़ान्मन्थदण्डे" इति अण् । वैशाखी पौर्णमासी अस्येति वा । "साऽस्य पौर्णमासी" इत्यण् । खजके मन्थानके यथा—दोर्वैशाखैर्विगाह्याम्भः । राधश्चित्रोत्तरो मासः । तत्र यथा—वैशाखे मधुसूदनः । स्थानकविशेषेऽपि मङ्क्षः । तत्र तु क्लीबे यथा—वैष्णवं समपादं च वैशाखं मण्डलं

पण्डिते फणिभेदे स्यादयोगः कठिनोद्यमे ।
विश्लेषे विधूरे कूटेऽपाङ्गो नेत्रान्तपुण्ड्रयोः ॥१०६॥
अङ्गहीनेऽप्यनङ्गं खे चित्तेऽनङ्गस्तु मन्मथे ।
आभोगः परिपूर्णत्वे वरुणच्छत्रयत्नयोः ॥१०७॥

तथा । प्रत्यालीढमथालीढं स्थानान्येतानि षड् विदुः । सुमुखो गरुडात्मजे । पण्डिते फणिभेदे स्यात् । शोभनं मुखमस्य सुमुखः । गरुडात्मजो गरुडपुत्रः ॥१०५॥ पण्डिते वाच्यलिङ्गः । तत्र यथा—ग्राह्या सुमुखशेमुषी । फणिभेदो नागविशेषः । अथ गान्ताः । अयोगः कठिनोद्यमे । विश्लेषे विधूरे कूटे । नास्ति योगोऽत्र अयोगः । अयोवद्गति वा । चतुर्ष्वर्थेषु । कठिनेषु कर्मस्वद्यमोऽस्य पुरुषस्य कठिनोद्यमः । विधुरो विकलः । तयोर्वाच्यलिङ्गः । विश्लेषे यथा—वरगुरुभिरयोगे ह्म्भते नो विवेकः । कूटमसत्यम् । अपाङ्गो नेत्रान्तपुण्ड्रयोः । अङ्गहीनेऽपि । अपक्रान्तोऽपगतो वा अङ्गात्, अपकृष्टमङ्गमस्येति वा अपाङ्गः । अङ्गहीने वाच्यलिङ्गः । नेत्रान्ते यथा—चलापाङ्गं दृष्टिं स्पृशसि बहुशो वेपथुमतीम् । पुण्ड्रे तिलके यथा—गोरोचनापाङ्गरुचौ ललाटे ॥१०६॥ अङ्गहीने यथा—कुर्यान्नापाङ्गसङ्गतिम् । अनङ्गं खे चित्ते । नास्ति अङ्गम् आकारः शरीरं वाऽस्य अनङ्गम् । खम् आकाशम् । चित्तं मनः । अनङ्गस्तु मन्मथे । यथा—अनङ्गः पञ्चभिः पौष्पैर्विश्वं व्यजयतेषुभिः । आभोगः परिपूर्णत्वे वरुणच्छत्रयत्नयोः । आसमन्ताद् भुज्यतेऽनेन आभोगः । परिपूर्णत्वे यथा—दृश्यः किञ्चित्पवनचलचीनांशुकतया कुचाभोगः स्त्रीणां हरति न तथोन्मुद्रितवपुः । वरुणस्य पादः पतेश्छत्रं वरुणछत्रम् । यत्न आदरः ॥१०७॥ आयोगो गन्धमाल्योपहारे व्यापृतिरो-

आयोगो गन्धमाल्योपहारे व्यापृतिरोधयोः ।
आशुगोऽर्के शरे वायौ उत्सर्गस्त्यागदानयोः ॥१०८॥
वर्जने सामान्यविधावुद्वेगं पूगिकाफले ।
उद्वेगस्तूद्वेजने *स्यात्कलिङ्गो नीवृदन्तरे ॥१०९॥

धयोः । आयुज्यतेऽनेन आयुक्तिर्वा आयोगः । गन्धमाल्योपहारे यथा—आयोगयोगविहिताखिलदेवभोगः । व्यापृतौ व्यापारे यथा—आयोगो योगकर्मणि । रोधो निरोधनम् । आशुगोऽर्के शरे वायौ । आशु शीघ्रं गच्छति आशुगः । "नाम्नो गमः" इति डः । अर्के यथा—नाशयत्याशुगस्तमः । शरे यथा—रावणस्यापि रामास्तो (?) भित्वा हृदयमाशुगः । वायौ यथा—आशुगापहृत-पुष्पसौरभः । उत्सर्गस्त्यागदानयोः । वर्जने सामान्यविधौ । उत्सृज्यते उत्सर्जनम् वा उत्सर्गः । त्यागे यथा—तोयोत्सर्गा-द्रुततरगतिस्तत्परं वर्त्मतीर्णः । दाने यथा – वृत्तोत्सर्गः स्ववर्गेभ्यः स्वर्गद्वारमनर्गलम् ॥१०८॥ वर्जने यथा—कर्तव्यो मत्सरोत्सर्गः । सामान्येनोक्तोविधिः सामान्यविधिः । तत्र यथा—अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः । उद्वेगं पूगिकाफले । उद्गतो वेगोऽस्य स्रंसकत्वादुद्वेगम् । पुगिकाफलं क्रमुकम् । उद्वेगस्तूद्वेजने स्यात् । उद्वेजनम् उद्वेगः यथा—शान्तोद्वेगस्ति-मितनयनं दृष्टभक्तिर्भवान्याः । कलिङ्गो नीवृदन्तरे । पूतीकरञ्जे धूम्याटे स्यात् । कल्यते कलिङ्गः । "स्फुलीकलि पल्याद्भ्य इङ्गक्" (उ० १०२) कलिङ्गं चूडाऽस्येति वा । नीवृदन्तरे देशविशेषे यथा—उत्कलादेशितपथः कलिङ्गाभिमुखो ययौ । अयं प्रायेण पुंभूम्नि सूत्रे तु शब्दप्राधान्यादेकवचनान्तो निर्देशः ॥१०९॥

*मु० स्तिमिते शीघ्रगामिनि उद्वाहे च भवेऽपि स्यात्कलिङ्गो० ।

पूतीकरञ्जे धूम्याटे स्यात्कलिङ्गा नितम्बिनी ।
कलिङ्गं कौटजे फले कालिङ्गस्तु भुजङ्गमे ॥११०॥
द्विरदे भूमिकर्कारौ कालिङ्गी राजकर्कटी ।
चक्राङ्गः श्वेतगरुति चक्राङ्गी कटुरोहिणी ॥१११॥
जिह्मगो मन्दगे सर्पे तुरगो वाजिचित्तयोः ।
तुरगी त्वश्वगन्धायां धाराङ्गस्तीर्थखड्गयोः ॥११२॥

पूतीकरञ्जो वृक्षः । धूम्याटः पक्षी । कलिङ्गा नितम्बिनी । नितम्बिनी स्त्रीविशेषः । कलिङ्गं कौटजे फले । कुटजस्य वृक्षस्येदं फलं कौटजम् । कालिङ्गस्तु भूजङ्गमे । द्विरदेभूमि-कर्कारौ । कु ईषत् लिङ्गमस्य कालिङ्गः । "अल्पे" इति कादेशः, कलिङ्गे भवो वा । केन(जलेन)आलिङ्ग्यते वा ॥११०॥ भूमिकर्कारुः । कूष्माण्डविशेषः । कालिङ्गी राजकर्कटी । राजकर्कटी राजचिर्भटी । चक्राङ्गः श्वेतगरुति । चक्राकारं वृत्तत्वादङ्गमस्य चक्राङ्गः । श्वेतगरुति हंसे यथा—चक्राङ्गै-र्वक्रितग्रीवैः । चक्राङ्गी कटुरोहिणी । कटुरोहिणो ओषधि-विशेषः ॥१११॥ जिह्मगो मन्दगे सर्पे । जिह्मं गच्छति जिह्मगः । "नाम्नो गमः" इति डः । मन्दगे वाच्यलिङ्गः । द्वयोर्यथा—जिह्मगाः कस्य न द्वेष्याः । तुरगो वाजिचित्तयोः । तुरो गच्छति तुरगः । नाम्नोगमः इति डः । वाजिनि अश्वे यथा—आकुल्यकारि-कटकस्तुरगेण तूर्णम् । चित्तं मनः । तुरगी त्वश्वगन्धायाम् । अश्वगन्धा ओषधिः । धाराङ्गस्तीर्थखड्गयोः । धारां परं प्रकर्ष-मङ्गति धाराङ्गः । धारे वाङ्गमस्येति वा । तीर्थं तीर्थविशेषः । खड्गे यथा—भ्रातर्भ्रंस्यति भूधरोऽपि भवता धारङ्गधाराहतः ॥११२॥ नरङ्गं शेफे वरण्डे । नृणाति नरंगम् । पतितमीत्यंगः ।

नरङ्गं शेफे वरण्डे नारङ्गं विटजन्मिनोः ।
कणारसे नागरङ्गे निषङ्गस्तूर्णसङ्गयोः ॥११३॥
निसर्गः सृष्टौ स्वभावे *प्लवगः कपिभेकयोः ।
अर्कसूते पन्नगस्तु पद्मकोष्ठे भुजङ्गमे ॥११४॥

शेफो लिङ्गम् । वरण्डो भित्तिः । इक्ष्वादिभारको वा । नारङ्गं विटजन्मिनोः । कणारसे नागरङ्गे । नृणाति नारङ्गम् । "सृवृनृभ्यो णित्" (उ० ९९) इति अंगः । चतुर्ष्वर्थेषु । विटः खिड्गः। जन्मी देही । कणारसः पिप्पलीरसः। नागरङ्गे यथा—रसो गन्धश्च रूपं च नारङ्गे त्रितयं स्थितम् । निषङ्गस्तूर्णसङ्गयोः । निषज्यन्ते बाणा अस्मिन्निति निषङ्गः । निषञ्जनं वा । तूणे इषुधौ यथा—जातामिषङ्गो नृपतिर्निषङ्गादुद्धर्तु मैच्छत्प्रसभोद्धृतारि । सङ्गे यथा-गहनवननिषङ्गो मोक्षहेतुर्न कस्य ॥११३॥ निसर्गः सृष्टौ स्वभावे । निसर्जनं निसर्गः । सृष्टौ यथा—जगन्निसर्गसंहार—कारकः परमेश्वरः । स्वभावे यथा—निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः । प्लवगः कपिभेकयोः । अर्कसूते । प्लवेन गच्छति प्लवगः । "नाम्नो गमः" इनि डः । कपौ यथा—प्लवगसैन्यमलूकजिताजितम् । भेके मण्डूके यथा—प्लवगरवविचित्रे तत्र तीरे सरस्याः । अर्कस्य सूतः सारथिररुणः । अर्कादंशुमतः सूतो जातो वा । यदाह—रेवन्तस्त्वर्करेतोजः प्लवगो हयवाहनः । पन्नगस्तु पद्मकोष्ठे भुजङ्गमे । पद्भ्यां न गच्छति पन्नगः । पन्नं छन्नं गच्छति वा । पद्मकोष्ठम् ओषधिविशेषः । भुजङ्गमे यथा – दोलाकेलिनिषण्णपन्नगवधूगीतोत्सवप्रक्रमे ॥ ११४ ॥ परागश्चन्दने रेणौ गिरौ ख्यात्युपरागयोः । स्नानीयपुष्परजसोः ।

*नीलङ्गु कृमिजातिके । भम्भराल्यां प्रसूने च प्लवगः० ।

परागश्चन्दने रेणौ गिरौ ख्यात्युपरागयोः ।
स्नानीयपुष्परजसोः पतङ्गः सूर्यपक्षिणोः ॥११५॥
पारते शलभे शालौ पत्राङ्गं रक्तचंदने ॥
भूर्जपद्मकयोश्चापि प्रयागो वाजिशक्रयोः ॥११६॥

परा गच्छति परागः "नाम्नो गमः" इति डः । परश्चासौ रागश्चेति वा । सप्तस्वर्थेषु । चन्दने यथा—ग्रीष्मे परागरस-वासितबाहुमध्या । रेणौ यथा—समूढकर्पूरपरागपाण्डुरम् । गिरिः पश्चिमाचलः । तत्र यथा—परागशृङ्गे रविरस्तमेति । ख्यातिः प्रसिद्धिः । सा च शुभा अशुभा च । तत्र अशुभायां यथा—समपहाय विरागिपरागिणीरलिकदम्बकमम्बुरुहां ततीः । उपरागे सूर्येन्दुग्रहणे यथा—न देयं गणकैर्लग्नं परागे चन्द्रसूर्ययोः । स्नाति अनेन स्नानीयं चूर्णं पिष्टिकादि तत्र यथा—परागोद्वर्त्तितैरङ्गैः । पुष्परजसि यथा—उद्धूतः सरसिजसम्भवः परागः । पतङ्गः सूर्यपक्षिणोः । पारते शलभे शालौ । पतति पतङ्गः । "पतितमीति" अङ्गः । पतौ गच्छति वा 'नाम्नो गमः" इति डः । अपतंगति वा पृषोदरादित्वात् । सूर्ये यथा—पतत् पतङ्गप्रतिमस्तपोनिधिः । पक्षिणि यथा—पतङ्गनाथोपरि कैटभारिः ।११५॥ पारते रसेन्द्रे यथा—तापादुड्डीय पतति पतङ्गः शीतले जले। शलभे यथा—पतङ्गवद्वह्निमुखं विविक्षुः । शालौ शालिविशेषे यथा—पतङ्गास्तपनीयाश्च ये चाऽन्ये शालयः शुभाः। पारते क्लीब इत्यन्ये । पत्राङ्गं रक्तचन्दने । भूर्जपद्मकयोश्चापि । पत्रेष्वङ्गति पत्राणि अङ्गमस्येति वा पत्राङ्गम् । पद्मकम् औषधिभेदः । प्रयागो वाजिशक्रयोः । यज्ञे तीर्थविशेषे च । प्रारब्धो यागोऽत्रानेन अस्मिन् अस्मै वा प्रयागः । प्रयजनं प्रेज्यते वा । वाजिनि शक्रे च

यज्ञे तीर्थविशेषे च प्रयोगस्तु निदर्शने ।
कार्मणे च प्रयुक्तौ च प्रियङ्गू राजसर्षपे ॥११७॥

पिपल्यां फलिनीकङ्ग्वोः पुन्नागः पादपान्तरे ।
जातीफले नरश्रेष्ठे भुजङ्गः सर्पषिङ्गयोः ॥११८॥

मातङ्गः श्वपचो हस्ती मृदङ्गो घोषवाद्ययोः ।
रक्ताङ्गो भौमे रक्ताङ्गं कम्पिल्ये विद्रुमेऽपि च ॥११९॥

यथा–याति प्रयागो गगनेन वेगात् ॥११६॥ यज्ञे यथा-द्विजैः प्रयागः क्रियते नियोगात् । तीर्थविशेषे यथा–लोकः प्रयागवासी कूपे स्नानं समाचरति । प्रयोगस्तु निदर्शने । कर्मणे च प्रयुक्तौ च । प्रयुज्यतेऽनेन प्रयोजनं वा प्रयोगः । निदर्शने उदाहरणे यथा–दृष्टशिष्टप्रयोगोऽहम् । कार्मणे वशीकरणे यथा–योगी प्रयोगेण वशीचकार । प्रयुक्तिर्व्यापारः । तत्र यथा–मुग्धत्वादविदितकैतव-प्रयोगा गच्छन्त्यः सपदि पराजयं तरुण्यः । प्रियङ्गू राजसर्षपे । पिपल्यां फलिनी कङ्ग्वोः। प्रीणाति प्रियङ्गुः। "प्रीकैपैनीलेरङ्गुक्" (उ० ७६१) राजसर्षपो राजिका ॥११७॥ पिप्पली कणा । फलिनी श्यामलता । तत्र यथा–प्रियङ्गुश्यामाङ्गः प्रकृतिसुभगः । कङ्गुः पीततण्डुला । तत्र यथा–अणवः प्रियङ्गुकोद्रवमयुष्ठकाः शालिराढकाः। पुन्नागः पादपान्तरे । जातीफले नरश्रेष्ठे । पुमांश्चासौ नागश्च पुन्नागः । पुन्नाग इव प्रधानत्वाद्वा । पादपान्तरनरश्रेष्ठयो-र्यथा–वरसहकारकरञ्जकवीरतरोशोकमदनपुन्नागः । भुजङ्गः सर्पषिङ्गयोः । भुजेन गच्छति भुजाभ्यां नृत्यद्भ्यामिव गच्छति वा भुजङ्गः । नाम्नो गमः इति डः । षिङ्गो वेश्यापतिः । द्वयोर्यथा–तमिद्धमाराधयितुं स कर्णकैः कुलैर्न भेजे फणिनां भुजङ्गता ॥११८॥ मातङ्गः श्वपचो हस्ती । मन्यते मातङ्गः । "मने-

रक्तङ्गा जीवन्तिकायां रथाङ्गः कोकपक्षिणि ।
रथाङ्गं चक्रे वराङ्गं योनौ शीर्षे गुडत्वचि ॥१२०॥

कुञ्जरे च विडङ्गस्तु स्यादभिज्ञकृमिघ्नयोः ।
विसर्गो विसर्जनीये वर्चसि त्यागदानयोः ॥१२१॥

र्न् मातौ च" (उ० १००) इत्यङ्गः । श्वपचश्चण्डालः । द्वयोर्यथा–मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती । मृदङ्गो घोषवाद्ययोः । मृद्यते मृदङ्गः । विडिविलि (उ०१०१) इति कृदङ्गः । घोषो नादभेदः । वाद्ये यथा–रजनि विरति-शंसी कामिनीनां भविष्यद्विरहविहितनिद्राच्छेदमुच्चैर्मृदङ्गः । रक्ताङ्गो भौमे । रक्तमङ्गमस्य रक्ताङ्गः । भौमो मङ्गलस्तत्र यथा–रक्ताङ्गः पञ्चमस्थः । रक्ताङ्गं कम्पिल्ये विद्रुमेऽपि च । कम्पिल्यम् औषधभेदः । विद्रुमः प्रवालम् ॥११९॥ रक्ताङ्गा जीवन्तिकायां । जीवन्तिका मधुस्रवा । रथाङ्गः कोकपक्षिणि । रथाङ्गं चक्रं तन्नामत्वाद् रथाङ्गः । यथा–रथाङ्गमिथुनाश्रया । रथाङ्गं चक्रे । रथस्याङ्गं रथाङ्गम् । यथा–रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः सम्वलिता विरेजिरे । वराङ्गं योनौ शीर्षे गुडत्वचि कुञ्जरे च । वरं प्रधानमङ्गम्, वराङ्गम् । योनौ यथा–अङ्गनानां वराङ्गेषु नीरागो रज्यते कथम् । शीर्षे यथा– गङ्गां वराङ्गे दधतः स्मरारेः । गुडवन्मधुरात्वक् । सुगन्धिवल्ली(छल्ली)विशेषः तत्र यथा–वराङ्गकौतीमधुकविल्व-मज्जैलवालुकम् ॥१२०॥ कुञ्जरे यथा–वराङ्गसङ्ग्राम-तरङ्गितेषु । विडङ्गस्तु स्यादभिज्ञकृमिघ्नयोः । विड् व्यापक-मङ्गमस्य विडङ्गः । विड्यते वा "विडिविलि" (उ० १०१) इति किदङ्गः । अभिज्ञे वाच्यलिङ्गः । कृमिघ्नम् । तत्र

सम्भोगो भोगरतयोः शुण्डायां सर्वगं जले ।
सर्वगस्तु विभौ रौद्रे सारङ्गो विहगान्तरे ॥१२२॥
चातके चञ्चरीके च द्विपैणशबलेषु च ।
अनघः स्याद् गतपापे मनोज्ञे निर्मलेऽपि च ॥१२३॥

त्रिलिङ्गः । तत्र यथा—फेनौ रसाञ्जनं क्षौद्रं विडङ्गोऽथ मनःशिला । विसर्गो विसर्जनीये वर्चसि त्यागदानयोः । विसृज्यते विसर्गः । विसर्जनीये बिन्दुद्वये यथा—प्रतिकूलवर्णमुपहत लुप्तविसर्गं विसन्धिहतवृत्तम् । वर्चसि अन्नमले यथा—विसर्गः स्वर्गिणां कुतः । त्यागदानयोर्यथा—आदानं हि विसर्गाय सतां वारिमुचामिव ॥१२१॥ सम्भोगो भोगरतयोः शुण्डायाम् । सम्भुज्यते सम्भोगः । भोगे यथा—असंभोगादलब्धेव समृद्धिगृं द्धिबुद्धिभिः । रते यथा—सम्भोगान्ते मम समुचिते हस्तसम्वाहनायाम् । शुण्डायां यथा—सम्भोगदण्डेन पपौ स नागः । सर्वगं जले । सर्वत्र गच्छति सर्वगम् । यथा—सर्वगं सर्ववल्लभम् । सर्वगस्तु विभौ रुद्रे । विभौ व्यापके वाच्यलिङ्गः । तत्र यथा—सर्वीयं सर्वगं सर्वं सर्वदेवनमस्कृतम् । रुद्रे यथा—स सर्वगः पर्वतपुत्रिकायुतः । सारङ्गो विहगान्तरे । चातके चञ्चरीके च द्विपैणशबलेषु च । सरति सारङ्गः । "सृवृन्भ्यो णित्" (उ० ९९) इति अङ्गः । सारङ्गायति गच्छति वा । पृषोदरादित्वात् । सह आरङ्गेण वर्त्तते इति वा । चञ्चरीके स्त्रीपुंसः । शवले वर्णे पुंसि । तद्वति वाच्यलिङ्गः । षट्स्वर्थेषु शवलवर्जं सर्वेषु यथा—नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढैराविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् । दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः सारङ्गास्ते जललवमुचः सूचयिष्यन्ति

अमोघः सफलेऽमोघा पुनः पथ्याविडङ्गयोः ।
उल्लाघो निपुणे हृष्टे शुचिनिरोगयोरपि ॥१२४॥
काचिघस्तु मूषिके स्याच्छते कुम्भेच्छमण्डके ।
परिघोऽस्त्रे योगभेदे परिघातेऽर्गलेपि च ॥१२५॥

मार्गम् ॥१२२॥ शबले यथा—नारङ्ग मीलसारङ्ग यावन्नो याति पक्वताम् । अथ घान्ताः । अनघः स्याद्गतपापे मनोज्ञे निर्मलेऽपि च । नास्ति अघमस्य अनघः । वाच्यलिङ्गः । सर्वेषु यथा—दिदृक्षमाणाः प्रति रथ्यमीयुर्मुरारिमाराऽदनघं जनौघाः ॥१२३॥ अमोघः सफले । मुह्यतेऽनेन मोघः । घञि मेघादित्वाद् घत्वम्, न मोघोऽमोघः । वाच्यलिङ्गः । यथा—यदमोघमपामन्तरुप्तं बीजमजत्वया । अमोघा पुनः पथ्याविडङ्गयोः । पथ्या हरीतकी । विडङ्गः कृमिघ्नम् । उल्लाघो निपुणे हृष्टे शुचि नीरोगयोरपि । उल्लाघते स्म उल्लाघः । क्ते अनुपसर्गात् क्षीवोल्लाघेति साधुः वाच्यलिङ्गः । चतुर्ष्वपि यथा—उल्लाघः श्लाघ्यते न कैः ॥१२४॥ काचिघस्तु मूषिके स्याच्छते कुम्भेच्छमण्डके । कच्यते काचिघः "मघाघङ्घ" (उ० ११०) इति साधुः । मण्डकः प्रदेशविशेषः । परिघोऽस्त्रे योगभेदे परिघातेऽर्गलेऽपि च । परिहण्यतेऽनेन परिहणनं वा परिघः। "परेर्घः" इति करणेऽलि साधुः । भावेऽपि बहुलाधिकारात् । अस्त्रे यथा—पादपाविद्धपरिघः शिलानिष्पिष्ट मुद्गरः । योगभेदे यथा—शूले मूर्ध्नि मृगौ मघा च—परिघे चित्रा तथा वैधृते । परिसमन्ताद् हननं परिहण्यतेऽनेन वा परिघातः । तत्र यथा—भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरिघो दुरत्ययः । अर्गले यथा—नगरपरिघदीर्घाबाहवस्ते ममेते ॥१२५॥ पलिघः काचकलशे घटे प्राकारगोपुरे । "परिघस्य

पलिघः काचकलशे घटे प्राकारगोपुरे ।
प्रतिघो रुट्प्रतिघातौ महार्घो लावकाण्डजे ॥१२६॥

महामूल्येऽप्यवीचिस्त्वन्तरङ्गे नरकान्तरे ।
कवचस्तु परित्राणे पटहे नन्दिपादपे ॥१२७॥

क्रकचः करपत्रे स्याद् ग्रन्थिलाल्यतरावपि ।
कणीचिः पुष्पितलतागुञ्जयोः शकटेऽपि च ॥१२८॥

परिघाङ्कयोगे—इति लत्वे पलिघः । त्रिष्वपि यथा—पलिघः । सलिलाकुलः । प्रतिघो रुट् प्रतिघातौ । प्रतिहन्यतेऽनेन प्रतिघः । "क्वचित्" इति डे पृषोदरादित्वाद् घत्वम् । रुट् रोषस्तत्र यथा—उद्दामप्रतिघानलप्रतिहतप्रज्ञः स विज्ञोऽप्यभूत् । प्रतिघाते यथा—सह निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति । महार्घो लावकाण्डजे । महामूल्येऽपि । महानर्घोऽस्य महार्घः । महामूल्ये वाच्यलिङ्गः । लावकोऽभिधानोऽण्डकः पक्षी लावकाण्डजः ॥१२६॥ महामूल्ये यथा—यतो महार्घाणि भृतान्यनूनैः प्रस्थैर्मुहुर्भूरिभिरुच्छिखानि । अथ चान्ताः । अवीचिस्त्वतरङ्गे नरकान्तरे । न विद्यन्ते वीचयोऽस्मिन् अवीचिः । अव्यते वा "मृश्चिकणि" (उ० ६२७) इति ईचिः । अतरङ्गं कल्लोलरहितम् । तत्र वाच्यलिङ्गः । नरकान्तरे स्त्रीपुंसः । अतरङ्गे यथा—अवीचिर्निर्वाति सरससरसीवेयमचला । नरकान्तरे यथा—अवीचौ पच्यन्ते सुकृतरहितायातनशतैः । कवचस्तु परि(तनु)त्राणे पटहे नन्दिपादपे । कूयते कवते वा कवचः । "कल्यवि" (उ०११४) इति अचः । तनुत्राणे पुंक्लीबः । तत्र यथा—रथी निषङ्गी कवची धनुष्मान् पटह आनकः । नन्दि पादपो गर्दभाण्डवृक्षः ॥१२७॥ क्रकचः करपत्रे स्याद् ग्रन्थिलाख्यतरावपि । क्राम्यति

नमुचिर्दितिजे कामे नाराचो लोहसायके ।
जलेभे नाराच्येषण्यां प्रपञ्चो विप्रलम्भने ॥१२९॥

विस्तारे सञ्चये चापि मरीचिः कृपणे घृणौ ।
ऋषिभेदेऽथ मारीचः कक्कोले याजकद्विपे ॥१३०॥

क्रम्यते वा क्रकचः । "क्रकचादयः" (उ० ११५) इति साधुः । करपत्रे पुंक्लीबः । तत्र यथा—दारुदारं विदार्यन्ते दारुगैः क्रकचैः क्वचित् । कणीचिः पुष्पितलतागुञ्जयोः शकटेऽपि च । कणति कणीचिः । "मृश्चिकणि" (उ० ६२७) इति ईचिः । त्रिष्वर्थेषु । शकटे पुंसि । शेषयोः स्त्रियाम ॥१२८॥ नमुचिर्दितिजे कामे । न मुञ्चति नमुचिः । "नाम्युपान्त्य" इति किदिः । नखादित्वान्नञोऽदभावः । दितिजे दानवे यथा—नमयति स्म स केवलमुन्नतं वनमुचे नमुचेररये शिरः । कामे स्मरे यथा—आविश्चेराक्रमैः किञ्चिन्नमुचिर्न विमुञ्चति । नाराचो लोहसायके । जलेभे । नरमञ्चति नराच् तस्यापत्यं (तस्यायं) नाराचः । नारमञ्चति वा । लोहसायके यथा—नाराचैः कृतवीर्यनन्दनवधूबाष्पप्रियंभावुकैः । जलेभो जलहस्ती । नाराच्येषण्याम । एषणी वैद्यशलाका । प्रपञ्चो विप्रलम्भने । विस्तारे सञ्चये चापि । प्रपञ्चनं प्रपञ्चः । विप्रलम्भनं विप्रतारणम् । तत्र यथा—धूर्ताः प्रपञ्चचतुराः परिवञ्चयन्ते ॥१२९॥ विस्तारे यथा—कैः कैरत्र वचः प्रपञ्चरचनाचातुर्यमाचर्यते । सञ्चये यथा—बन्धूकविद्रुमजपाकुसुमप्रपञ्चोदन्तच्छदस्य सपरिच्छद एष सर्वः । मरीचिः कृपणे घृणौ । ऋषिभेदे । म्रियतेऽसावनेन वा मरीचिः । "मृशिवकणि" (उ० ६२७) इति ईचिः । कृपणे वाच्यलिङ्गः । घृणौ स्त्रीपुंसः । ऋषौ पुमान् । कृपणे यथा—मरीचिर्म्रियमाणोऽपि

रक्षोभेदेऽथाण्डजः स्यात्कक्किण्डेऽहौ खगे झषे ।
अण्डजा तु मृगनाभौ अङ्गजो मन्मथे सुते ॥१३१॥
मदे केशे *अङ्गजं रक्ते कम्बोजो नीवृदन्तरे ।
शङ्खहस्तिभेदयोश्च करजो नखवृक्षयोः ॥१३२॥

विश्राणयति न सो धनम् । घृणौ यथा-संनिगृह्य तिमिरं मरीचिभिः। ऋषिभेदः सप्तऋषिमध्यवर्त्ती । यदाह-मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहस्तथा वसिष्ठश्च महातेजाः सप्तमः परिकीर्त्तितः । अथ मारीचः कक्कोले याजकद्विपे । रक्षोभेदे । म्रियतेऽनेन मारीचः। म्रियते रीचण् । कक्कोलो वृक्षभेदः । याजकस्य द्विपो याजकद्विपः ॥१३०॥ रक्षोभेदो रावणमातुलः । तत्र यथा-हिंस्रासु बाहू मारीचमिश्रानः परिवृण्वतेः । अथ जान्ताः । अथाण्डजः स्यात्कक्किण्डेऽहौ खगे झषे । अण्डाज्जातोऽण्डजः । कक्किण्डः कृकलासः । अहिः सर्पः । खगे यथा-नीडक्रोडेऽण्डजश्रेणीतुण्डैः खण्डयतिच्छदम् । झषो मत्स्यः । अण्डजा तु मृगनाभौ । मृगनाभिः कस्तूरिका । अङ्गजो मन्मथे सुते । मदे केशे । अङ्गादङ्गजे वा जायतेऽङ्गजः । चतुर्ष्वपि यथा-अङ्गजः कस्य न प्रियः ॥१३१॥ अङ्गजं रक्ते । रक्ते रुधिरे यथा-गजाङ्गजैस्तत्र वहन्ति नद्यः। कम्बोजो नीवृदन्तरे । शङ्खहस्तिभेदयोश्च । काम्यते कम्बोजः । उटजादयः (उ० १३४) इति साधुः । नीवृदन्तरे देशभेदे यथा-कम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः । शङ्खभेदे हस्तिभेदे च यथा-कम्बोजः पूज्यते न कैः । करजो नखवृक्षयोः । करे जायते करजः । कीर्यते वा । उटजादित्वात्साधुः । नखे यथा-दन्तक्षतानि करजैश्च विपाटितानि । वृक्षः करञ्जाख्यः ॥१३२॥ काम्बोजः

* प्र० सुंदरे च काम्बोजो० ।

काम्बोजः पुनरश्वानां भेदे पुन्नागपादपे ।
वलक्षखदिरे चापि काम्बोजी माषपर्णिका ॥१३३॥
कारुजः कलभे फेने वल्मीके नागकेसरे ।
गैरिके शिल्पिनां चित्रे स्वयंजाततिलेऽपि च ॥१३४॥
कुटजोऽगस्त्ये द्रुभेदे द्रोणे गिरिजमभ्रके ।
शिलाजतुनि लोहे च गिरिजा मातुलुङ्ग्युमा ॥१३५॥

पुनरश्वानां भेदे पुन्नागपादपे । वलक्षखदिरे चापि । कम्बोजदेशे भवः काम्बोजः । काम्यते वा उटजादित्वात्साधुः । अश्वभेदे यथा-यात्रानेहसि यस्य दिग्विजयिनः काम्बोजवाहावली । वीखोल्लेखविकासिनि क्षितिरजःपङ्क्ते वियच्चुम्बति । वलक्षखदिरः श्वेतखदिरः । काम्बोजी माषपर्णिका । माषपर्णिका ओषधिविशेषः ॥१३३॥ कारुजः कलभे फेने वल्मीके नागकेसरे । गैरिके शिल्पिनां चित्रे स्वयंजाततिलेऽपि च । किरति कीर्यते वा कारुजः "उटजादयः" (उ० १३४) इति साधुः । कारोर्जातो वा केन अरुजो वा । सप्तस्वर्थेषु । कलभस्त्रिंशदब्दको हस्ती । फेनो डिण्डीरः। वल्मीको नाकुः । नागकेसरो वृक्षः । गैरिकं धातुभेदः । शिल्पिनां कारूणां चित्रं विस्मयकारि कर्म । तत्र वाच्यलिङ्गः । स्वयंजाततिलोऽरण्यतिलः ॥१३४॥ कुटजोऽगस्त्ये द्रुभेदे द्रोणे । कुटात् घटाज्जातः कुटजः । कुटति वा । "कुटे रजः" (उ० १३०) इति अजः । कुटादित्वान्न गुणः । अगस्त्ये द्रोणाचार्ये च यथा-कुटजेन निपीतोऽयं महानपि रणोदधिः । द्रुभेदे वृक्षभेदे यथा-कुटजपुष्पपरागकणाः स्फुटं विदधिरे दधिरेणुविडम्बनाम् । गिरिजमभ्रके । शिलाजतुनि लोहे च । गिरौ जातं गिरिजम् । अभ्रकं स्वच्छपत्रम् । शिलाजतु धातुभेदः । लोहं ताम्रादि । सर्वेषु

जलजं कमले शङ्खे नीरजं पद्मकुष्टयोः ।
परञ्जोऽसौ तैलयन्त्रे क्षुरिका फलफेनयोः ॥१३६॥
बाहुजस्तु स्वयंजाते तिले क्षत्रियकीरयोः ।
भूमिजौ नरकाङ्गारौ भूमिजा जनकात्मजा ॥१३७॥

यथा—राजते गिरिजैः गिरिः । गिरिजा मातुलुङ्ग्युमा । मातुलुङ्गी बोजपूरी । उमायां यथा-अवोचद्यं पश्यत्यवतु स शिवः सा च गिरिजा ॥१३५॥ जलजं कमले शङ्खे । जले जायते जलजम् । कमले यथा—विहङ्गमानां जलजातपत्रैः । शङ्खे यथा—ततः प्रियोपात्तरसेऽधरोष्ठे निधाय दध्मौ जलजं कुमारः । नीरजं पद्मकुष्टयोः । नीरे जातं नीरजम् । निश्चितं रजत्यनेन वा । स्थादित्वात्कः । पद्मे यथा—ब्रीडयारुददिवालिविरावैर्नीलनीरजमगच्छदधरतात् । कुष्टं गन्धद्रव्यविशेषः । परञ्जोऽसौ तैलयन्त्रे क्षुरिकाफलफेनयोः परं प्रकृष्टं जयति जायते वा परञ्जः । "क्वचित्" इति डः । पृषोदरादित्वात् मोऽन्तः । असिः खड्गः । तैलयन्त्रं दारुमयम् । क्षुरिकाफलं कृपाणिका पत्रम् ॥१३६॥ बाहुजस्तु स्वयंजाततिले क्षत्रियकीरयोः । बाहुभ्यां जातो बाहुजः । बहिर्जातो वा । पृषोदरादित्वात् । क्षत्रिये यथा—सम्प्रत्यस्य समस्तबाहुजभुजक्रोधस्य निर्वास्यतः। क्षुंदानो धनुरैन्दुशेखरमहो जातो भवानिन्धनम्। कीरः शुकः । भूमिजौ नरकाङ्गारौ । भूमेर्जातौ भूमिजौ । नरको नरकासुरः । अङ्गारो मङ्गलः । द्वयोर्यथा—को भूमिजान्नोद्विजते जनौघः । भूमिजा जनकात्मजा । जनकात्मजा सोता । तत्र यथा—जनकः स निजां कन्यां ददौ रामाय भूमिजाम् । वलजं गोपुरे सस्ये क्षेत्रसङ्गरयोरपि । सदाकारे । वलते वलजम् । "वलैर्वन्तश्च वा" इति अजः । वलाज्जायते वा । सदाकारे

वलजं गोपुरे सस्ये क्षेत्रसङ्गरयोरपि ।
सदाकारे वलजा तु पृथिव्यां वरयोषिति ॥१३८॥
वनजो मुस्तके स्तम्बेरमे वनजमम्बुजे ।
वनजा तु मुद्गपर्ण्यां सहजः सहसम्भवे ॥१३९॥
निसर्गे च सामजस्तु सामोत्थे कुञ्जरेऽपि च ।
हिमजो मेनका पुत्रे हिमजा पार्वती शची ॥१४०॥

वाच्यलिङ्गः । क्षेत्रे तात्स्थ्यात्सस्येऽपि च त्रिलिङ्गः । तयोर्यथा—त्वं समीरण इव प्रतीक्षितः कर्षकेण वलजां पुपूषता । गोपुरे पुरद्वारे यथा—रूरुधुर्वलजं बलात् । सङ्गरे सङ्ग्रामे यथा—न युद्धशौण्डा बलजे वलन्ते । सदाकारे भद्राकृतौ यथा—वन्द्यास्ते साधवो वलजाः । वलजा तु पृथिव्यां वरयोषिति । द्वयोर्यथा—स्वबलैर्बलवन्तोऽपि युध्यन्ते वलजाकृते ॥१३८॥ वनजो मुस्तके स्तम्बेरमे । वनं जलम् अरण्यं वा तत्र जातो वनजः । मुस्तको मुस्ता । स्तम्बेरमे गजे यथा—वनजैरवनेर्जयः । वनजमम्बुजे । यथा—दीर्घेष्वमी नियमिताः पटमण्डपेषु । निद्रां विहाय वनजाक्षवनायुदेश्याः । वनजा तु मुद्गपर्ण्याम् । मुद्गपर्णी ओषधिः । सहजः सहसम्भवे । निसर्गे च । सहजायते सहजः । "क्वचित्" इति डः । सह सम्भवे वाच्यलिङ्गः । तत्र यथा—सहजकालकूटशिक्षितक्रौर्येव लक्ष्मीः ॥१३९॥ निसर्गे स्वभावे यथा—सहजचापलदोषसमुद्धतः । सामजस्तु सामोत्थे कुञ्जरेऽपि च । साम्नो जातः सामजः । सामोत्थे वाच्यलिङ्गः । तत्र यथा—राजा तु सामजं सन्धिं द्विषां न बहुमन्यते । कुञ्जरे यथा—दन्तादन्तैराहताः सामजानां जग्मुर्भङ्गं न स्वयं सामजाताः । हिमजो मेनकापुत्रे । हिमाज्जातो हिमजः । मेनकापुत्रो

क्षेत्रज्ञावात्मनिपुणौ दोषज्ञः प्राज्ञवैद्ययोः ।
सर्वज्ञस्तु जिनेन्द्रे स्यात्सुगते शङ्करेऽपि च ॥१४१॥
अवटः कूपखिलयोर्गर्त्ते कुहकजीविनि ।
अरिष्टो लशुने निम्बे फेनिले कंककाकयोः ॥१४२॥

मैनाकः । तत्र यथा–ययौ महेन्द्रवित्रस्तो हिमजो हि महोदधौ । हिमजा पार्वती शठी । पार्वत्यां यथा–हिमजा महिमोत्सवे । शठी ओषधिभेदः ॥१४०॥ अथ ज्ञान्ताः । क्षेत्रज्ञावात्मनिपुणौ । क्षेत्रं शरीरं पात्रं वा जानाति क्षेत्रज्ञः । निपुणे वाच्यलिङ्गः । आत्मनि यथा–क्षेत्रज्ञक्षेत्रयोर्भेदो विज्ञातव्यो विचक्षणैः । निपुणे यथा–क्षेत्रज्ञः कुरुते किञ्चिन्नाविचार्य हिताहिते । दोषज्ञः प्राज्ञवैद्ययोः । दोषं जानाति दोषज्ञः । वाच्यलिङ्गः । द्वयो-र्यथा–बुद्धिमलरोगदोषज्ञः । खलेऽपि मंखः । यथा–गुणदोषौ गुणी वेत्ति दोषज्ञो दोषमेव हि । सर्वज्ञस्तु जिनेन्द्रे स्यात्सुगते शङ्करेऽपि च । सर्वं जानाति सर्वज्ञः । जिनेन्द्रे यथा–सर्वज्ञ एव हि जानाति परिणामं हि कर्मणाम् । सुगते बुद्धे यथा–प्रणम्य सर्वज्ञमपेतविप्लवम् । शङ्करे यथा–देवं प्रणम्य सर्वज्ञं सृष्टिसंहारकारकम् ॥१४१॥ अथ टान्ताः । अवटः कूपखिलयो-र्गर्त्ते कुहकजीविनि । अव्यते अवटः । "दिव्यवि" (उ०१४२) इति अटः । चतुर्ष्वर्थेषु । कूपे यथा–अन्धेनान्ध इवाकृष्टः पात्यते नरकावटे । खिले यथा–पाटयत्यवटं बटुः । गर्त्ते यथा–को नाम स्यादवटकुहरालोकनेव्यस्य कल्पः । कुहकमैन्द्रजालं तेन जीवति कुहकजीवी । तत्र वाच्यलिङ्गः । तत्र यथा–अवटः कपटे पटुः । प्रमत्तेऽपि मङ्खः । यथा–अवटाटङ्कसङ्केतनिकेतनसमाश्रयाम् । अरिष्टो लशुने निम्बे फेनिले कङ्क(दैत्य)काकयोः । न रिष्य-

अरिष्टं सूत्यगारेऽन्तचिह्ने तक्रे शुभेऽशुभे ।
अवटुर्गर्तान्धुघाटासूत्कटस्तीव्रमत्तयोः ॥१४३॥
उच्चटा दम्भचर्यायां, प्रभेदे लशुनस्य च ।
करटः करिगण्डे स्यात्कुसुम्भे निन्द्यजीवने ॥१४४॥

तेऽरिष्टः । नास्ति रिष्टं क्षेममत्र वा । लशुनं कन्दभेदः । निम्बफेनिलौ वृक्षौ । कङ्कः पक्षी । काके वायसे यथा–अरिष्टैरिव मूर्त्तैस्तदरिष्टैर्वलितं गृहम् । दैत्यविशेषेऽपि मङ्खः । यथा–दुष्टरिष्टकठोरकण्ठवलना विश्लिष्टकण्ठस्रजा ॥१४२॥ अरिष्टं सूत्यगारेऽन्तचिन्हे तक्रे शुभेऽशुभे । शुभमात्रेऽशुभमात्रे च क्लीबे । तद्वति वाच्यलिङ्गः । सूते प्रसवस्यागारं गृहं सूत्यागारं तत्र यथा–अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा । अन्तचिन्हे मरणचिन्हे यथा– षाण्मासिकमरिष्टं तत् । तक्रे यथा–अरिष्टमिष्टं हि विशिष्टपुंसाम् । शुभे यथा–अरिष्टाः सन्तु पन्थानः । अशुभे यथा – अरिष्टकर्मकार्येषु वर्जनीयं प्रयत्नतः । आसवभेदेऽपि मङ्खः । अरिष्टमिष्टैः सह सेवते सदा । अवटुर्गर्तान्धुघाटासु । अव्यते अवटुः । "अव्यर्ति गृभ्योऽटुः" (उ०७६२) घाटायां स्त्रीपुंसः । शेषयोः स्त्रियाम् । यदाह–अवटुः कथिता घाटा कूपगर्त्तेषु सूरिभिः । गर्त्तः श्वभ्रम् । अन्धुः कूपः । तयोर्यथा–अवटोनिकटे घटं घटं घाटा कृकाटिका । तत्र यथा–अवटौ लकुटा हतः । उत्कटस्तीव्रमत्तयोः । अधिक उत्कटः । "सम्प्रोन्नेः संकीर्णप्रकाशाधिकसमीपे" (७–१–१२५) इति उदोऽधिकार्थे कट प्रत्ययः । उद्भिन्नौ कटावस्य वा वाच्यलिङ्गः । तीव्रे यथा–कोपाटोपसमुद्भटोत्कटसटा कोटेरिभारेः शनैः । मत्ते यथा–मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ।

काके वाद्ये दुर्दुरुटे, नवश्राद्धेऽथ केर्कटः ।
कुलीरे करणे स्त्रीणां, राशौ खगेऽथ कर्कटी ॥१४५॥
शाल्मलीफलवालुङ्क्योः कार्यटो जतुकार्यिणोः ।
कीकटः कृपणे निस्वे, देशभेदे तुरङ्गमे ॥१४६॥

उच्चटादम्भे चर्यायां प्रभेदे लशुनस्य च। उच्चटति भिनत्ति उच्चटा । दम्भः कैतवम् । चर्या चरणम् । लशुनस्य प्रभेदो लशुन-विशेषः करटः करिगण्डे स्यात्कुसुम्भे निन्द्यजीवने । काके वाद्ये दुर्दुरुटे नवश्राद्धे । करोति करटः । "दिव्यवि" (उ०१४२) इति अटः । केति शब्दं रटति वा । के शिरसि रटति वा । करिगण्डे यथा—अलिकुलसेवितकरटितटम् । कुसुम्भं रागद्रव्यम् । निन्द्य-जीवनं कुत्सितवृत्तिः ॥१४४॥ दुर्दुरूटे दुर्मुखे वाच्यलिङ्गः । तत्र काके वाद्यभेदे च यथा – ते कर्णकोटिकटवः करटा रटन्ति । नवश्राद्धं प्रेतस्य एकादशाहश्राद्धम् । तत्र यथा—करटवटकभोजी लम्पटो विप्रखेटः । अथ कर्कटः । कुलीरे करणे स्त्रीणां राशौ खगे । कर्किः सौत्रः कर्कति कर्कटः । "दिव्यवि" (उ०१४२) इति अटः । कुलीरो जलचरभेदः । तत्र यथा—कर्कटसधर्माणो हि राजपुत्रा जनकभक्षाः । स्त्रीणां करणं वात्स्यायनप्रसिद्धम् । राशौ यथा—पुनर्वसुपाद एकः पुष्याश्लेषौ च कर्कटः । खगः पक्षिविशेषः । अथ कर्कटी ॥१४५॥ शाल्मलीफलवालुङ्क्योः । शाल्मली वृक्षभेदस्तस्या फलम् । वालुङ्की चिर्भटी । द्वयोर्यथा—दशनशकटकोटच्या कर्कटीं त्रोटयन्ति । कार्यटो जतुकार्यिणोः । कारिणमटति कार्यटः । कार्याय वा अटति पृषोदरादित्वात् । जतु लाक्षा । कार्यी कार्यार्थी । तत्र वाच्यलिङ्गः । यथा—लम्पटाः कार्यटा

कुरण्टो झिण्टिकाभेदे कुरण्टी दारुपुत्रिका ।
कुक्कुटः कुक्कुभे ताम्रचूडे वह्निकणेऽपि च ॥१४७॥
निषादशूद्रयोः पुत्रे, कूपीटमुदरे जले ।
चक्राटो धूर्त्ते दीनारे, विषवैद्येऽथ चर्पटः ॥१४८॥

विटाः । कीकटः कृपणे निस्वे देशभेदे तुरङ्गमे । ककते कीकटः । "कपटकीकटादयः" (उ० १४४) इति साधुः । चतुर्ष्वर्थेषु । कृपणो मितंपचः । निस्वो निर्धनः । तयोर्वाच्य-लिङ्गः । द्वयोर्यथा—कीकटादानसङ्कटाः । देशभेदो मगधाख्यः । यदाह—कीकटा मगधाह्वयाः ॥१४६॥ कुरण्टो झिण्टिकाभेदे रण्टिः सौत्रः । कुत्सितं रण्टति कुरण्टः । झिण्टिका भेदः पीताकिंटी । यन्निघण्टुः—सैरेयके सहचरो झिण्टीमहाचरश्च सः । सतुरक्तः कुरुवकः स्यात्पीतस्तु कुरण्टकः । कुरण्टी दारुपुत्रिका । दारुमयीपुत्रिका दारुपुत्रिका । कुक्कुटः कुक्कुभे ताम्रचूडे वह्निकणेऽपि च । निषादशूद्रयोः पुत्रे । कोकते कुक्कुटः । नर्कुटकुक्कुटौ (उ० १५५) इति साधुः । कुक्कुभः कुम्भकार-कुक्कुटः । ताम्रचूडे पुंक्लीबः । तत्र यथा—अयि विजहीहि दृढोपगू(ह)ढनं त्यज नवसङ्गमभीरु वल्लभम् । अरुणकरोद्गम एष वर्तते वरतनु संप्रवदन्ति कुक्कुटाः । वह्निकणः स्फुलिङ्गः । तत्र यथा—उड्डीनैः शतकोटिकुक्कुटशतैः ॥१४७॥ निषाद-शूद्रयोः पुत्रे इति निषादाच्छूद्रायां यो जायते । कुक्कुटी मिथ्या-चर्य्यादावपि । कूपीटमुदरे जले । कल्पते कूपीटम् । तृ कृ कृपि (उ०१५१) इति कीटः । उदरे यथा—गूढोद्भिन्नकूपीटपीढमकरो-दंधासुरं यः शिवः । जले यथा—कूपाटयोनेरुदियाय तेजः । अत्र हि कूपीटं योनिरस्य कूपीटयोनिः । यत्स्मृतिः अद्भ्योऽग्निर्ब्रह्मतः

चपेटे स्फारविपुले, पर्पटे चिपिटः पुनः ।
पृथुके पिच्चिततते चिरिण्टी तु सुवासिनी ॥१४९॥
तरुणी च जकुटस्तु, वार्ताककुसुमे शुनि ।
यमले त्र्यङ्गटो धौताञ्जन्यां शिवयभिदीश्वरे ॥१५०॥

क्षत्रम्। चक्राटो धूर्ते दीनारे विषवैद्ये। चक्रेण दम्भेन चक्रं दम्भं वा अटति चक्राटः। धूर्त्ते वाच्यलिङ्गः। दीनारो नाणकविशेषः। अथ चर्पटः चपेटे स्फारविपुले पर्पटे। चरत्यनेन चर्यते वा चर्पटः। "कपटकीकटादयः" (उ०१४४) इति साधुः ॥१४८॥ चपेटे यर्था—कैटभश्चपेटैर्भिन्नः। स्फारमुद्भटं विपुलं विस्तीर्णं स्फारं च तद् विपुलं च स्फारविपुलम्। तत्र वाच्यलिङ्गः। पर्पटो भक्ष्यविशेषः। चिपिटः पुनः। पृथुके पिच्चिततते। निशब्दात् नासानतितद्वतोरर्थयोः "नेरिनपिट" (७–१–१२८) इति पिटप्रत्यये चिपिटः। तत्तुल्यत्वाचिपिटः। पृथुके अभ्योषे यथा—चिपिटमवटकण्ठे सैरिका भक्षयन्ति। पिच्चितं कुट्टितं सत् ततं विस्तीर्णं पिच्चितततम्। तत्र वाच्यलिङ्गः। यथा—केचिच्चिपिटनर्कुटाः। चिरिण्टी तु सुवासिनी तरुणी च। चिरेः सौत्रात् "टिण्टश्चर् च वा" (उ० १५०) इति चिरिण्टी। सुवासिनी शब्देन रुढ्या गृहिणी वृद्धाऽप्युच्यते इति मङ्खः ॥१०९॥ तरुणी द्वितीयवया सर्वास्त्री। द्वयोर्यथा—कष्टं चिरिण्टी चिरकालनष्टा। जकुटस्तु वार्ताककुसुमे शुनि। यमले। जायते जकुटः। "नर्कुट कुक्कुट" (उ० १५५) इति साधुः। वार्त्ताककुसुमे पुंक्लीबः। यमलं युग्मम। त्र्यङ्गटो धौताञ्जन्यां शिवयभिदीश्वरे। त्रीणि अङ्गानि अटति त्र्यङ्गटः पृषोदरादित्वात्। धौताञ्जनी

त्रिकूटं सिन्धुलवणं, त्रिकूटस्तु सुवेलके ।
त्रिपुटौ तीरसातीनौ, त्रिपुटा त्रिवृदोषधौ ॥१५१॥
सूक्ष्मैलायां मल्लिकायां, द्रोहाटो मृगलुब्धके ।
चतुष्पदी प्रभेदे च, बिडालव्रतिकेऽपि च ॥१५२॥
धाराटश्चातकेऽश्वे च, निर्दटो निष्प्रयोजने ।
निर्दयेऽन्यदोषे रते निष्कुटो गृहवाटिका ॥१५३॥

श्वेतगृहगोधा। शिक्यं काचस्तस्यभित्। अनयोः पुंक्लीबः। ईश्वरः शम्भुः ॥१५०॥ त्रिकूटं सिन्धुलवणे (लक्षणे)। त्रीणि कूटान्यस्य त्रिकूटम्। सिन्धुलवणम् समुद्रलवणं। त्रिकूटस्तु सुवेलके। सुवेलकः पर्वतविशेषः। तत्र यथा—दुर्गं त्रिकूटः परिखा समुद्रः। त्रिपुटौ तीरसातीनौ। त्रीणि पुटान्यस्य त्रिपुटः। तीरं कूलम्। सातीनः कलायाख्यो धान्यविशेषो मालवप्रसिद्धः। त्रिपुटा त्रिवृदोषधौ ॥१५१॥ सूक्ष्मैलायां मल्लिकायाम्। सूक्ष्मैला गन्धद्रव्यभेदः। मल्लिका विचकिलः। द्रोहाटो मृगलुब्धके। चतुष्पदीप्रभेदे च बिडालव्रतिकेऽपि च। द्रोहेण अटति द्रोहाटः। द्रुह्यति वा। "कपाट विराट" (उ०१४८) इति साधुः। चतुष्पदीप्रभेदे यथा—द्रोहाटपाठकोऽप्येष लभते न वराटकम्। अत्र वाच्यलिङ्गः। बिडालव्रतिको दाम्भिकः ॥१५२॥ धाराटश्चातकेऽश्वे च। धारा धाराभिर्वा अटति धाराटः। द्वयोर्यथा—धाराटश्चाटुलम्पटः। निर्दटो निष्प्रयोजने। निर्दयेऽन्यदोषे रते। निर्दत्ते निर्दटः। "कपटकीकटादयः" (उ० १४४) इति साधुः। वाच्यलिङ्गः त्रिष्वपि यथा—नेष्टः कस्यापि निर्दटः। निष्कुटो गृहवाटिका। केदारकः कपाटश्च। निर्गतः कूटात् मन्दिरात्, निष्कुटति वा निष्कुटः। गृह-

केदारकः कपाटश्च, पर्पटो भेषजान्तरे ।
पिष्टविकृतौ परीष्टिः, परीक्षापरिचर्ययोः ॥१५४॥
स्यात्पर्कटी प्लक्षतरौ, पूगादेर्नूतने फले ।
पिच्चटस्तु नेत्ररोगे, पिच्चटं त्रपुसीसयोः ॥१५५॥
वर्वटी व्रीहिभिद्वेश्या, [1]भाकूटः शैलमीनयोः ।
[2]भावाटो भावके साधुनिवेशे कामुकेऽपि [3]च ॥१५६॥

वाटिकायां यथा–ग्रीष्मं निर्गमयन्ति निष्कुटकुटक्रोडेषु भूमीभृतः ॥१५३॥ ह्रस्वः केदारः केदारकः । पर्पटो भेषजान्तरे । पिष्टविकृतौ पृणाति पर्पटः "कपट कीकटादयः" (उ० १४४) इति साधुः । द्वयोर्यथा–पर्पटः कर्पटोपमः । परीष्टिः परीक्षापरिचर्ययोः । पर्येषणं परीष्टिः । परीक्षा गवेषणम् । परिचर्या सेवा । द्वयोर्यथा– इष्टा परीष्टिः शिष्टानां दुष्टकर्म विपाटनी ॥१५४॥ स्यात्पर्कटी प्लक्षतरौ पूगादेर्नूतने फले । पृच्यते पर्कटी "कपटकीकटादयः" (उ० १४४) इति साधुः । गौरादित्वाद् ङीः। द्वयोर्यथा–संक्रीडन्ते विकटदशनामर्कटा पर्कटीभिः । पिच्चटस्तु नेत्ररोगे । पिच्चयति पिच्च्यते वा पिच्चटः । "कपटकीकटादयः" (उ० १४४) इति साधुः । यथा–दृष्टिः पिच्चटपिच्छिला प्रवयसाम् । पिच्चटं त्रपुसीसयोः । द्वयोर्यथा–गण्डभित्तिर्विभात्येषा चञ्चत्पिचटकुण्डला ॥१५५॥ वर्वटी व्रीहिभिद्वेश्या–वर्वति वर्वटी "कपट" (उ० १४४) इति साधुः । व्रीहिभिदि यथा–मेरौ वर्वन्ति वर्वटी । वेश्या गणिका तत्र यथा–वर्वटी चीनकर्पटा । भाकूटः शैलमीनयोः । भान् कूटोऽस्य भाकूटः । शैलविशेषे

१ प्र० बार्वटः कान्तिपुञ्जके । वारुण्डे मकरे पोते–भाकुटः० ।
२ प्र० भार्याटः पटहाजीवे लोभात्स्वस्त्रीसमर्पके । ३ प्र० नटे ।

मर्कटस्तु कपावूर्णनाभे स्त्रीकरणान्तरे ।
मर्कटी करञ्जभेदः [1]शूकशिम्ब्यथ मोरटम् ॥१५७॥
सप्तरात्रात्परं क्षीरेऽङ्कोठपुष्पेक्षुमूलयोः ।
मोरटा तु मूर्विकायां मोचाटः कृष्णजीरके ॥१५८॥
चन्दने कदलीगर्भे [2]वर्णाटश्चित्रकारिणि ।
गायने स्त्रीकृताजीवे वराटा हंसयोषिति ॥१४९॥

मीनविशेषे च भावाटो भावके साधुनिवेशे कामुकेऽपि च । भावं भावेन वा अटति भावाटः । वाच्यलिङ्गः । भावको भावयिता । साधुनिवेशो भद्राकारः । कामुकः कामी ॥१५६॥ मर्कटस्तु कपावूर्णनाभे स्त्रीकरणान्तरे । मर्किः सौत्रः । मर्कति मर्कटः । "दिव्यवि" (उ० १४२) इति अटः। कपौ यथा–नीता मर्कटकेन कामपि दशां धिग् दैवमावश्यकम् । ऊर्णनाभो लूता । स्त्रीणां करणान्तरं वात्स्यायनप्रसिद्धम् । मर्कटी करञ्जभेदः शूकशिम्बी करञ्जो नामवृक्षस्तस्य भेदः । शूकशिम्बी कपिकच्छूः । अथ मोरटम् । सप्तरात्रात्परं क्षीरेऽङ्कोठपुष्पेक्षुमूलयोः । मुरति मोरटम् "कपट" (उ० १४४) इति साधुः ॥१५७॥ त्रिष्वपि यथा–मोरटं पित्तनाशनम् । मोरटा तु मूर्विकायां मूर्विका ज्याहेतुस्तृणविशेषः । मोचाटः । कृष्णजीरके । चन्दने कदलीगर्भे–मुञ्चति मोचाटः । "कपाट विराट" (उ० १४८) इति साधुः । मोचामटति वा ॥१५८॥ चन्दने कदलीगर्भे च यथा–उच्चाटयन्ति मोचाटा निदाघेदाह-

१ प्र० शूकशिम्बी च वानरी । बीजं च राजकर्कट्याः प्राचीनामलकस्य च ।
२ मु० मू० रेवटो दक्षिणावर्तशङ्खे जाङ्गुलिकेऽपि । रेवटो (?) सोरटे वेणौ, स्याद्वातुलवराहयोः ॥ वर्णाटो० ।

गन्धोल्यां चाथ विकटः कराले पृथुरम्ययोः ।
वेकटो जाततारुण्ये मणिकारेऽथ वेरटः ॥१६०॥
मिश्रीकृते च नीचे च वेरटं बदरीफले ।
शैलाटो देवले शुक्लकाचे सिंहकिरातयोः ॥१६१॥

विप्लवम् । वर्णाटश्चित्रकारिणि । गायने स्त्रीकृताजीवे–वर्णान् अटति वर्णाटः । वाच्यलिङ्गः । चित्रकारी चित्रकरः । गायनो गाथकः । स्त्रीकृतः आजीवो जीविका यस्यासौ स्त्रीकृताजीवः । त्रिष्वपि यथा–वर्णाटो भाटकाधीनः । वरटा हंसयोषिति । गन्धोल्यां च । वृणोति वरटा । "दिव्यवि" (उ० १४२) इति अटः । हंसयोषिति यथा–वरटेव वरारोहा सविलासमटाट्यते ॥१५९॥ गन्धोली तैलाद्याख्यः क्षुद्रजन्तुः । तत्र स्त्रीपुंसः । अथ विकटः कराले पृथुरम्ययोः । विस्तृतो विकटः "कटः" ७/१/१२४ इति कटप्रत्ययः । विशेषेण कटति वा । वाच्यलिङ्गः । कराले यथा–मुखकन्दरान्तरगतोऽपि विकटदशनेन केशिना । पृथौ रम्ये च यथा–गन्तव्यं देवकुले द्रष्टव्या विकटकटितटा वेश्या । वेकटो जाततारुण्ये मणिकारे–विङ्क्ते वेकटः "कपट" (उ० १४४) इति साधुः । जाततारुण्ये वाच्यलिङ्गः । द्वयोर्यथा–वेकटैर्घट्यते मणिः । अथ वेरटः । मिश्रीकृते च नीचे च वेरम् । अटति वेरटः । पृषोदरादित्वात् । वाच्यलिङ्गः ॥१६०॥ वेरटं बदरीफले । बदरीफलं कुवलम् । शैलाटो देवले शुक्लकाचे सिंहकिरातयोः । शैलमटति शैलाटः । चतुर्षु अर्थेषु । देवलऋषिविशेषः । किरातो भिल्लः । संसृष्टं तु सङ्गते स्याच्छुद्धे च वमनादिना । संसृज्यते स्म संसृष्टम् । वाच्यलिङ्गः । सङ्गते यथा–दत्ताः कर्णेन विषसंसृष्टमोदकाः ।

***अम्बष्ठो विप्रतो वैश्यातनये नीवृदन्तरे ।**
अम्बष्ठा स्यादम्ललोण्यां पाठायूथिकयोरपि ॥१६२॥
कनिष्ठोऽल्पेऽनुजे यूनि कनिष्ठा त्वंतिमांगुली ।
कमठः कच्छपे दैत्यविशेषे मुनिभाजने ॥१६३॥

वमनविरेचनादिना शुद्धे यथा–संसृष्टे देयमौषधम् ॥१६१॥ अथ ठान्ताः । अम्बष्ठो विप्रतो वैश्यातनये नीवृदन्तरे । अम्बायां तिष्ठति अम्बष्ठः । "गोऽम्बाम्ब" (२–३–३०) इति षत्वम् । "ङ्यापो बहुलं नाम्नि" २–४–९९ । इति ह्रस्वः । अमति वा । "पष्टैधिठादयः" (उ० १६६) इति साधुः । विप्रेण यो वेश्यायां जन्यते तत्र। नीवृदन्तरे देशविशेषे । अम्बष्ठा स्यादम्ललोण्यां पाठायूथिकयोरपि । अम्ललोणी पाठा च औषधी । यूथिका पुष्पतरुः ॥१६२॥ कनिष्ठोऽल्पेऽनुजे यूनि अतिशयेन अल्पो युवा वा कनिष्ठः। "अल्प यूनोः कन् वा" ७–४–३३ । इति इष्ठे कनादेशः । वाच्यलिङ्गः । अल्पे यथा–प्रासादस्य कनिष्ठस्य शृणु पार्वति लक्षणम् । अनुजे लघुभ्रातरि यथा–ज्येष्ठेऽमूढे परिवेत्ता कनिष्ठो दारसङ्ग्रही । यूनि यथा–कनिष्ठः पापनिष्ठो हि पारदारिकतादिभिः । कनिष्ठा त्वंतिमांगुली । यथा–वितस्तिः स्यात्कनिष्ठया । कमठः कच्छपे दैत्यविशेषे मुनिभाजने । के जले मठति वसति कमठः । काम्यते वा । मृ जॄ शॄ कमि (उ०१६७) इति अठः । कच्छपे पुंसि । अन्यत्र पुंक्लीबः । कच्छपे यथा–निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः । दैत्यविशेषे यथा–कमठे धरणेन्द्रे च स्वोचितं कर्मकुर्वति । प्रभुस्तुल्य-

*प्र० संसृष्टं तु सङ्गते स्याच्छुद्धे च वसनादिना ।
हर्मटः कच्छपे प्रोक्तः सहस्रकिरणेऽपि च ॥ अम्बष्ठो० ।

जरठः कर्कशे जीर्णे नर्मठौ षिड्गचूचुकौ ।
प्रकोण्ठः कूर्णराधस्ताद्भूपकक्षान्तरेऽपि च ॥१६४॥
हस्ते च विस्तृतकरे प्रतिष्ठागौरवे स्थितौ ।
छन्दोजातौ यागसिद्धौ मत्कुष्ठौ धान्यमन्थरौ ॥१६५॥

मनोवृत्तिः पार्श्वनाथः श्रियेऽस्तु वः । मुनिभाजने यथा–भुंक्ते मठे कमठपाणिरसौ मुनीन्द्रः ॥१६३॥ जरठः कर्कशे जीर्णे । जीर्यति जरठः "मृ जॄ श" (उ० १६७) इति अठः । कर्कशे गुणे पुंसि तद्वति जीर्णे च वाच्यलिङ्गः । द्वयोर्यथा–अयमति जरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः । नर्मठौ षिड्गचूचुकौ । नर्मणि तिष्ठति नर्म्मठः । पृषोदरादित्वात् । षिड्गो विटः । चूचुकं स्तनमुखम् । द्वयोर्यथा–नर्म्मठः काम-कर्मठः । प्रकोष्ठः कूर्पराधस्ताद्भूपकक्षान्तरेऽपि च । हस्ते च विस्तृतकरे । प्रकुष्णाति प्रकुष्यते वा प्रकोष्ठः । "कुषेर्वा" (उ०१६४) इति ठः । कूर्पराधस्तात् कूर्पराधोभागे कलाचिकायां यथा–कनकवलय-भ्रंसरिक्त–प्रकोष्ठः । भूपकक्षान्तरे यथा–वल्गन्ति वाहाः प्रथमप्रकोष्ठे ॥१६४॥ विस्तृतकरे हस्ते यथा–गोष्ठ-प्रकोष्ठैर्मिमते हि काष्ठम् । प्रतिष्ठा गौरवे स्थितौ छन्दोजातौ यागसिद्धौ । प्रतिष्ठानं प्रतिष्ठीयतेऽनया वा प्रतिष्ठा । "उपसर्गादातः" (५–३–११०) इत्यङ् । गौरवे स्थितौ च यथा–विपक्ष मखिलीकृत्य प्रतिष्ठा खलु दुर्लभा । अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते । छन्दोजातिश्चतुरक्षरा तत्र यथा–उक्तात्युक्ता तथा मध्या प्रतिष्ठा सुप्रतिष्ठिका । यागसिद्धौ यथा–एष वै प्रतिष्ठा नाम यज्ञः । मर्यादा देवादिस्थापनयोरपि मङ्गः । मर्यादायां यथा–कृतप्रतिष्ठा निवसन्ति सन्तः । देवादिस्थापने

लघिष्ठो भेलकेऽत्यल्पे स्याद्वरिष्ठस्तु तित्तिरे ।
वरिष्ठं मरिचे ताम्रे वरोरूतमयोरपि ॥१६६॥
वैकुण्ठो वासवे विष्णौ श्रीकण्ठः कुरुजाङ्गले ।
शङ्करे चाथ साधिष्ठोऽत्यर्थे दृढतमेऽपि च ॥१६७॥
कारण्डो मधुकोशेऽसौ कारण्डवे दलाटके ।
कूष्माण्डौ गणकर्कारू कूष्माण्ड्यावम्बिकौषधी ॥१६८॥

यथा–इष्टिः प्रतिष्ठासमये पुरारेः । मत्कुष्ठौ धान्यमन्थरौ मद्यते मत्कुष्ठः । "पष्ठैधिठादयः" (उ० १६६) इति साधुः । मन्थरे वाच्यलिङ्गः । धान्ये यथा–मत्कुष्ठाः कुष्ठनाशनाः । मन्थरे यथा–मत्कुष्ठगामी सततं सकामी ॥१६५॥ लघिष्ठो भेलकेऽत्यल्पे स्यात् । अतिशयेन लघुर्लघिष्ठः । भेलक उडुपः । अत्यल्पे वाच्यलिङ्गः । तत्र यथा–ज्येष्ठे लघिष्ठो रजनिर्बभूव । वरिष्ठस्तु तित्तिरौ । अतिशयेन वरो वरिष्ठः । तित्तिरिः पक्षी । वरिष्ठं मरिचे ताम्रे वरोरुतमयोरपि । अतिशयेन उरु वरिष्ठं "प्रियस्थिर" ७–४–३८ । इति वरादेशः । वरोरुतमयोर्वाच्य-लिङ्गः । तयोर्यथा– वसिष्ठस्तमभाषिष्ट वरिष्ठं रघुपुङ्गवम् । ॥१६६॥ वैकुण्ठो वासवे विष्णौ । विकुण्ठाया अयं वैकुण्ठः । वासवे यथा–वैकुण्ठो दशकण्ठेन कुण्ठशक्तिर्विनिर्ममे । विष्णौ यथा–वैकुण्ठकमठः पायात् । श्रीकण्ठः कुरुजाङ्गले शङ्करे च । श्रीः कण्ठे यस्य श्रीकण्ठः । कुरुजाङ्गलं तीर्थविशेषः । शङ्करे यथा–श्रीकण्ठकण्ठच्छविः । अथ साधिष्ठोऽत्यर्थे दृढतमेऽपि च । अतिशयेन साधुः साधिष्ठः । अतिशयेन बाढो वा । बाढन्तिकयोर्साधनेदौ (७–४–३७) इति साधादेशः । वाच्य-लिङ्गः । द्वयोर्यथा–अधिष्ठितमसाधिष्ठैः सुष्ठु राज्यं न तिष्ठति

कोदण्डः कार्मुके देशभेदभ्रूलतयोरपि ।
गारुडं तु मरकते विषशास्त्रेऽथ तित्तिडः[1] ॥१६९॥
दैत्यभेदे[2] तित्तिडी तु कालदासे महीरुहे ।
तिन्तिडी चुक्रे चिञ्चायां निर्गुण्डी सिन्धुवारकः ॥१७०॥

॥१६७॥ अथ डान्ताः । कारण्डो मधुकोशेऽसौ कारण्डवेदलाटके । किरति कीर्यते वा कारण्डः । पिचण्डैरण्डः (उ० १७६) इति साधुः चतुर्षु अर्थेषु । मधुकोशे मधुमण्डकः । असिः खड्गः । कारण्डवदलाडकौ पक्षिणौ । कूष्माण्डौ गणकर्कारू । कुष्णाति कुष्यते वा कूष्माण्डः । पिचण्डैरण्ड इति साधुः । गणः केलिकिलाक्षः । कर्कारौ यथा–ब्रूत नूतन कूष्माण्डफलानां के भवन्त्यमी । भ्रूणेऽपि । कूष्माण्ड्यावम्बिकौषधी । अम्बिकायां देवताविशेषे यथा–मृगेन्द्रवाहना नित्यं कूष्माण्डी कमलेक्षणा ॥१६८॥ कोदण्डः कार्मुके देशभेदभ्रूलतयोरपि । कोटिमान् दण्डोऽस्य कोदण्डः । पृषोदरादित्वात् कूयते वा । पिचण्डैरण्ड (उ० १७६) इति साधुः । कार्मुके पुंक्लीबः । तत्र यथा–स्फुटिष्यति न कोदण्डस्त्रुटिष्यति न वा गुणः। भ्रूलतायां यथा–कोदण्डे दृश्यते ज्योतिः । गारुडं तु मरकते विषशास्त्रे (विषोद्भवे) । गरुडस्येदं गरुडो देवताऽस्येति वा गारुडम् । गरुडमधिकृत्य कृतम् वा । अमोऽधिकृत्यग्रन्थे (६–३–१९८) इत्यण् । मरकते यथा–राशिर्मणीनामिव गारुडानां स पद्मरागः फलितो विभाति । विषशास्त्रे यथा–नष्टं विषं गारुडमन्त्रजापैः । अथ तित्तिडः । दैत्यभेदे । तिर्यक् ताडयति ताड्यते वा तित्तिडः । पृषोदरादि-

१ मु० मू० विषोद्भवे तरण्डो बडिशीसूत्रबद्धस्तु निभेलके तित्तिडो० ।
२ दैत्यभेदे स्याद्यमदाशेथ तित्तिडी० ।

नीलशेफाल्यब्जकन्दः प्रचण्डः स्यात्प्रतापिनि ।
वलक्षकरवीरेऽपि प्रकाण्डः स्तम्बशस्तयोः ॥१७१॥
स्कन्धमूलान्तरे च द्रोः पिचण्डोऽवयवे पशोः ।
उदरे चाथ पूत्यण्डो गन्धैणे गन्धकीटके ॥१७२॥

त्वात् ॥१६९॥ तित्तिडी तु कालदासे महीरुहे । गौरादित्वात् ङीः । कालस्य यमस्य दासः कालदासः । तिन्तिडी चुक्रे चिञ्चायां । तिन्तिडशैलभवत्वात् तिन्तिडी । तिम्पति वा । विहडकहोड (उ० १७२) इति साधुः । चुक्रम् अम्लवेतसः । चिञ्चा अम्लिका । निर्गुण्डी सिन्धुवारकः । नीलशेफाल्यब्जकन्दः । गुडुण् वेष्टने निर्गुण्डयति निर्गुण्डी । सिन्धुवार–नीलशेफाल्यौ वृक्षौ । अब्जकन्दः पद्मकन्दः । सिन्धुवारे यथा–निर्गुण्डी धूपगुण्डितम् ॥१७०॥ प्रचण्डः स्यात्प्रतापिनि । वलक्षकरवीरेऽपि । प्रचण्डते प्रचण्डः । प्रतापिनि वाच्यलिङ्गः । तत्र यथा–प्रचण्डा चामुण्डा समरडमरं खण्डयतु वः । वलक्षकरवीरः श्वेतकरवीरः। प्रकाण्डः स्तम्बशस्तयोः । स्कन्दमूलान्तरे च द्रोः । प्रवृद्धं काण्डमस्य प्रकाण्डः । प्रकण्यते वा । कण्यणि (उ० १६९) इति णित् डः । पुंक्लीबः । स्तम्बे यदा–कुशप्रकाण्डेन ममार्ज भाण्डम् । शस्ते प्रशस्ते यथा–जानाम्यहं त्वां पुरुषं प्रकाण्डम् ॥१७१॥ द्रोर्वृक्षस्य स्कन्धमूलयोरन्तरं मध्यभागस्तत्र यथा–कण्डूयमानाः सरलप्रकाण्डे । पिचण्डोऽवयवे पशोः । उदरे च । अपिचण्डते पिचण्डः । पृषोदरादित्वादलोपः । पिचेः सौत्रस्य वा । पिचण्डैरण्ड इति साधुः । पशोरवयवे यथा–पिचण्डखण्डानि चखाद चण्डी । उदरे यथा–पिचण्डिलश्चण्डगतिः कथं भवेत् । अत्र हि पिचण्डोऽस्त्यस्येति । लोमपिच्छादेः (७–२–२८)

भेरुण्डौ भीषणखगौ भेरुण्डा देवताभिदि ।
[1]मारण्डोऽण्डे भुजङ्गानां मार्गे गोमयमण्डले ।।१७३।।
मार्तण्डस्तरणौ क्रोडे वरण्डो वदनामये[2] ।
अन्तरावेदौ सङ्घे च [3]वतण्डा शारिका क्षुरी ।।१७४।।

इति–इलः । अथ पूत्यण्डो गन्धैणे गन्धकीटके । पूतिरहितं पूतिप्रधानं वाऽण्डं मुष्कः कोशो वाऽस्य पूत्यण्डः । गन्धैणः कस्तूरिकामृगः । गन्धकीटः सुरभिकीटकः ।। १७२ ।। भेरुण्डौ भीषणखगौ । विभेत्यस्मादिति भेरुण्डः । पिचण्डैरण्ड इति साधुः । भीषणे भीष्मे वाच्यलिङ्गः । खगः पक्षी । तत्र यथा–विसंहता विनश्यंति भेरुण्डा इव पक्षिणः । भेरुण्डा देवताभिदि । भेरुण्डा रुण्डमालायुगलवलयिता । मारण्डोऽण्डे भुजङ्गानां मार्गे गोमयमण्डले । मारयन्ति मार्यते वाऽत्र मारण्डः । पिचण्डैरण्ड इति साधुः । त्रिषु अर्थेषु । भुजङ्गानामण्डः कोशः । मार्गोऽध्वा । गोमयस्य मङ्गलार्थं मण्डलम् गोमयमण्डलम् ।।१७३।। मार्तण्डस्तरणौ क्रोडे । मृतण्डस्यापत्यं मार्तण्डः । ऋषिवृष्णि (६–१–६१) इत्यण् । मारयति वा । पिचण्डैरण्ड इति साधुः । तरुणौ यथा–अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः । क्रोडः सूकरः । वरण्डो वदनामये । अन्तरावेदौ सङ्घे च । व्रियते वरण्डः । जृकृतृ (उ० १७३) इति अण्डः । वदनामये यथा–वरण्डेनार्दितं तुण्डम् । अन्तरावेदौ यथा–वरण्डक्रमदण्डाभ्यामारुरोह द्विपः क्रुधा । सङ्घे यथा–इक्षोर्वरण्डं क्षिपति स्म शुण्डया । वतण्डा शारिका क्षुरी । वर्त्तिः । अवतनोति वतण्डा । पञ्चमाड्डः (उ० १६८) इति साधुः । वा वाप्योः

१ मु० म० मारुण्डस्तु २ वदनव्यथा ३ वरण्डा

वर्त्तिर्वारुण्डस्तु कर्णदृग्मले सेकभाजने ।
गणिस्थराजे बितण्डा कच्चीशाके शिलाह्वये* ।।१७५।।
करवोर्यां वादभेदे शिखण्डो बर्हचूडयोः ।
सरण्डः स्यात्कृकलासे भूषणान्तरधूर्त्तयोः ।।१७६।।

(३-२-५६) इति अवस्य वादेशः शारिका पक्षिणी । क्षुरी कृपाणी ।।१७४।। वर्त्तिर्दशा । वारुण्डस्तु कर्णदृग्मले सेकभाजने । गणिस्थराजे । वृणोति वारुण्डः। पिचण्डैरण्ड इति साधुः। कर्णस्य दृशश्च मलः कर्णदृग्मलः। गणिस्थराजो वृक्षभेदः। तयोः पुंक्लीबः । सेकभाजने यथा–वारुण्डेन मुनेः कन्या तरुषण्डं निषिञ्चति । वितण्डा कच्चीशाके शिलाह्वये । करवीर्यां वादभेदे । वितन्यते वितण्डा पञ्चमाड्डः (उ० १६८) इति डः । चतुर्ष्वर्थेषु । कच्चीशाकः शाकभेदः । शिलाह्वय ओषधम् ।।१७५।। करवीरी लताभेदः । वादभेदे यथा–जल्पः प्रतिपक्षस्थापनाहीनो वितण्डा । शिखण्डो बर्हचूडयोः । शिखाभिर्डयते शिखण्डः । क्वचित् इति डे पृषोदरादित्वात्साधुः । बर्हे कलापे यथा–खड्गसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः । चूडायां काकपक्षे यथा–तौ पितुर्नयनजेन वारिणा किञ्चिदुक्षितशिखण्डकावुभौ । सरण्डः स्यात्कृकलासे भूषणान्तरधूर्त्तयोः । सरति सरण्डः । जृकृ (उ० १७३) इत्यण्डः। कृकलासः सरटः । भूषणान्तरं भूषणभेदः। धूर्त्ते शठे वाच्यलिङ्गः । तत्र यथा–सरण्डैः खण्डिता मही ।।१७६।। अथ ढान्ताः । अध्यूढ ईश्वरे । अध्युह्यते स्म अध्यूढः ईश्वरो विभुः । अध्यूढा कृतसापत्न्ययोषिति । कृत सापन्त्यं

१ मु० मू० फणिराजद्वारपिण्डयोर्वारुण्डः खग उद्रिणि (?) वितण्डा वार्तभेदे स्यादतकच्चीशाके शिलाह्वये ।

***अध्यूढ ईश्वरेऽध्यूढा कृतसापत्न्ययोषिति ।**
आषाढो मलयगिरौ व्रतिदण्डे च मासि च । ॥१७७॥
उपोढ ऊढे निकटेऽप्युदूढः पीवरोढयोः ॥
प्ररुढो जठरे वृद्धे प्रगाढो दृढकृच्छ्रयोः ॥१७८॥

यया सा कृत सापत्न्या सा चासौ योषिच्च या एकस्या उपरि द्वितीया परिणीयते । आषाढो मलयगिरौ व्रतिदण्डे च मासि च । आषाढो देवता यस्य आषाढः। देवता (६–२–१०१) इत्यण् । आषाढा प्रयोजनमस्येति वा । विशाखाषाढान्मन्थदण्डे (६–४–१२०) इति अण् । आषाढी पूर्णमासी अस्येति वा । सास्य पौर्णमासी (६–२–९८) इत्यण् । मलयगिरौ यथा–प्ररूढं बाढमाषाढे चन्द्रनैर्दृढगन्धिभिः । व्रतिदण्डे यथा–अथाजिनाषाढधरः प्रगल्भवाक् । मासे मासविशेषे यथा–आषाढस्य प्रथम दिवसे मेघमाश्लिष्ट सानुम् ॥१७७॥ उपोढ ऊढे निकटेऽपि । उपोह्यते स्म उपोढः। वाच्यलिङ्गः । ऊढे यथा–उपोढ रागेण विलोलतारकम् । निकटं समीपम् । तत्र यथा–उपोढरागाणि यथा ग्रहणे निषित्रेऽरुमा विशेषोच्छ्वसितम्बभूव । उदूढः पीवरोढयोः ॥ उदुह्यते स्म उदूढः वाच्यलिङ्गः। ऊढे यथा–उदूढलोकत्रितयेन साम्प्रतं । गुरुर्धरित्रीक्रियते तरां त्वया । प्ररूढो जरठे वृश्रे । प्ररोहति स्म प्ररूढः। वाच्यलिङ्गः । द्वयोर्यथा–प्ररूढरोमां कुरु दन्तुरेण । प्रगाढो दृढकृच्छ्रयोः । प्रगाह्यते स्म प्रगाढः । वाच्यलिङ्गः । दृढे यथा–प्रगाढप्रौढबाहवः । भृशेऽपि । यदाह-प्रगाढं कृच्छ्रमिच्छन्ति प्रगाढं वलवद्भृशम् ॥१७८॥ वारुढः शम्बले वस्त्राञ्चलेऽग्नौ पञ्जरेररौ । वार्भिरुह्यते स्म वारूढः पञ्चस्वर्थेषु । अररिः कपाटम् । विरूढोऽङ्कुरिते जाते । विरोहति स्म विरूढः । वाच्यलिङ्गः । अङ्कुरिते यथा–शतावरी विरूढानि गुडूचीकोमलाम्लिका । जाते यथा–गङ्गप्रवाहाम्बु विरूढशष्पं गौरीगुरोर्गह्वरमाविवेश । विगूढो गर्ह्यगुप्तयोः । विगुह्यते स्म विगूढः । वाच्यलिङ्गः । द्वयोर्यथा–प्रकाशयेन्नैव विगूढकार्यम् । ॥१७९॥ समूढः पुञ्जिते सद्योजाते भुग्नेऽनुपप्लुते । समुह्यते स्म समूढः । वाच्यलिङ्गः । चतुर्ष्वपि यथा–गूढः समुज्झति समूढः तृणां धरित्रीम् । पक्वेऽपि वल्लभटीका यथा–समूढकर्पूरपरागपाण्डुरम् । संरूढोऽङ्कुरिते प्रौढे । संरोहति स्म संरूढः । वाच्यलिङ्गः । द्वयोर्यथा–हर्म्याग्रसंरूढतृणाङ्करेषु । तेजोविषह्यं रिपुमन्दिरेषु । अथ णान्ताः । अरुणोऽर्कानूरुपिङ्गयोः । सन्ध्यारागे बुधे कुष्टे निःशब्दाव्यक्तरागयोः । इर्यति अर्यते वाऽरूणः । ऋकृवृधृदारिभ्य उणः । पिङ्गा व्यक्तरागयोर्गुणयोः पुंसि । तद्वति निःशब्दे च वाच्यलिङ्गः । अर्के यथा-अरुणकरोद्गम एष वर्त्तते । अनूरौ सौर्यसारथौ । यथा-कह्लाय तावदारुणेन तमो निरस्तम् । पिङ्गे यथा–हिमरुचिररुणिम्ना राजते रज्यमानैर्जरवकमलकन्दच्छेदगौरैर्मयूखैः ॥१८०॥ सन्ध्यारागे

* संपिण्डस्तनये प्रोक्तो दायादे सदृशेऽपि च । अध्यूढ० ।

वारुढः शम्बले वस्त्राञ्चलेऽग्नौ पञ्जरेऽररौ ।
विरूढोऽङ्कुरिते जाते विगूढो गर्ह्यगुप्तयोः ॥१७९॥
समूढः पुञ्जिते सद्योजाते भुग्नेऽनुपप्लुते ।
संरूढोऽङ्कुरिते प्रौढेऽरुणोऽर्केऽनूरुपिङ्गयोः* ॥१८०॥
सन्ध्यारागे बुधे कुष्टे निःशब्दाव्यक्तरागयोः ।
अरुणा त्रिवृत्तिश्यामामञ्जिष्ठाऽतिविषासु च । ॥१८१॥

* मुद्रितमूले–समीढो मूत्रिते घने । अभीक्ष्णं तु भृशे नित्येऽप्यरुणोऽनूरुसूर्ययोः ॥

अभीक्ष्णं तु भृशं नित्यमिरिणं शून्य ऊषरे ॥

इन्द्राणी शच्यां निर्गुण्ड्यां स्त्रीकरणेऽप्यथोषणा ॥१८२॥

कणोषणं तु मरिचं करुणो रसवृक्षयोः ।

करुणा तु कृपायां स्यात्करणं क्षेत्रगात्रयोः ॥१८३॥

सान्ध्यद्युतौ यथा—अरुणेन कृताः सायं दिशः कौसुम्भवाससः । बुधे सौम्ये यथा—सम्प्रत्यप्राच्च्यामरुणः समुद्गतः । कुष्टे कुष्टभेदे यथा—अरुणालिङ्गितं वपुः । निःशब्दः शब्दरहितः । अव्यक्तरागेऽव्यक्तलौहित्ये यथा – निद्राविगमारुणलोचनायाः । लोहितेऽपि । यथा – परिसरणमरुणचरणे रणरणकमकारणं कुरुते । अरुणा त्रिवृत्तिश्यामामञ्जिष्ठाऽतिविषासु च । चतस्रोऽप्योषधयः । स्त्रियाम् ॥१८१॥ अभीक्ष्णं तु भृशं नित्यम् । अभीक्ष्यते अभीक्ष्णम् । भ्रूणतृणेति साधुः । द्वयोर्यथा—अभीक्ष्णमक्षुण्णतयाऽतिदुर्गमम् । इरिणं शून्य ऊषरे । ऋश् गतौ । ऋणाति इरिणम् । ऋद्रुहेः कित् । (उ० १९५) इति इणः । शून्ये वाच्यलिङ्गः । ऊषरेऽप्यन्ये । द्वयोर्यथा—संसारे रिणकल्पवृक्षभवतः पादारविन्दद्वयम् । इन्द्राणी शच्यां निर्गुण्ड्यां स्त्रीकरणेऽपि । इन्द्रस्य भार्या इन्द्राणी । वरुणेन्द्ररुद्र (२–४–६३) इति ङीः । आन् वांतः । इन्द्रोऽप्यनित्यनया वा । शच्यां यथा—सिञ्चन्ति नित्यमिन्द्राण्यो घुसृणैरावणाङ्गम् । अथोषणा । कणा । ओषति उषणा । नन्दयादित्वाद् अनः ॥१८२॥ कणा पिप्पली । ऊषणं तु मरिचं । मरिचं कृष्णम् । करुणो रसवृक्षयोः । कीर्यते करुणः । ऋ कृ वृ धृदारिभ्य उणः। (उ०१९६) रसे यथा – शृङ्गारहास्यकरुणारौद्रवीर – भयानकाः । वृक्षे यथा—तरुणकरुणवल्ली फुल्लमुल्लासयन्त्यः । दीनेऽपि । तत्र

गीताङ्गहारसंवेश–भिक्षुकायस्थ संहतौ ।

वर्णानांस्पृष्टतादौ च योगिनामासनादिषु । ॥१८४॥

हृषीके साधकतमे बवादौ च कृतावपि ॥

करणःशूद्राविट पुत्रे कङ्कणं करभूषणे । ॥१८५॥

बाच्यलिङ्गः । यथा—करुणमपि समर्थं मानिनां मानभेदे रुदितमुदितमस्त्रं योषितां विग्रहेषु । करुणा तु कृपायां स्यात् । कृपा दया तत्र यथा—करुणाभराञ्चितपुटा वीरस्य वो दृष्टयः । करणं क्षेत्रगात्रयोः । गीताङ्गहारसंवेश–भिक्षुकायस्थ–संहतौ । वर्णानां स्पृष्टतादौ च योगिनामासनादिषु हृषीके साधकतमे बवादौ च कृतावपि । क्रियतेऽनेन कृतिर्वा करणम् । किरति कीर्यते वा । तृ कृ श (उ०१८७) इति अणः। क्षेत्रं केदारः। तत्र यथा—ग्रन्थिपर्णकिरणेषु विचेरुः । गात्रे यथा—उपमानमभूद्विलासिनां करणं यत्तव कान्तिमतया ॥१८३॥ गीतभेदे यथा—तत्रैलाकरणं ढिङ्की वर्तनी ज्याम्बडस्तथा । अङ्गहारभेदः । स्थिर–हस्त–पर्यस्ततारकादिर्द्वात्रिंशत्प्रकारः । तत्र यथा—करणैरुलवणैः केयं भ्रातर्नृत्यति नर्तकी । संवेशो निधुवनं तस्य भेदो वात्स्यायनोक्तः । तत्र यथा—नवनवकरण–परायण–रमणी–लीलारसेन तरुणानाम् । कायस्थोऽध्यक्षादेरुपलक्षणं तेषां संहतिः समूहः । तत्र बवबालवादौ च यथा—करणं करोतु राजन् सकले भुवने त्वदीय करणानि । वर्णानां स्पृष्टतादौ यथा—स्पृष्टं करणं स्पर्शानाम् । योगिनामासनादिषु यथा—करणानि पुनर्भद्रासनादीनि विदुर्बुधाः ॥१८४॥ हृषीके इन्द्रिये यथा—आख्यातमन्तः करणैर्विशङ्कैः । साधकतमे यथा—येन क्रियते तत्करणम् । कृतौ यथा—सर्वोपकार–करणै–कपरायणेन । कायस्थे इत्येके । कायस्थकर्मणि इत्यपरे । करणः

मण्डने हस्तसूत्रे च कल्याणं हेम्नि मङ्गले ।
***कत्तृणं रोहिणं फञ्जा करेणुस्तु मतङ्गजे ॥१८६॥**

शूद्राविट पुत्रे । शूद्रायां वैश्याज्जाते इत्यर्थः । कङ्कणं करभूषणे । मण्डने हस्तसूत्रे च । ककुड्गतौ । कङ्कते कङ्कणम् । तृकृश् (उ० १८७) इति अणः । पुंक्लीबः । करभूषणे यथा—उद्वेल्लद्भुजवल्लि—कङ्कण—झणत्कारस्तदादुः सहः ॥१८५॥ मण्डने प्रसाधने यथा— मसृण—घुसृणाङ्कैः कुर्वते कङ्कणानि । हस्तसूत्रं प्रतिसरः । तत्र यथा—कङ्कणमोचनाय गच्छामि । शिरोभूषणेऽपि । यथा—सिन्दूरितानेकप—कङ्कणाङ्किता तरङ्गिणी वेणिरिवायता भुवः । कल्याणं हेम्नि मङ्गले । कल्यते कल्याणम् । कल्याणपर्याणादयः (उ० १९३) इति साधुः । द्वयोर्यथा—यत्कल्याणं तस्य तु वह्नि विशतोऽपि कल्याणम् । कत्तृणं रौहिषं फञ्जा । कुत्सितं तृणमस्य कत्तृणम् । "तृणे जातौ" (३-२-१३२) इति कोः कदादेशः रौहिषं तृणजातिः । फञ्जा शाकविशेषः । द्वयोर्यथा—तं मुष्टिभिः कत्तृणवत्पुपोष । करेणुस्तु मतङ्गजे । द्विरदस्य च योषायां कर्णिकारतरावपि कृणोति करोति वा करेणुः । कृहृभू (उणादि ७७२) इति एणुः । के मूर्ध्निरेणुरस्य वा । मतङ्गजे तद्योषायां च स्त्रीपुंसः । कर्णिकारतरौ पुंसि । मतङ्गजे हस्तिनि यथा—करेणुः प्रस्थितोऽनेको रेणु-

* अरणिस्तु भवेदग्निमन्थे निर्मन्थ्यदारुणि ॥ इन्द्राणी तु शचीसिन्दुवारयोः करणे स्त्रियाः । इरिणं तूषरे शून्येऽपीक्षणं दर्शने दृशि ॥ उषणा तु कणायां स्यादूषणं मरिचे मतम् । एषणी व्रतमार्गानुसारिण्यां च तुलाभिदि ॥ कङ्कणं करभूषायां हस्तसूत्रे च शेखरे । कत्तृणं रौहिषं फञ्जा कल्याणं हेम्नि मङ्गले ॥

द्विरदस्य च योषायां कर्णिकारतरावपि ।
कारणं घातने हेतौ करणे कारणा पुनः ॥१८७॥
यातना कार्मणं मन्त्रादियोगे कर्मकारके ।
काकणी मानदण्डस्य तुरीयांशे पणस्य च ॥१८८॥

घण्टाः सहस्रशः ॥ ॥१८६॥ द्विरदस्य योषायां हस्तिन्यां यथा—ददौ सरः पङ्कजरेणुगन्धिगजाय गण्डूषजलं करेणुः । कारणं घातने हेतौ करणे । कृंग् हिंसायाम् इत्यस्य हन्त्यर्थत्वाच्चुरादित्वे "चुरादिभ्यो णिच्" (३-४-१७) इति णिचि । ततो भावेऽनटि कारणम् । करोति वा कारणमिति साधुः क्रियतेऽनेन करणम् ततः स्वार्थेऽण् वा । घातने यथा—कारणोपहितमानसस्य ते कारणा निरयवह्निषु स्थिता । हेतौ यथा—नाकारणरुषां संख्या संख्याताः कारणक्रुधः । करणे साधकतमे यथा—भक्तिर्यमश्च श्रद्धा च कारणं मोक्षसंपदः । कारणा पुनः । यातना । णिवेत्त्यास (५-३-१११) इति अने कारणा ॥१८७॥ यातना नरकवेदना तस्यां यथा—कारणा निरयवह्निषु स्थिता । कार्मणं मन्त्रादि योगे कर्मकारके । वृद्धोपदिष्टं कर्मैव कार्मणम् । "कर्मणः सन्दिष्टे" (७-२-१६७) इति अण् । कर्मैव वा कार्मणम् । प्रज्ञादित्वादण् । मन्त्रादियोगे यथा—कार्मणत्वमगमद्रणेषु । कर्म च तत्कारकं च कर्मकारकम् । काक(कि)णीमानदण्डस्य तुरीयांशे पणस्य च । कृष्णलायां वराटे च । केक्यते काकणिः । "ककेणित्" (उ० ६४०) इति अणिः । ङ्यां काकणी । तुरीयांश इति मानदण्डस्य पणस्य च काकाक्षिगोलकन्यायेनाभिसम्बध्यते । मानदण्डश्चतुष्करः । पणतुरीयांशे यथा—पञ्चाहतैश्चतुर्भिर्वराटकैः काकिणी चैका ॥१८८॥ कृष्णला

कृष्णलायां वराटे च कृपाणी कर्तरी क्षुरी ।
कृपाणोऽसौ क्षेपणी तु नौदण्डजालभेदयोः ॥१८९॥
कौङ्कणः स्याज्जनपदे कौङ्कणं त्वायुधान्तरे ।
ग्रहणं स्वीकृतौ वन्द्यां धीगुणे शब्द आदरे ॥१९०॥

गुञ्जा । वराटे कपर्दे यथा—असिधाराक्रयक्रीता वरमेकापि काकिणी । मानभेदे प्रसृति मध्यलक्षणेऽपि मङ्गः । यथा—दरिद्रः काकिणीं दद्यात् । चक्रवर्त्ति—रत्नविशेषेऽपि । कृपाणी कर्तरी क्षुरी । कल्पते छेदनाय कृपाणी । कृपि विषि (उ० १११) इति आणक् । ङ्यां कृपाणी । कर्तर्यां यथा—कृत्तः कृपाण्या हतकेशसंचयः । छुर्यां यथा—द्रोहं चक्रे कस्यचित्स्वा कृपाणी । कृपाणोऽसौ । असौ खड्गे यथा—हे हस्त दक्षिणमृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणम् । क्षेपणी तु नौदण्डजालभेदयोः । क्षिप्यतेऽनयाऽस्यां वा क्षेपणी । द्वयोर्यथा—जलनिधिजलमध्ये क्षेपणीं निक्षिपन्ति ॥१८९॥ कौङ्कणः स्याज्जनपदे । कुक्यते कौङ्कणः । चिक्कणकुक्कण (उ० १९०) इति साधुः । अयमवनि पततीन्दुर्भूपतिः कौङ्कणानाम् । कौङ्कणं त्वायुधान्तरे । आयुधान्तरम् आयुधविशेषः । ग्रहणं स्वीकृतौ वन्द्यां धीगुणे शब्द आदरे । ग्रहोपरागे प्रत्याये । गृहीतिर्गृह्यते वा ग्रहणम् । गृह्यतेऽनेन वा । स्वीकृतौ यथा—लक्ष्मीकरग्रहणकण्टकितप्रकोष्ठः । वन्द्यां यथा—ग्रहणीकृतरिपुर्लक्ष्मीः । धीगुणे यथा—शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । शब्दे यथा—लोकोपचाराद्ग्रहणसिद्धिः । आदरे यथा—चूडामणौ किं ग्रहणं हरस्य ॥१९०॥ प्रत्यायो राजादि ग्राह्यं धनम् । तत्र ग्रहोपरागे च यथा—सा राहुमूर्त्तिरिव

* मु. मू० ग्रहणी तु रुगन्तरे ।

ग्रहोपरागे प्रत्याये ग्रामणीः* क्षुरमर्दिनि ।
प्रधाने भोगिके पत्यौ ग्रामिणी पण्ययोषिति ॥१९१॥
ग्रामेद्यां नीलिकायां च गोकर्णः[1] प्रथमान्तरे ।
अंगुष्ठानामिकोन्माने मृगेऽश्वे नरसर्पयोः ॥१९२॥

न ग्रहणं जहाति । ग्रामणीः क्षुरमर्दिनि । प्रधाने भोगिके पत्यौ । ग्रामं नयति ग्रामणीः । ग्रामाग्रान्नियः (२–३–७१) इति णत्वम् । क्षुरमर्दिनि पुंसि । प्रधाने भोगिके पत्यौ च वाच्यलिङ्गः । क्षुरमर्दी नापितः । तत्र यथा—क्व भूपतिपरिस्यन्दो ग्रामणी कलहः क्व च । प्रधाने पत्यौ च यथा—खादति मुहुः पाणीमृगग्रामणीः । भोगो विद्यतेऽस्य भोगिकः । भोगपात्रम् । ग्रामिणी पण्ययोषिति । ग्रामेद्यां नीलिकायां च । ग्रामः पेटकंसंवसथो वाऽस्त्यस्य ग्रामिणी । पण्ययोषित् पण्यस्त्री ॥१९१॥ ग्रामेयी ग्रामोद्भवा । नीलिका ओषधिः । गोकर्णः प्रमथान्तरे । अङ्गुष्ठानामिकोन्माने मृगेऽश्वे नरसर्पयोः । गौरिव कर्णौ अस्य गोकर्णः । गोकर्णसदृशत्वाद्वा गौर्दृष्टिः कर्णोऽस्येति वा । प्रमथान्तरं गणविशेषः । तत्र यथा—स्मृतगोकर्णनिकेतमीश्वरम् । अत्र गोकर्णगणसेवितत्वात् । गोकर्णो निकेतः । अङ्गुष्ठानामिकोन्माने यथा—प्रदेशन्यादिभिः सार्द्धमङ्गुष्ठे वितते सति । प्रादेशनालगोकर्णवितस्तयोर्यथाक्रमम् । मृगे यथा—गोकर्णतर्णकोऽयं तर्णोत्युपकण्ठकच्छेषु । अश्वतरो वेसरः । तत्र सर्पे च यथा—गोकर्णः कृष्णवर्णोऽयं लष्ठवर्णेन वर्ण्यते ॥१९२॥ गोकर्णी तु मूर्विकायाम् । मूर्विका ज्याहेतुस्तृणविशेषः । चरणो मूलगोत्रयोः ।

१ मुद्रितेमूले—गोकर्णोऽश्वतरे सर्पे मृगभेदे गणान्तरे ।
२ मु. मू० भ्रमणे भक्षे रासभस्य ध्वनावप ।

गोकर्णी तु मूर्विकायां चरणो मूलगोत्रयोः ।
बह्वृचादौ च पादे च चरणं भ्रमणेऽदने ॥१९३॥
जरणो रुचके हिंगौ जीरके कृष्णजीरके ।
तरुणः *कुक्कुटुण्वे स्यादेरंडे यूनि नूतने ॥१९४॥
तरणिस्तरणेऽर्केऽशौ कुमार्योषधिनौकयोः ।
यष्ठावाब्धौ दक्षिणस्तु परच्छन्दानुवर्तिनि ॥१९५॥

बह्वृचादौ च पादे च। चरत्यनेन चरणः। चर्यते वा। तृकृशृ (उ० १८७) इति अणः पुंक्लीबः। मूले यथा—चरणसेकविवर्द्धितवृक्षकाः। गोत्रमन्वयः। वह्वृचादयो वेदशाखाध्ययननिमित्तकव्यपदेशभाजो द्विजन्मानः। तत्र यथा—विशाला ब्रह्मशालेयं चतुश्चरणमण्डिता। पादे यथा—सारं जयत्वाचरणो कृताशीमर्लिये नतां निर्वचनं जघान। चरणं भ्रमणेऽदने। चर्यते चरणं। द्वयोर्यथा—बहुतरचरणे नोद्वेजितास्तावकेन। चारित्रेपि। यथा—अवृत चरणबोधः प्राणिनो यत्प्रसादादसमसुखनिधानं मोक्षमासादयन्ति ॥१९३॥ जरणो रुचके हिंगौ जीरके कृष्णजिरके। जीर्यतेऽनेन जरणः। चतुर्ष्वर्थेषु रुचकं सौवर्चलं। हिंगू क्लीबे दूत्यन्ये। तरुणः कुक्कडपुष्पे स्यादेरंडे यूनि नूतने। तरति तरुणः। यम्यजिशक्य (उ० २८८) इति उन। यूनि नूतने च वाच्यलिंगः यूनि यथा—ग्रामतरुणं तरुण्या नवमञ्जुलमंजरीसनाथकरं। नूतने यथा—एषु रे तरुण मारुतधूयमानदावावलीवलयितेषु महीरुहेषु ॥१९४॥ तरणिस्तरणेऽर्केऽशौ कुमार्योषधिनौकयोः। यष्ठावाब्धौ। तरुणं तरति तीर्यतेऽनया वा तरणिः। ऋहृसृमृधृ (उ० ६३८) अणिः।

* कुब्जपुष्पे।

दक्षेऽपसव्ये सरलेऽप्राचीनेप्यथ दक्षिणा ।
दिक्प्रतिष्ठा यज्ञदानं द्रुघणः पशुवेधसोः ॥१९६॥
मुद्गरेऽप्यथ दुर्वर्णं कलधौतकुवर्णयोः ।
दौर्वीणं मृषपर्णे स्याद्धरितालीरसेऽपि च ॥१९७॥

सप्तस्वर्थेषु अर्केऽशौ यष्ठावाब्धौ च स्त्रीपुंसः। अन्यत्र स्त्रियाम्। तरणे यथा—तरणिकरणिमेणाः कुर्वते फालदानैः। अर्केऽशौ च यथा—तरुणतरणितापवलान्तकौलेयजिह्लातः रभतरनिपातं जीवितं मानवानाम्। कुमारी चासावोषधिश्च कुमार्योषधिः। नौकायां यथा—दारिद्रचोदधि तरणिः सरणि निःश्रेयसस्य नित्यस्य यष्टिः पतितगोरूपोच्छापनो दंडः। यष्ठाब्धिदक्षिणस्तु परच्छन्दानुबर्तिनि। दक्षे अपसव्ये सरलेऽप्राचीनेपि। दक्षते दक्षिणः। द्रुह्वृहि (उ० १९४) इण। पंचस्वर्थेषु वाच्यलिंगः। परछन्दानुवर्त्तिनि ॥१९५॥ दक्षे सरले च यथा—दक्षिणः क्षितिपतिः व्यशश्रणत्। अपसव्ये यथा—हे हस्तदक्षिण मृतस्य शिशोर्द्विजस्य। अप्राचीने दक्षिणदिग्भवे यथा—चाटुकार इव दक्षिणोऽनिलः। अथ दक्षिणा। दिक् प्रतिष्ठा यज्ञदानम्। दिशि यथा—दिक्दक्षिणा गंधवाहं मुखेन। प्रतिष्ठायां यथा—करणीया शुभे लग्ने दक्षिणा हि विचक्षणैः। यज्ञदाने यथा—दक्षिणाः सदसि राजसूयकीः। द्रुघणः पशुवेधसोः। मुद्गरेपि। द्रुर्हन्यतेऽनेन द्रुघणः। व्ययोद्रोः करणे (५-३-३८) इत्यल्। घनादेशश्च। अरीहणादिपाटात् णत्वं। द्रुह्यति वाचि क्वण कुक्वणेत्यणे साधुः। पर्शुमुद्गरयोर्यथा—प्रचक्रे द्रुघणैर्व्रणः। वेधसि ब्रह्मणि यथा—द्रुघणोपि न निद्राति सांद्रदैत्येन्द्रशंकया ॥१९६॥ अथ दुर्वर्णं कलधौतकुवर्णयोः। दुष्टो वर्णोऽस्य दुर्वर्णं कुवर्णं

धरणोऽहिपतौ लोके मान्ये[1] धान्येऽपि दिवाकरे ।
धरणं धारणे मानविशेषे धरणी भुवि[2] ॥१९८॥
घर्षणं रतेऽभिभवे धर्षणी त्वभिसारिका ।
[3]धिषणस्त्रिदशाचार्यः धिषणा तु मनीषिका ॥१९९॥

वाच्यलिंगः । कलधौते यथा—उच्चैर्महारजतराजिविराजिताऽसौ दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा । कुवर्णे यथा—सवर्णं दुर्वर्णं सुतनुतनुकान्त्या तव कृतम् । दौर्वीणि मृषपर्णे स्याद्धरिताली रसेऽपि च । दुखेन वीर्यते दौर्वीणं भ्रूण वृणेति साधुः । मृषपर्णं ओषधिविशेषः । हरिताली दुर्वा तस्याः रसः ॥१९७॥ धरणोऽहिपतौ लोके माने धान्येपि दिवाकरे । ध्वरति ध्रियतेऽनेन वा धरणः । अहिपतौ यथा—कमठे धरणेन्द्रे च स्वोचितं कर्मकुर्वति । लोको लोकविशेषः धरणं धारणे मानविशेषे । धृतिधरणं धारणे यथा—दुखाकुलस्य मनसो धरणं न शक्यम् । मानविशेषे यथा—अयं धारयते मूर्ध्ना पित्रव्यधरणद्वयीम् । धरणी भुवि यथा—धरणीधरकन्दरान्तरस्थाम् इकारान्तोपि यथा—विलसितमनुकुर्वती पुरस्ताद्धरणि रुहाधिरोहो वधूर्लतायाः ॥१९८॥ धर्षणं रतेऽभिभवे । घृष्यतेऽस्मिन् घृष्टिर्वा घर्षणं । द्वयोर्यथा—अविरत-घर्षणरसिकः खल इव वेश्याजनो जयति । धर्षणी त्वभिसारिका धृणोति धर्षणी रम्यादित्वादनटि टित्वांङ्ङीः । यथा—वर्षत्यपि घने याति रसोत्कर्षेण धर्षणी । धिषणस्त्रिदशाचार्यः । धृष्णोति धिषणः धृषि वहेरिश्चोपान्त्यस्येत्यणः । यथा—सौखप्रसुप्ति-कविधौ धिषणो नदीष्णः । धिषणा तु मनोषिका । मनीषिका

१ प्र० स्तने । २ भुवि । धारणः सलिले स्वर्गे परमेष्ठिनि धर्मणः ॥ सर्वभेदे वृक्षभेदे० ३ धारिणी नाडिलादिभिः। धारणा स्यात्त योगाङ्गे वारणं ग्रहहे मतम् ॥

निर्याणं निर्गमे मोक्षगजापांगप्रदेशयोः ।
निर्वाणं मोक्षनिर्वृत्योर्विघाते करिमज्जने ॥२००॥
निर्माणं सारनिर्मित्योः कर्मभेदे समंजसे ।
निःश्रेणिरधिरोहिण्यां खर्जूरी पादपेऽपि च ॥२०१॥

बुद्धिस्तत्र यथा—तीक्ष्णा हि मनीषिणां धिषणा ॥१९९॥ निर्याणं निर्गमें मोक्षगजापांगप्रदेशयोः नियीयते निर्याणं निर्याति मनेऽनेन वा । निर्गमे यथा—ततो नगरनिर्याणे तयोरासीत्समागमः मोक्षे यथा—सर्वसंगपरित्यागान्निर्याणं स यियासति । गजापांगप्रदेशे यथा—निर्याणं निर्पदसृजं चलितं निषादी । निर्वाणं मोक्ष—निर्वृत्यो—र्विघाते करिमज्जने । निर्वात्यस्मिन् करणाधारेऽनट् (५/३/१२९ निर्वाति स्म वा । निर्वाणमवाते इति क्तनत्वे साधुः । विघाते वाच्यलिंगः । निर्वृत्तिः सुखमात्रं तत्र मोक्षे च यथा—प्रियादर्शनमेवास्तु किमन्यैः दर्शनान्तरैः । प्राप्यते येन निवार्णं सरागेणापि चेतसा । विघाते यथा—निर्वाणवैर-दहनाः प्रशमादरीणां । करिमज्जने यथा—निर्वाणमापि सरसीषु गजाधिरूढपेन ॥२००॥ निर्माणं सारनिर्मित्योः कर्मभेदे समंजसे । निर्मीयते निर्माणं । सारस्थिरोऽर्थः । निर्मितौ यथा—जननयननिर्माणमफलं । कर्मभिदो विचित्रावयवरचनाहेतु-र्नाम कर्मभेदः । तत्र यथा—निर्माणेन विनिर्मिता तनुरियम् । समंजसं न्यायः । निःश्रेणिरधिरोहिण्यां खर्जूरीपादपेपि च । निर्गता श्रेणिः सोपानपंक्तिरत्र निःश्रेणिः निष्क्रान्ता श्रेणेस्तरु समूहाद्वा उच्चविटपत्वात् । स्त्रियां अधिरोहिण्यां यथा—अधिरोढुं गुणश्रेणीं निःश्रेणीमुक्तिवेश्मनः ॥२०१॥ प्रघणोऽलिंदके ताम्र-कलसे लोहमुद्गरे । प्रहण्यते प्रघणः । प्रघणप्रघाणौ गृहांशे

प्रघणोऽलिंदके ताम्रकलसे लोहमुद्गरे ।
प्रवणस्तु क्षणे प्रह्वे क्रमनिम्ने चतुष्पथे ॥२०२॥
आयते च प्रमाणन्तु मर्यादासत्यवादिनोः ।
प्रमातर्येकतेयत्तानित्येषु हेतुशास्त्रयोः ॥२०३॥
पत्तोर्णं धौतकौशेये स्यात्पत्रोर्णस्तु शोणके* ।
पक्षिणी पूर्णिमाखग्योः शाकिनी रात्रिभेदयोः ॥२०४॥

इत्यलि (५-३-३५) साधुः । प्रघणति वा अलिंदके द्वाराधोदारुणि यथा-प्रघणे प्रगुणीचक्रुः कर्पूरस्वस्तिकान् स्त्रियः । प्रवणस्तु क्षणे प्रह्वे क्रमनिम्ने चतुष्पथे । आयत्ते च । अवन्तेऽत्र प्रवणः । प्रवते वा । पंचस्वर्थेषु क्षणे पुंसि । चतुष्पथे तु क्लीबः । अन्यत्र वाच्यलिंगः । क्षणोऽवसरः । प्रह्वे आसक्ते यथा-परोपकारप्रवणेन चेतसा । क्रमनिम्ने यथा-प्रागुदक्प्रवणा भूमिः श्लक्ष्णा योगे प्रशस्यते । चतुष्पथे यथा-प्रवणे चरन्ति भूताः ॥२०२॥ आयत्ते यथा-प्रायेण योषित्प्रवणा हि कामिनः । प्रमाणन्तु मर्यादासत्यवादिनोः प्रमातर्येकतेयत्तानित्येषु हेतुशास्त्रयोः । प्रमीयतेऽनेन प्रमितिः । प्रमिमीते वा प्रमाणम् । मर्यादा अवधिः । तत्र यथा-राजानं मां च प्रमाणं कृत्वा यतः यस्याकुशलं पश्यसीति । सत्यवादिनि यथा-वाणी पमाणस्य मुनेः प्रमाणं । प्रमातरि यथा-सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः । एकतायां यथा-परस्परप्रमाणाः भ्रातरः । इयत्ता परिच्छेदः । तत्र यथा-कियत्प्रमाणमुदकम् । नित्ये यथा-नभः प्रमाणं गुणिनो गृणन्ति । हेतौ यथा-धूमः प्रमाणं ज्वलनावबोधे । शास्त्रे यथा-पदवाक्यप्रमाणानां पारंयात-

* शोणकद्रुमे ।

प्रवेणिर्वेणिकुथयोः पुराणं प्रत्नशास्त्रयोः ।
पुराणः षोडशपणे पूरणं वानतन्तुषु ॥२०५॥
पूरके पिष्टभेदे च पूरणी शाल्मलिद्रुमे ।
प्रोक्षणं सेकवधयोः भरणं वेतने भृतौ ॥२०६॥

स्य धीमतः । पत्तोर्णं धौतकौशेये स्यात् । प्राप्ता ऊर्णाऽनेन पत्तोर्णं पृषोदरादित्वात् । यथा-पत्तोर्णसावर्ण्यजुषःकरास्ते । पत्रोर्णस्तु शोणके । शोणको रलुकवृक्षः । पक्षिणी पूर्णिमाखग्योः शाकिनीरात्रिभेदयोः । पक्षावस्याः स्तः पक्षिणी । पूर्णिमायां यथा-सदृक्षः पक्षिणींदुना । खग्यां यथा-सा ययावन्तरिक्षेण पक्षिणी व क्षणादपि । शाकिनीभेदः शाकिनीविशेषः । रात्रिभेदे आगामिवर्तमानदिनयुक्ते यथा-अमावास्यां पक्षिणीं नाधीते ॥२०४॥ प्रवेणिर्वेणिकुथयोः । प्रवेति प्रवेणिः । कावावी (उ० ६३४) इति णिः । स्त्रियां वेणिः कबरी । कुथो वर्णकंवलः । द्वयोर्यथा-प्रवेणीमदनस्येव प्रवेणी कुसुमांचिता । पुराणं प्रत्नशास्त्रयोः पुरा भवं पुराणं । प्रत्ने पुरातने वाच्यलिंगः तत्र यथा-निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः । शास्त्रं पंचलक्षणं । यथा-सर्गश्च प्रतिसर्गश्च, वंशो मन्वन्तराणि च । वंशानुवंशचरितं पुराणं पंचलक्षणम् । पुराणः षोडशपणे । यदाह-षोडशपणः पुराणः पणो भवेत्काकिणी चतुष्केण । पूरणं वानतंतुषु । पूरके पिष्टभेदे च । पूर्यतेऽनेन पूरयति वा पूरणं ॥२०५॥ पूरके वाच्यलिंगः । तत्र यथा-सहस्रपूरणः कश्चिल्लूनमूर्द्धासिना द्विषः । पिष्टभेदे यथा-घृतपूरैः सकर्पूरैः पूरणैश्च स पूरितः । पूरणी शाल्मलिद्रुमे । स्त्रियां । टित्वाड्डी । प्रोक्षणं सेकवधयोः । प्रोक्ष्यते प्रोक्षणं । सेके

भरणी शोणके भे च भ्रमणी स्यादधीशितुः ।
क्रीडादौ कारुंडिकायां भीषणं सल्लकीरसे ॥२०७॥
भीषणो दारुणेऽर्गाटे मत्कुणोऽश्मश्रुपूरुषे ।
उद्दंशो नालिकेरे च निर्विषाणगजेऽपि च ॥२०८॥
मसृणाऽकठिने स्निग्धे मसृणो स्यादतस्यपि ।
मार्गणं याचनेऽन्वेषे मार्गणस्तु शरेऽर्थिनि ॥२०९॥

यथा-पृण्टप्रोक्षणलब्धशुद्धिरधुना । वधो हिंसाऽर्थाद्यज्ञे । तत्र यथा-प्राणप्रोक्षणके वनेत्र विजने किं भीरु बंभ्रम्यसे । भरणं वेतने भृतौ । भ्रियतेऽनेन भृतिर्वा बिभर्ति वा भरणं वेतनं मूल्यं । भृतिः पोषणमात्रं द्वयोर्यथा–मूर्खशिष्योपदेशेन दुष्टस्त्री भरणेन च ॥२०६॥ भरणी शोणके भे च । शोणको रलुकवृक्षः । भे नक्षत्रे यथा–बुधे धनिष्ठा भरणी अश्विनी मूलरेवती । भ्रमणी स्यादधीशितुः क्रीडादौ कारुंडिकायां । भ्रम्यतेऽस्यां भ्रमणी । अधीशितुः राजादेः । क्रीडादौ यथा–भ्रमण्यां प्रययौ (नृपः)। कारुंडिका ओषधिः । भीषणं सल्लकीरसे भीषयति भीषणं ॥२०७॥ भीषणो दारुणेऽर्गाटे । दारुणे वाच्यलिंगः । तत्र यथा–स रावणो नाम निकामभीषणं । बभूव रक्षः क्षतरक्षणं दिवः । अर्गाटोऽपामार्गः । मत्कुणोऽश्मश्रुपूरुषे उद्दंशे नालिकेरे च निर्विषाणगजेऽपि च । माद्यति मत्कुणः । भ्रूणतृणेति (उ० १८६) साधुः । अश्मश्रुपूरुषे नालिकेरे च यथा–स्त्रैणं क्रीडति मत्कुणैः । उद्दंशे क्षुद्रजन्तौ यथा–मत्कुणाविव पुरः परिप्लवौ सिन्धुनाथशयने निषेदुषः । निर्विषाणगजे यथा–दशन–व्यसनादीयुर्मत्कुणत्वं मतंगजः ॥२०८॥ मसृणोऽकठिने स्निग्धे । मस्यति परिणमते मसृणः । भ्रूणतृणेति (उ० १८६) साधुः ।

यन्त्रणं बन्धने त्राणे नियमे रमणं पुनः ।
पटोलमूले जघने रमणो रासभे प्रिये ॥२१०॥
रोषणो रोषणे हेमघर्षे पारद ऊषरे ।
रोहिणी सोमवल्के भे कंठरोगोभयोर्गवि ॥२११॥

गुणे पुंसि । तद्वति वाच्यलिंगः । अकठिने यथा–मसृणचरणपातं गम्यतां भूः सुदर्भा । स्निग्धे यथा–मसृणघुसृणपंकैरंकिता पाणि-रस्याः । मसृणास्यादतस्यपि । अतसि उमा । मार्गणं याचनेऽन्वेषे । मार्ग्यते मार्गणं । याचने यथा–द्रविणमार्गण-लंपटकुट्टनी । अन्वेषे यथा–वैदेहो मार्गणं रामः सकामः कुरुते वने । मार्गणस्तु शरेऽर्थिनि । मार्गति मार्गणः । अर्थिनि वाच्यलिंगः । द्वयोर्यथा–कृतपुंखतया लेमे लक्षमप्याशु मार्गणैः ॥२०९॥ यन्त्रणं बंधने त्राणे नियमे । यंत्र्यते यंत्रणं । त्रिष्वपि यर्था–कुर्यादिंद्रिययन्त्रणं । रमणं पुनः । पटोलमूले जघने । रम्यतेऽनेन रमणं । पटोलमूलमौषधं । जघने यथा–रमणालवालनिर्गतरोमावलिवल्लरीव संसिक्ता । रमणो रासभे प्रिये । रमते रमणः । रम्यादित्वादनट् । प्रिये यथा–चाटुचाकृतक संभ्रममासाकार्मणत्वमगमद्रमणेषु ॥२१०॥ रोषाणो रोषणे हेमघर्षे पारद ऊषरे रुष्यति रोषाणः । कल्याण पर्याणा (उ० १९३) इति साधुः । रोषणे वाच्यलिंगः । तत्र यथा–रोपाणस्तं विषाणाभ्यां विव्याध व्यालकुंजरः । हेमघर्षः शोणः । पारदो रसः । ऊषरमिरिणं । रोहिणी सोमवल्के भे कंठरोगो-भयोर्गवि । लोहिताकटुरोहिण्योः । रोहति अवश्यं रोहिणी णित्वावश्यकेति णिन् । रोहित शब्दाद्वाश्येति डीस्तस्य नत्वं च । सप्तसवर्षेषु । सोमवल्कः श्रीपर्णी । भे नक्षत्रे यथा–

लोहिताकटुरोहिण्योर्लवणो राक्षसे रसे ।
अस्थिभेदे लवणात्विट् लक्षणं नामचिह्नयोः ॥२१२॥
लक्ष्मणं च लक्षणस्तु सौमित्रो लक्ष्मणो यथा ।
लक्ष्मणः श्रीयुते लक्ष्मणौषधौ सारसस्त्रियाम् ॥२१३॥

हे रोहिणि त्वमसि रात्रिचरस्य भार्या । कंठरोगो गलांकुरः । उमा गौरी तत्र यथा—रोहिणोरहितः शिवः । गवि यथा—वर्द्धिष्णुधारा ध्वनिं रोहिणीः पयश्चिरं निदध्यौ दुहतः स गोदुहः ॥२११॥ लोहितायां रक्तायां यथा—तापाय रोहिणी तडित् । कटुरोहिणी ओषधिः । लवणो राक्षसे रसे । अस्थि-भेदे । लुनाति लवणः । नद्यादित्वात् अनो णत्वं च । राक्षसे यथा—दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति । रसे यथा—स्वक्षो लवणभोजी स्यात् । अस्थिभेदो भालकर्णान्तरास्थि । तत्र यथा—शृणाति लवणाधातः । लवणात्विट् । त्विट् दीप्ति लक्षणं नामचिह्नयोः । लक्ष्मणं च । लक्ष्यतेऽनेन लक्षणं । लक्षयति वा । लक्ष्यतेऽनेन लक्ष्मणं । चिक्कण कुक्कण (उ० १९०) इति साधुः । लक्षणलक्ष्मणशब्दौ नामचिह्नयोः वर्त्तेते इत्यर्थः । नामनि यथा—ककुत्स्थ इत्याहित लक्षणोऽभूत् । लक्ष्मणे न स लक्ष्मणः । चिह्ने यथा—उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः । आज्ञैश्वर्यं च सत्वं च विदुक्ष्मापस्य लक्ष्मणं ॥२१२॥ लक्षणं शास्त्रेऽपि । लक्षणस्तु सौमित्रो लक्ष्मणो यथा—सौमित्रो रामानुजे यथा—उच्चरणलब्धकीर्त्तेराज्ञारहितस्य लक्षणयुतस्य । रामस्य वनं शरणं जितपरकलभस्य शरभस्य । सुग्रीवस्य श्रियं दृष्ट्वा विनयं लक्ष्मणस्य च । विभीषणस्य दोलेव मतिरायाति याति च । लक्ष्मणः श्रीयुते । लक्ष्मी-

वरुणोऽर्केऽप्पतौ वृक्षे वरणो वरुणद्रुमे ।
प्राकारे वरणं वृत्यां वारणः स्यान्मतंगजे ॥२१४॥
वारणं तु प्रतिषेधे ब्राह्मणं विप्रसंहतौ ।
वेदे च ब्राह्मणो विप्रे *वारुणी पश्चिमासुरा ॥२१५॥

रस्त्यस्य लक्ष्मणः । लक्ष्म्या अनः वाच्यलिंगः । पुण्यभागी स लक्ष्मणः । लक्ष्मणौषधौ सारसस्त्रियां । सारसस्त्रियां यथा—वाल्मीकेररहितरामलक्ष्मणानां सादृश्यं दधति गिरां महासरस्य ॥२१३॥ वरुणोऽर्केऽप्पतौ वृक्षे । वृणोति वरुणः । दृकृवृ दारिभ्य उणः । अर्के यथा—उदेति वरुणोरुणः । अप्पतौ पश्चिमापतौ यथा—अतिसक्तिमेत्य वरुणस्य दिशा भृशमन्वरज्यदनुषारकरः । वृक्षो वृक्षभेदः । वरणो वरुणद्रुमे । प्राकारे । वृणोति वरणः । तृ कृ श्रृ इत्यणः । द्वयोर्यथा—प्रोत्तुंगवरणावृतः । वरणं वृत्यां वृतिः स्वीकारः । तत्र यथा—कन्या वरणमिच्छति स्वजातावेव वाणिजाः । वारणः स्यान्मतंगजे । वारयति वारणः ॥२१४॥ वारणं तु प्रतिषेधे । वार्यते वारणं । मतंगजे प्रतिषेधे च यथा—न भवति बिसतन्तुर्वारिजं वारणानां । ब्राह्मणं विप्रसंहतौ । वेदे च । ब्राह्मणानां समूहो ब्राह्मणं । ब्राह्मणमाणवेतियवाधकः श्वादिभ्योऽञ् । ब्रह्मणा प्रोक्तं वा तेन प्रोक्त इत्यण् । वेदेऽन् । ब्राह्मणमत्रैवेति निर्देशाद्ब्रह्मण इत्यंत्यस्वरादिलोपो न भवति । विप्रसंहतौ यथा—ब्राह्मणं ब्रह्मशालायामजिह्मध्वनि गायति । वेदे वेदैकदेशे यथा—पम्यन्ते याज्ञवल्कानि ब्राह्मणैर्ब्राह्मणानि तैः । ब्राह्मणो विप्रे । ब्रह्मणोऽपत्यं ब्राह्मणः । डसोऽपत्ये इत्यण् यथा—गंधेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः ।

* ब्राह्मणी वाडवस्त्रियां । स्पृक्कायां फञ्जिकायां च । वारुणी०

गंडदूर्वा विषाणं तु शृंगे कोलेभदंतयोः ।
विषाणी मेषशृंग्यां स्यात् विपणिः पण्यहट्टयोः ।।२१६।।
पण्यवीथ्यां श्रमणस्तु निर्ग्रंथे निंद्यजीविनि ।
श्रमणा सुलता मांसी मुण्डीरी च सुदर्शना ।।२१७।।

फंजिकास्पृक्कयोस्तु ब्राह्मणीति प्रयोक्तव्यम् । वारुणी पश्चिमा सुरा । गंडदूर्वा । वरुणस्येयं वारुणी । पश्चिमासुरयोर्यथा–स वारुणीसक्तिमुपेत्य साम्प्रतं विहीनकान्तिः पतितो द्विजेश्वरः ।।२१५।। गंडदूर्वा प्रधानदूर्वा विषाणं तु शृंगे कोलेभदंतयोः । वेवेष्टि विषाणं । कृपिवृषि वृगीत्याणक् । त्रिलिंगः । शृंगे यथा–परेतभर्तुर्महिषोऽमुना धनुर्विधातुमुत्खातविषाणमंडलः । कोलदंते यथा–कोला विषाणतटघट्टितपल्वलान्तः । इभदन्ते यथा–न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति । विषाणी मेषशृंग्यां स्यात् । मेषशृंगी ओषधिः । विपणिः पण्यहट्टयोः । पण्यवीथ्यां विपण्यते विपणायंत्यस्मिन् वा विपणिः । पदिपठीति इः । स्त्रियां । माघस्तु पण्यवीथ्यां पुंस्याह । त्रिष्वपि यथा–अगण्यपण्यपूर्णापिणं विपणिनो विपणिं विभेजुः । अत्र विपणिः । पण्यं हट्टौ वा विद्यते येषां ते विपणिनः । शिखादित्वादिन् । विपणिं पण्यवीथिकामित्यर्थः । श्रमणस्तु निर्ग्रंथे निंद्यजीविनि । श्राम्यति श्रमणः । नद्यादित्वादनः । निर्ग्रंथे यथा–क्षमाप्रधानाः श्रमणाः भवन्ति । निंद्यजीविनी वाच्यलिंगः । तत्र यथा–विश्रामः श्रमणे कुतः । श्रवणो नक्षत्रभेदे । श्रूयते श्रवणः । तृकृश्रृ इत्यणः । स्त्रीपुंसः। यथा–मूलेऽर्कः श्रवणे चन्द्रः । श्रवण श्रवसि श्रुतौ । श्रूयतेऽनेन श्रुतिर्वा श्रवणं । श्रवसि कर्णे पुंक्लीबः । श्रुतौ श्रवणमात्रे

श्रवणो नक्षत्रभेदे श्रवणं श्रवसि श्रुतौ ।
शरणं रक्षणे गेहे वधरक्षकयोरपि ।।२१८।।
***श्रीपर्णस्त्वग्निमंथेऽब्जे श्रीपर्णी शाल्मलौ हठे ।**
संकीर्णो निचिताशुद्धौ सरणिः श्रेणिमार्गयोः ।।२१९।।
सारणः स्यादतोसारे दशकन्धरमंत्रिणि ।
सिङ्घाणन्तु घ्राणमलेऽयः किट्टे काचभाजने ।।२२०।।

क्लीबे । श्रवसि यथा–आलोचनान्तत् श्रवणौ वितत्य । श्रुतौ यथा–शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । शरणं रक्षणे गेहे वधरक्षकयोरपि । शृणोत्यपायं शरणं । तृकृशृ इत्यणः । शीर्यते वा । श्रियंति तदिति नैरुक्ताः । रक्षणे यथा–तरुणानपि रक्षति क्षमी स शरण्यः शरणागतान् द्विषः। गेहे यथा–एताभिरग्निशरणेषु सधर्मिणीभिः । वधे यथा–विद्विषां शरणं शरैः। रक्षके यथा–त्वमेव शरणं मम ।।२१८।। श्रीपर्णमग्निमंथेऽब्जे । श्रीः पर्णे यस्य श्रीपर्णं । अग्निमंथोऽरणिः। अब्जे यथा–श्रीपर्णपर्णं विदधाति कर्णे । श्रीपर्णी शाल्मलौ हठे । शाल्मलिर्वृक्षभेदः। हठो जलजस्तृणविशेषः। संकीर्णो निचिताशुद्धौ । सम्यक्कीर्णः संकीर्णः। संकीर्यंते मिश्रीक्रियते स्म वाच्यलिंगः । निचिते यथा–सकीर्णकीचकवनस्खलितैकवालविच्छेदकातरधियश्चलितुं चमर्यः । अशुद्धे यथा–संकीर्णजातिर्गज एष याति । सरणिः श्रेणिमार्गयोः। सरन्त्यस्यामिति सरणिः । कृहृसृ इत्यणिः । स्त्रियां । श्रेणौ पंक्तौ यथा–सरणिः पिपीलिकानां निर्याता वर्षसूचनं कुरुते । मार्गे यथा–उपपरिसरं गोदावर्याः परित्यजताध्वगाः। सरणिमपरोमार्गस्तावद्भवद्भिरिहेक्ष्यताम् ।।२१९।। सारणः स्यादतोसारे दशकन्ध-

*श्रावणो मासि पाखण्डे दध्याढ्यां श्रावणा मता । श्रीपर्ण०।

सुषेणो विष्णुसुग्रीववैद्ययोः करमर्दके ॥
सुवर्णं कांचने कर्षे सुवर्णालौ मषान्तरे ॥२२१॥
कृष्णागुरुणि विस्ते च सुपर्णः कृतमालके ॥
गरुडे स्वर्णचूडे च सुपर्णा विनताब्जिनी ॥२२२॥
हरणं तु हृतौ दोष्णि यौतकादिधनेपि च ॥
हरिणौ पांडुसारंगौ हरिणी चारुयोषिति ॥२२३॥

रमंत्रिणि । सारयति सारणः। अतीसारे यथा–तंत्रं सारणदारणं। रावणमंत्रिणि यथा-मंत्रिणौ शुकसारणौ। सिंहाणं तु घ्राणमलेऽयः किट्टे काचभाजने । सिंघ्यते सह्यते वां सिं(घा)हाणं । कल्याणप्रर्याणाढ्य (उ० १८३) इति साधुः ॥२२०॥ सुषेणो विष्णुसुग्रीववैद्ययोः। करमर्दके । शोभना सेनाऽस्य सुषेणः। एत्यक इति षत्वं । विष्णौ यथा–सुषेणसेनाप्रसरेण भेदिनी । सुग्रीवस्य वैद्यः सुग्रीववैद्यः। करमर्दको वृक्षविशेषः। सुवर्णं कांचने कर्षे सुवर्णालौ मषान्तरे । कृष्णागुरुणि विस्ते च । शोभनो वर्णोऽस्य सुवर्णं । सुष्टु वर्ण्यते वा । पुंक्लीबः । कांचने यथा–सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः। कर्षेऽर्थात् कांचनस्य यथा–माषोदशार्द्धगुंजः । षोडशमाषो निगद्यते कर्षः । स सुवर्णस्य सुवर्णः । सुवर्णस्यालुः करकपात्रिका सुवर्णालुः । मषान्तरं यज्ञभेदः ॥२२१॥ कृष्णागुरुः काकतुंडः । विस्तः षष्ठिः पलशतानि । सुपर्णः कृतमालके । गरुडे स्वर्णचूडे च । शोभनानि पर्णान्यस्य सुपर्णः । कृतमाल आरग्वधः । गरुडे यथा–निजकेतुशिरःश्रितः सुपर्णादपतन्नयुतानि पक्षिराजं । स्वर्णचूडः पक्षिविशेषः । सुपर्णा विनताब्जिनी । विनता गरुडमाता । तत्र यथा–सौपर्णेयप्रकीर्णैर्विषधरनिकरैः । अब्जिनी पद्मिनी ॥२२२॥ हरणं तु हृतौ दोष्णि यौतकादिधनेपि

सुवर्णप्रतिमायां च हरिता वृत्तभेदयोः ॥
हर्षणस्तु श्राद्धदेवे हर्षके योगरुग्भिदोः ॥२२४॥
हरेणुः कुलयोषायां रेणुकायां सतीनके ॥
हिरणं हिरण्यमिव वराटे हेम्नि रेतसि ॥२२५॥

च । ह्रियते हरणं । ह्रियतेऽनेन वा । हृतौ यथा–सीताहरणकारणात् । दोर्बाहुः यौतकं वधूवरयोर्देयं तत्र यथा–इच्छानुरूपं हरिणी कृतश्रीः प्रास्थापयद्राधवमन्वगाच्च । हरिणौ पांडुसारंगौ । हरति हरिणः । हृ दृ वृ हि दक्षिभ्य इणः । पांडौ गुणे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा–हरिणवदनकान्त्या शल्यमन्यर्व्यनक्ति । सारंगे मृगे यथा–अरण्ये मां त्यक्त्वा हरिण हरिणाक्षी क्व नु गता । हरिणी चारुयोषिति । सुवर्णप्रतिमायां च हरिता वृत्तभेदयोः । हरितशब्दात् श्येतैतहरितेतिङ्यान्तस्य नत्वे च हरिणी । चारुः प्रधानयोषित् चारुयोषित् । वात्स्यायनप्रसिद्धा ॥२२३॥ सुवर्णप्रतिमायां यथा–हरिणीभिः श्रितस्तंभा भान्ति प्रासादमंडपाः । हरिता नीला तत्र यथा–सन्मनोहारिणी व्योम्नि हरिणी शुकधोरणी । वृत्तभेदे यथा–भवति हरिणीन्सौम्रौम्लौ गोरसो दधिसप्तकैः । हर्षणस्तु श्राद्धदेवे हर्षके योगरुग्भिदोः । हृष्यति हर्षणः । हर्षके वाच्यलिङ्गः । श्राद्धदेवो यमः । हर्षके यथा–करेणुर्मदहर्षणः । योगभिदि यथा–व्याघातो हर्षणस्तथा । रुग्भिद् अक्षिरोगविशेषः ॥२२४॥ हरेणुः कुलयोषायां रेणुकायां सतीनके । हरति हरेणुः । कृ हृ भू इत्येणुः । सतीनके पुंसि । शेषयोः स्त्रियां । कुलयोषा कुलस्त्री । रेणुका गंधद्रव्यं सतीनकस्त्रिपुटधान्यं । हिरणं हिरण्यमिव वराटे हेम्नि रेतसि । हरति हिरणं । चिक्कण

अमृतं यज्ञशेषेम्बुसुधामोक्षेष्वयाचिते ।।
अन्नकांचनयोर्जग्धौ खे स्वादुनि रसायने ।।२२६।।
घृते हृद्ये गोरसे चामृतं धन्वन्तरौ सुरे ।।
अमृतामलकीपथ्यागुडूचीमागधीषु च ।।२२७।।
अनृतं कर्षणेऽलीके चाक्षतः स्यादहिंसिते ।।
षंडे लाजेष्वर्दितं तु वातव्याधौ हतेऽर्थिते ।।२२८।।

कुक्कण (उ० १९०) साधुः । हरति हिरण्यं । हिरण्यवर्जन्यादय (उ० ३८०) इति साधुः । हिरणं क्लीबे । हिरण्यं हेम्नि पुंक्लीबेऽन्यत्र क्लीबे । त्रिष्वपि हिरणं यथा—हिरणं कारणं श्रियः। वराटे हेम्नि च हिरण्यं यथा—हिरण्यमेवार्जय निष्फलाः कलाः। हिरण्यमक्षय्याकुप्यमानभेदद्रव्येष्वपि ।।२२५।। अथ तान्ताः । अमृतं यज्ञशेषेऽम्बुसुधामोक्षेष्वयाचिते । अन्नकांचनयोर्जग्धौ खे स्वादुनि रसायने घृते हृद्ये गोरसे च । नास्ति मृतमस्मादस्मिन्वा अमृतं । न मृतं याचितं इति वा । चतुर्दशस्वर्थेषु क्लीबे । यज्ञशेषे यथा—नित्यं चामृतभोजनः । अंबुनि यथा—अमृतमिति वचसि सत्यपि विषमिति हि किमुच्यते वारि । सुधायां यथा—देवासुरैरमृतमंबुनिधिर्ममन्थे । मोक्षे यथा—सेव्यतामक्षयो धीराः सश्रिये चामृताय च । अयाचिते यथा—यन्मनुः । ऋतुमुंच्छशिलंक्षेयममृतं स्यादयाचितं । शेषेषु यथा—अमृते कस्य न प्रीतिः° ।।२२६।। अमृतो धन्वन्तरौ सुरे । द्वयोर्यथा—अमृताय नमस्तस्मै । अमृतामलकीपथ्यागुडूचीमागधीषु च । सर्वा अप्योषधयः । गुडूच्यां यथा—क्षुद्रामृतानागरपुष्कराख्यैः ।।२२७।। अनृतं कर्षणेऽलीके च । न ऋतं अनृतं । पापिष्टत्वात् । कर्षणं कृषिः । अलीकमसत्यं । तद्वति वाच्यलिङ्गः। द्वयोर्यथा—अनृते वर्तते पार्थं ।

अजितस्तीर्थकृद्भेदे बुद्धे विष्णावनिर्जिते ।
अच्युतो द्वादशस्वर्गे केशवाभ्रष्टयोरपि ।।२२९।।
अव्यक्तं प्रकृतावात्मन्यव्यक्तोऽस्फुटमूर्खयोः ।
अनन्तं खे निरवधावनन्तस्तीर्थकृद्भिदि ।।२३०।।

अक्षतं स्यादहिंसिते । षंढे लाजेषु । न क्षण्यते अक्षतं । अहिंसिते बाच्यलिंगः । लाजेषु पुंक्लीबः । लाजे पुंसि । बहुवचनान्त एव । अहिंसिति यथा—अक्षतः स्मरशरासनबाणैः। षंडस्तृतीया प्रकृतिः । लाजेषु मांगल्यतंडुलेषु । यथा—सुदक्षिणा साक्षतपात्रहस्ता । अर्दितं तु वातव्याधौ हतेऽर्थिते । अर्घते स्म अर्दितं । हतार्थितयोर्वाच्यलिंगः । हते यथा—हृदये दिग्धशरैरिवार्दितः अर्थिते यथा—कदर्यकुर्दतेर्ऽदितः ।।२२८।। अजितस्तीर्थकृद्भेदे । बुद्धे विष्णावनिर्जिते । न जीयतेऽजितः । अनिर्जिते वाच्यलिंगः। तीर्थकृद्भेदे द्वितीयतीर्थकरे यथा—श्रीमंतमजितं देवं सर्वतः प्रणिदध्महे । शेषेषु यथा—जीयादजितः परैरजितः । अच्युतो द्वादशस्वर्गे केशवाभ्रष्टयोरपि । न च्यवतेऽच्युतः । अभ्रष्टे वाच्यलिंगः । द्वादशस्वर्गे यथा—अच्युतेन्द्रश्च्युतो दिवः । केशवे यथा—शुचिस्मितां वाचमवोचदच्युतः । अभ्रष्टे यथा—अच्युतेषु सलक्ष्यतः ।।२२९।। अव्यक्तं प्रकृतावात्मनि । न व्यक्तं अव्यक्तं । प्रकृतिः सांख्योक्ता । तत्र यथा—सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तं । आत्मनि परात्मनि यथा—अव्यक्तादण्डमभवत् । अव्यक्तोऽस्फुटमूर्खयोः । वाच्यलिंगः । अस्फुटे यथा—अव्यक्तमित्यभिहिते मनुजेश्वरेण । मूर्खे यथा—न वक्तियुक्तमव्यक्तः । अनंतं खे निरवधौ । नास्त्यंतोऽस्य अनंतं । निरवधौ वाच्यलिंगः । खे आकाशे यथा—अनन्तमारोहति तेजसा रविः । निरवधौ

विष्णौ शेषेऽप्यनन्ता गुडूचीभूर्दुरालभा ।
विशल्या लांगलीदूर्वा शारिवाहैमवत्यपि ॥२३१॥
अस्वंतमशुभे क्षेत्रे चुल्यामनवधौ मृतौ ।
अमतिः काले चंडे चाप्यंकतिर्वह्निवेधसोः ॥२३२॥
अग्निहोत्रिण्यगस्तिर्द्रुमुन्योः स्याददितिर्भुवि ।
देवमातरि पार्वत्यामंहतिस्त्यागरोगयोः ॥२३३॥

यथा—अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता । अनन्तस्तीर्थकृद्धिदि । विष्णौ शेषेऽपि । तीर्थकृद्भेदे चर्तुदशे तीर्थकरे यथा—नमः श्रीमदनंताय वीतरागाय तायिने ॥२३०॥ विष्णौ यथा—लक्ष्मीरनन्तस्य निबद्धभावा । शेषे नागराजे यथा अनन्तभोगीन्द्रफणामणिप्रभाप्रवृद्धसक्तौ शुभकान्ति वो हरेः । अनाशेऽपि मंख । यथा—अनन्तो जगदन्तकः । अनन्ता गुडूची भूर्दुरालभा । विशल्या लांगली दूर्वा शारिवा हैमवत्यपि । भूर्भूमिः। तत्र यथा—सप्तसागरपर्यन्तामनंतां भ्राम्यता भया । शेषा ओषधयः ॥२३१॥ अस्वंतमशुभे क्षेत्रे चुल्यामनवधौ मृतौ । न विद्यते शोभनोऽतोऽस्य अस्वंतं । अशुभे धर्ममात्रे क्लीबे तद्वति अनवधौ च वाच्यलिंगः। पंचस्वपि यथा—अस्वन्तं स्वान्तदुःखदं । अमतिः काले चंडे चापि अमत्यमतिः। स्वल्पमित्यति । काले यमे पुंसि । चंडे वाच्यलिंगः। अंकतिर्वह्निवेधसोः । अग्निहोत्रिणि । अंच्यते अंकतिः। अंचेः कचवेत्यतिः । पुंसि ॥२३२॥ अगस्तिर्द्रुमुन्योः स्यात् । अगति अगस्ति । अगिवलीत्यस्तिक् (उ० ६६०) पुंसि । द्रुर्वृक्षविशेषः। तत्र यथा—प्रयाणं भूभुजां युक्तमगस्ति कुसुमोद्गमे । मुनौ यथा—समे पीतं च भुक्तं च अगस्तिर्जरयिष्यति । अदितिर्भुवि । देवमातरि पार्वत्यां । न ददाति अदितिः । मञ्गोडागोडितिः ।

आपातः पाततत्कालेऽप्याहृतः सादरेऽर्चिते ।
आख्यातं भाषितेत्यादावाघ्राते ग्रस्तशिंघिते ॥२३४॥
आप्लुतः स्नातके स्नातेऽप्यावर्तः पयसां भ्रमे ।
आवर्तने चिन्तने चानर्तो जनपदे जने ॥२३५॥

स्त्रियां । त्रिष्वपि यथा—दुरितान्यदितिर्द्यमु । अंहतिस्त्यागरोगयोः। हंति अंहतिः। हंतेरंह च (उ० ६५४) इति अतिः। स्त्रियां त्यागो दानम् । रोगो रोगभेदः ॥२३३॥ आपातः पाते तत्काले । आपतनं आपतन्त्यत्र वा आपातः। पाते यथा—पुष्पापातस्तकितमिदं भूतलं भूतभर्तुः । तत्काले यथा—आपातरम्या विषयाः पर्यंतपरितापिनः। आहृतः सादरेऽर्चिते । आद्रियते आहृतः । कर्तृकर्मणोः क्तः। वाच्यलिंगः। सादरे यथा—इति स्म पृच्छत्यनुवेलमाहृतः। प्रियासखीः उत्तरकोशलेश्वरः। अर्चिते यथा—इत्याहृतः सतरसारससारवह्निः। आख्यातं भाषिते त्यादौ । आख्यायते स्म आख्यातं । भाषिते वाच्यलिंगः। त्यादिस्त्याद्यन्तं पदं द्वयोर्यथा—मा स्म संधिं विजानन्तु मा स्म जानन्तु विग्रहं । आख्यातं यदि श्रृणवन्ति भूयास्तेनैव पंडिताः। आघ्राते ग्रस्तशिंघिते आघ्रायते स्म आघ्रातं । वाच्यलिंगः। ग्रस्ते यथा—व्याघ्राघ्रातमृगी कृपा कुलमृगन्यायेन हिंसारुचे । शिंघिते यथा—सैः शीघ्रमाघ्रातकदंवगंधः ॥२३४॥ आप्लुतः स्नातके स्नाते पि । आप्लवते स्म आप्लुतः। स्नाते वाच्यलिंगः। वेदं समाप्य स्नातः स्नातकः। तत्र यथा—आप्लुतः प्लवते गृहं । स्नाते यथा—आप्लुतास्तोरमंदारकुसुमोत्क्करवीचिषु । आवर्तः पयसां भ्रमे । आवर्त्तने चिन्तने च । आवृत्यतेऽनेन आवर्तनं वा आवर्तः। पयसां भ्रमे यथा—संसर्पत्याः स्खलितसुभगं दर्शितावर्त्तनाभेः ।

समरे नृत्यशालायामाहतं तु मृषार्थके ।
गुणिते ताडिते चाप्याध्मातः शब्दितदग्धयोः ।।२३६।।
वातरोगेप्यथास्फोतः कोविदारार्कपर्णयोः ।
आस्फाता गिरिकर्ण्यां च वनमाल्ल्यामथाचितः ।।२३७।।

आवर्त्तनं भ्रमिः। पुनः पुनरध्ययनं वा। भ्रमौ यथा—चक्रावर्त्तविवर्त्तितक्षितिरजःपुंजैर्नभस्छादितं। अध्ययने चिन्तने च यथा—मंत्रावर्त्तप्रणिहितमना वर्त्तते सौ मुनीन्द्रः। आनर्तो जनपदे जने। समरे नृत्यशालायां। आनृत्यंत्यसौ अस्मिन् वा आनर्तः। जनपदो देशविशेषः। जनस्तन्निवासी ।।२३५।। समरे नृत्यशालायां च यथा—आनर्त्तनर्तनविवर्तितखड्गवल्ली कान्ताक्षतक्षपितशत्रुनिकायकायः। आहतं तु मृषार्थके। गुणिते ताडिते चापि। आहन्यते आहतं वाच्यलिंगः। मृषार्थके यथा—धिक् धिक् तवाहतमिदं वचनं वंचनात्मकम्। गुणिते यथा—पंचाहतैश्चतुर्भिर्वराटकैः काकणी चैका। ताडिते यथा—आहतं कुचतटेन तरूण्याः साधुसोढमगुनेति पपात। आध्मातः शब्दितदग्धयोः। वातरोगे पि। आध्मायते स्म आध्मातः। शब्दितदग्धयोर्वाच्यलिंगः। शब्दिते यथा—आध्माते पांचजन्ये जनयति जनतानंदकन्दप्ररोहम्। दग्वे तापिते यथा—आध्माततामृच्छविः ।।२३६।। वातरोग आयुर्वेदप्रसिद्धः। अथास्फोतः कोविदारार्कपर्णयोः। आस्फायते आस्फोतः। आस्फायेर्डिदित्योतः। कोविदारार्कपर्णौ वृक्षौ। आस्फाता गिरिकर्ण्यां च वनमाल्ल्यां। एते ओषधी। अथाचितः। छादिते शकटोन्मेये पलानामयुतद्वयोः। संगृहीतेपि। आचीयते स्म आचितः। छादिते संगृहीते च वाच्यलिंगः। छादिते यथा—चैत्येषु तेषु कुसुमप्रकराचितेषु। शकटेन उन्मेयः शकटोन्मेयः।

छादिते शकटोन्मेये पलानामयुतद्वयोः ।
संगृहीतेप्यथायस्तः क्लेशिते तेजिते हते ।।२३८।।
क्रुद्धे क्षिप्तेऽथायतिः स्यात्प्रभावोत्तरकालयोः ।
दैर्घ्ये संगेऽप्याकृतिस्तु जातौ रूपे वपुष्यपि ।।२३९।।
आयत्तिर्वासरे स्नेहे वशित्वे स्थाम्नि सीम्नि च ।
आसत्तिः संगमे लोभेप्यापत्तिः प्राप्तिदोषयोः ।।२४०।।

शकटेन वोढुं शक्यो भार इत्यर्थः। पलानामयुतद्वयं दश भाराः। एवं च आचितशब्द एकस्मिन् भारे दशसु च भारेषु वर्त्तते इत्यर्थः। यदमरः। "आचितो दश भाराः स्युः शाकटो भार आचितः" ।।२३७।। संगृहीते यथा—अर्द्धाचितासत्वरमुच्छि(च्छि्)तायाः। अथायस्तः। क्लेशिते तेजिते हते। क्रुद्धे क्षिप्ते। आयस्यति आयस्यते वा आयस्तः। पंचस्वर्थेषु वाच्यलिंगः। क्लेशिते क्षिप्ते च यथा—आयस्तमैक्षत जनश्चटुलाग्रपादं गच्छन्तमुच्छलितचामरचारुमश्वं। तेजिते यथा—आयस्तासिलतोल्लसद्रिपुकुले कालायमानो रणे। हते यथा—मंथायस्तार्णवांभः प्रतिकुहरचलन्मन्दरध्वानधीरः ।।२३८।। क्रुद्धे यथा—आयस्तशक्रनिवहाहननप्रवृद्धः। अथायतिः स्यात्प्रभावोत्तरकालयोः। दैर्घ्ये संगेपि। आयस्यतेऽनया आयतिः। आयततेऽस्यामिति वा स्त्रियां। प्रभावोत्तरकाले च यथा—रहयत्यापदुपेतमायतिः। दैर्घ्ये यथा—बिभ्राणमायतिमतीमवृथाशिरोधम्। संगः संश्लेषः। आकृतिस्तु जातौ रूपे वपुष्यपि। आक्रियतेऽनया आकरणं वा आकृतिः। स्त्रियां। जातौ यथा—क्षत्राकृतिः कोऽपि युवा प्रविष्टः। रूपं संस्थानविशेषः। तत्र यथा—यत्राकृतिस्तत्र गुणा वसन्ति। वपुषि यथा—अलभ्यशोकाभिभवेयमाकृतिः ।।२३९।। आयत्तिर्वासरे स्नेहे

आपद्यपींगितं तु स्याच्चेष्टायां गमनेपि च ।
उत्तप्तं चंचले शुष्कमांससंतप्तयोरपि ॥२४१॥
उचितं विदितेऽभ्यस्ते मिते युक्तेऽप्यथोत्थितम् ।
वृद्धिमत्प्रोद्यतोत्पन्नेषूदितं तूद्गतोक्तयोः ॥२४२॥

वशित्वे स्थाम्नि सीम्नि च । आयतन्तेऽत्र आयतनं वा आयत्तिः। स्त्रियां । सर्वेषु यथा—आयत्तौ कार्यसंपत्तिः । आसत्तिः संगमे लोभे पि । आसदनं आसत्तिः। स्त्रियां । द्वयोर्यथा—बाणाहवे व्याहत-शंभुशक्तेरासक्तिमासाद्य जनार्दनस्य । आपत्तिः प्राप्तिदोषयोः । आपद्यपि । आपदनं आपत्तिः । स्त्रियां । त्रिष्वपि यथा—द्रव्यापत्तौ भवति न मनो विह्वलं कस्य कस्य ॥२४०॥ इंगितं तु स्याच्चेष्टायां गमनेऽपि च । इगु गतौ । इंगनं इंगितं । द्वयोर्यथा—तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च । उत्तप्तं चंचले शुष्कमांस-संतप्तयोरपि । उत्तप्यते स्म उत्तप्तं चंचलसंतप्तयोर्वाच्यलिंगः । चंचले यथा—उत्तप्तसप्तिनिवहाप्रकुतूहलानाम् । शुष्कमांसे यथा—उत्तप्ते कृमयो यथा । संतप्ते यथा—कुपितमदनमुक्तोत्तप्त-नाराचलीलाम् ॥२४१॥ उचितं विदितेभ्यस्ते मिते युक्तेऽपि । उच्यति स्म उचितं । चतुर्ष्वर्थेषु वाच्यलिंगः । विदितं ज्ञानं तत्र यथा—स्पर्शमुष्णमुचितं दधच्छिखी यद्ददाह हविरद्भुतं न तत् । अभ्यस्ते यथा—मम्लनुर्न मणिकुट्टिमोचितो । मातृपार्श्वपरिवर्त्त-नाविव । मिते यथा—उचितरुचितवादी कैर्न वंद्यो मुनीन्द्रः । युक्ते यथा—उचितमनुचितं वा वेत्ति कः पंडितोऽपि । अथोत्थितं । वृद्धिमत्प्रोद्यतोत्पन्नेषु । उत्तिष्ठते स्म उत्थितं । वाच्यलिंगः । वृद्धिमति यथा—गृहादग्निरिवोत्थितः। प्रोद्यतः सोद्वेगस्तत्र यथा—समरायोत्थितस्तदा । उत्पन्ने यथा—उपप्लवाय लोकानां धूमकेतु-

उद्धृतं स्यादुत्तुलिते परिभुक्तोज्झितेऽपि च ।
उषितं न्युषिते प्लुष्टे उच्छ्रितं तूच्चजातयोः ॥२४३॥
प्रवृद्धे स्यादथोद्वान्त उद्गीर्णे निर्मदे द्विपे ।
उदात्तोदातृमहतोर्हृद्ये च स्वरभिद्यपि ॥२४४॥

रिवोत्थितः। उदितं तूद्गतोक्तयोः। उदेति स्म उदितं । उद्यतो स्मेति वा । वाच्यलिंगः । उद्गते यथा—उदिते तु सहस्रांशौ न खद्योता न चन्द्रमाः। उक्ते यथा—अधिरुह्यतामिति महीभृतोदितः कपिके-तनार्पितकरो रथं हरिः ॥२४२॥ उद्धृतं स्यादुत्तुलिते परिभुक्तो-ज्झितेपि च । उद्ध्रियते स्म उद्धृतं । वाच्यलिंगः । उत्तुलिते उत्क्षिप्ते यथा—वल्मीकः किमुतोद्धृतो गिरिरियात्कस्य स्पृशेदा-शयम् । परिभुक्तोषिते यथा—क्षिपेदप्सूद्धृतं ततः । उषितं न्युषिते प्लुष्टे । वसति स्म उषितं । क्ते क्षुधवसस्तेषामितीटि । यजादि ति पृतिघस्वस इति षत्वम् । उषू दाहे तस्य वा मतांतरेणेति उषितं । वाच्यलिंगः । न्युषिते यथा—वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः। प्लुष्टं दग्धं तत्र यथा—उषितशिखरि शाखी दाववह्निः क्व चैषः । उच्छ्रितं तूच्चजातयोः । प्रवृद्धे स्यात् । उच्छ्रयति स्म उच्छ्रितं । वाच्यलिंगः । उच्चे यथा—अत्युच्छ्रितेषु गिरिकुटतटेषु वायोः। जाते यथा—उच्छ्रितां कुरु विराजितांतरा ॥२४३॥ प्रवृद्धे यथा—उच्छ्रितानि पतितानि पतितान्युच्छ्रितानि च । अथोद्वान्त उद्गीर्णे निर्मदद्विपे । उद्वम्यते उद्वमति स्म वा उद्वान्तः । उद्गीर्णे वाच्यलिंगः । तत्र यथा—उद्वान्तगरलैः सर्पैः । निर्मद-द्विपो मदरहितो गजः। उदात्तोदातृमहतोर्हृद्ये च स्वरभिद्यपि । उदादत्ते स्म उदात्तः । स्वरभिदि पुंसि । अन्यत्र वाच्यलिंगः । दातरि यथा—किमदेयमुदात्तानां । महति हृद्ये च यथा—धीरो-

उन्मत्तो मुचकुन्दे स्याद्धत्तूरोन्मादयुक्तयोः ।
उदंतः साधौ वार्त्तायामुद्घातः समुपक्रमे ।।२४५।।
मुद्गरेऽभ्यासयोगाय कुंभकादित्रयेऽपि च ।
पादस्खलन उद्रंगेऽप्युन्नतिस्ताक्ष्र्ययोषिति ।।२४६।।
उदये च समृद्धावप्येधतु नरि पावके ।
क्रंदितं रुदितं हुतौ कलितं विदिताप्तयोः ।।२४७।।

दात्तगुणोत्तरो रघुपतिः। काव्यार्थबीजं स्वरभिदि यथा—निहत्यरीनेकपदे उदात्तः स्वरानिव ।।२४४।। उन्मत्तो मुचकुंदे स्याद्धत्तूरोन्मादयुक्तयोः। उन्माद्यति स्म उन्मत्तः। उन्मादयुक्ते वाच्यलिंगः मुचकुन्दो वृक्षजातिः। धत्तूरे यथा—उन्मत्तकरसास्वादां। उन्मादयुक्ते यथा—उन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः। उदंतः साधौ वार्त्तायां। उद्गतो अन्तोऽस्य उदंतः। साधौ वाच्यलिंगः। तत्र यथा – उदंता दांतचेतसः। वार्त्तायां यथा—कान्तो दान्तः सुहृदुपहृतः संगमात्किंचिदूनः। उद्घातः समुपक्रमे। मुद्गरेऽभ्यासयोगाय कुंभकादित्रयेपि च। पादस्खलन उद्रंगेऽपि। उद्धननं उद्धन्यते अनेन वा उद्घातः। पंचस्वर्थेषु समुपक्रमे आरंभे यथा—आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ।।२४५।। मुद्गरे यथा—उद्घातघातित्तपदालिरयं प्रयाति। योगिनां पवनजयनिमित्तं योऽभ्यासयोगस्तदर्थं कुंभकरेचकपूरकत्रयं। पादस्खलने यथा-ययावनुद्घातसुखेन मार्गम्। उद्गतो रंगोऽस्य उद्रंगः। द्रव्यभेदः। उन्नतिस्ताक्ष्र्ययोषिति। उदये च समृद्धावपि। उद्गता मतिर्यस्या उन्नमनं वा उन्नतिः। स्त्रियां। ताक्ष्र्ययोषित् गरुडपत्नी ।।२४६।। उदयसमृद्धयोर्यथा—असतामनिशं तथाप्यहो गुरुहृद्रोगकरी तदुन्नतिः। एधतुर्नरि पावके। एधते एधतुः। वहिमहिगुह्ये-

किरातः स्यादलपतनौ भूनिम्बम्लेच्छयोरपि ।
किराती कुट्टनी गंगा कृतांतोऽक्षेमकर्मणि ।।२४८।।
सिद्धान्तयमदैवेषु गर्जितो मत्तकुंजरे ।
गर्जितं जलदध्वाने ग्रन्थितं हृतदृब्धयोः ।।२४९।।

धिभ्योऽतुः। (उ० ७७९)। ना मनुष्यः। पावकोऽग्निः। क्रंदितं रुदितं हुतौ। क्रन्दनं क्रंदितं। रुदिते यथा—हा तातेति क्रंदितमाकर्ण्य विषण्णः। हूतिराकारणं। कलितं विदिताप्तयोः। कल्यते स्म कलितं। वाच्यलिंगः। विदिते यथा—अकलितविदैव नियोगाः। आप्ते यथा—पायात्स वः शशिकलाकलितावतंसः। संख्याततुलितक्षिप्रशब्दितेष्वपि मंखः। संख्याते यथा—अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधौ। तुलि यथा—करकलितहराद्रेर्दुष्करं किं हि तस्य। क्षिप्ते यथा—संग्रामे कलितोऽपि शत्रुनिवहस्तुष्टाव कीर्तिं तव। शब्दिते यथा—कलितकीर्तिषु शक्रमुखेषु ।।२४७।। किरातः स्यादलपतनौ भूनिम्बम्लेच्छयोरपि। किरति किरातः। कृ वृ कल्पलीत्पातक्। (उ० २०९) अल्पतनौ यथा—पर्यंताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं। कुब्जानी च तथैव यांति शनकैरात्मेक्षणाशंकिनः। भूनिंबः। किराततिक्ताख्यमोषधं। म्लेच्छे यथा—विदन्ति मार्गं नखरंध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः। किराती कुट्टनी गंगा। गौरादित्वाद्ङीः। कुट्टनी संभली। गंगा जाह्नवी। द्वयोर्यथा—भ्रातर् द्विजपरित्यक्ताकिरातीयं करोतु किम्। कृतांतोऽक्षेमकर्मणि। सिद्धान्तयमदैवेषु। कृतस्यान्तः कृतान्तः। कृतः सिद्धोंऽतोनिष्ठाऽस्य वा। कृतोऽन्तोऽनेन वा कृतांतः। चतुर्ष्वर्थेषु अक्षेमकर्मणि अशुभे कर्मणि यथा—कृती कृतान्तं कुरुते न जातु ।।२४८।। सिद्धान्ते यथा—

आक्रान्ते च गरुत्मांस्तु विहगे पन्नगाशने ।
गभस्तिः स्याद्दिनकरे स्वाहाकिरणयोरपि ॥२५०॥
गोदंतो हरिताले स्यात्संनद्धे दंशितेऽपि च ।
गोपतिः शंकरे षंडे नृपतौ त्रिदशाधिपे ॥२५१॥

कृतान्तमाप्नोति न निर्विवेकः। यमे यथा—कृतांतः कुपितस्तस्मै तस्मिन्दैवं पराङ्मुखम् । दैवे यथा—क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः। गर्जितो मत्तकुंजरे । गर्जति स्म गर्जितः। मत्तकुंजरो मत्तगजस्तत्र गर्जितशब्दो भारतादौ प्रसिद्धः। गर्जितं जलदध्वाने गर्जनं गर्जितं यथा – तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः। जलदेत्युपलक्षणं। तेनान्यत्रापि। यथा—सिन्धुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जितम् । ग्रन्थितं हतदृब्धयोः। आक्रान्ते च। ग्रंथ्यते स्म ग्रंथितं। वाच्यलिंगः। त्रिष्वपि यथा—ग्रंथितं दयितया नवमाल्यं ॥२४९॥ गरुत्मांस्तु विहगे पन्नगाशने। गरुंति विद्यंतेऽस्य गरुत्मान्। विहगे यथा—विदूरभावेन रवेर्गरुत्मतां। पन्नगाशने यथा—किं भक्षणात्त्वं विरतो गरुत्मन्। गभस्तिः स्याद्दिनकरे स्वाहा-किरणयोरपि। गृध्यति गभस्तिः। गृधेर्गमचेति (उ० ६६१) अस्तिक्। स्वाहायां स्त्रियां। शेषयोः पुंसि। दिनकरे यथा—ध्वान्तं हिनस्ति द्युतिभिर्गभस्तिः। स्वाहा अग्निभार्या। किरणे यथा—गभस्तीनां पत्युस्तिततउतुलनां मंडलमगात् ॥२५०॥ गोदन्तो हरिताले स्यात्। संनद्धे दंशितेऽपि च। गुध्यंते गोदन्तः। सीमन्त हेमन्त (उ० २२२) इति साधुः। गां दाम्यति वा। दम्यमीति (उ० २००) साधुः। संनद्धदंशितयोर्वाच्यलिंगः। हरितालं धातुभेदः। तत्र पुंसि। क्लीबेऽपि केचित्। संनद्धो

सहस्रकिरणे चापि ज्वलितौ दग्धभास्करौ ।
जयन्तावैन्द्रिगिरीशौ जयन्त्युमापताकयोः ॥२५२॥
जीवन्त्यामिन्द्रपुत्र्यां च जगतीच्छंदसि क्षितौ ।
जंबूवप्रे जने लोके जामाता दुहितुः पतौ ॥२५३॥

व्यूढकंकटः। दंशितो दष्टः। गोपतिः शंकरे षंढे नृपतौ त्रिदशाधिपे। सहस्रकिरणे चापि। गोर्वृषस्य उस्रायाः पृथिव्याः स्वर्गस्य त्विषां वा पतिः गोपतिः। शंकरे षंढे त्रिदशाधिपे च यथा—मनः प्रीणाति गोपतिः। नृपतौ सहस्रकिरणे च यथा—क्रामत्यंबरखंडमात्रविभवो देशांतरं गोपतिः ॥२५१॥ ज्वलितौ दग्धभास्वरौ। ज्वलति स्म ज्वलितः। वाच्यलिंगः। दग्धे यथा—हुतभुजा ज्वलिता वनान्तः। भास्वरे यथा—ज्वलितं न हिरण्यरेतसं। चयमास्कंदति भस्मनां जनः। जयन्तावैन्द्रि-गिरीशौ। जयति जयन्तः। नृ जि भू इत्यंतः। ऐंद्रिरिन्द्र-सुतः। तत्र यथा—यथा जयंतेन शचीपुरंदरौ। गिरीशे शंभौ यथा—पुरा विजेता जयताज्जयंतः। जयन्त्युमापताकयोः। जीव-न्त्यामिन्द्रपुत्र्यां च। उमायां धवयोगादन्यत्र तु गौरादित्वाद्ङीः। जीवन्ती मधुस्रवा। चतुर्ष्वपि यथा—जगज्जयंती स्वगुणैर्जयन्ती ॥२५२॥ जगतीच्छंदसि क्षितौ। जंबूवप्रे जने लोके। गच्छति जगती। गमेर्ङीः द्वेचेति कर्तृः। अधातुदृदित इति ङीः। छन्दो द्वादशाक्षराजातिः। यदाह—त्रिष्टुप् च जगती चैव। क्षितौ पृथि-व्यां यथा— त्रिःसप्तकृत्वो जगतीपतीनां। जंबूर्जंबूद्वीपस्तस्य वप्रः। तत्र यथा—जगतीजालकटकैः। जनः प्रजा। लोको विष्टपं। तत्र यथा—सत्यं सुंदरि वेधसस्त्रिजतीसारं त्वमेका

सूर्यावर्त्ते वल्लभे च जीमूतो वासवेंऽबुदे ।
घोषकेऽद्रौ भृतिकरे जीवन्ती शमिवंदयोः ॥२५४॥
जीवन्त्यां च गुडूच्यां च जीवातुर्जीवनौषधे ।
जीविते च जंभितं तु विचेष्टितप्रवृद्धयोः ॥२५५॥

कृतिः । जामाता दुहितुः पतौ सूर्यावर्त्ते वल्लभे च । जायां प्रजायामिन्वति तमिति जामाता । जायामिग (उ० ८६०) इति तृः । दुहितुः पतौ यथा – जामातुरग्रेसरतां प्रपद्य ॥२५३॥ सूर्यावर्त्त ओषधिः । वल्लभो दयितः । जीमूतो वासवेंऽबुदे । घोषकेऽद्रौ भृतिकरे । जीवंत्यनेन जीमूतः । जीवेर्मवेत्यूतः । जीवनस्य जलस्य मूतः पुटबंधो वा । पृषोदरादित्वात् । घोषकभृतिकरयोर्वाच्यलिंगः । वासवे यथा–पौलोमीवल्लभः सोऽयं जीमूतो वै प्रवर्षति । अम्बुदे यथा–जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिं । घोषकः पुनः पुनरुच्चैः शब्दकर्ता अद्रौ यथा–धन्यास्ते क्षपयंति जीवितमिदं जीमूतकुंजे क्वचित् । भृत्यां भृतिं वा करोति भृतिकरः। जीवन्ती शमिवंदयोः । जीवन्त्यां च गुडूच्यां च । जीव्यादिति जीवन्ती । रुदि नंदीति टिदंतः । शमिर्वृक्षः । वंदो वृक्षरुहानाम वृक्षः। यो वृक्षस्योपरि प्ररोहति ॥२५४॥ जीवन्तो मधुस्रवा । गुडूची अमृता । जीवातुर्जीवनौषधे । जीविते च । जीव्यतेऽनेन जीवनं वा जीवातुः। जीवेरातुः। पुंक्लीबः। जीवनस्यौषधमुपायः। तत्र यथा – प्राचीमंकुरयंति किंचन रुचो राजीवजोवातवः । जीविते यथा–जीवातवे विसृज शूद्रमुनौ कृपाणं । जंभितं तु विचेष्टितप्रवृद्धयोः । जं(जृं)भायां स्फुटिते चापि । जंभणं जंभितं । चतुर्ष्वपि यथा–रम्यं वदनजंभितं । क्रियावति वाच्यलिंगः ॥२५५॥

जंभायां स्फुटिते चापि त्वरितं वेगतद्वतोः ।
***त्रिगर्तो गणिते देशे त्रिगर्ता कामुकस्त्रियाम् ॥२५६॥**
घुघुर्य्यामथ तृणता तृणत्वे कार्मुकेऽपि च ।
दंशितो वर्मिते दष्टे स्रवन्ती च द्रवन्त्यपि ॥२५७॥
नद्यामोषधिभेदे च द्विजातिर्ब्राह्मणेंऽडजे ।
दुर्जातं व्यसनासम्यक्जातयोरथ दुर्गतिः ॥२५८॥

त्वरितं वेगतद्वतोः । त्वरणं त्वरितं । त्वरते स्म वा । तद्वति वाच्यलिंगः। वेगे यथा–शस्त्रं शस्त्रं न शस्त्री त्वरितमहह हा कर्कशत्वं नखानाम् । तद्वति यथा–त्वरितैस्तुरगैर्ययुः। त्रिगर्त्तो गणिते देशे । त्रयो गर्तोऽस्य त्रिगर्तः । गणितं गणितभेदः । देशे प्रायेण पुंभूम्नि । तत्र यथा–परित्रिगर्तं प्रववर्ष मेघः। त्रिगर्त्ता कामुकस्त्रियां घुर्घुर्य्यां । कामुकी चासौ स्त्री च कामुकस्त्री ॥२५६॥ घुर्घुरी किंकणी । अथ तृणता तृणत्वे कार्मुकेऽपि च । तृणस्य भावः तृणता । तृणवत्ताडयति वा । क्वचिदिति डे पृषोदरादित्वात् । तृणत्वे यथा–तां रत्नतां च तृणतां च निसर्गसिद्धां तेषां पुनर्घटयितु नियतं वराकः । कार्मुके यथा–कामुकानि वनालिकान् तृणताः सहसामुचन् । वल्लभस्तु धनुषि त्रिषु नता तृणता इत्याह । तत्र तु गणिकापक्षे णत्वं चिन्त्यम् । दंशितो वर्मिते दष्टे । दंशेर्ण्यंतात् क्ते दंशितः । दंशः संजातोऽस्य वा वाच्यलिंगः । वर्मिते यथा–दंशितैर्नाशितं बलं । दष्टे यथा–दंदशूकैश्च दंशिता । स्रवन्तीव द्रवंत्यपि नद्यामोषधिभेदे च । स्रवति द्रवति च स्रवन्ती द्रवंती च ॥२५७॥ नद्यां यथा–परकीतिस्रवतीनां न प्रवेशमदत्त यः । ओषधिभेदः आखुपर्णी । द्विजातिर्ब्राह्मणेऽडजे ।

*मु० मू० तालितं स्तनिते वस्त्रे वाद्यभाण्डे गुणे स्तुतौ । त्रिगर्तो०।

नरके निःस्वतायां च दृष्टान्तः स्यादुदाहृतौ ।
शास्त्रेऽथ निकृतं विप्रलब्धे विप्रकृतेऽधमे ।।२५९।।
निरस्तः प्रेषितशरे संत्यक्ते त्वरितोदये ।
निष्ट्यूते प्रतिहते च निमित्तं हेतुलक्ष्मणोः ।।२६०।।

द्विर्जातिर्जन्माऽस्य द्विजातिः । ब्राह्मणेत्युपलक्षणं तेन क्षत्रियवैश्यावपि । यदाह—ब्राह्मणः क्षत्रियो वैश्यः त्रयोवर्णा द्विजातयः । ब्राह्मणेऽडजे च यथा—द्विजातीनां शब्दैर्मुखरितविभाते सुदिवसे । दुर्जातं व्यसनासम्यक्जातयोः । दुर्जायते स्म दुर्जातं । असम्यक् जाते वाच्यलिंगः । व्यसने यथा—दुर्जातबंधुरयमृच्छ हरीश्वरो मे । असम्यक् जाते यथा—दुर्जातास्ते व्यसननिवहाः केन शक्याः विसोढुम् । अथ दुर्गतिः । नरके निःस्वतायां च । निंदिता गतिर्दुगतिः ।।२५८।। नरके स्त्रीपुंसः । निःस्वतायां स्त्रियां । द्वयोर्यथा—त्वत्पादपंकेरुहपांसुलिप्तो । न दुर्गतिं याति जनः कदाचित् । दृष्टान्तः स्यादुदाहृतौ । शास्त्रे । °दृष्टोंऽतो निश्चयोऽत्र दृष्टान्तः । उदाहृतौ यथा—पूर्णचन्द्रोदयाकांक्षी दृष्टान्तोऽत्र महार्णवः । शास्त्रे यथा—अभ्यस्तदृष्टान्तशतस्य तस्य । अथ निकृतं विप्रलब्धे विप्रकृतेऽधमे । निक्रियते स्म निकृतं । वाच्यलिंगः । विप्रलब्धो वंचितः । विप्रकृतः पराभूतः । तयोर्यथा—निकृतोऽपि न याति विक्रियां । अधमः क्रूरः ।।२५९।। निरस्तः प्रेषितशरे संत्यक्ते त्वरितोदिते । निष्ट्यूते प्रतिहते च । निरस्यते स्म निरस्तः । प्रेषिते शरे पुंसि । अन्यत्र वाच्यलिंगः । प्रेषितशरे प्रतिहते च यथा—राज्ञा निरस्तैः रिपवो निरस्ताः । संत्यक्ते यथा—निरस्तनारीसमयादुराधयः । त्वरितोदिते यथा—एते निरस्तवचनाः सूचयन्त्यर्त्तिमातुराम् । निष्ट्यूते यथा—

निवातो वातरहिते दृढसन्नाह आश्रये ।
निर्मुक्तो मुक्तनिर्मोकभुजगे निष्परिग्रहे ।।२६१।।
निशांतं सदने शांते प्रभातेऽप्यथ निर्वृतिः ।
मोक्षे मृत्यौ सुखे सौस्थ्ये निकृतिः शठशाठ्ययोः ।।२६२।।

निरस्तांबुकणोऽम्बुदः । निमित्तं हेतुलक्ष्मणोः। निमियतेऽनेन निमित्तं । पुत्रपित्तेति (उ० २०४) साधुः । हेतुः कारणं । लक्ष्म लक्ष्मणं चक्षुः स्पन्दनादि । हेतौ यथा—पुंसां कुलं न हि निमित्तमुदात्ततायाः । लक्ष्मणि यथा—तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।।२६०।। निवातो वातरहिते दृढसन्नाह आश्रये । निवृत्तो वातोऽत्र निवायते गम्यते वा निवातः । वातरहिते वाच्यलिंगः । अन्यत्र पुंक्लीबः । वातरहिते यथा— निवातनिष्कंपमिव प्रदीपं । दृढश्चासौ सन्नाहश्च दृढसन्नाहः । शस्त्राभेद्यं वर्म्म । तत्र यथा—निवातकवचच्छन्नशरीरास्ते भटा बभुः । आश्रये यथा—एते निवातास्तरवो मुनीनाम् । निर्मुक्तो मुक्तनिर्मोकभुजगे निष्परिग्रहे । निर्मुचति स्म निर्मुक्तः । निष्परिग्रहे वाच्यलिंगः । मुक्तनिर्मोकभुजगे यथा — निर्मुक्तशेषधवलैरचलेन्द्रमंथसंक्षुब्धदुद्यमयसागरगर्भगौरैः । निष्परिग्रहे यथा—निर्मुक्तो मुक्तिसौख्यभाक् । त्यक्तनिर्ग्रंथिकयोरपि मंखः । क्रमेण यथा—निर्मुक्तसर्वभावस्य । निर्मुक्तकवरीभारव्याप्तवक्षस्थलाऽधमे ।।२६१।। निशांतं सदने शान्ते प्रभातेऽपि । निशाम्यति स्म निशांतं । शान्ते वाच्यलिंगः । सदने यथा—इत्यल्पेतरकल्पनाकवलितस्वान्ता निशांतान्तरे । शान्ते यथा—निशांतचित्रे मुनिपुंगवेऽपि । प्रभाते यथा—वसनमपि निशान्ते मेष्यते तत्प्रदातुम् । अथ निर्वृतिः । मोक्षे मृत्यौ सुखे सौस्थ्ये । निर्वरणं निर्वृतिः ।

भर्त्सनेऽभिभवे क्षेपे निःकूतिर्निरुपद्रवे ।
अलक्ष्म्यां दिक्पतौ चापि नियती दैवसंयमौ ॥२६३॥
प्रभूतोद्गते प्राज्ये प्रसूतं जातपुष्पयोः ।
प्रतीतः सादरे प्राज्ञे प्रथिते ज्ञातहृष्टयोः ॥२६४॥

स्त्रियां । मोक्षे यथा—अमूलमंत्रतंत्रं च कार्मणं निर्वृत्तिश्रियः । मृतौ यथा—गंगातटे निर्वृतिमाप भूपः । सुखे सौस्थ्ये च यथा—निर्वृतिर्हि मनसो मदहेतुः । निकृतिः शठशाठ्ययोः । भर्त्सनेऽभिभवे क्षेपे । निक्रियतेऽसौ अनया वा निकृतिः। शठे वाच्यलिंगः। अन्यत्र स्त्रियां । शठे यथा—वर्जयेन्निकृतीन्खलान् । शाठ्ये यथा—अर्थस्य मूलं निकृतिः क्षमा च ॥२६२॥ भर्त्सनं कोपेन दंडाविष्करणं । अभिभवो घातप्रतिघातादिः । क्षेपो निन्दामात्रं । एतेषु त्रिषु यथा—निकृतिपरेषु परेषु भूरिधाम्नः । निःकूतिर्निरुपद्रवे । अलक्ष्म्यां दिक्पतौ चापि । निष्क्रांतकूतेः पोडायाः । निश्चिता-कूतिरतो वा निःकूतिः । निरुपद्रवे वाच्यलिंगः । अलक्ष्म्यां स्त्रियाम् । दिक्पतौ पुंसि । निरुपद्रवे यथा—निःकूतिर्धर्म्मे कर्मठः। शेषयोर्यथा-पुण्यशेषेण विनाकृतः पुमान्। स याति निःकूत्युपभोग्यतां हठात् । नियती दैवसंयमौ । नियम्यतेऽनया नियमनं वा नियतिः स्त्रियां । दैवे यथा—नियतिः केन विलंघ्यते सखि । संयमे यथा—नियतिं विधाय चित्ते ॥२६३॥ प्रभूतमुद्गते प्राज्ये । प्रभवति स्म प्रभूतं । वाच्यलिंगः। द्वयोर्यथा—तृणैः प्रभूतैः परिभूषिता भूः। प्रसूतं जातपुष्पयोः। प्रसूते स्म प्रसूतं । जाते वाच्यलिंगः । तत्र यथा—भूभृद्भिरिक्ष्वाकुकुलप्रसूतैः। पुष्पे यथा—चूतप्रसूतैः कृतनव्यबाणः । प्रतीतः सादरे प्राज्ञे प्रथिते ज्ञातहृष्टयोः। प्रत्येति स्म प्रतीयते स्म वा प्रतीतः । पंचस्वर्थेषु वाच्यलिंगः। सादरप्राज्ञयोर्यथा—तत्प्रती-

प्रहतं विस्तृते क्षुण्णे पलितं पंकतापयोः ।
पक्वकेशे *केशपाके पंडितः सिल्हधीमतोः ॥२६५॥
प्रणीत उपसंपन्ने कृते क्षिप्ते प्रवेशिते ।
संस्कृताग्नौ पर्याप्तं तु शक्ते पूर्णे निवारणे ॥२६६॥

तमनसामुपेयुषां द्रष्टुमावहनमग्रजन्मनां । प्रथितज्ञातयोर्यथा—सोय वटः श्याम इति प्रतीतः । हृष्टे यथा—प्रत्युज्जगामागमन-प्रतीतः ॥२६४॥ प्रहतं विस्तृते क्षुण्णे । प्रहण्यते स्म प्रहतं । वाच्यलिंगः । विस्तृते विस्तीर्णः । क्षुण्णो व्युत्पन्नः । द्वयोर्यथा—शास्त्रप्रहतबुद्धिभिः । ताडितेऽपि । यथा—संगीताय प्रहतमुरजा स्निग्धगंभीरघोषम् । पलितं पंकतापयोः। पक्वकेशे । केशपाके । पलति पलितं । हृश्यारुहि (उ० २१०) इति इतः । पलितानि सन्त्यस्य वा अभ्रादित्वादः । पंके पंकोपचारात् पानीयपृष्ट-वर्त्तमाने मलविशेषे तापे च यथा—पानीयनिर्गमनमार्गविवर्त्तनेन यानाद्रदाः पलितधूसरताममीयत् । पक्वश्चासौ केशश्च पक्वः केशोऽस्येति वा पक्वकेशः । कर्मधारयपक्षे पुंक्लीबः । बहु-व्रीहिपक्षे वाच्यलिंगः । बहुव्रीहिपक्षे यथा—न तेन वृद्धो भवति येनास्य पलितं शिरः । केशस्य पाकः शौक्ल्यं केशपाकः । तत्र पक्वकेशे च यथा—कैकेयीशंकये चाह पलितच्छद्मना जरा । पंडितः सिल्हधीमतोः । पंड्यते स्म पंडितः । पंडा बुद्धिः संजाताऽस्येति वा धीमति वाच्यलिंगः । सिल्हो गंधद्रव्यं । धीमति यथा—यः क्रियावान्सः पंडितः ॥२६५॥ प्रणीत उपसंपन्ने कृते क्षिप्ते प्रवेशिते । संस्कृताग्नौ । प्रणीयते स्म प्रणीतः । संस्कृताग्नौ पुंसि । शेषेषु वाच्यलिंगः। उपसंपन्नं रूपरसादिनिष्पन्नमन्नादि ।

*प्र० शैलजाते ।

यथेष्टे *प्रसृतस्त्वद्धांजलौ वेगिविनीतयोः ।
तते च प्रसृता जंघा प्रमीतं प्रोक्षिते मृते ॥२६७॥
पर्यस्तं तु हते स्रस्ते प्रपातः °सौप्तिके भृगौ ।
पर्वतो गिरिदेवर्ष्योः पक्षतिः प्रतिपत्तिथौ ॥२६८॥

तत्र यथा–प्रणीतमन्न बुभेजे द्विजेन्द्रः । कृते यथा–भवत्प्रणोतमाचारमामनंति हि साधवः । क्षिप्ते यथा – धनुष्प्रणीतैः विशिखैः प्रणुन्नः । प्रवेशिते यथा–प्रधानवर्गस्य पुरः प्रणीतः संरकृताग्नौ यथा–प्रणीते जुहुयाद्धव्यम् । पर्याप्तं तु शक्ते पूर्णे (तृप्तौ) निवारणे । यथेष्टे । पर्याप्यते स्म पर्याप्तं । शक्तपूर्णयोर्वाच्यलिंगः । शक्ते यथा – पर्याप्तोपि स योद्धुमुद्धतमतिर्धत्ते नयान्नीचताम् । पूर्णे यथा–पर्याप्तपुष्पस्तबकस्तनीभ्यः । निवारणे यथा–पर्याप्तं तप्तवारिभिः । निवारणेऽव्ययमपि ॥२६६॥ यथेष्टे यथा–पर्याप्तमाप्ताः प्रविशन्तु मध्ये । प्रसृतस्त्वद्धांजलौ वेगिविनीतयोः । तते च । प्रसरति स्म प्रसृतः । अद्धांजलौ पुमान् । अन्यत्र वाच्यलिंगः । अद्धांजलौ यथा-एतां मे प्रसृताक्षि विक्षिपसि किं तीक्ष्णां कटाक्षच्छटाम् । वेगिनि यथा–पश्यैप प्रसृतो हस्ती । विनीते तते च यथा–नानाशास्त्रार्थसोद्बोधशुद्धप्रसृतबुद्धयः । प्रसृता जंघा । यथा–प्रसरत्प्रसृताहतः । प्रमीतं प्रोक्षिते मृते । प्रमीयते स्म प्रमीतम् । वाच्यलिंगः । प्रोक्षितं मखे हतं । यथा–प्रमीताः पशवो मखे । मृते यथा–भीष्मं भटैरप्रमितैः प्रमीतैः ॥२६७॥ पर्यस्तं तु हते स्रस्ते । पर्यस्यते स्म पर्यस्तं । वाच्यलिंगः । हते यथा–स्वहस्तपर्यस्तसमस्त-

* मु०मू० यथष्ट दोष कृच्छे च पर्याप्तिः परिच्छेदे । प्राप्ते कामे प्रसृतो०
° प्र० निर्झरे ।

पक्षमूले प्रसूतिः स्यादपत्ये प्रसवेऽपि च ।
पद्धतिः पथि पंक्तौ च प्रकृतिर्योनिशिल्पिनोः ॥२६९॥
पौरामात्यादिलिंगेषु गुणसाम्यस्वभावयोः ।
प्रत्यात्पूर्विकायां च प्रततिर्विस्तृतिर्लता ॥२७०॥

शत्रुः । स्रस्ते यथा–पर्यस्तहारावलिः । प्रपातः सौप्तिके भृगौ । प्रपत्यनेनास्मिन्वा प्रपातः । सौप्तिकं रात्रिधाटी । तत्र यथा–यस्य प्रपातभयतो निशि न प्रसुप्ताः । भृगुरद्रितटः । पर्वतो गिरिदेवर्ष्योः । पर्वाणि सन्त्यस्य । मरुत्पर्वणस्त (७ । २ । १५) इति तः । पर्वति वा दृ सृ मृ भृ इत्यतः । गिरौ यथा–पर्वतेप्रमाणी च पदार्थत्वं व्यवस्थितं । देवर्षौ यथा–द्वन्द्वं नारदपर्वतौ । पक्षतिः प्रतिपत्तिथौ । पक्षमूले । पक्षस्य मूलं पक्षतिः । पक्षातिरिति तिः (७ । १ । ८९) स्त्रियां । द्वयोर्यथा–गगनसरसि चन्द्रौ हंसवत्पक्षती द्वे ॥२६८॥ प्रसूतिः स्यादपत्ये प्रसवेऽपि च । प्रसूयते प्रसवनं वा प्रसूतिः । स्त्रियां । अपत्ये यथा–मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा । प्रसवे यथा–आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा । पद्धतिः पथि पंक्तौ च । पादाभ्यां हन्यते पद्धतिः । हिमहतिकाषिये पदिति (३।२।९६) पदादेशः । स्त्रियां । पथि यथा–शिवपुरपद्धतिरेषा । पंक्तौ यथा–नैषाप्यत्र त्रियामारमणरुचिशुचिः पद्धतिर्मौक्तिकानाम् । प्रकृतिर्योनिशिल्पिनोः । पौरामात्यादिलिंगेषु गुणसाम्यस्वभावयोः । प्रत्ययात्पूर्विकायां च । प्रक्रियतेऽनया प्रकृतिः । प्रत्यात्प्रथमं क्रियते वा । अष्टस्वर्थेषु स्त्रियां । योनिरुपादानकारणं तत्र यथा–यामाहुः सर्वबीजप्रकृतिरिति । शिल्पिनि यथा–कृतज्ञाप्रकृतिः कुतः ॥२६९॥ पौरेषु पुरवास्तव्येषु यथा – तथैव सोऽभूदन्वर्थो

प्रवृत्तिर्वृत्तौ वार्त्तायां प्रवाहे *प्रार्थितं हते ।
याचिते शत्रुसंरुद्धे पार्वती द्रुपदात्मजा ॥२७१॥

राजा प्रकृतिरंजनात् । अमात्यादयः सप्तराज्यांगानि । **यदमरः**। स्वाम्यमात्यः सुहृत्कोशो राष्ट्रदुर्गबलानि च । राज्यांगानि प्रकृतयः। तत्र यथा-अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया । लिंगं स्त्रीपुंनपुंसकं । महदादिकं च । क्रमेण यथा— तृतीया प्रकृतिः षंढः महदाद्याः प्रकृतिविकृतयः सप्त । गुणानां सत्वरजस्तमसां साम्यं गुणसाम्यं । तत्र यथा — बहिर्विकारं प्रकृतेः पृथग्विदुः । पुरातनं त्वां पुरुषं पुराविदः । स्वभावे यथा—विरराम महीयांसः। प्रकृत्या मितभाषिणः। प्रत्ययात्पूर्विकायां यथा—सोभवद्वारवधूसमागमः । प्रत्ययप्रकृतियोगसंनिभः । प्रततिविस्तृतिर्लता । प्रतननं प्रतन्यते वा प्रततिः । स्त्रियां । द्वयोर्यथा— विटपीव द्विपेन्द्रोऽयं पुष्पप्रततिभिर्वृतः ॥ २७० ॥ प्रवृत्तिर्वृत्तौ वार्त्तायां । प्रवाहे । प्रवर्त्तनं प्रवृत्तिः । स्त्रियां । वृत्तौ यथा— प्रवृत्तिरासीच्छब्दानां चारितार्थाचतुष्टयी । वार्त्तायां यथा— जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् । प्रवाहे यथा—प्रवृत्तिरेषा भूतानाम् । प्रार्थितं हते । याचिते शत्रुसंरुद्धे । प्रार्थ्यते स्म प्रार्थितं । वाच्यलिंगः । हते यथा—किमर्थं प्रार्थितः पशुः । याचिते यथा—भविष्यति प्रार्थितदुर्लभः कथं । शत्रुसंरुद्धे यथा— अन्योन्यप्रार्थितैर्भटैः । पार्वती द्रुपदात्मजा । शल्लकी जीवनी गौरी । पर्वतस्येयं पर्वते भवा वा पार्वती । पार्वत्यवतारत्वाद्वा ।

*मु० प्रचितः शकटोन्मेषे पलानामयुतद्वये । प्रकृतं तु प्रस्तुतेऽपि प्रकृतः प्रकृतिस्थिते ।

शल्लकी जीवनी गौरी पिंडितं गुणिते घने ।
पिशितं मांसं पिशिता मांसिका पीडितं पुनः ॥२७२॥
बाधिते करणे स्त्रीणां यंत्रान्तर्मर्दितेऽपि च ।
***प्रोक्षितं सिक्तहतयोर्भरतः शबरे नटे ॥२७३॥**

द्रुपदात्मजा द्रौपदी ॥२७१॥ शल्लकी गजप्रिया । जीवनी मधुस्रवा । गौर्यां यथा—लीलाकमलपत्राणि गणयामास पार्वती । पिंडितं गुणिते घने । पिंड्यते स्म पिंडितम् । वाच्यलिंगः। गुणिते यथा—षष्टांशेन तु पिंडितं । घने यथा—भ्राम्यत्पिंडितचंडिमा कथमहो नाद्यापि विश्राम्यति । पिशितं मांसं । पिंशति पिशितं । कुसिपिशीति किदितः । यथा — तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा । पिशिता मांसिका । मांसिका गन्धद्रव्यं । पीडितं पुनः । बाधिते करणे स्त्रीणां यंत्रांतर्मर्दितेऽपि च । पीड्यते पीडितं ॥२७२॥ बाधिते यंत्रान्तर्मर्दिते च वाच्यलिंगः। बाधिते यथा—निद्रा तात कुतस्तेषां ये क(ऋ)णव्याधिपीडिताः। स्त्रीणां करणं वात्स्यायनप्रसिद्धं । यन्त्रांतर्मर्दिते यथा—वाचः श्रीकालिदासस्य पीडितेक्षुरसोपमाः । प्रोक्षितं सिक्तहतयोः । प्रोक्ष्यते स्म प्रोक्षितं । वाच्यलिंगः सिक्ते यथा — कन्याभिः प्रोक्षितैर्वृक्षैर्लक्षसो लक्षितं वनं । हतोऽर्थाध्वज्ञे यथा—मंत्रप्रोक्षितवालवर्करशिरः पूजोपहारैः क्षणात् । भरतः शबरे नटे । क्षेत्रे रामानुजे शास्त्रे दौष्यंतावृषभात्मजे । तंतुवाये । बिभर्ति भरतः। दृ पृ भृ इत्यतः । अष्टस्वर्थेषु शबरे नटे च यथा—पल्लीव भाति

*मु० पुटितः स्यूतपाटिते । हस्तिपुटे (हस्तपुटे) पृषतस्तु मृगे बिन्दौ खरोहिते । श्वेतबिन्दुयुतेऽपि स्यात्प्रेषितं प्रेरिते गते ।

क्षेत्रे रामानुजे शास्त्रे दौष्यंतावृषभात्मजे ।
तन्तुवाये भारतं तु शास्त्रद्वीपांशभिद्यपि ॥२७४॥
भारती पक्षिणीवृत्तिभिदोर्वाच्यथ भावितं ।
वासिते प्राप्ते भासंतो भे सूर्ये रम्यभासयोः ॥२७५॥

भरतैर्नवनाद्यशाला ॥२७३॥ क्षेत्रे क्षेत्रविशेषे यथा—इहैव भरतक्षेत्रे। रामानुजे यथा—मातुः पापस्य भरतः प्रायश्चित्तमिवाचरत् । शास्त्रं नाट्यशास्त्रं तत्र यथा—तदिति भरतविद्भिर्लक्षितं नाट्यलक्ष्म । दौष्यंतौ दुष्यंतापत्ये यथा—भरतः कार्तवीर्यश्च षडेते चक्रवर्तिनः। ऋषभ आदिनाथस्तस्य आत्मजः पुत्रस्तत्र यथा—अवाप केवलज्ञानं भरतो भरताधिपः । तन्तुवायः कुविंदः। मुनिविशेषेऽपि यथा—अभ्यधाद्भरतो मुनिः। भारतं तु शास्त्रे द्वीपांशभिद्यपि। भरतानधिकृत्य कृतो ग्रन्थो भारतम्। अमोऽधिकृत्य ग्रंथे इत्यण्। भरतमेव वा भारतं। स्वार्थेऽण्। शास्त्रेऽण् । शास्त्रे यथा—सृष्टा गौरीदृशी येन भवे विस्तारिभारता । द्वीपांशभेदे यथा—एतेन भारतमिलावृतवद्विभाति ॥२७४॥ भारती पक्षिणीवृत्तिभिदोर्वाचि। भरतो विभ्रत इयं भारती। पक्षिणीभित् पक्षिणीविशेषः। वृत्तिभिदि यथा—कैशिक्यारभटी चैव सात्त्वती भारती तथा। वाचि वचने तद्देवतायां च यथा—तेषां भारति भारती सुरसरित्कल्लोललोलोर्म्मिभिः। अथ भावितं। वासिते प्राप्ते। भाव्यते स्म भावितं। वाच्यलिंगः। वासिते यथा—भावितं मृगमदेन तन्मधु। प्राप्ते यथा—भाविताथैर्वनीपकैः। साक्षात्कृतोत्पादिताश्वस्तभक्तेष्वपि मंखः। साक्षात्कृते यथा—भावितात्मा भुवो भर्त्तुः। उत्पादिते यथा—तैस्तैर्वार्यैर्विबुधगदितैर्भाविता तस्य भक्तिः। आश्वस्ते यथा—भावितैः कतिपयैः

मथितं निर्जलघोले व्यालोडितनिघृष्टयोः ।
मालती युवतौ काकमाच्यां जातीविशल्ययोः ॥२७६॥
ज्योत्स्नायां निशि नद्यां च मुषितं खंडिते हृते ।
मूर्छितं सोच्छ्रये मूढे रजतो दंतिदन्तयोः ॥२७७॥

पदातिभिः। भक्ते सेविते यथा—पुनः पुनश्चेतसि येन भावितं। भासंतो भे सूर्ये रम्यभासयोः। भासते भासंतः। तृ जृ भूवदीत्यंतः। रम्ये वाच्यलिंगः। भासः पक्षिभेदः। सर्वेषु यथा—द्यां भासयति भासंतः ॥२७५॥ मथितं निर्जलघोले व्यालोडितघृष्टयोः। मथ्यते स्म मथितं। व्यालोडितनिघृष्टयोर्वाच्यलिंगः। निर्जलघोले व्यालोडिते च यथा—युवतीकरनिर्मथितं मथितं पिब हे नृप सर्वरुजापहरं। निघृष्टे यथा—मथितवंशसमुत्थितवह्निना। मालती युवतौ काकमाच्यां जातीविशल्ययोः। ज्योत्स्नायां निशिनद्यां च। मलते मालती। युतपित्तेति साधुः। गौरादित्वाङ्गीः। सप्तस्वर्थेषु युवतिः स्त्री। काकमाचीविशल्या ओषधिः। जात्यां यथा—ते चोन्मीलितमालती सुरभयः प्रौढाः कदंबानिलाः॥२७६॥ ज्योत्स्ना चन्द्रप्रभा। निशा रात्रिः। नद्यां नदीविशेषे यथा—मालतीतीरजष्टं कणः। मुषि(ण्डि)तं खंडिते हृते। मुष्यते स्म मुषितं। वाच्यलिंगः। खंडिते यथा-अलिमुखमुषितसरोरुहमकरंदस्यंदसुरभिता सरसो। हृते यथा—सत्यं किं विधुरासि वत्स मुषिता केनाम्ब दुर्मेधसा। मूर्च्छितं सोच्छ्रये मूढे। मूर्च्छा संजाताऽस्य मूर्छितं। तदस्य संजातमितीतः। वाच्यलिंगः। सोच्छ्रये यथा—चन्दनासक्तभुजगनिश्वासानिलमूर्छितः। मूढो जातमोहः। तत्र यथा—पपात मूर्छितः पृथ्व्यां। रजतो दंतिदंतयोः धवले शोणिते हारे दुर्वर्णे हृदशैलयोः। रजत्यनेन रजतं पृषिरंजीति किदतः सप्तस्वर्थेषु। शैले पुंसि

धवले शोणिते हारे दुर्वर्णे ह्रदशैलयोः ।
रसितं स्वर्णादिलिप्ते रुतस्तनितयोरपि ॥२७८॥
[1]रेवती बलभार्यायां नक्षत्रभिदि मातृषु ।
रैवतः स्यादुज्जयंते सुवर्णालौ पिनाकिनि[2] ॥२७९॥

॥२७७॥ धवले शोणिते च गुणे पुंसि तद्वति वाच्यलिंगः । शेषेषु पुंक्लीबः। दंतिनो दंतौ दंतिदंतौ । तत्र यथा—नयै राजन्ति राजानो रजतैरिव कुंजरा । धवले शोणिते च यथा—प्रतिफलति करौघे संमुखावस्थितायां । रजतकटकभित्तौ सान्द्रचन्द्रासु गौर्याः । ह्रदे शैले च यथा—क्रीडन्ति कांताः रजतैश्च कान्तैः । रसितं स्वर्णादिलिप्ते रुतस्तनितयोरपि । रसण् आस्वादनस्नेहनयोः । रस्यते रसनं वा रसितम् । रसः संजातोऽस्य वा । स्वर्णादिलिप्ते वाच्यलिंगः । कनकरसितकुंभैः शोभते भूपवेश्म । रुतं वासितं तत्र यथा—सरसं सारसरसितं । स्तनिते मेघगर्जिते यथा—मुहुरत्र तस्य रसितैः पयोमुचः ॥२७८॥ रेवती बलभार्यायां नक्षत्रभिदि मातृषु । रेवते रेवती । दृ पृ भृ इति बहुवचनादतः । नक्षत्रभिदि रेवतरो ह्रिणेति ङीः । शेषयोस्तु रेरस्यास्तीति मतौ नाम्नीति वत्वे उदितत्वाङ्ङीः । बलभार्यायां यथा—रेवती दशनोच्छिष्टपरिपूतपुटे दृशौ । नक्षत्रभिदि यथा—सोमे न सौम्यं भृगुरेवती च । मातृषु यथा—स पुनर्जातमात्रोऽम्बारेवतीभिरगृह्यते। रैवतः स्यादुज्जयन्ते सुवर्णालौ पिनाकिनि । रायावतो रैवतः। उज्जयन्ते यथा—असौ गिरिं रैवतकं ददर्श । सुवर्णालुः सुवर्णकरकपात्रिका तत्र यथा—रैवते न पयः पपौ । पिनाकिनि

१ मु० रमतिर्नायके स्वर्गे रमितं स्तनिते रुते । २ प्र० हरेऽसुरे ।

रोहितो लोहिते मीने मृगे रोहितद्रुमे ।
रोहितं त्वृजुशक्रास्त्रे धीरे ललितमीप्सिते ॥२८०॥
लडिते हारभेदे च लोहिते मंगले नदे ।
वर्णभेदे लोहितं तु कुंकुमे रक्तचन्दने ॥२८१॥
गोशीर्षे रुधिरे युद्धे वर्द्धितं छिन्नपूर्णयोः ।
प्रसृते वनितं तु स्यात्प्रार्थिते सेवितेऽपि च ॥२८२॥

यथा— तं दैवतं रैवतनामधेयम् ॥२७९॥ रोहितो लोहिते मीने मृगे रोहीतकद्रुमे । रोहति रोहितः । दृश्यारुहीतीतः । लोहिते गुणे पुंसि । तद्वति वाच्यलिंगः । तत्र यथा—मसृणघुसृणराजी रोहितो रोहिणीशः । मीने मृगे च यथा—ऋगिति निरपराधान् रोहितान् घातयंति । रोहितं त्वृजुशक्रास्त्रे धीरे । ऋजुशक्रास्त्रे यथा—जातम् रोहितमेव केवलपमज्याबद्धमैन्द्रं धनुः। धीरे कुंकुमे यथा—आलोडितै रोहितपंकपूरैः। ललितमीप्सिते । लडिते हारभेदे च । ललण् ईप्सायां । लड् विलासे वा । लल्यते स्म लडति स्म वा ललितं । ईप्सितलडितयोर्वाच्यलिंगः । तयोर्यथा—गाढोत्कंठाललितललितै रंगकैस्ताम्यतीति ॥२८७॥ हारभेदो हारविशेषः । लोहिते मंगले नदे । वर्णभेदे । रोहितशब्दस्य रस्य लत्वे लोहितः । मंगलो भौमः । तत्र यथा—अश्विनी लोहिते श्रेष्ठः । नदे यथा—रोहितानां भवेन्नांबुसौहित्यं लोहितेपि किं । वर्णभेदे गुणे पुंसि तद्वति वाच्यलिंगः । तत्र यथा—लोहितायति कदाचिदातपे । लोहितं तु कुंकुमे रक्तचन्दने गोशीर्षे रुधिरे युद्धे । रुधिरे पुंक्लीबः । कुंकुमे यथा—गोरोचना लोहितं च शिलावदलमेव च ॥२८१॥ गोशीर्षं रक्तचन्दनं च चंदनविशेषो । रुधिरे यथा—ताः पूतनालोहितपानमत्ताः । युद्धं संग्रामः । वर्द्धितं च्छिन्नपूर्णयोः । प्रसृते । वर्द्धण् छेदनपूर्णयोः ।

वनितोत्पादितात्यर्थरागनार्यपि नार्यपि ।
वसतिः स्यादवस्थाने निशायां सदनेऽपि च ॥२८३॥
व्रततिस्तु प्रतानिन्यां विस्तारेऽप्यथ वापितम् ।
बीजाकृते मुंडिते च व्याघातो योगविघ्नयोः ॥२८४॥

वृधूङ् वृद्धौ वा ण्यन्तः वर्द्ध्यते स्म वर्द्धितं। वाच्यलिंगः। छिन्ने यथा—कुठारैर्वर्द्धितस्तरुः। पूर्णे यथा—द्रविणवर्द्धितकोशनिरीक्षणात्। प्रसृते यथा—वर्द्धिता कीर्तिजाह्नवी। वनितं तु स्यात् प्रार्थिते सेवितेऽपि च। वन भक्तो। वन्यते स्म वनितं। वाच्यलिंगः। द्वयोर्यथा—वनितं केन नो वनं ॥२८२॥ वनितोत्पादितात्यर्थ-रागनार्यपि नार्यपि। उत्पादितात्यर्थरागा नारी सामान्यनारी च। द्वयोर्यथा—वनेचराणां वनितासखानां। वसतिः स्यादवस्थाने निशायां सदनेऽपि च। वसन्त्यस्यामिति वसतिः। खल्यमीति (उ० ६५३) अतिः। स्त्रियां। अवस्थाने यथा—गन्तव्या ते वसतिरलकानामयक्षेश्वराणाम्। निशायां यथा—कतिचिदुषित्वा वसतीः। सदने यथा—देव्याविभ्रमसद्म पद्मवसतेः ॥२८३॥ व्रततिस्तु प्रतानिन्यां विस्तारेऽपि। व्रियतेऽनया व्रततिः। वृगोर्व्रतचेति (उ० ६५५) अतिः। प्रततेर्जपादित्वात्पस्य वत्वं। वा। स्त्रियां। प्रतानिनी वल्ली तस्यां यथा—धराधरेन्द्रं व्रतती-ततीरिव। विस्तारे यथा—वात्या संवेगविष्वग्व्रततिबलयित-स्फीतधूमाधिवास। अथ वापितं। बीजाकृते मुंडिते च। वाप्यते स्म वाच्यलिंगः। बीजाकृतं उप्तबीजं। द्वयोर्यथा—सुक्षेत्रमिव नो कस्य प्रीतये वापितं शिरः। व्याघातो योगविघ्नयोः। घाते। व्याहन्यतेऽनेन व्याहननं वा व्याघातः। योगे यथा—नवव्याघात-

१ मु० विस्तारे वहतुः पथि। वृषभे वहतिर्धेन्वा सचिवेऽप्यथ वापितम्॥

घातेऽथ व्यायतं दोर्घव्यापृतेऽतिशये दृढे ।
वासन्तः परपुष्टे स्यात्करभेऽवहिते विटे ॥२८५॥
वासन्ती माधवीयूथीपाटलास्वथ वासितम् ।
वस्त्रच्छन्ने ज्ञानमात्रे *भावितेऽप्यथ वासिता ॥२८६॥
स्त्रीकरिण्योः विवस्वांस्तु देवसूर्ये विश्रुतं ।
ज्ञाते हृष्टे प्रतीते च विदितं बुधिते श्रुते ॥२८७॥

वज्रयोः। विघ्ने यथा—कार्यव्याघातजातं हरतु गणपतिः। ॥२८४॥ घाते यथा—व्याघ्रव्याघातजर्जरः। अथ व्यायतं दीर्घव्यापृतेऽतिशये दृढे। व्यायच्छते स्म व्यायतं। वाच्यलिंगः। अतिशेते अतिशयः। अतिशयवानित्यर्थः। दीर्घे दृढे च यथा—युवायुगव्याहतबाहुरंसलः। शेषयोर्यथा—प्रान्तव्यायतदीर्घलोचन-दलैः। वासन्तः परपुष्टे स्यात्करभेऽवहिते विटे। वसन्ते भवा वासंतः भर्त्तुसंध्यादेरण् (६।३।८९)। अवहितः सावधानः। तत्र वाच्यलिगः[१] सर्वेषु यथा—वासन्तैर्भासितं वनम् ॥२८५॥ वासन्ती माधवीयूथीपाटलासु। वसन्ते पुष्यति वासन्ती। ऋतवण् (६।४।१२५) अणन्तत्वात्ङीः। सर्वाः कुसुमलताः। अथ वासितं। वस्त्रच्छन्ने ज्ञानमात्रे भावितेऽपि। वास्यते स्म वासितं। वस्त्रच्छन्नभावितयोर्वाच्यलिंगः। वस्त्रच्छन्ने यथा—चीनांशुकैर्वासितहर्म्यगर्भे। ज्ञानमात्रे यथा—वासितं पादपेष्वपि। भाविते यथा-तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तदृष्टिः। अथ वासिता ॥२८६॥ स्त्रीकरिण्योः। द्वयोर्यथा—एताः शृंगारितांग्यः करकमलजुषो वासिताः संचरन्ति। विविस्वांस्तु देवे सूर्ये।

* मु० भाविते त्रिहगारवे। वासिता करिणीनार्योर्विहितं तु कृते श्रुते॥
विदितं स्वीकृते ज्ञाते विवस्वान् देवसूर्ययोः।

विगतो निष्प्रभे वीते विविक्तो वसुनंदके ।
विविक्तं स्यादसंपृक्ते रहःपूतविवेकिषु ॥२८८॥
विधुतं कंपिते त्यक्ते विकृतो रोग्यसंस्कृतः ।
बीभत्सश्च विनीतस्तु निभृते निर्जितेन्द्रिये ॥२८९॥

विवस्तेजोऽस्त्यस्य विवस्वान् । देवे यथा – विवस्वंतः स्वांते भयमुपययुस्तस्य वचसा । सूर्ये यथा–अधोविवस्वान् परिवर्त्तमानः। अथ विश्रुतं । ज्ञाते हृष्टे प्रतीते च । विश्रूयते स्म विश्रुतं । वाच्यलिंगः । ज्ञातमेकेनापि । प्रतीतं सर्वप्रसिद्धं । तयोर्यथा– रामोऽसौ भुवनेषु विश्रुतगुणः । विदितं बुधिते श्रुते । विद्यते विदितं । वाच्यलिंगः । द्वयोर्यथा–ननु जनविदितैर्भवद्वचलीकैश्चिरपरिपूरितमेवकर्णयुग्मम् ॥२८७॥ विगतो निष्प्रभे वीते । विगच्छति स्म विगतः । वाच्यलिंगः विशेषेण इतं गतं वीतं द्वयोर्यथा–विगततिमिरपंकं दश्यति व्योमयावत् । विविक्तो वसुनंदके । विविच्यते स्म विविक्तः । वसुनंदकः स्फुरकः । विविक्तं स्यादसंपृक्ते रहःपूतविवेकिषु । वाच्यलिंगः । असंपृक्ते पूते च यथा–प्रसन्नदिक्पांसु विविक्तवातम् । रहसि एकान्ते यथा–विविक्तं स्थानमाश्रयेत् । विवेकिनि यथा–विविक्तो धर्मतत्परः ॥२८८॥ विधुतं कंपिते त्यक्ते । धुञ् कंपने । मतान्तरेण ह्रस्वांतः। विधूयते स्म विधुतः। वाच्यलिंगः । कंपिते यथा–कोपेन विधुताधरः । त्यक्ते यथा–रहसि विधुतवस्त्रा कान्तमालिंगति स्त्री । विकृतो रोग्यसंस्कृतः। बीभत्सश्च । विकुरुते स्म विकृतः । वाच्यलिंगः । रोगिणि यथा–हा हा क्षणादिदमभूद्विकृतं शरीरं । असंस्कृते यथा–विकृतवचनो मूर्खः कस्य प्रयाति न हास्यतां । बीभत्से यथा–कीचकास्त्रेण भीमोऽयं समन्ताद्विकृतः

वणिजे साधुवाह्यश्वे विनयग्राहिते हृते ।
विनतः प्रणते भुग्ने विनता पिटकाभिदि ॥२९०॥
सुपर्णायां विहस्तस्तु विह्वले पंडकेऽपि च ।
विश्वस्तः कृतविश्वासे विश्वस्ता विधवस्त्रियाम् ॥२९१॥

कृतः । विनीतस्तु निभृते निर्जितेन्द्रिये वाणिजे (ज्ये) साधुवाह्यश्वे विनयग्राहिते हृते । विनीयते स्म विनीतः । षट्स्वर्थेषु वणिजे साधुवाह्यश्वे च पुंसि । शेषेषु वाच्यलिंगः । निभृते यथा–उपस्थितं प्रांजलिना विनीतेन गरुत्मता । निर्जितेन्द्रिये वाणिजे च यथा–विनीतजनविभ्राजिगर्भा सा नगरी बभौ ॥२८९॥ साधुवाह्यश्वे यथा–वनायुजैर्विनीतैस्तैः। विनयग्राहिते यथा–नीतौ विनीतैरवरोधरक्षैः । हृते अपनीते यथा–विनीतमोहोमृदुभिर्वनानिलैः। विनतः प्रणते भुग्ने । विनमति स्म विनतः । वाच्यलिंगः । प्रणते यथा–विनतवनिताचूडारत्नप्रभारुणितांघ्रिभिः । भुग्ने यथा–भ्रूभारविनतगात्रः । विनता पिटकाभिदि । सुपर्णायां । पिटका भाजनविशेषः ॥२९०॥ सुपर्णा गरुडमाता । तत्र यथा– वैनतेय इव विनतानंदनः । विहस्तस्तु विह्वले पंडकेऽपि च । विगतौ हस्तावस्य विहस्तः। विहसति वा दम्यमिति तः। विह्वले वाच्यलिंगः । तत्र यथा–रामापरित्राणविहस्तयोधम् । पंडकः षंढः । विश्वस्तः कृतविश्वासे । विश्वसिति स्म विश्वस्तः । वाच्यलिंगः । विश्वस्ता विधवस्त्रियां । कृतविश्वासे विधवस्त्रियां च यथा–सुचिरं स हसर्वसातवतैर्भवविश्वस्तविलासिनीजनः । विजातो विकृते जाते । विजायते स्म विजातः । वाच्यलिंगः । द्वयोर्यथा–विजातजाती कुसुमावतंसः । विजाता तु प्रसूतिका । यथा–विजाताजात्यपुत्रकं । विवर्त्तो नर्तने संघेऽपावृत्तो । विवर्त्तनं विवर्तः । नर्तनं नृत्तं । संघः समुदायः ।

विजातो विकृते जाते विजाता तु प्रसूतिका ।
विवर्त्तो नर्तने संघेऽपावृतौ विकृती रुजि ॥२९२॥
डिंबे विकारमद्यादौ विपत्तिर्यातनापदोः ।
विच्छित्तिः स्यादंगरागे हावविच्छेदयोरपि ॥२९३॥
विधाता द्रुहिणे कामे विनेता देशके नृपे ।
वृतांतस्तु प्रकरणे कार्त्स्न्ये वार्त्ताप्रकारयोः ॥२९४॥

अपावृत्तिरपावर्त्तनं । तत्र यथा–अहो दशास्यस्य दशाविवर्त्तः । विकृती रुजि । डिंबे विकारमद्यादौ । विक्रियतेऽनया विकरणं वा विकृतिः । स्त्रियां । चतुर्ष्वर्थेषु ॥२९२॥ डिंबो विप्लवः । विकारे यथा – मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः । मद्यादयो मद्यमांसनवनीतमधुदुग्धदधिघृततैलपक्वान्न-गुडरूपा दश । तत्र यथा–कषायप्रध्वंसाद्विकृतिपरिहारव्रतमिदम् । विपत्तिर्यातनापदोः । विपद्यतेऽनया विपदनं वा विपत्तिः । यातना नारकीव्यथा । आपदि यथा– संपत्तौ च विपत्तौ च महतामेकरूपता । विच्छित्तिः स्यादंगरागे हावविच्छेदयोरपि । विच्छिद्यतेऽनया विच्छेदनं वा विच्छित्तिः । अंगरागे हावे च यथा – नवनवविच्छित्तिभूषितैरंगैः । विच्छेदे यथा–न भाति दानविच्छित्तिः प्रभूणां दन्तिनामिव ॥२९३॥ विधाता द्रुहिणे कामे । विधत्ते विधाता । द्वयोर्यथा–अकिंचित्कुर्वाणाः पशव इव तस्यां वयमहो विधातुर्वामत्वाद्विपदि परिवर्त्तामिह इमे । विनेता देशके नृपे । विनयति विनेता । देशकः शिक्षयिता । तत्र वाच्यलिंगः । द्वयोर्यथा–त्रिभुवनविनेता रघुपतिः । वृतान्तस्तु प्रकरणे कार्त्स्न्ये वार्ताप्रकारयोः । वृत्तोऽन्तोऽस्य वृतस्यांत इति वृतांतः । प्रकरणे प्रस्तावे यथा – वृत्तांतागतमेतत्ते कथ-

वृहती क्षुद्रवार्ताक्यां छन्दोवसानभेदयोः ।
महत्यां वाचि वार्द्धान्यां वेल्लितं कुटिले धृते ॥२९५॥
प्लुते वेष्टितं लासके रुद्धे स्त्रीकरणान्तरे ।
शकुंतो विहगे भासे श्रीपतिर्विष्णुभूपयोः ॥२९६॥
शुद्धान्तः स्याद्रहःकक्षान्तरे राज्ञोऽवरोधने ।
संख्यावान्मितसुधियोः सरस्वानुदधौ नदे ॥२९७॥

यिष्याम्यनन्तरम् । कार्त्स्न्यं सामस्त्यं । वार्त्तायां प्रकारे च यथा–किं वृतान्तैः परगृहगतैः ॥२९४॥ वृहती क्षुद्रवार्त्ताक्यां छन्दोवसानभेदयोः । महत्यां वाचि वार्द्धान्यां । वर्हति वृहती । द्रुहि वृहिमहिपृषिभ्यः कतृः (उ० ८८४ ।) अधातूदृदित इति ङीः । क्षुद्रवार्त्ताकी ओषधिः । दोनवाक्षराजातिः । यदाह–वृहतीपंक्तिरेव च । वसनभेदो वैकक्ष्यं वासः । तत्र महत्यां च यथा–वृहतोवृहती श्रेष्टा । वाक् वाणी वार्द्धानी गलंतिका कंटकारिकायामपि । वेल्लितं कुटिले धृते । प्लुते । वेल्लति स्म वेल्लितं । वाच्यलिंगः । त्रिष्वपि यथा–कल्लोलवेल्लित-दृषत्यरुषप्रहारैः ॥२९५॥ वेष्टितं ल(ला)सके रुद्धे स्त्री–करणान्तरे । वेष्ट्यते स्म वेष्टितं । रुद्धे वाच्यलिंगः । लसक ओषधभेदः । रुद्धे यथा – वेष्टितो विषवल्लीभिः कल्पद्रुरिव राजते । स्त्रीणां करणान्तरं वात्स्यायनप्रसिद्धं । शकुंतो विहगे भासे । शक्नोति शकुंतः । शके रुंतः । विहगः सामान्यपक्षी । भासः पक्षिविशेषः । द्वयोर्यथा–क्रीडाशकुंतमिव पंजरभाजमाजौ । श्रीपतिर्विष्णुभूपयोः । श्रियः पतिः श्रीपतिः । विष्णौ यथा–उपालब्धेवोच्चैर्गिरिपतिरिति श्रीपतिमसौ । भूपे यथा–श्रियः पदं श्रीपतिरेव नान्यः ॥२९६॥ शुद्धान्तः स्याद्रहःकक्षान्तरे राज्ञो-ऽवरोधने । शुद्धो रक्षितोऽन्तोऽस्य शुद्धान्तः । रहः कक्षान्तर-

संवर्त्तः प्रलयेऽक्षद्रौ संहतं मिलिते दृढे ।
स्खलितं छलिते भ्रेषे संस्कृतं लक्षणान्विते ।।२९८।।
भूषिते कृत्रिमे शस्ते संघातो घातसंचयोः ।
संहिता वर्णसंयोगे शास्त्रवेदैकदेशयोः ।।२९९।।

मेकान्तस्थानविशेषः । तत्र यथा – शुद्धान्ते मंत्रणं राज्ञां । अवरोधनं अन्तःपुरम् । तत्र पुंक्लीबः । तत्र यथा–शुद्धान्तरक्ष्या जगदे कुमारी । संख्यावान्मितसुधियोः । संख्या एकत्वादिविचारणा वाऽस्त्यस्य संख्यावान् । द्वयोर्यथा–संख्यावन्तो भवन्ति सत्पुरुषाः । सरस्वानुदधौ नदे । सरः प्रसरणमस्त्यस्य सरस्वान् । द्वयोर्यथा–सरस्वतिपदं चित्तं सरस्वति निधेहि मे ।।२९७।। संवर्त्तः प्रलयेऽक्षद्रौ । संवृत्यतेऽनेन संवृतः । प्रलये यथा–संवर्त्तशंभुकैवर्त्तः कुरुते विश्वयादसां । अक्षद्रुर्बिभीतकः । तत्र यथा–संवर्त्ते वर्त्तते कलिः । संहतं मिलिते दृढे । संहन्यते स्म संहतं । वाच्यलिंगः। मिलिते यथा–न संहतास्तस्य न भेदवृत्तयः। प्रयाणि वाञ्छन्त्यसुभिः समीहितुं। दृढे यथा–संहिताखिलसंधयः। स्खलितं छलिते भ्रेषे । स्खल्यते स्म स्खलनं वा स्खलितं । छलिते वाच्यलिंगः । तत्र यथा–कलिनास्खलितः खलु भ्रेषो यथोचितात् । रूपाद्भ्रंशः । तत्र यथा–स्खलिते स्खलिते वध्य इति चेत्क्रियते मतिः । संस्कृतं लक्षणान्विते । भूषिते कृत्रिमे शस्ते । संस्क्रियते स्म संस्कृतं । वाच्यलिंगः । लक्षणेन प्रकृतिप्रत्ययविभागेन अन्वितं लक्षणान्वितम् । तत्र क्लीबे इत्येके । कृत्रिममुत्पाद्यं । तयोर्यथा – स्वादयन्रसमनेकसंस्कृतप्राकृतैरकृतपात्रसंकरैः । भावशुद्धिविहितैर्मुदं जनो नाटकैरिव बभार भोजनैः ।।२९८।। भूषिते यथा–मस्कुरीवल्कसंस्कृतः । शस्ते यथा – शुष्मणि प्रणयिनाभिसंस्कृतैर्हवींषि जुहवांबभूविरे ।

स्थपतिः सौविदेऽधीशे बृहस्पतीष्टयज्वनि ।
कारुके च संततिस्तु तनये दुहितर्यपि ।।३००।।
परंपराभवे पंक्तौ गोत्रविस्तारयोरपि ।
संनतिः प्रणतिध्वन्योः संगतिर्ज्ञानसंगयोः ।।३०१।।

संघातो घातसंचयोः । संहननं संघातः । घाते यथा–खड्गसंघातपातितः । संघे यथा–योधसंघातभीतः । संहिता वर्णसंयोगे शास्त्रवेदैकदेशयोः । संधीयते स्म संहिता । क्ते धाग इत्यनेन हिरादेशः । वर्णानामकारादीनां संयोगः संधिः । तत्र यथा–संहितैकपदे नित्या नित्या धातूपसर्गयोः । शास्त्रैकदेशे यथा–ईशानसंहिता । वेदैकदेशे यथा–शाकल्यसंहितामनुप्रावर्षत्पर्जन्यः ।।२९९।। स्थपतिः सौविदेऽधीशे बृहस्पतीष्टयज्वनि । कारुके च । स्थापयति स्थपतिः । खल्यमीति (उ० ६५३) उपलक्षणादतिः। पृषोदरादित्वाद्ध्रस्वः । अधीशः स्वामी । तत्र वाच्यलिंगः । सौविदः कंचुकी । तत्र यथा–स्थपतिनिपतकक्ष्ये को विशेद्राजहर्म्ये । बृहस्पतोष्टिरिष्टिविशेषो बाजपेययागानंतरं क्रियते तस्यायो यज्वा तत्र । कारुकस्तक्षा । तत्र अधोशे च यथा–जगत्त्रयैकस्थपतिस्त्वमुच्चकैः । संततिस्तु तनये दुहितर्यपि । परंपराभवे पक्तौ गोत्रविस्तारयोरपि । संतन्यते संततिः। स्त्रियां क्तिः । तनये यथा–संततिः शुद्धवंश्या हि परत्रेह च शर्म्मणे । दुहतरि यथा–पायाद्वो दधदर्द्धाङ्गे तुहिनाचलसंततिम् ।।३००।। परंपराभवे यथा–चितासंततितंतुजालनिबिडस्यूतेवलग्नाप्रिया । पंक्तौ यथा–पश्यैतां तरुसंततिं कुसुमितां संतापतापच्छिदम् । गोत्रे यथा–रघुरिक्ष्वाकुसंततिः। विस्तारे यथा–अंतको ध्वांतसंततेः। संनतिः प्रणतिध्वन्योः । संनमनं संनतिः । प्रणतौ यथा–

सम्मतिर्वांच्छानुमत्योः समितिर्युधि संगमे ।
साम्ये सभायामीर्यादौ संवित्तिर्ध्यविवादयोः ।।३०२।।
स्थापितं निश्चिते न्यस्ते स्तिमितौ क्लिन्ननिश्चलौ ।
सिकताः स्युर्वालुकायां सिकता सैकते रुजि ।।३०३।।

हरिराक्रमणेन सनतिं किल बिभृत । भियेत्यसंभवः । ध्वनिः शब्दः । संगतिर्ज्ञानसंगयोः। संगच्छतेऽनया संगमनं वा. संगतिः। स्त्रियां । ज्ञाने यथा – षडंगसंगतिः कस्य । संगे यथा–संगतिः सुजने जने ।।३०१।। संमतिर्वांच्छानुमत्योः । संमननं संमतिः। स्त्रियां । द्वयोर्यथा–संमतिर्न विमतिर्न योगिनः । समितिर्युधि संगमे । साम्ये सभायामीर्यादौ । संयति अस्यां समदनं वा समितिः । स्त्रियां । युधि संगमे सभायां च यथा – समितौ रभसादुपागतं । सगदः संप्रतिपत्तुमर्हसि । इर्या आदिर्यस्यासौ ईर्यादिः । यदाह–ईर्याभाषैषणादाननिक्षेपोत्सर्गसंज्ञकाः । पंचाहुः समितीः । तत्र साम्ये च यथा–शमिनां समितिः श्रेष्ठा । संवित्तिर्ध्यविवादयोः । सम्यक् वदनं संवित्तिः । धीर्बुद्धिस्तत्र यथा–त्रिकल्पैर्मोहितं विश्वं निजसंवित्तिकल्पितैः । अविवादे यथा–संवित्तिरुभयोरपि ।।३०२।। स्थापितं निश्चिते न्यस्ते । स्थाप्यते स्म स्थापितं । वाच्यलिंगः । निश्चिते यथा–प्रमेयः स्थापितो येन । न्यस्ते यथा–वक्षः स्थापितकौस्तुभः । स्तिमितौ क्लिन्ननिश्चलौ । स्तिम्यते स्म स्तिम्यति वा स्तिमितः । वाच्यलिंगः । क्लिन्ने यथा–अंभोदांतः स्तिमितवसना । निश्चले यथा–ध्यानस्तिमितलोचनः । सिकताः स्युर्वालुकायां । सिकिः सौत्रः सिक्यंते स्म सिकताः। पृषिरंजोति (उ० २०८) किदतः। प्रायेण स्त्रीभूम्नि यथा–रसिकतासिकतास्त्विव दुर्धियाम् । सिकता

सुकृतं तु शुभे पुण्ये सुविधानेऽथ सुव्रता ।
सुखदोह्यसौरभेय्यां सुव्रतोऽर्हति सुद्व्रते ।।३०४।।
सुनीतिर्ध्रुवमाता स्यात्सुनयोरप्यथ *सूनृतं ।
मंगले प्रियसत्योक्तौ हसन्ती शाकिनीभिदि ।।३०५।।

सैकते रुजि । सैकतं तटं तत्र उपचारात् सिकताशब्दः । रुक् रोगविशेषः । शर्करायामपि ।।३०३।। सुकृतं तु शुभे पुण्ये सुविधाने । सुष्ठु क्रियते स्म सुकृतं । शोभनं कृतं वा । शुभं क्षेमं । पुण्यं श्रेयः । शोभनं विधानं यस्य सुविधानं । सुविहित-मित्यर्थः । तत्र वाच्यलिंगः । शुभे यथा–देवस्तनोतु नम्राणां सुकृतं पुण्यशालिनाम् । पुण्ये सुविधाने च यथा–सुकृतं दुष्कृतं चैव पुरुषस्य समं व्रजेत् । अथ सुव्रता सुखदोह्यसौरभेय्यां । शोभनं व्रतमस्याः सुव्रता । सुखेन दोह्यते सुदोह्या सा चासौ सौरभेयी गौश्च सुखदोह्यसौरभेयी । तस्यां यथा–सुव्रता केन नो वृता । सुव्रतोऽर्हति सद्व्रते । अर्हन् विंशस्तीर्थकरः । तत्र यथा–वंदे सुव्रतनेमिनौ । सद्व्रते वाच्यलिंगः । तत्र यथा–वरं वरय सुव्रत ।।३०४।। सुनोतिर्ध्रुवमाता स्यात्सुनयोरपि । सुष्ठु नीयते सुनयनं वा सुनीतिः । शोभना नीतिरस्येति वा सुनीतिः । ध्रुवस्य औत्तानपादेर्माता ध्रुवमाता । शोभनो नयः सुनयः । अनयोरर्थयोः स्त्रियां । शोभनो नयोऽस्येति वा सुनयः। अस्मिन् पक्षे सुनीति शब्दो वाच्यलिंगः । ध्रुवमातरि यथा – सुनीतिः सुषुवे ध्रुवं । सुनये यथा–सुनीतिः श्लाघ्यते न कैः। अथ सूनृतं । मंगले प्रियसत्योक्तौ । सुष्ठु ऊन्यते सून् । सून् च तत् ऋतं

*मू० स्यात्सुनया सुरतं पुनः । मोहने सुरता देवभावे च सुहितं पुनः। तप्ता भुक्ते सुष्ठुहिते सूनृतं । प्रियसत्यवाक् ।

मल्लिकांगारधान्योश्च हारितो विहगान्तरे ।
मुनौ छद्मन्यथाश्वत्थः पिप्पले गर्दभांडे ॥३०६॥
अश्वत्थेषपौर्णमास्यामतिथिः कुशनंदने ।
*कृध्यागंतावथोपस्थः पायुमेढ्रांकयोनिषु ॥३०७॥

च सूनृतं । मंगलं कल्याणं तत्र धर्ममात्रे क्लीबे तद्वति प्रियसत्योक्तौ च वाच्यलिंगः। द्वयोर्यथा—सूनुः सूनृतवाक् स्रष्टुर्विससर्जो जितश्रियम् । हसन्ती शाकिनीभिदि मल्लिकांगारधान्योश्च । हसति हसंती ॥३०५॥ मल्लिका दीपवर्त्याधारः। अंगारधानी अंगारशकटी । तत्र यथा—शीतं निर्गमयंत्येते हसन्ती प्रांतवर्तिनः। हारीतो विहगान्तरे । मुनौ छद्मनि । हरति हारीतः। हृग् ईतण् । विहगान्तरे यथा—मरिचोद्भ्रान्तहारीतामलयाद्रेरूपत्यका । मुनौ मुनिविशेषे यथा—हारीतगर्ग्यैर्गिरिशं स्तुवंति । छद्म कैतवं तत्र यथा—हारीतेन हरन्ति हन्त जनताचित्तानि वित्तेषिणः । अथ थान्ताः। अथाश्वत्थः पिप्पलें गर्दभांण्डे । अश्व इव तिष्ठति अश्वत्थः। पृषोदरादित्वाद् द्वावपि वृक्षौ । तयोर्यथा—वनं तदश्वत्थकपित्थसंकुलम् ॥३०६॥ अश्वत्थेषपौर्णमास्या । अश्वत्थेन चन्द्रयुक्तेन युक्ता पौर्णमासी अश्वत्था । श्रवणाश्वत्थान्नाम्न्य इति अप्रत्ययः। ईषस्य आश्विनस्य पौर्णमासी । तत्र यथा—अश्वत्थायां वितन्वंति पुरन्दरमहोत्सवम् । अतिथिः कुशनंदने । कृध्यागंतौ । अतति अतिथिः। अतेरिथिः। अथोपस्थः पायुमेढ्रांकयोनिषु । उपतिष्ठते उपस्थः। पायुर्गुदः। मेढ्रं पुंश्चिह्नं । अंक उत्संगः। योनिः स्त्रीचिह्नं । सर्वेषु यथा—

*मु० कृध्यागन्तावव्यथस्तु व्यथाहीने च पन्नगे। अव्यथा तु हरीतक्या-मुपस्थो योनिलिङ्गयो ॥ उत्सङ्गगुदयोश्चापि समीपस्थितवत्यपि।

उन्माथो मारणे कूटयंत्रसंघातयोरपि ।
°क्षवथुः काशे छिक्कायां कायस्थोऽक्षरजोवकः ॥३०८॥
परमात्मा च कायस्था हरीतक्यामलक्यपि ।
*दमथो दमने दंडे निर्ग्रंथो निस्वमूर्खयोः ॥३०९॥
श्रमणं च निशीथस्तु रात्रिमात्रार्द्धरात्रयोः ।
प्रमथः शंकरगणे प्रमथा तु हरीतकी ॥३१०॥

उपस्थसंस्थापितपाणिपल्लवः ॥३०७॥ उन्माथो मारणे कूटयंत्रघातकयोरपि । उन्मथनं ऊर्ध्वपातान्मथ्यतेऽनेन वा उन्माथः। उन्मथति वा बाहुलकादुपसर्गादपि ज्वलादित्वाण्णः। मारणे यथा—प्रत्यर्थिपार्थिवोन्माथः। कूटयंत्रे यथा—उन्मादबद्धगात्रस्य मृगस्येव विचेष्टितम् । घातको हंता । तत्र वाच्यलिंगः। मंखस्तु कूटयंत्रकमुन्माथं न स्त्रीनावधघातयोः इत्याह। क्षवथुः काशे छिक्कायां । क्षवणं क्षवथुः। द्वितोऽथुरिति अथुः। पुंसि । द्वयोर्यथा—अभीक्ष्णक्षवथूद्गारसंतापाचांतविग्रहः। कायस्थोऽक्षरजोवकः। परमात्मा च। काये तिष्ठति कायस्थः। अक्षरजोवके यथा—कायस्थेनोदरस्थेन मातुर्मांसं न भक्षितम् ॥३०८॥ परमात्मनि यथा—कायस्थोऽपि न कायस्थः। कायस्थोऽपि न दृश्यते। कायस्था हरीतक्यामलक्यपि । हरीतक्यामलक्यौ वृक्षौ । दमथो दमने दंडे । दमनं दाम्यंत्यनेन वा दमथः। भृशीशपीति बहुवचनादथः। दंडश्चतुर्थ उपायः। निर्ग्रंथो निस्वमूर्खयोः । श्रमणे च । निर्गतो ग्रंथो द्रव्यं शास्त्रं वाऽस्य निर्ग्रंथः। निस्वमूर्खयोर्वाच्यलिंगः। त्रिष्वपि यथा—निर्ग्रंथो हस्यते विटैः ॥३०९॥ निशीथस्तु रात्रिमात्रार्द्धरात्रयोः। नितरां शेरते प्राणिनोऽत्रेति निशीथः।

° मु० उद्रथस्ताम्रचूडे स्यान्महेन्द्रमहाकामुके। क्षवथु०।
* मु० गोग्रन्थिस्तु करीषे स्याद्गोष्ठे गोजिह्विकौषधौ०।

मन्मथः कामचिंतायां पुष्पचापकपित्थयोः ।
रुदथः कुकुटशुनोः वंचथः पिककालयोः ॥३११॥

वरूथं तु तनुत्राणे रथगोपनवेश्मनोः ।
वयस्थो मध्यमवयाः वयःस्था शाल्मलिद्रुमे ॥३१२॥

न्युद्भ्यां शीङ इति कित्थः । रात्रिमात्रे यथा— निशीथदीपाः सहसाहतत्विषो बभूवुरालेख्यसमर्पिता इव । अर्द्धरात्रे यथा— क्व प्रस्थितासि करभोरुघने निशीथे । प्रमथः शंकरगणे । प्रमथति प्रमथः। यथा—प्रथमः प्रमथेषु यः। प्रमथा तु हरीतकी । हरीतकी पथ्या ॥३१०॥ मन्मथः कामचिंतायां पुष्पचापकपित्थयोः । मनो मथ्नाति मन्मथः । पृषोदरादित्वात्साधुः । मथति चित्तं रागिणामिति वा । क्रमिमथिभ्यां चेति साधुः । कामचिंतायां यथा—तमथ मन्मथमन्मतभाषिणः । पुष्पचापे यथा—मधुर्नृणां मन्मथसाहचर्यादसावनुक्तोऽपि सहाय एव । कपित्थो वृक्षः । रुदथः कुकुटशुनोः । रोदिति रुदथः । विदि भिदीति किदथः। वंचथः पिककालयोः । वंचति वंचथः । भृशीशपीत्यथः । (उ० २३२) ॥३११॥ वरूथं तु तनुत्राणे रथगोपनवेश्मनोः । वृणाति वरूथं । भृवृभ्यामूथः । रथगोपने पुंक्लीबः । तनुत्राणे कवचे यथा—वरूथमित्र पाथोदैर्दिननाथस्य निर्ममे । रथगोपने यथा—अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः । वेश्म गृहं । वयःस्थो मध्यमवयाः। वयसि यौवने तिष्ठति वयःस्थः । वाच्यलिंगः । तत्र यथा—एते वयःस्थाः स्थपुटेऽपि मार्गे-वयःस्था शाल्मलिद्रुमे । ब्राह्मीगुडूचीकाकोलीसूक्ष्मैलामलकीषु च । वयांसि तिष्ठंत्यत्रेति वयसे तिष्ठति इति वा वयःस्था

ब्राह्मीगुडूचीकाकोलीसूक्ष्मैलामलकीषु च ।
वमथुर्वमने काशे गजस्य करसीकरे ॥३१३॥
विदथो योगिनि प्राज्ञे शमथः सचिवे शमे ।
शपथः कार आक्रोशे शपने च सुतादिभिः ॥३१४॥
शयथः स्यादजगरे निद्रालौ मरणेऽपि च ।
षड्ग्रंथः करंजभेदे षड्ग्रंथा तु वचा शठी ॥३१५॥
समर्थः शक्तिसंपन्ने संबद्धार्थिहितेऽपि च ।
सिद्धार्थः सर्षपे शाक्यसिंहेऽन्त्यजिनवप्तरि ॥३१६॥

षडपि वनस्पतिभेदाः ॥३१२॥ वमथुर्वमने काशे गजस्य करसीकरे । वमनं वम्यतेऽसाविति वा वमथुः। द्वितोऽथुरित्यथुः। पुंसि । वमनं वांतिः । काशः क्षवथुः । गजस्य करसीकरे यथा—उद्भ्रांतो दंडशुंडो द्रुमरवमथु(दंडो द्रुमरवः मधु)भिर्व्योमताराकरालम् ॥३१३॥ विदथो योगिनि प्राज्ञे । वेत्ति विदथः । विदिभिदीति किदथः । वाच्यलिंगः । शमथः सचिवे शमे । शाम्यति शमनं वा शमथः । भृशिशपीति (उ० २३२) अथः । शपथः—कार आक्रोशे शपने च सुतादिभिः । शपनं शपथः । भृशिशपीत्यथः । कारः क्रिया । आक्रोशो गालिदानं । सुतादिभिः शपनं सुतादिशरीरस्पर्शः । त्रिष्वपि यथा—न वृथा शपथं कुर्यादल्पेऽप्यर्थे नरो बुधः ॥३१४॥ शयथः स्यादजगरे निद्रालौ मरणेऽपि च । शेते शयनं वा शयथः भृशिशपीत्यथः । निद्रालौ वाच्यलिंगः। षड्ग्रंथः करंजभेदे। षड्ग्रंथयोऽस्य षट्ग्रंथः। पृषोदरादित्वात् साधुः । करंजो वृक्षः। तस्य भेदः । षट्ग्रंथा तु वचा शठी । द्वेऽपि ओषधी ॥३१५॥ समर्थः शक्तिसंपन्ने संबद्धार्थिहितेऽपि च । समर्थयते समर्थ्यते संगतोऽर्थोऽस्येति वा

अर्बुदः पर्वते मांसकीलके दशकोटिषु ।
अर्द्धेन्दुः स्यादतिप्रौढस्त्रीगुह्यांगुलियोजने ॥३१७॥
गलहस्ते नखांकेऽर्धचन्द्रेऽगदस्तु वालिजे ।
अंगदं तु केयूरे स्यादंगदा याम्यदिग्गजो ॥३१८॥

समर्थः । वाच्यलिंगः । शक्तिसंपन्ने यथा–कोऽतिभारः समर्थानां । सम्बद्धार्थे हिते च यथा–तथा समर्थां गिरमूचिवांसं प्रत्याह देवानुचरं दिलीपः। सिद्धार्थः सर्षपे शाक्यसिंहेऽन्त्यजिनवप्तरि । सिद्धोऽर्थोऽस्य सिद्धार्थः । शाक्यसिंहो बुद्धविशेषः। तत्र सर्षपे च यथा–सिद्धार्थता स्फुरति तावदियं स्फुटैव सद्वृत्तता भवति सर्षपयावदेव । अन्त्यजिनो महावीरस्तस्य वप्ता जनकस्तत्र यथा – सिद्धार्थपार्थिवसुतः सुकृताय वीरः ॥३१६॥ अथ दान्ताः। अर्बुदः पर्वते मांसकीलके दशकोटिषु । अर्वति अर्बुदः । इंग्र्यर्विभ्यामुदः । पर्वते पुंसि । शेषयोः पुंक्लीबः । पर्वतविशेषे यथा–अत्याश्चर्यनिधानमर्बुद इति ख्यातो गिरिः । मांसकीलोऽक्षरोगविशेषः । तत्र यथा–चक्षुश्चर्वितमर्बुदैः । दश-संख्याकोटयो दशकोटयः । यदाह–प्रयुतं कोटिमथार्बुदमिति । अर्द्धेन्दुः स्यादतिप्रौढस्त्रीगुह्यांगुलियोजने । गलहस्ते नखांकेऽर्ध-चन्द्रे । इन्दोरर्द्धं अर्द्धेन्दुस्तत्सदृशत्वादर्द्धेन्दुः । समेंऽशे अर्द्धं न वेति समासः । अर्द्धं इन्दोरिति असमांऽशे तु जरत्यादिभिरिति समासः । अतिप्रौढस्त्रीगुह्यांगुलियोजनं वात्सायनप्रसिद्धं ॥३१७॥ गलहस्ते नखांके च यथा–अर्द्धेन्दुस्तेन मे दत्तस्तेनाहं सखि विह्वला । अर्द्धचंद्रे यथा–तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दु-मूलेः । अंगदस्तु वालिजे । अंगं ददाति द्यति वा अंगदः । वालिजो वालिपुत्रस्तत्र यथा–तदातमज इहांगदः प्रहित एष

आस्पदं कृत्यपदयोरामोदो गंधहर्षयोः ।
आक्रंदो दारुणे रणे सारावरूदिते नृपे ॥३१९॥
क्षणदं तोये क्षणदो गणके क्षणदा निशि ।
कपर्द्दः पार्वतीभर्तुर्जटाजूटे वराटके ॥३२०॥

सौमित्रिणा । अंगदं तु केयूरे स्यात् । केयूरे बाहुभूषणे यथा–ऐरावतास्फालनविश्लथं यः संघट्टयन्नंगदमंगदेन । अंगदा याम्यदि-ग्गजो । दक्षिणदिक्वारणस्य वामनस्य पत्नी ॥३१८॥ आस्पदं कृत्यपदयोः । आसमन्तत्पदं आस्पदं । वर्च्चस्कादित्वात् । कृत्यं कार्यं । पदे स्थाने यथा– निसर्गभिन्नास्पदमेकसं-स्थमस्मिन्द्वयं श्रीश्च सरस्वती च । आमोदो गंधहर्षयोः । आमोदते आमोदनं वा आमोदः । द्वयोर्यथा– सांद्रामोदे हृदयकमले भृंगतामेति भक्तिः । आक्रंदो दारुणे रणे सारावरुदिते नृपे। आक्रन्दंति अत्रेति आक्रन्दनं आक्रन्द-यति वा आक्रंदः । दारुणे रणे यथा– आक्रंदे महति जहर्ष वीरवर्गः । सारावे सशब्दे रूदिते यथा–उदितरुदिताक्रंदं क्वापि क्वचित्कलगीतिकम् । नृपः पार्ष्णिग्राहाक्रांतस्य विजिगीषो रक्षिता । तत्र यथा–आक्रंदसंदीपितजैत्रयात्राः ॥३१९॥ क्षणदं तोये । क्षणं ददाति क्षणदं । तोयं नीरं । क्षणदो गणके । गणको मौहूर्त्तिकः । क्षणदा निशि । यथा–आरुह्य नार्यः क्षणदासु यस्यां नभोगता देव्य इव व्यराजन् । कपर्द्दः पार्वतीभर्त्तुर्जटाजूटे वराटके। कंशिरः पिपर्त्ति कपर्द्दः । शा शपीति (उ० २३७) बहुवचनाद्दः । के जले पर्द्दते वा । पार्वतीभर्तुर्महेश्वरस्य जटाजूटे यथा–कपर्दे कूर्दते यस्य जाह्नवी वीचिहस्तकैः । वराटके यथा–प्राप्ता काणकपर्दिकापि न मया तृष्णेऽधुना मुंच माम् । अत्र

कर्णांदुः स्यात्कर्णपाश्युत्क्षिप्तिका कुमुदः कपौ ।
दिग्नागनागयोर्दैत्यविशेषे च सितोत्पले ॥३२१॥
कुमुदा कुंभीगंभार्योः कुसीदं वृद्धिजीवने ।
वृद्धचा जीवे कौमुदस्तु कार्तिके कौमुदीन्दुभा ॥३२२॥

ह्रस्वः कपर्दः कपर्द्दिका ॥३२०॥ कर्णांदुः स्यात्कर्णपाश्युत्क्षिप्तिका । कर्णमंदति कर्णांदुः । भृ सृ तृ त्सरीति बहुवचनादुः । स्त्रियां । कर्णपाशी कर्णलालिका । उत्क्षिप्तिका कर्णाभरणं । द्वयोर्यथा—सुवर्णकर्णांदुविलोलकर्णा । कुमुदः कपौ । दिग्नागनागयोर्दैत्यविशेषे च सितोत्पले । कौ पृथिव्यां कुत्सितं वा मोदते कुमुदः । मूलविभुजादित्वात्कः । काम्यते वा कुमुदबुदबुदादय इति साधुः । सितोत्पले पुंक्लीबः । अन्यत्र पुंसि । कपौ सितोत्पले च यथा—कीर्तिः प्रवरसेनस्य प्रयाता कुमुदोज्वला । दिग्नागे यथा—वामनः कुमुदोंजनः । नागः सर्पविशेषः । तत्र यथा—नागेन लौल्यात्कुमुदेन नूनमुपातमंतर्ह्दवर्तिना तत् । दैत्यविशेषे यथा—जिगाय दैत्यं कुमुदं मुकुंदः ॥३२१॥ कुमुदा कुंभीगंभार्योः । द्वेऽपि ओषधी । कुसीदं वृद्धिजीवने । वृद्धचा जीवे । कुस्च श्लेषे दंत्यांतः । कुस्यति कुसीदं । कुसेरिदेदाविति किदोदः । वृद्धचा जीवे वाच्यलिंगः । वृद्धिजीवने यथा—कुसीदकृषिवाणिज्यैर्वैश्यवृत्तिरुदाहृता । वृद्धचा जीवे यथा—कुसीदे नास्ति दाक्षिण्यं सलोभे नास्ति सौहृदम् । दुर्जने नास्ति विश्वासो दारिद्र्ये नास्ति भोजनम् । कौमुदस्तु कार्त्तिके । कौमुद्यः संत्यत्र कौमुदः । अभ्रादित्वादः । यथा—मोदंते कौमुदे मासि गावः । शावकसंकुलाः । कौमुदींदुभा । कुमुदानामियं कौमुदी । इन्दोर्भा प्रभा तस्यां यथा—शशिना सह याति कौमुदी सह मेघेन

गोविन्दस्तु गवाध्यक्षे वासुदेवे बृहस्पतौ ।
गोष्पदं गोखुरस्वभ्रे गवां च गतिगोचरे ॥३२३॥
जलदो मुस्तके मेघे जीवदो रिपुवैद्ययोः ।
ग्रंथिपर्णे तमोनुत्तु शशिमार्तण्डवह्निषु ॥३२४॥
दारदो विषभेदे स्यात्पारदे हिंगुलेऽपि च ।
दायादो सुतसपिंडौ *धनदो दातृगुह्यकौ ॥३२५॥

तडिद्विलीयते ॥३२२॥ गोविन्दस्तु गवाध्यक्षे वासुदेवे बृहस्पतौ । गां विन्दति गोविन्दः । निगवादे नाम्नीति शः । गवाध्यक्षे वासुदेवे च यथा—गोविन्द तासु विहिता भवता यथार्था । बृहस्पतौ यथा—आदिदेश स गोविन्दं दानवोच्छित्तये हरिः । गोष्पदं गोखुरस्वभ्रे गवां च गतिगोचरे । गोः पदं गोष्पदं । वर्चस्कादित्वात्साधुः । गोखुरश्वभ्रे यथा—ववर्ष मेघः किल गोष्पदप्रं । गवां गतिगोचरे यथा—गोष्पदेषु विचरन्नपीयत ॥३२३॥ जलदो मुस्तके मेघे । जलं दत्ते जलदः । मुस्तके मेघे नामत्वात् । मेघे यथा—कुतो वारामोघं बत जलद मोघं वितरसि । जीवदो रिपुवैद्ययोः । ग्रंथिपर्णे । जीवं द्यति ददाति वा जीवदः । रिपौ वैद्ये च यथा—आयुश्चेद्रोगिणां न स्याज्जीवदो जीवदस्तदा । ग्रंथिपर्णं गंधद्रव्यं । तमोनुत्तु शशिमार्तण्डवह्निषु । तमोऽधकारं नुदति तमोनुत् । त्रिष्वपि यथा—तमोनुदासंतमसं निरस्तं ॥३२४॥ दारदो विषभेदे स्यात्पारदे हिंगुलेऽपि च । दरत्सुदेशे भवो दारदः । त्रिष्वपि यथा—सदारदं मर्द्दयति स्म वार्तिकः । दायादो सुतसपिंडौ । दायं भागमादत्ते दायादः । दश्चाज्ञ इति डः । सुतः पुत्रः । ययोरेकः पूर्वः सप्तमः पुरुषस्तावन्योन्यस्य सपिंडौ । गोत्रिणावित्यर्थः । द्वयोर्यथा—दायादा धनमाह-

*मु० दोहदो गर्भलक्षणे । अभिलाषे तथा गर्भे धनदो० ।

नलदा मांस्यां नलदमुशीरमकरन्दयोः ।
नर्मदा रेवानर्मल्योः निषादः श्वपचे स्वरे ॥३२६॥
निर्वादस्त्यक्तवादेऽपवादे च प्रमदो मुदि* ।
प्रमदा स्त्री प्रसादोऽनुग्रहस्वास्थ्यप्रसत्तिषु ॥३२७॥

रन्ति तरसा यत्नेन संरक्षितम् । धनदो दातृगुह्यकौ । धनं ददाति धनदः । दातरि वाच्यलिंगः । द्वयोर्यथा–धनदोसि धनार्थिनाम् ॥३२५॥ नलदा मांस्यां । नलं द्यति नलदा । अतो ड इति डः । मांसी गंधद्रव्यं । नलदमुशीरमकरन्दयोः । उशीरं वारिणीमूलं । मकरंदो मधु । नर्मदा रेवानर्म्मल्योः । नर्म द्यति–ददाति वा नर्मदा । रेवायां यथा–उद्देशोऽयं सरसकदलिश्रेणिशोभातिशायी । कुंजोत्कर्षां कुरितरमणीविभ्रमो नर्मदायाः। नर्मलि नर्मसखी । निषादः श्वपचे स्वरे । निषीदति निषादः । वा ज्वलादीति णः । निषीदंति स्वरा अत्रेति वा । व्यंजनाद्यञ् । श्वपचे यथा – मा निषाद प्रतिष्ठास्त्वमगमः शास्वती समाः। स्वरे स्वरविशेषे यथा–निषादः सर्वसंधिस्थो ललाटस्थस्तु धैवतः ॥३२६॥ निर्वादस्त्यक्तवादेऽपवादे च । निर्गतो वादोऽस्य निर्वादः। निर्वदनं वा । त्यक्तवादे वाच्यलिंगः। तत्र यथा–निर्वादा वादिनः कृताः । अपवादोऽवर्णवादः । तत्र यथा–खलु निर्वादकथायां वदितायत्खलु जनोऽपि स्यात् । प्रमदो मुदि । प्रमदनं प्रमदः । संमदप्रमोदो हर्ष इत्यल् यथा–सृष्टा सितेन विधिना निधना गुणानाम् । लोकत्रयीं प्रमदकंदमयीं विधातुं । प्रमदा स्त्री । प्रमाद्यति प्रमदा । प्रकृष्टो मदोऽस्या इति वा । यथा–प्रमदाः पतिवर्त्मगाः । इति प्रतिपन्नं हि

*मु० मुदि मत्तके ।

काव्यगुणे प्रह्लादस्तु निनादे दानवान्तरे ।
प्रतिपत्तु संवित्तिथौ प्रासादो राजमंदिरे ॥३२८॥
देवतायतने चापि मर्यादा स्थितिसीमयोः ।
माकंदः स्यात्सहकारे माकन्द्यामलकीफले ॥३२९॥

विचेतनैरपि । प्रसादोऽनुग्रहस्वास्थ्यप्रसत्तिषु । काव्यगुणे । प्रसदनं प्रसीदत्यनेन वा प्रसादः। अनुग्रहे यथा–तव प्रसादात्कुसुमायुधेऽपि । स्वास्थ्ये यथा–गहनमपररात्रप्राप्तबुद्धिप्रसादाः । कवय इव महीपाश्चिन्तयन्त्यर्थजातं । प्रसत्तौ यथा–प्रसादे वर्त्तस्व प्रकटय मुदं संत्यज रूषम् ॥३२७॥ काव्यगुणे यथा–शुष्केंधनाग्निवत् स्वच्छजलवत् सहसैव यः । व्याप्नोत्यन्यत् प्रासादोसौ सर्वत्र विहितस्थितिः। नैर्मल्येऽपि मंखः। यथा–प्रसादमादर्श इवान्तरात्मनि । प्रह्लादस्तु निनादे दानवान्तरे। प्रह्लादनं प्रह्लादते वा प्रह्लादः। दानवविशेषो हिरण्यकशिपोः पुत्रः। प्रतिपत्संवित्तिथौ । प्रतिपदनं प्रतिपद्यते वा प्रतिपत् । स्त्रियां । संविदि यथा–ईति सम्यक्प्रतिपदात्त्वयेंद्रियजयः कृतः । तिथौ यथा–प्रतिपत्पाठशीलस्य विद्येव तनुतां गता । प्रासादो राजमंदिरे । देवतायतने चापि । प्रसीदंति नयनमनांसि अस्मिन्निति प्रासादः । घञ्युपसर्गस्य बहुलमिति दीर्घः। राजमंदिरे यथा–हर्षस्य सप्तभुवनप्रथितोरुकीर्तेः । प्रासादपंक्तिरियमुच्छिखरा विभाति ॥३२८॥ देवतायतने यथा–प्रासादेषु त्रुटितशिखरस्वभ्रलब्धप्रवेशैः। प्रातः प्रातस्तुहिनसलिलैः शार्वरैः स्नापितानि । मर्यादा स्थितिसीमयोः। मर्येति सीमार्थेऽव्ययं । मर्या ददाति मर्यादा । स्थितौ यथा–आर्याः समर्यादमुदाहरन्तु । सीमायां यथा–मर्यादामभिभवन्ति जलनिधयः । माकंदः स्यात्सहकारे । माकन्दते

मुकुंदः पारदे रत्नविशेषे गरुडध्वजे ।
मेनादः केकिनिच्छागे मार्जारे वरदः पुनः ॥३३०॥
प्रसन्ने शान्तचित्ते च वरदा तु कुमारिका ।
विशदः पांडुरे व्यक्ते शारदो वत्सरे नवे ॥३३१॥
शरद्भवे पीतमुद्गरशालिनेऽप्यथ शारदी ।
सप्तपर्णांबुपिपल्योः सुनंदा रोचनांगना ॥३३२॥

माकंदः। यथा—माकन्दमंजरीपुंजपिंजरीकृतकाननः। माकन्द्यामलकी फले। माकन्द्याः फलं माकन्दी। दोरथाणिन इति मयट्। फल इति तस्य लुप्। हरीतक्यादित्वात्स्त्रीत्वं गौरादित्वाड्ङीः ॥३२९॥ मुकुंदः पारदे रत्नविशेषे गरुडध्वजे। मुंचति मुकुंदः। मुचेर्डुः। कुंदक कुंदाविति डुकन्दः। ॰त्रिष्वपि यथा—मुकुंदो वंद्यते न कैः। निधिविशेषेऽपि यथा—मुकुंदकुंदनीलाश्च चर्च्वा स्वनिधयो न वा। मेनादः केकिनिच्छागे मार्जारे। मे इति नादोऽस्य मेनादः। त्रिष्वपि यथा—मेनादनादं स निशम्य बालः। वरदः पुनः। प्रसन्ने शान्तचित्ते च। वरं ददाति वरदः। वाच्यलिंगः ॥३३०॥ प्रसन्नः कृतानुग्रहः। द्वयोर्यथा—वृणुते वरदः शंभूरस्मत्संक्रमितैः। वरदा तु कुमारिका। वराय दीयते वरदा। क्वचिदिति डः। विशदः पांडुरे व्यक्ते। विशीयते विशदः। पांडुरे गणे पुंसि। तद्वति व्यक्तौ च वाच्यलिंगः। पांडुरे यथा—कुंदेंदुविशदं यशः। व्यक्ते यथा—हिमव्यपायाद्विशदाधराणाम्। शारदो वत्सरे नवे। शरद्भवे पीतमुद्गरशालिनेपि। शरदेव शारदः। प्रज्ञादित्वादण्। शरदि ऋतुविशेषे भव इति वा शारदः। भर्त्तुसंध्यादिरिणित्यण्। नवे शरद्भवे शालिने वाच्यलिंगः। वत्सरे यथा—निपतन्त्येव बालानामष्टमे शारदे रदाः। नवे यथा— शारदैर्मृगमदैः प्रमदाभिः ॥३३१॥

जननी बाहुबलिनोऽप्यगाधोऽस्ताघरंध्रयोः ।
अवधिः स्यादवधाने कालसीमबिलेष्वपि ॥३३३॥
आनद्धं बद्धमुरजाद्याविद्धः क्षिप्तवक्रयोः ।
आबंधो भूषणे प्रेम्णि बंधेऽथोत्सेध उच्छ्रये ॥३३४॥

शरद्भवे यथा—आतपत्रीभवत्येते क्षणं शारदवारिदाः। शालीनोऽधृष्टः। अथ शारदी सप्तपर्णांबुपिपल्योः। सप्तपर्णा वृक्षभेदः। अंबुपिप्पली जलपिप्पली। मंखस्तु त्रिष्वधृष्टनवे शुद्धौ शारदोऽपि शरद्भवे। अस्त्री संवत्सरे सप्तपूर्णीव शारदी पुनः। लांगली शारदादेवी। तत्र देव्यां यथा—शारदां शारदांभोदसितां हंसासनां नुमः। सुनंदा रोचनांगना। जननी बाहुबलिनोपि। सुष्ठु नंदति सुनन्दा। रोचना रागद्रव्यं। अंगना स्त्री ॥३३२॥ बाहुबलिन आदिनाथपुत्रस्य जनन्यां यथा—वनेचरान् गिरिवरान् दुर्मदान् स्वापदान्यपि। द्राक् खंजीभवतः पश्यत्सुनंदानंदनाज्ञया। अथ धान्ताः। अगाधोऽस्ताघरंध्रयोः। न गाधते अगाधः। अस्ताघे वाच्यलिंगः। अस्ताघेऽलब्धमध्ये यथा—कियद्गाधमगाधं वा गजं पृच्छसरः सखे। रंध्रे यथा—दुष्टांधतमसाक्रांतादगाधान्मां समुद्धर। अवधिः स्यादवधाने कालसीमविलेष्वपि। अवधीयतेऽसौ अवधानं वा अवधिः। उपसर्गाद्ः किरिति (५।३।८७) किः। पुंसि। चतुर्ष्वर्थेषु काले सीम्नि च यथा—शेषान्मासान्गमनदिवसस्थापितस्यावधेर्व्वा विन्यस्यंती भुवि गणनया देहलीदत्तपुष्पैः ॥३३३॥ आनद्धं बद्धमुरजादि। आनह्यते स्म आनद्धं। बद्धे वाच्यलिंगः। तत्र यथा—भुजंगमानद्धजटाकलापम्। मुरजादौ यथा—ततं वीणादिकं वाद्यमानद्धमुरजादिकम्। आविद्धः क्षिप्तवक्रयोः। आविध्यते स्म आविद्धः। वाच्यलिंगः। क्षिप्ते

संहननेऽप्युपाधिस्तु धर्मध्याने विशेषणे ।
कुटुंबव्यापृते छद्मन्युपधिव्याजचक्रयोः ॥३३५॥
कबन्धं तुंडे रुंडेऽप्सु कबन्धो राहुरक्षसोः ।
दुर्विधो दुर्जने निःस्वे न्यग्रोधो वटपादपे ॥३६६॥

यथा—पयोधिमाविद्धचलज्जलाविलम् । विलंघ्य लंकां निकषा हनिष्यति । वक्रे यथा—आविद्धवलितजघनं । आबंधो भूषणे प्रेम्णि बंधे । आबध्यतेऽसौ अनेन वा आबंधनं इति वा आबंधः । भूषणे यथा—प्रभ्रष्टैः सरभसमंभसोऽवगाहक्रीडाभिर्विदलितयूथिकानिशांगैः । आबंधैः सरसिहिरण्मयैर्वधूनामौर्वाग्निद्युतिशकलैरिव व्यराजि । प्रेम्णि यथा—पुत्रदारनिराबंधः। बंधे यथा— प्रेमाबंधविवर्धिताधिकरसा प्रीतिस्तु या सा त्वयि। अथोत्सेध उच्छ्रये । संहननेऽपि । उत्सेधनं उर्द्ध्वं सिध्यत्यनेन वा उत्सेधः। पुंक्लीबः। उच्छ्रये यथा—बबन्ध बालारुणबभ्रुवल्कलं पयोधरोत्सेधविसीर्णसंहति ॥३.४॥ संहनने शरीरे यथा—स्थूलोत्सेधव्यवहितरथस्यात्मनः कुंभकर्णः । उपाधिस्तु धर्मध्याने विशेषणे। कुटुंबव्यापृतेच्छद्मनि । उपाधीयते उपाधिः। चतुर्ष्वर्थेषु पुंसि । धर्मध्याने यथा—विनोपाधेः शास्त्रं तृणतुषबुसप्रख्यमधुना विशेषणे यथा—उपाधिरहितः सोऽपि स्फटिको न विराजते । कुटुंबव्यापृते यथा—उपाधिर्बाधंते विविधविधिभिर्बाधवजनाः । छद्मनि यथा—चिद्रूपानंदमयो निःशेषोपाधिवर्जितः शुद्धः। उपधिर्व्याजचक्रयोः । उपधीयते उपधिः । पुंसि । व्याजे यथा—अरिषु हि विजयार्थिनः क्षितीशा न विदधति सोपधिसंधिदूषणानि । चक्रं रथांगं ॥३३५॥ कबंधं तुंडे रुन्डेऽप्सु । कवते कूयते वा कबंधं । कोरंध इति (उ० २५७) अंधः । कस्य शिरसो

शम्यां व्यामे न्यग्रोधी तु मोहनाख्योषधीभिदि ।
वृषपर्ण्यां निषधस्तु कठिने पर्वते स्वरे ॥३३७॥
देशतद्राजयोश्चापि निरोधो नाशरोधयोः ।
प्रसिद्धो भूषिते ख्याते प्रणिधिर्याचने चरे ॥३३८॥

बंधोऽत्रेति वा केन बंध्यं वा पृषोदरादित्वात् । रुन्डे पुंक्लीबः। शेषयोः क्लीबे । रुन्डं अपशीर्षं वपुः । तत्र तुंडे च यथा—त्वदर्थीयक्रव्यात्कपिकुलकबंधव्यतिकरैः । करालेयं भूमिर्भुवनमयमद्यापि तनुते । अप्सु यथा—कबंधसंबन्धविवृद्धपादपं । कबंधो राहुरक्षसोः । राहौ यथा—कबंधो बाधते विधुम् । रक्षसि यथा—बधनिर्धूतशापस्य कबन्धस्योपदेशतः । दुर्विधो दुर्जने निःस्वे । दुष्टा विधा क्रिया भोजनपिंडो वाऽस्य दुर्विधः । वाच्यलिंगः । दुर्जने यथा—दुर्विधेषु विनयो न शोभते । निःस्वे यथा—विविनक्ति न बुद्धिर्दुर्विधः स्वयमेव स्वहितं पृथग्जनः । न्यग्रोधो वटपादपे । शम्यां व्यामे । न्यक्रोहति न्यग्रोधः । लिहाद्यचि वीरुन्न्यग्रोधाविति (४।१।१२१) साधुः । न्यक्रुणद्धि वा । वटपादपे यथा—न्यग्रोधे फलशालिनि स्फुटरसं किंचित्फलं पच्यते ॥३३६॥ शमी वृक्षभेदः । व्यामस्तिर्यक्प्रसारितबाह्वन्तरं । तत्र यथा—न्यग्रोधमेयचतुरस्रनितंबबिंबा । न्यग्रोधी तु मोहनाख्यौषधीभिदि । वृषपर्ण्यां । गौरादित्वाङ्ङीः । वृषपर्णी आखुपर्णी । निषधस्तु कठिने पर्वते स्वरे । देशतद्राजयोश्चापि । निष्यति निषधः । नेः स्यतेरधक् (उ० २५२) कठिने वाच्यलिंगः । तत्र यथा—निषिद्धं निषधं वचः । स्वरो निषधाख्यः । तत्र यथा—धैवतो निषधः। सप्ततंत्री कंठोद्भवाः स्वराः । पर्वते देशे तद्राजे च यथा—स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धशत्रुः । अनूनसारं निषधान्नगेंद्रात्पुत्रं यमाहुर्निषधाख्यमेव ॥३३७॥ निरोधो

परिधि यज्ञियतरोः शाखायामुपसूर्यके ।
मागधो मगधोद्भूते शुक्लजीरकबंदिनोः ॥३३९॥
वैश्यतः क्षत्रियापुत्रे मागधी तु स्यात्पिप्पली ।
यूथीभाषाविशेषश्च विबुधः पंडिते स्वरे ॥३४०॥

नाशरोधयोः। निरोधनं निरोधः। नाशे यथा— स्थितिसर्गनिरोधकारिणा भवता विश्वजनीनमीदृशं। रोधे यथा—अन्तश्चराणां मरुतां निरोधात् निवातनिष्कंपमिव प्रदीपम्। प्रसिद्धो भूषिते ख्याते। प्रसिध्यते प्रसिध्यति स्म वा प्रसिद्धः। वाच्यलिंगः। द्वयोर्यथा—यथा प्रसिद्धैर्मधुरं सरोरुहै जटाभिरप्येवमभूत्तदाननम्। प्रणिधिर्याचने चरे। प्रणिधानं प्रणिधीयते वा प्रणिधिः। पुंसि। याचने यथा—प्रणिधिवशादुपजातसत्प्रभावः। चरे यथा—श्रुतं मया मत्प्रणिधिः सवर्ग्यः। प्रणिधानेऽपि ॥३३८॥ परिधि यज्ञियतरोः शाखायामुपसूर्यके। परितोऽग्नेश्चतुर्दिक्त्वं धीयते दर्भास्तरणवत् परिधिः। परिधीयते सूर्यादिरनेन वा। पुंसि। यज्ञियो यज्ञार्हस्तरुस्तस्य शाखा। तत्र यदाह—बहुप्रमाणाः परिधेरच्छिन्नाग्रोऽतिपत्रलः। उपसूर्यके सूर्यपरिवेषे यथा—परिधिमुक्त इवाह्निमदीधितिः। चक्रप्रांतेऽपि। मागधो मगधोद्भूते शुक्लजीरकबंदिनोः। वैश्यतः क्षत्रियापुत्रे। मगधेषु भवो मागधः। मगध्यति मगधः। ततः स्वार्थेऽणि वा मागधः। मगधोद्भूते वाच्यलिंगः। तत्र यथा—न मे ह्रिया शंसति किंचिदीप्सितं। स्पृहावती वस्तुषु केषु मागधी। बंदिनि यथा—प्रणिजगदूरकाक्षि श्रावकस्निग्धकंठाः। परिणतिमिति रात्रेर्मागधा माधवाय ॥३३९॥ वैश्यतः क्षत्रियापुत्रे यथा—सूतमागधबंदिभिः। मागधी तु स्यात्पिप्पली। यूथी भाषाविशेषश्च। पिप्पली कणा। यूथी

विस्रब्धोऽनुद्भूटे शान्ते विश्वस्तात्यर्थयोरपि ।
विवधो वीवधो भारे पर्याहाराध्वनोरपि ॥३४१॥
संबाधः संकटे योनौ संरोधः क्षेपरोधयोः ।
संनद्धो वर्मिते व्यूढे समाधिः स्यात्समर्थने ॥३४२॥

पुष्पलता। भाषाविशेषे यथा— एकरूपा हि भगवतोऽर्धमागधीभाषा वारिदविमुक्तवारिवदाश्रयानुरूपतया परिणमति। विबुधः पंडिते सूरे। विबुध्यते विबुधः। पंडिते वाच्यलिंगः। द्वयोर्यथा—जयत्यन्य स कोप्यध्वा भारत्याः खमिवाखिलः। क्षण्णोऽपि विबुधैर्बाढं विभात्यक्षुण्ण एव यः ॥३४०॥ विस्रब्धोऽनुद्भूटे शान्ते विश्वस्तात्यर्थयोरपि। विस्रंभते स्म विस्रब्धः। वाच्यलिंगः। विश्वस्ते यथा— विस्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षितिः पल्वले। अत्यर्थे यथा—विस्रब्धं परिचुंब्य जातपुलकामालोक्य गंडस्थलीम्। विवधो वीवधो भारे पर्याहाराध्वनोरपि। विवध्यते विवधः। घञ्युपसर्गस्य बहुलमिति दीर्घत्वे वीवधः। विविधो वधोऽस्येति वा। पर्याहारतृणजलान्नादीनामन्यत आनयनं। भारे यथा—वहन्ति वीवधं मूर्ध्ना न शास्त्रं जिह्वया जडाः। पर्याहारे ध्वनि च यथा—निरुद्धवीवधासारप्रसारांगा इव व्रजम्। एवं विवाधोऽपि ॥३४१॥ संबाधः संकटे योनौ। संबाधते संवाधः। सम्यक् बाधोऽत्रेति वा। संकटे वाच्यलिंगः। द्वयोर्यथा—करिहस्तेन संबाधे प्रविश्यांतर्विलोडिते। उपसर्पन्ध्वजः पुंसः। साधनान्तर्विराजते। संरोधः क्षेपरोधयोः। संरोधनं संरोधः क्षेपे यथा—योधसंरोधदुर्धर्षः। रोधे यथा-अंभसामोघसंरोधः प्रतीपगमनादिव। संनद्धो वर्मिते व्यूढे। संनह्यति स्म संनद्धः। वाच्यलिंगः। वर्मिते यथा—संनद्ध इव केसरी। व्यूढं विपुलम्।

चित्तैकाग्र्यनियमयोर्मौने संन्निधिरंतिके ।
प्रत्यक्षे चाथ संसिद्धिः सम्यक्सिद्धिस्वभावयोः ।।३४३।।
अयनं पथिगेहेऽर्कस्योदग्दक्षिणतो गतौ ।
अम्लानस्त्वमले किंटीभेदेऽर्जुनं तृणे सिते ।।३४४।।

समाधिः स्यात्समर्थने । चित्तैकाग्र्यनियमयोर्मौने । समाधानं समाधीयते मनोऽस्मिन्वा समाधिः । पुंसि । समर्थनं चोद्यपरिहार उत्तरमिति यावत् । यथा—अयं त्वदुक्ते तव पूर्वपक्षे समाधिराधीयत एष साधुः ।।३४२।। चित्तैकाग्र्ये यथा—सा भूधराणामधिपेन तस्यां समाधिमत्यां उदपादि भव्या । नियमे यथा—यदा फलं पूर्वतपः समाधिना न तावता लभ्यममंस्त मानिनी । मुनेर्भावः कर्म चा मौनं ध्यानवचनाभावादि । तत्र यथा—आत्मेश्वराणां न हि जातु विघ्नाः । समाधिभेदप्रभवा भवन्ति । संनिधिरंतिके प्रत्यक्षे च । संनिधीयते सन्निधिः । पुंसि । अंतिके यथा—वीतविघ्नमनघेन भाविता संनिधिस्तव मुखेन मेऽधुना । प्रत्यक्षे यथा—यातः सन्निधिमस्य तीव्रतपसा देवो भवानीपतिः । अथ संसिद्धिः सम्यक्सिद्धिस्वभावयोः । सम्यक् सेधनं संसिद्धिः । स्त्रियां क्तिः । सम्यक्सिद्धौ यथा—संसिद्धिसिद्धविभवाः मुनयः प्रयाताः । स्वभावे यथा—संसिद्धिरेषा सुजनस्य नित्यं परोपकारेषु हि यः प्रयत्नः । ।।३४३।। अथ नान्ताः अयनं पथिगेहेऽर्कस्योदग्दक्षिणतो गतौ । अयंतेऽस्मिन्निति अयनं । पथिगेहे यथा— किं वा मृगा मृगपतेरयनेष्वयंते । अर्कस्योदग्गतौ यथा—गंगायां च दिवा भूमावतीते चोत्तरायणे । दक्षिणगतौ यथा—अगस्तिचिह्नादयनात्समीपं । दिगुत्तरा भास्वति संनिवृत्ते । अम्लानस्त्वमले किंटीभेदे । न म्लायति स्म अम्लानः । क्तेव्यंजनान्तस्थेति नत्वं ।

नेत्ररोगेऽर्जुनंपार्थे हैहये केकीनि द्रुमे ।
मातुरेकसुते चार्जुन्युषा गोः कुट्टनी सरित् ।।३४५।।
अंगनं प्रांगणे याने ऽयंगना तु नितंबिनी ।
स्यादपानं गुदेऽपानस्तद्वायावंजनं मसौ ।।३४६।।

अम्ले वाच्यलिंगः । तत्र यथा—अम्लानमुखपंकजाः । किंटीभेदो वर्णतरूस्तत्र यथा—ये चत्वारो दिनकरकुलक्षत्रसंतानमल्लीमालाम्लानस्तवकरुचिरा जज्ञिरे राजपुत्राः । अर्जुनं तृणे सिते । नेत्ररोगे । अर्ज्यतेऽर्जुनः । यम्यजीत्युनः । (उ० २८८) सिते गुणे पुंसि । तद्वति वाच्यलिंगः । तृणे यथा—सोमं यदि न वंदेयुः पूतोकानभिषुणुयुः । यदि पूतीकान्न लभेयुरर्जुनो न्यभिषुणुयुः । सिते शुभ्रे यथा—पिशंगमौंजीयुजमर्जुनच्छविम् ।।३४४।। अर्जुनं पार्थे हैहये केकीनि द्रुमे । मातुरेकसुते च । पार्थे यथा—कोदंडं यस्य गांडीवं स्पर्धते कस्तमर्जुनम् । हैहये यथा—स्मरसि यदर्जुनः कार्त्तवीर्यः । केकी मयूरः । द्रुमः ककुभाख्यः । तत्र यथा—उत्फलार्जुन सर्व वासितमरुत् । मातुर्जनन्या एक एव सुतः सोऽर्जुन इत्यभिधीयते । अर्जुन्युषा गौः कुट्टनी सरित् । उषा रात्रिः । गवि यथा— आस्ते पुजितमर्जुनीकुलमपस्तं वेपला शोषरे । कुट्टनी शभली । सरित् करतोयाख्या नदी ।।३४५।। अगनं प्रांगणे यानेऽपि । अगति अस्मिन् अंग्यते वा अंगनं । अनट् । प्रांगणे यथा—अनंगांगनमंगनाः । यानं गमनं । अंगना तु नितम्बिनी । प्रशस्तमंगमस्त्यस्याः अंगना । नांगादेरिति नः । यथा—प्रायेणेते रमणविरहेष्वंगनानां विनोदाः । स्यादपानं गुदे । अपातीत्यनेन अपानं । व्यंजनाद्यन्ञ् । अपावृत्यनीयते वा क्वचिदिति डः । यथा—संकोच्यापानरंध्रं हुतवहसदृशं तंतु-

रसांजनेऽक्तौ सौवीरेथांजनो दिग्मतंगजे ।
अंजना तु हनुमन्मातर्यंजनी लेप्ययोषिति ॥३४७॥
अवनं रक्षणप्रीत्योरर्यमा पितृदैवते ।
तरणौ सूर्यभक्तायांमशनिर्वज्रविद्युतोः ॥३४८॥
अरत्निः कुर्प्परे पाणौ सप्तकोष्टततांगुलौ ।
आसनं विष्टरे हस्तिस्कन्धे यात्रानिवर्त्तने ॥३४९॥

वत्सूक्ष्मरूपम् । अपानस्तु तद्वायौ । यथा–अपानपवनोमन्या पृष्ट पृष्टांतपार्ष्णिगः । अंजनं मसौ । रसांजनेक्तौ सौवीरे । अज्यतेऽने नाक्षिअनक्ति वा अंजनं । मसौ कज्जले यथा–वसानमेणाजिनमंजन-द्युति ॥३४६॥ रसांजनमंजनविशेषः । अक्तिर्धात्वर्थमात्रं । तत्र यथा-मान्यः सैष मुनिः निरंजनमनाः । सौवीरं धातुविशेषः । अंजनो दिग्मतंगजे दिग्मतंगजे पश्चिमाशागजे । यथा–अंजनजनितविका-राधरेव दृष्टिर्न ते रम्या । अंजना तु हनुमन्मातरि । अनक्ति अंजना । नंद्यादि अने आप् । यथा–अंजनामगमद्वायुः । अंजनी लेप्ययोषिति । कर्तर्यनटि ङीः । रंजितः पुंजितः श्रीभिरंजनी-भिर्जनीजनः ॥३४८॥ अवनं रक्षणप्रीत्योः । अव्यते अवनं । द्वयोर्यथा – समुद्रकावेरवनेः कृतावनः । अर्यमा पितृदैवते । तरणौ सूर्यभक्तायां । अरीनामयति अर्यमा । श्वन्मातरिश्वन्निति (उ० ९०२) इति साधुः । पितर एव दैवते पितृदैवतं । तरणौ यथा–प्रोषितार्यमणं मेरोरंधकारस्तटीमिव । सूर्यभक्ता ओषधिः। अशनिर्वज्रविद्युतोः । अश्नुतेऽशनिः । शदिवृत्यमीत्यनिः। स्त्रीपुंसः। वज्रे यथा– जहार चान्येन मयूरपक्षिणा शरेण शक्रस्य महाशनिध्वजम् । विद्युति यथा–अशनेरमृतस्य चोभयोर्वशिनश्चां-बुधराश्च योनयः । करकेऽपि ॥३४८॥ अरत्निः कुर्प्परे पाणौ

आसनो जीवकतरावासनी पण्यवीथिका ।
आपन्नः सापदि प्राप्तेऽप्यादानं वाजिभूषणे ॥३५०॥
ग्रहणेऽथोत्थानं सैन्ये पौरुषे युधि पुस्तके ।
उद्यमोद्गमहर्षेषु वास्त्वंतेऽङ्गनचैत्ययोः ॥३५१॥

सप्रकोष्टततांगुलौ । इयर्ति अरत्निः । स्त्रीपुंसः। कुर्परे बाहुमध्य-संधौ यथा– छिन्नास्त्रा. प्रहरंत्यरत्निभिरपि क्रुद्धा हि योधा युधि । सप्रकोष्ठततांगुलौ पाणौ यथा–अरत्निमात्रीमपि नो भुवं ददौ । आसनं विष्टरे हस्तिस्कन्धे यात्रानिवर्त्तने । आस्यतेऽस्मिन् आसना वा आसनं । विष्टरे पुंक्लीबः । तत्र यथा–स्वहस्तदत्ते मुनिमासने मुनिश्चिरंतनस्तावदभित्यवीविशत् । हस्तिस्कंधे यथा–आसनास्फालनव्यग्रकरः संग्रामभूमिषु । यात्रा विजि-गीषोः शत्रुं प्रति यानं । तस्या निवर्त्तने यथा – क्षीणस्यैव क्रमशो दैवात् पूर्वकृतेन वा मित्रस्य चानुरोधेन द्विविधं स्मृत-मासनम् ॥३४९॥ आसनो जीवकतरौ । जीवकतरुर्वृक्षविशेषः । आसनी पण्यवीथिका । पण्यवीथिका पणिः । आपन्नः सापदि प्राप्तेऽपि । आपद्यते स्म आपन्नः । वाच्यलिंगः । सापदि यथा–आपन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् । प्राप्ते यथा–आपन्नपन्नगविषोपशमः कुमारः । आदानं वाजिभूषणे । ग्रहणे । आदीयते आदानं । वाजिभूषणे यथा–आदानसंदानितकंधराग्रः। ग्रहणे यथा–आदानं हि विसर्गाय पुंसां वारिमुचामिव ॥३५०॥ उत्थानं सैन्ये पौरुषे युधि पुस्तके । उद्यमोद्गमहर्षेषु वास्त्वं-तेऽङ्गनचैत्ययोः । मलोत्सर्गेऽपि । उत्थीयतेऽनेन अस्मिन्वा उत्थानं । एकादशस्वर्थेषु । सैन्ये पौरुषे युधि हर्षे च यथा–उत्थांना तु गतो जिगाय दिवसैः कैश्चित्स सर्वादिशः । पुस्तकं लिखित-

मलोत्सर्गेप्यथोत्तानः सुप्तोन्मुखगभीरयोः ।
उद्यानं स्यान्निःसरणे वनभेदे प्रयोजने ।।३५२।।

उद्धानमुद्गमे चुल्ल्यामुदानः पवनांतरे ।
सर्पभिद्युदरावर्त्ते कमनोशोकपादपे ।।३५३।।

पत्रसंचयः। उद्गमः ऊद्द्धोभवनं तत्र यथा—उत्यानोपनिवेशनानि कुरुते तल्पे मुहुः पांसुला। वास्तु गेहं तस्यांतस्तत्र उद्यमें अंगने च यथा—सूत्थाने सुजने जनस्य रमते चेतो यथा सद्मनि। चैत्यं विहारः ।।३५१।। मलोत्सर्गः पुरीषोत्सर्गः। अथोत्तानः सुप्तोन्मुखगभीरयोः। उत्तन्यते उत्तानः। वाच्यलिंगः। सुप्तश्चासावुन्मुखश्च सुप्तोन्मुखस्तत्र यथा—डिम्भैरुत्तानशायिभिः। अगभीरमुन्नतमध्यं तत्र यथा – उत्तानपाणिद्वयसन्निवेशात्प्रफुल्लराजीवमिवांकमध्ये। उद्यानं स्यान्निःसरणे वनभेदे प्रयोजने। उद्यायते उद्यात्यनेन अस्मिन्वा उद्यानं। निःसरणं निर्गमनं। वनभेदो राजादिक्रीडास्थानं पुष्पवाटी वा। तत्र पुंक्लीबः। यथा—विश्रांतः सन् व्रज नवनदीतीरजातानि सिंचन्नुद्यानानां नवजलकणैर्यूथिकाजालकानि। प्रयोजनं प्रवृत्तिसाध्यं फलं ।।३५२।। उद्धानमुद्गमे चुल्ल्यां। ओहांक् गतौ। डुधांग्क् धारणे च वा। उद्धायते उद्धत्यत्र वा उद्धानं। उद्गमे यथा-उद्धानं धान्यसंततेः। चुल्ल्यां यथा—उद्धानाद्धांडमुत्क्षिप्य। उदानः पवनान्तरे। सर्पभिद्युदरावर्त्ते। ऊर्ध्वमानयति रसादीन् उदानः। क्वचिदिति डः। उदानिति वा पवनांतरे यथा—उदानो हृच्छिरांतरे। सर्पभित् सर्पभेदः। उदरावर्त्त उदररोगविशेषः। कमनोशोकपादपे। कामिकामाभिरूपेषु। कामयते कमनः। रम्यादिभ्यः कर्तरि (५।३।१२६) इत्यनट्। कम्यभिरूपयोर्वाच्यलिंगः। चतुर्ष्वपि

कामिकामाभिरूपेषु कठिनं निष्ठुरोखयोः ।
कठिनी तु खटिका स्यात्कठिना गुडशर्करा ।।३५४।।

कर्त्तनं योषितां तूलसेवने च्छेदनेऽपि च ।
क्रंदनं रोदने ह्वाने कल्पनं क्रुप्तिकर्त्तने ।।३५५।।

कल्पनेभसज्जायां कलापी प्लक्षकेकिनोः ।
कंचुकी जोंगकतरौ महल्ले पन्नगे विटे ।।३५६।।

यथा—निकामं कामिनीनां हि प्रयाति कमने मनः ।।३५३।। कठिनं निष्ठुरोखयोः। कठति कठिनं। श्याकठीतीनः (उ० २८२)। निष्ठुरे वाच्यलिंगः। तत्र यथा—न गूढान्तःकोपाकठिनहृदये संवृतिरियं। उखा भाजनविशेषः। तत्र यथा—मठे कठिनसंकटे प्रविलुठंति कष्टं शठाः। कठिनी तु खटिका स्यात्। यथा—कठिन्या मारयन्त्येते गणयन्तो वणिक्शठाः। कठिना गुडशर्करा। गुडशर्करा शर्कराभेदः ।।३५४।। कर्त्तनं योषितां तूलसेवने च्छेदनेऽपि च। कृत्यते कर्त्तनं। तूलं निरस्थिकर्पासः तस्य सेवनं तत्र यथा—रंडाः कर्त्तनगोष्ठीषु न तिष्ठंति कथां विना। छेदने यथा—प्रथयतितरां स्वैराचारप्रवर्तनकर्त्तनम्। क्रंदनं रोदने ह्वाने। क्रदु रोदनाह्वानयोः। क्रंद्यते क्रंदनं। द्वयोर्यथा—किं क्रंदनेन न हि कोपि श्रृणोति शून्ये। कल्पनं क्रुप्तिकर्त्तने। क्रुप्यते कल्पनं। क्रुप्तौ यथा-तल्पकल्पनविधेरनंतरम्। कर्त्तने यथा—श्मश्रुकेशनखदैर्घ्यकल्पनम् ।।३५५।। कल्पनेभसज्जायां। कल्पनं कल्पना। णिवेत्यासेत्यनः (५।३।१११)। यथा—कल्पनासज्जसेनानीनीतबंधुरसिंधुरः। कलापी प्लक्षकेकिनोः। कलापोऽस्त्यस्य कलापी। प्लक्षो वृक्षः। केकिनि यथा—कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्धनकन्दरासु। कंचुकी जोंगकतरौ महल्ले

कांचनं हेम्नि किंजल्के कांचनो नागकेसरे ।
उदुंबरे कांचनारे पुन्नागे चंपकेऽपि च ॥३५७॥
कांचनी तु हरिद्रायां कानीनः कन्यकासुते ।
कर्णे व्यासे काननं तु ब्रह्मास्ये विपिने गृहे ॥३५८॥
कुहनो मूषिके सेर्ष्ये कुहना दंभकर्मणि ।
कुंडली वरुणे सर्पे मयूरे कुंडलान्विते ॥३५९॥

पन्नगे विटे । कंचुकमस्त्यस्य कंचुकी । जोंगकतरुरगरुवृक्षः। शेषेषु यथा—द्वारं रवद्भिरावृतं बहिरपि प्रक्लिन्नगंडैर्गजैरन्तः कंचुकिभिः स्फुरन्मणिशिखैरध्यासिता भूमयः ॥३५६॥ कांचनं हेम्नि किंजल्के । काम्यते कांचनं । विदनगगनेति (उ० २७५) साधुः । हेम्नि यथा—क्षणं वपुरपावृणु स्पृशतु कांचनं कलिकाम् । किंजल्के यथा—स्वर्णांबुजैः कांचनरेणुगर्भैः । कांचनो नागकेसरे । उदुंबरे कांचनारे पुंनागे चंपकेऽपि च । पंचापि वृक्षभेदाः । धत्तूरेऽपि ॥३५७॥ कांचनी तु हरिद्रायां । गौरादित्वाङ्ङीः । हरिद्रा रजनी । कानीनः कन्यकासुते । कर्णे व्यासे । कन्यायाः अपत्यं कनीनः। कन्यायाः त्रिवेण्याः । कनीनत्रिवणं चेति साधुः । व्यासे यथा—वंदे वाल्मीककानीनौ । काननं तु ब्रह्मास्ये विपिने गृहे । कस्य ब्रह्मणः आननं काननं । कनति वा । विदनेति (उ० २७५) इति साधुः । विपिने यथा—शीतो वायुः परिणमयिता काननोदुंबराणाम् ॥३५८॥ कुहनो मूषिके सेर्ष्ये । कुहणि विस्मापने । कुहयते कुहनः । सह ईर्ष्यया वर्त्तते सेर्ष्यः । तत्र वाच्यलिंगः । तत्र यथा—प्रियजानिरकुहनः । कुहना दंभकर्मणि । कुहनं कुहना । णिवेत्यासेत्यनः (५।३।१११) । यथा—नो विद्मः कुहनाविटेन बटुना किं तेन कारिष्यते । कुंडली

केतनं सदने चिह्ने कृत्ये चोपनिमन्त्रणे ।
केसर्यर्वणि पुन्नागे नागकेसरसिंहयोः ॥३६०॥
कौपीनं गुह्यदेशे स्यादकार्ये चीवरान्तरे ।
कौलीनं जनवादेऽहिपशुपक्षिशुनां युधि ॥३६१॥

वरुणे सर्पे मयूरे कुंडलान्विते—कुंडलमस्त्यस्य कुंडली शिखादित्वादिन् । कुंडलान्विते वाच्यलिंगः । तत्र सर्पे च यथा—जात्यैव ये वायुभुजो विकीर्णास्तान् भोगिनः कुंडलिनो वदंति ॥३५९॥ केतनं सदने चिह्ने कृत्ये चोपनिमन्त्रणे । केत्यते ज्ञायतेऽनेन केतनं । सदने यथा—अकृतसकृतकृत्यः केतनं भूतभर्तुः । चिह्ने पुंक्लीबः । तत्र यथा—समाललंबे वृषराजकेतनः । कृत्यमवश्यकार्यम् । तत्र उपनिमंत्रणे च यथा—पूर्वेद्युः केतनं कार्यं वृद्धानां गृहमेधिनाम् । केसर्यर्वणि पुंनागे नागकेसरसिंहयोः । केसराः सन्त्यस्य केसरी । अर्वणि अश्वे यथा—सह्यः केन स केसरी । पुंनागनागकेसरौ वृक्षौ । सिंहे यथा—केसरी निष्ठुरक्षिप्तमृगपूगो मृगाधिपः ॥३६०॥ कौपीनं गुह्यदेशे स्यादकार्ये चीवरान्तरे । कूपप्रवेशनमर्हति कौपीनं । शालीनकौपीनार्त्विजीनमिति (६।४।१८५) । इति साधुः । गुह्यं पायोपस्थं तच्च तद्देशश्च । तत्र यथा—कौपीनाच्छादनं वल्कमक्षसूत्रं जटाजिनम् । अकार्यं पापकर्म तत्र यथा—उत्सर्पत्पीनकौपीननाशिताशेषविग्रहः । चीवरान्तरे गुह्याच्छादनवाससि यथा—कौपीनं वसनं कदन्नमशनं शय्या धरा पांसुरा । कौलीनं जनवादेऽहिपशुपक्षिशुनां युधि । अकार्ये गुह्यकौलीन्ये । कुलस्य जल्पः कौलीनं । कुलाजल्पे (७।१।८६) इति ईनञ् । कुलीने भवं कुलीनस्य भावः कर्म युवादेरण् । जनवादो लोकापवादः । तत्र यथा—मा कौलीना-

अकार्ये गुह्यकौलीन्ये गहनं वनदुःखयोः ।
गह्वरे कलिले चापि गंधनं तु प्रकाशने ।।३६२।।

सूचनोत्साहहिंसासु गर्जनं स्तनिते क्रुधे ।
गृंजनं विषदिग्धस्य पशोर्मांसे रसोनके ।।३६३।।

गोस्तनो हारभेदे स्याद्गोस्तनी हारहूरिका ।
घट्टना चलनावृत्योश्चलनः पादकंप्रयोः ।।३६४।।

दसितनयने मय्यविश्वासिनी भूः । अहिपशुपक्षिशुनां युधि-युद्धे यथा—कौलीनकेलिसमये समये क्षितोऽभूत् ।।३६१।। अकार्यं कुत्सितं कर्म । गुह्यं गोप्यं । कौलीन्यं कुलीनत्वं । गहनं वन-दुःखयोः । गह्वरे कलिले चापि । गाह्यते गहनं । विदनेति (उ० २७५) साधुः । दुःखकलिलयोर्वाच्यलिंगः । वने यथा—अवि-शदशनैर्विध्यगहनं । दुःखं दुरवगाहं । तत्र यथा—किं गहनं स्त्री-चरितम् । गह्वरे । यथा- गिरिगहनानि विगाहयंति मोहात् । कलिल-माकीर्णं तत्र यथा—शार्दूलगहनं वनम् । गंधनं तु प्रकाशने । सूचनोत्साहहिंसासु । गंधिण् अर्दने । गंध्यते गंधनं । प्रकाशनं प्रकटनं ।।३६२।। सूचनं द्रोहाभिप्रायेण परदोषोद्घट्टनं । उत्साह उद्यमः । हिंसा प्राणिवधः । सर्वेषु यथा—तद्गंधनं प्रोद्धुर-कंधराणां नैवाद्रियन्ते सुजनाः खलानां । गर्जनं स्तनिते क्रुधे । गर्ज्यते गर्जनं । द्वयोर्यथा—न बिभ्यति भटा यस्माद्द्विषां गर्जनतर्जनैः । गृंजनं विषदिग्धस्य पशोर्मांसे रसोनके । गृजु शब्दे । गृंजति गृंजनं । धसिरसीत्यनः । रसोनकः कंकभेदः । तत्र पुंक्लीबः । तत्र यथा—रसोनो लशुनो रिष्टो गृंजनो दीर्घपत्रकः ।।३६३।। गोस्तनो हारभेदे स्यात् । गोस्तनाकृतित्वात् गोस्तनः । यथा—तस्याः

चलनं कंपे चलनी चारोभिद्वस्त्रघर्घरी ।
चंदनो वानरभिदि श्रीखंडे चंदनी नदी ।।३६५।।

चेतनः स्यात्सहृदयप्राणिनोश्चेतना तु धीः ।
चोलकी तु नागरंगे किष्कुपर्वकरीरयोः ।।३६६।।

कंपितगोस्तना स्तनतटी । गोस्तनी हारहूरिका । हारहूरिका द्राक्षा । तत्र यथा—संजाता बत गोस्तनोफलरसस्तत्त्वेऽपि वस्त्वंतरम् । घट्टना चलनावृत्योः । घट्टनं घट्टना । चलनं कंपनं । आवृत्तिरावर्त्तनं । द्वयोर्यथा—रणद्भिराघट्टनया नभस्वतः । चलनः पादकंप्रयोः । चलतीत्येवं शीलः चलनः । चाल्यशब्दार्था-दकर्मकाद् (५।२।४३) । इत्यनः । पादे यथा—चपलचलनकाक-प्रेरणोत्तुंगिताग्रं । कंप्रे वाच्यलिंगः ।।३६४।। चलनं कंपे । चल्यते चलनं । यथा—दिग्दतिरोमचलनं धरणीं धुनोति । चलनी चारोभिद्वस्त्रघर्घरी । चलत्यनया चलनी । चारीभेदो भरत-शास्त्रप्रसिद्धः । वस्त्रघर्घरी बालिकापरिधानविशेषः । चंदनो वानरभिदि । श्रीखंडे । चंदति चंदनः । धसिरसीत्यनः । श्रीखंडे पुंक्लीबः । तत्र यथा—यद्यपि चंदनविटपी विधिना फलपुष्प-वर्जितो विहितः । चंदनी नदी । गौरादित्वाङ्ङीः ।।३६५।। चेतनः स्यात्सहृदयप्राणिनोः । चेतयते चेतनः । सहृदये यथा-चेतन-स्य न मतिर्विरुध्यते । प्राणिनि यथा—कामार्त्ता हि प्रकृतिकृपणा-श्चेतनाचेतनेषु । चेतना तु धीः । चेतनं चेतना । णिवेत्यासे-त्यनः । (५।३।१११) । यथा—अवगच्छति मूढचेतनः प्रिय-नाशं हृदि शल्यमर्पितम् । चोलकी तु नागरंगे किष्कुपर्वकरीरयोः । चोलकोऽस्त्यस्य चोलकी । नागरंगकरीरौ वृक्षौ । किष्कुपर्वाऽश्रु-

छर्दनोऽलंबुषे निंबे छर्दनं वमनेऽपि च ।
छदनं पर्णगरुतोश्छेदनं कर्त्तने भिदि ॥३६७॥
जयनं विजयेऽश्वादिसंनाहे जघनं कटौ ।
स्त्रियः श्रोणिपुरोभागे जवनो वेगिवेगयोः ॥३६८॥
वेग्यश्वे नीवृति जवन्यपट्यांमोषधीभिदि ।
जीवनस्तु पुत्रंजीवे जीवनं वृत्तिवारिणोः ॥३६९॥

वंशो वा ॥३६६॥ छर्दनोऽलंबुषे निंबे । छर्द्यतेऽनेन छर्दते वा छर्दनः । अलंबुषो राक्षसविशेषः । निंबो वृक्षः । छर्दनं वमनेऽपि च । छर्द्यते छर्दनं । यथा—दातव्यं छर्दनौषधं । छदनं पर्णगरुतोः । छादयति छदनं । विदन (उ० २७५) इति साधुः । पर्णे यथा—छदनांतरितातपा द्रुमाली । गरुति पक्षे यथा—चरन्ति चित्रच्छदनाः शिखण्डिनः । छेदनं कर्त्तने भिदि । छिद्यते छेदनं । कर्त्तने द्वैधीकरणे यथा—शरैः शरच्छेदनमाचरंति । भिदि विदारणे यथा—तुंदछेदननिर्यदंत्रविसरा वीराः क्रमन्ते पुरः ॥३६७॥ जयनं विजयेऽश्वादिसंनाहे । जयो जीयतेऽनेन वा जयनं । घसिरसीत्यनः । अश्वादिसंनाहे यथा—जयति जयनशाला वाजिनां राजकीया । जघनं कटौ । स्त्रियाः श्रोणिपुरोभागे । हन्यतेऽस्मिन् जघनं । हनेर्घतजघौ चेत्यनः । (उ० २७२) । कटौ यथा—पृथुलपृथुलास्थूलस्थूलाकृता जघनस्थली स्त्रियाः । श्रोणिपुरोभागे यथा—ज्ञातास्वादः पुलिनजघनां को विहातुं समर्थः । पश्चादर्थेऽपि मंखः । यथा—पश्यंति यत्र रिपवो जघनं हयानां । जवनो वेगिवेगयोः । वेग्यश्वे नीवृति । जवति जवनः । भूषाक्रोवेत्यनः । (५।२।४२) । जवतेऽनेन वा । वेगिनि वाच्यलिंगः । तत्र यथा—तत्प्राथितं जवनवाजिगतेन राज्ञा ॥३६८॥ नीवृत् देशः ।

स्याज्जीवना तु मेदायां जीवनी तु मधुस्रवा ।
तलिनं विरले स्वच्छे स्तोकेऽथ तपनो रवौ ॥३७०॥
भल्लाते नरके ग्रीष्मे तलुनो यूनि मारुते ।
तमोघ्नो वह्निसूर्येन्दुबुद्धकेशवशंभुषु ॥३७१॥
तपस्वी तापसे दीने तरस्वी वेगिशूरयोः ।
तेमनं व्यंजने क्लेदे तेमनी चुल्लिभिद्यपि ॥३७२॥

जवन्यपट्यांमोषधीभिदि । अपटी प्रतिसीरा । तत्र यथा—समीरशिशिरः शिरस्सु वसतां सताम् । जवनिका निकामसुखिनाम् । जीवनस्तु पुत्रंजीवे । जीवयति जीवनः । नंद्यादित्वादनः । पुत्रंजीवो वृक्षविशेषः । जीवनं वृत्तिवारिणोः । जीव्यतेऽनेन जीवनं । वृत्तौ यथा—क्व यामः किं कुर्मो गृहिणि गहनो जीवनविधिः । वारिणि यथा—जगज्जीवति जीवनैः ॥३६९॥ स्याज्जीवना तु मेदायां । मेदा ओषधिः । जीवनी तु मधुस्रवा । जीव्यतेऽनया जीवनो । अनट् । मधुस्रवा जीवन्ती । तलिनं विरले स्वच्छे । स्तोके । तलति तलिनं । विपिनेति (उ० २८४) । साधुः । वाच्यलिंगः । विरले यथा—तलिनमलिनदंतः सोऽयमग्रे पिशाचः । स्वच्छे निर्मले यथा—सौधानां तलिनोदरेषु पतितम् । स्तोकेऽल्पे यथा—मृगेक्षणानां तलिनोदरीणां । निरंतरं विग्रहकर्शितानाम् । अथ तपनो रवौ । भल्लाते नरके ग्रीष्मे । तपति तपनः । नंद्यादित्वादनः । रवौ यथा—पंचमः पंचतपसस्तपनो जातवेदसां ॥३७०॥ नरके यथा—अवीचौ तपने कल्पं वसेयुर्ब्रह्मघातकाः । तलुनो यूनि मारुते । तरति तरुणः । यम्यजिशक्य (उ० २८८) इत्युनः । रफिडादित्वाल्लत्वे तलुनः । यूनि वाच्यलिंगः । तत्र यथा—नखैस्तलिनमौलिभिस्तलूनलून पीनस्तना । तमोघ्नो वह्निसूर्ये दुबुद्धकेशवशंभुषु । तमोंऽधकारं पापं वा हन्ति तमोघ्नः । ब्रह्मादित्वादृक् । सर्वेषु यथा—निहन्तु विघ्नं जगतस्तमोघ्नः ॥३७१॥

तोदनं व्यथने तोत्रे दहनो दुष्टचेष्टिते ।
भल्लाते चित्रकेऽग्नौ च दमनो वीरपुष्पयोः ॥३७३॥
दर्शनं दर्पणे धर्मोपलब्ध्योर्बुद्धिशास्त्रयोः ।
स्वप्नलोचनयोश्चापि दंशनं वर्मदंशयोः ॥३७४॥

तपस्वी तापसे दीने । तपोऽस्त्यस्य तपस्वी । अस्तपोमायेति (७।२।४७) विन् । वाच्यलिंगः । तापसे यथा–तपस्विभिर्या सुचिरेण लभ्यते । दीने यथा–किमनेन तपस्विना । तरस्वी वेगिशूरयोः । तरो वेगो बलं वाऽस्त्यस्य तरस्वी । वाच्यलिंगः । वेगिनि यथा–असकृदेव हितेन तरस्विना हरिहयाग्रशरेण धनुर्भृता । शूरे यथा–समरमूर्धनि तैंन तरस्विना । तेमनं व्यंजने क्लेदे । तिम्यते तेमनं । व्यंजने यथा–संभारस्पृहणीयतेमनरसानास्वाद्य किंचित्ततः । क्लेदे यथा–स्वेदतेमनविलिग्नकंचुकाः । तेमनी चुल्लिभिद्यपि । यथा–खातास्तेमनिकाश्चमूचरनरैरस्तोकपाकोत्सुकैः ॥३७२॥ तोदनं व्यथने तोत्रे । तुद्यते तुदंत्यनेन वा तोदनं । व्यथने यथा–विधातव्यं न वाचापि बुधैः सज्जनतोदनम् । तोत्रे यथा–नालस्यतश्चलति तोदनताडितोऽपि । दहनो दुष्टचेष्टिते । भल्लाते चित्रकेऽग्नौ च । दहति दहनः । दुष्टचेष्टिते वाच्यलिंगः । तत्र भल्लाते चित्रके च यथा–दहनो दाहकः खलु । अग्नौ यथा–धूमांधितेन दहनेन न वीक्षितासि । दमनो-वीरपुष्पयोः । दाम्यति दमयति वा दमनः । पुष्पे यथा–पूजाविधिर्दमनकेन चयः स्मरस्य तस्मिन्मधुः स भगवान् गुरुरंगनानां ॥३७३॥ दर्शनं दर्पणे धर्मोपलब्ध्योर्बुद्धिशास्त्रयोः । स्वप्नलोचनयोश्चापि । दृष्टिर्दृश्यतेऽनेन अस्मिन्वा दर्शनं । सप्तस्वर्थेषु दर्पणे यथा–अंधस्य किं दर्शनदर्शनेन । धर्मे यथा–

द्विजन्मा वौ रदे विप्रे दुर्नाम पुनरर्शसि ।
दुर्नामा दीर्घकोश्यां स्याद्देवनोऽक्षेऽथ देवनं ॥३७५॥
व्यवहारे जिगीषायां क्रीडायां धमनो नले ।
क्रूरे भस्त्राध्मायके च धमनी कंधरा सिरा ॥३७६॥

अहिंसा जिनदर्शने । उपलब्धिर्ज्ञानं । तत्र यथा–सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते । बुद्धिर्मतं तत्र यथा–इत्येकेषां हि दर्शनम् । शास्त्रे यथा–ज्ञाता षण्णां दर्शनानां अस्मिन् वाङ्मयसद्मनि । स्वप्ने यथा–दर्शनेऽद्य मया दृष्टः सुप्तया निशि वल्लभः। लोचनं दृष्टिस्तत्र यथा–पाणिना कुरुते बाला दर्शनस्पर्शनं मुहुः । विलोकनेपि । यथा–तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः। दंशनं वर्मदंशयोः । दंशयति दश्यते वा दंशनं । वर्मणि यथा–अंसैर्दंशनबंधुरैः । दंशे यथा–दंशदंशनभयेन धेनवः ॥३७४॥ द्विजन्मा वौ रदे विप्रे । द्वे जन्मनी यस्य द्विजन्मा । तारकास्वपि मंखः । विः पक्षी । विप्रेत्युपलक्षणम् । तेन क्षत्रियवैश्ययोरपि । वौ विप्रे तारकासु च यथा–हिरण्यगर्भो भुवनांडकादिव क्षपाकरः क्षीरमहार्णवादिव । अभूत्सुपर्णो विनतोदरादिव द्विजन्मनामर्थपतिः पतिस्ततः । रदे यथा–सद्य एव तु शुद्धिः स्यादजातेषु द्विजन्मसु । दुर्नाम पुनरर्शसि । दुष्टं नामास्य पापरोगत्वात् दुर्नाम । क्लीबे । यथा–दुर्नामभिर्वामन एष जातः । दुर्नामा दीर्घकोश्यां स्यात् । दुष्टं नमति दुर्नामा । सात्मन्नात्मन्निति (उ० ९१६) साधुः । स्त्रियां । दीर्घकोशी जलजंतुविशेषः । देवनोऽक्षे । दीव्यंत्यनेन देवनः । अक्षः पाशकः । यथा–देवनाच्छलकृतो हि किमत्र । अथ देवनं । व्यवहारे जिगीषायां क्रीडायां । दीव्यते देवनं ॥३७५॥ त्रिष्वपि यथा–प्रकटीकृत-

हरिद्रा च धावनं तु गतौ शौचेऽथ नंदनम् ।
इन्द्रोद्याने नंदनस्तु तनये हर्षकारिणि ॥३७७॥
नलिनं नलिकातोयेऽम्बुजेषु नलिनी पुनः ।
पद्माकरे गंगाब्जिन्योर्निधनं कुलनाशयोः ॥३७८॥

देवनान्कुरून् । धमनो नले । क्रूरे भस्राध्मायके च । धमिः सौत्रः धमति धम्यते वा धमनः । यूसिरसीत्यनः । नलस्तृणविशेषः । अनल इत्यन्यः । यदाह–धमनोऽप्यनले भस्राध्मायकक्रूरयोः स्मृतः । क्रूरभस्राध्मायकयोर्वाच्यलिंगः । तयोर्यथा–धमनानां मनः-शुद्धिर्वर्त्तते न मनागपि । धमनी कंधरा सिरा । हरिद्रा च । धमति धमनिः । शदिवृत्यमीति अनिः । ङ्यां धमनी । कंधरायां यथा–चंचवाक्षेपप्रहारैस्तुटितधमनिर्भिदिक्षु विक्षिप्यमाणै-राशापालोपहारं दशभिरपि भृशं त्वच्छिरोभिः करोमि । सिरायां यथा–धमन्यो नाभिसंबद्धा विंशतिश्चतुरुत्तरा ॥३७५॥ हरिद्रा रजनी अग्न्युद्दीपनभांडेऽपि **मंखः** । यथा–मुखेनोपधमेदग्निं धमन्यं-तरितेन तु । धावनं तु गतौ शौचे । धाव्यते धावनं । गतौ वेगवति यथा–धने पुण्यैकसंसाध्ये मुधा धावनमर्थिनां । शौचे यथा–साधुभिः प्रातरुत्थाय विधेयं दन्तधावनम् । अथ नंदनं । इन्द्रो-द्याने । नंदति नन्दनं । यथा–अभिज्ञाः छेदपातानां क्रियन्ते नन्दनद्रुमाः । नन्दनस्तु तनये हर्षकारिणि । हर्षकारिणि वाच्य-लिंगः । द्वयोर्यथा–पांडोर्नंदन नंदनं वनमिदम् ॥३७७॥ नलिनं नलिकातोयेऽम्बुजेषु । नलति नलिनं । श्याकठीति (उ० २८२) इनः । अंबुजे पुंक्लीबः । गौडस्तु नलिनी पद्मिनी व्योमनिम्नगा कमलाकरे । नपुंसकं नलिकायां न पुंसि सरसीरुहे । इत्याह । नलिका अंतःशुषिरमुपकरणं । तत्र यथा–नलिननलिनवातैर्वह्निमु-

निदानं कारणे शुद्धौ तपसः फलयाचने ।
वत्सदाम्न्यवसाने च प्रधनं युधि दारुणे ॥३७९॥
प्रधानं प्रकृतौ बुद्धावुत्तमे परमात्मनि ।
महामात्रे प्रसूनं तु प्रसूते फलपुष्पयोः ॥३८०॥

न्मीलयंति । तोये यथा–पुलिनं नलिनं स्वल्पं । अंबुजे यथा–चरणनलिनन्यासोदंचन्नवांकुरकोरकः । नलिनी पुनः । पद्मा-करे गंगाब्जिन्योः । पद्माकरे यथा–नलिनी निगूढसलिला च यत्र सा स्थलमित्यदः । पतति यासु योधने । गंगायां यथा–द्विपैर्मदजलासारैर्नलिनी मलिनीकृताः । अब्जिन्यां यथा–निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिंबम् । निधनं कुलनाशयोः । नियतं धनमत्र निवृत्तं धनमत्र वा निधनं । निपूर्वो धनिर्मरणार्थे इति सभ्याः । पुंक्लीबः । कुले यथा–कल-चुरिनिधना धनानि दद्युः । नाशे यथा–कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः । अंतेऽपि । यथा–ध्वनंति धेनवो ग्रामनिधनेषु प्रतिव्रजम् ॥३७८॥ निदानं कारणे शुद्धौ तपसः फलयाचने । वत्सदाम्न्यवसाने च । डुदांक् दाने । दांक्षलवने दैबशोधने वा यथायोगं करणे भावे च अनट् निदानं । कारणे यथा–अयथाबलमारंभो निदानं क्षयसंपदः । शुद्धौ यथा–कार-भोजनपात्राणां निदानं वह्निना भवेत् । तपसः फलयाचने यथा–रागाभिभूतः संभूतो निदानमिति निर्ममे । वत्सदाम्नि यथा–निदानसंदानितबालवत्सम् । अवसाने यथा–निदानेंतर्वृकः सपदि मरुता सोऽप्यपहृतः । प्रधनं युधि दारुणे । धनिर्मरणा-र्थोत्र निधनवत् । प्रधन्यतेऽस्मिन्ननेन वा प्रधनं । वर्षादयः क्लीबे (५।३।२९) इत्यल् । द्वयोर्यथा–क्षेत्रं क्षत्रप्रधन-पिशुनं कौरवं तद्भजेथाः ॥२७९॥ प्रधानं प्रकृतौ बुद्धावुत्तमे

प्रज्ञानं बुद्धौ चिह्ने च स्यात्प्रसन्नं प्रसादवत् ।
प्रसन्ना तु मदिरायां पवनो वायुवल्लयोः ॥३८१॥
पवनं पुनरापाके पद्मिनी योषिदन्तरे ।
अब्जेऽब्जिन्यां सरस्यां च पावनं जलकृच्छ्रयोः ॥३८२॥

परमात्मनि । महामात्रे । प्रधीयतेऽस्मिन् प्रधत्ते वा प्रधानं । अजहत् । क्लीबलिंगः । प्रकृतिः सत्त्वरजस्तमसां साम्यवस्था । तत्र उत्तमे च यथा—न महानयं न च बिभर्ति गुणसमतया प्रधानताम् । बुद्धौ परमात्मनि महामात्रे च यथा—वृत्तिः प्रधानानुगता जनस्य । प्रसूनं तु प्रसूते फलपुष्पयोः । प्रसूयते स्म प्रसूनं । सूयत्याद्योदित इति तस्य नः । प्रसूते वाच्यलिंगः । तत्र यथा—प्रसूनसूनुर्वनिता नितांतम् । फलपुष्पयोर्यथा—प्रसूनकॢप्तं ददतः सदत्तंवः । पुरे स्य वास्तव्यकुटुंबितां गताः ॥३८०॥ प्रज्ञानं बुद्धौ चिह्ने च । प्रज्ञायतेऽनेन प्रज्ञानं । बुद्धौ यथा—प्रज्ञानमीदृग्विधमस्ति यस्य । चिह्ने यथा—प्रज्ञानेन वृषेण विद्धि गिरिशम् । स्यात्प्रसन्नं प्रसादवत् । प्रसीदति स्म प्रसन्नं । वाच्यलिंगः । यथा—अपि प्रसन्नं हरिणेषु ते मनः । प्रसन्ना तु मदिरायां । यथा—प्रसन्नामासन्नामपि दधति नो निर्मलधियः । पवनो वायुवल्लयोः । पुनाति पूयतेऽनेन वा पवनः । वायौ यथा—पवनश्च धूतनवनीपवनः । वल्लो निष्पावः ॥३८१॥ पवनं पुनरापाके । आपाकः कुलालपाकस्थानं । तत्र यथा—पवने पावकं कोपि पापः क्षिपति निष्कृपः । पद्मिनी योषिदंतरे । अब्जेऽब्जिन्यां सरस्यां च । पद्मानि विद्यंतेऽस्यां पद्मिनी । योषिदंतरं कामशास्त्रप्रसिद्धं । शेषेषु यथा—जातं मन्ये तुहिनमथितां पद्मिनीं वान्यरूपाम् । पावनं जलकृच्छ्रयोः । पावयति पावनं ।

पावनः पावके सिल्हेऽध्यासे पावयितर्यपि ।
पावनी तु हरीतक्यां पाठीनो गुग्गुलुद्रुमे ॥ ३८३ ॥
पाठके मीनभेदे च पिशुनः सूचके खले ।
कप्यासे पिशुना स्पृक्का स्यात्पिशुनं तु कुंकुमम् ॥ ३८४ ॥
पीतनं तु हरिताले पीतदारुणि कुंकुमे ।
पीतनः पुनराम्राते पूतना तु हरीतकी ॥ ३८५ ॥

जलं नीरं । कृच्छ्रं सांतपनादिकम् । द्वयोर्यथा—वने मुनिः पावनपूतगात्रः ॥ ३८२ ॥ पावनः पावके सिल्हेऽध्यासे पावयितर्यपि । पावकोऽग्निः सिल्हो गंधद्रव्यं । अधिकमसारमस्यते क्षिप्यतेऽनेन अध्यासः । शूर्पमिति यावत् । पावयितरि वाच्यलिंगः । तत्र यथा—संभावयति यान्येव पावनैः पादपांसुभिः । पावनी तु हरीतक्यां । हरीतकी पथ्या । पाठीनो गुग्गुलुद्रुमे । पाठके मीनभेदे च । पठति पाठीनः पठेर्णिदिति (उ० २८७) ईनः ॥ ३८३ ॥ पाठके वाच्यलिंगः । तत्र यथा—नवीनः पाठीनो लुठति पदपीठे निजगुरोः । मीनभेदे यथा—मैनाकोऽपि गभीरनीरविलुठत्पाठीनपृष्ठोल्लसच्छेवालांकुरकोटिकोटरकुटोकुडयांतरे निर्वृतः । पिशुनः सूचके खले । कप्यासे । पिंसति पिशुनः । पिशिमिथिकुधिभ्यः (उ० २९०) उनः । सूचकखलयोर्वाच्यलिंगः । सूचके कथके यथा—पद्मभेदे पिशुनाः सिषेविरे गंधमादनवनांतमारुताः । खले दुर्जने यथा—वद शुना पिशुनासदृशः कथं । कप्यासं कपिमुखं । पिशुना स्पृक्कां स्यात् । स्पृक्का गंधद्रव्यभेदः । पिशुनं तु कुंकुमं । यथा—कान्तोपभोगपिशुनं पिशुनं स्तनानाम् ॥ ३८४ ॥ पीतनं तु हरिताले पीतदारुणि कुंकुमे । पीतयति पीतनं । पीतदारु दारु हरिद्रा त्रिष्वपि यथा—पीतं पीतनरेणुना । पीतनः

वध्या च वासुदेवस्य पूतनाऽनीकिनी चमूः ।
सेना सैन्यविशेषश्च फाल्गुनो मासपार्थयोः ॥ ३८६ ॥
नदीजेऽर्जुनवृक्षे च फाल्गुनी पूर्णिमाभिदि ।
भवनं सदने भावे भंडनं कवचे युधि ॥ ३८७ ॥

पुनराम्राते । आम्रातो वृक्षविशेषः । पूतना तु हरीतकी । वध्या च वासुदेवस्य । पूयते पूतना । पृपूभ्यां किदिति (उ० २९३) तनः ॥ ३८५ ॥ वासुदेवस्य वध्यायां राक्षस्यां यथा—यदि नांगतेति मतिरस्य मृदुरजनि पूतनां प्रति । मंखस्तु पूतना तु हरीतकी । भूतभेदे । पुंस्त्रीलिंगः । द्वयोरित्याह—यथा एतत्पूतनचक्रमक्रमग्रासार्द्धमुक्तैः । पूतनाऽनीकिनी चमूः । सेना सैन्यविशेषश्च । पिपर्त्ति पृतना । पृपूभ्यां किदि (उ० २९३) ति तनः । तिस्रो वाहिन्यः सैन्यविशेषः । तैस्त्रिभिश्चमूः । ताभिस्तिसृभिरनीकिनी । सेना सैन्यमात्रं । सर्वेषु यथा—श्रीभीमपृतनोत्खातरजोभिर्वैरिभूभुजा । फाल्गुनो मासपार्थयोः । नदीजेऽर्जुनवृक्षे च । फाल्गुनी पौर्णमासी अस्य फाल्गुनः । सास्यपौर्णमामीत्यण् (६।२।९८) । फल्गुनीषु जातः फल्गुनः । फल्गुन्याष्ट इति (६।३।१०६) टे । प्रज्ञादित्वात्स्वार्थेऽणि वा । मासे यथा—भवन्ति फाल्गुने मासि वृक्षशाखा विपल्लवाः । पार्थे यथा—अर्जुनः फाल्गुनः पार्थः किरीटी श्वेतवाहनः ॥ ३८६ ॥ नदीजो विटमाक्षिको नाम धातुभेदः । फाल्गुनी पूर्णिमाभिदि । फल्गुनीभिश्चन्द्रयुक्ताभियुक्ता फाल्गुनी । यथा—न फाल्गुनीपर्वणि फल्गु दत्तम् । भवनं सदने भावे । भवन्त्यस्मिन्निति भूयते वा भवनं । अनट् सू धू भू इति अनो वा । सदने पुंक्लीबः । तत्र यथा—दृष्ट्वा दृष्ट्वा भवनवलभीतुंगवातायनस्थाम् । भंडनं कवचे युधि ।

खलीकारे भट्टिनी तु ब्राह्मण्यां नृपयोषिति ।
भावना वासना ध्यानं भुवनं लोकखांबुषु ॥ ३८८ ॥
भूतात्मा द्रुहिणे देहे मदनः सिक्थके स्मरे ।
राडे वसंते धत्तूरे मलिनं कृष्णदोषयोः ॥ ३८९ ॥

खलीकारे । भडुड परिभाषणे । भंडचते भंडनं । त्रिष्वपि यथा—भटैर्भंडनमंडितैः ॥ ३८७ ॥ भट्टिनी तु ब्राह्मण्यां नृपयोषिति । भट्टो द्विजन्मा नृपतिर्वा पतिरस्त्यस्या भट्टिनी । द्वयोर्यथा—भट्टिनी भट्टवेष्टिता । भावना तु वासना ध्यानं । भाव्यते भावना । द्वयोर्यथा—भावना भवनाशिनी । भुवनं लोकखांबुषु । भवन्त्यनेन अस्मिन्वा भुवनं । सू धू भू इति किदनः । लोके विष्टपं तत्र पुंक्लोबः । तत्र अंबुनि च यथा—करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः । पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥ ३८८ ॥ भूतात्मा द्रुहिणे देहे । भूतानामात्मा भूतान्येवात्माऽस्येति वा भूतात्मा । द्रुहिणे यथा—भगवांस्ते स भूतात्मा निर्वाणं सम्प्रदास्यति । देहे यथा—कदा भूतात्मानं सुरसरिति मुक्त्वा सुखमियां । मदनः सिक्थके स्मरे । राडे (राढे—जले) वसंते धत्तूरे । माद्यति मदयति वा मदनः । सिक्थके मधूच्छिष्टे यथा—मदनगोलकमृष्टरदच्छदाः । राडो वृक्षविशेषः । यथाह—मदनः । सल्यको राडः । तत्र स्मरे च यथा—अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवम् । वसन्ते यथा—उपययौ मदनोथ यथार्थताम् । मलिनं कृष्णदोषयोः । मलोस्त्यस्य मलिनं । मलादीमसश्चेति इनः । कृष्णे वाच्यलिंगः । तत्र यथा—अथ नागयूथमलिनानि जगत्परितस्तमांसि

मलिनी रजस्वलायां मंडनं तु प्रसाधने ।
मंडनोऽलंकरिष्णौ स्यान्मार्जनो लोध्रशाखिनि ॥ ३९० ॥
मार्जनं शुद्धिकरणे मार्जना मुरजध्वनौ ।
मालिन्युमायां गंगायां चंपावृत्तप्रभेदयोः ॥ ३९१ ॥
मालिक्यां मिथुनो राशौ मिथुनं पुंस्त्रियोर्युगे ।
मुंडनं रक्षणे क्षौरे मेहनं मूत्रशिश्नयोः ॥ ३९२ ॥

परितस्तरिरे । दोषे यथा—यशः प्रसूते मलिनं प्रमार्ष्टि ॥ ३८९ ॥ मलिनी रजस्वलायां । गौरादित्वाङ्डीः । यथा-स्पृशति । नो बत जातिवियोगतः कमलिनीं मलिनीमिव षट्पदः । मंडनं तु प्रसाधनं । मंड्यते मंडनं । यथा—मंदं मंदमकारि येन निजयोर्दोर्दंडयो-र्मंडनम् । मंडनोऽलंकरिष्णौ । मंडयति इत्येवंशीलो मंडनः । भूषाक्रोधार्थेत्यनः । वाच्यलिंगः । यथा—तत्रापि वरदातीर-मंडनं कुंडिनं पुरम् । स्यान्मार्जनो लोध्रशाखिनि । मार्ज्यतेऽनेन मार्जनः ॥ ३९० ॥ मार्जनं शुद्धिकरणे । मार्ज्यते मार्जनं । यथा-कुर्वाणानां संपरायांतरायं भूरेणूनां मृत्युना मार्जनाय । मार्जना मुरजध्वनौ । मार्ज्यते मार्जना । णिवेत्यासेत्यनः । यथा—आसीनाः किमिति स्थिता ननु सखे प्रसूयतां मार्जना । वाद्यवदनदेयध्यान्य-पिंडचोमिति मंखः । मालिन्युमायां गंगायां चंपावृत्तप्रभेदयोः । मालिक्यां । मलतेऽवश्यं मालिनी । णिन्वावश्यकेति णिन् । माला अस्त्यस्या इति वा मालायाः क्षेपे इतीन् । पंचस्वर्थेषु उमा गौरी गंगा जाह्नवी । चंपा नगरी । वृत्तप्रभेदे च यथा—ननमयययुतेयं मालिनी भोगिलोकैः ॥ ३९१ ॥ मालिकी पुष्पलावी । तत्र यथा—सा मालिनी चंपकमालभारिणी । मिथुनो राशौ । मेथति मिथुनः । पिशिमिथीति (उ० २९०) किदुनः । यथा—

मैथुनं रतसंगत्योः यमनं यमबंधयोः ।
यापनं कालविक्षेपे निरासे वर्तनेऽपि च ॥ ३९३ ॥
योजनं चतुष्क्रोश्यां स्याद्योगपरमात्मनोः ।
रसनं ध्वनिते स्वादे रसज्ञारास्नयोरपि ॥ ३९४ ॥

पंचव्योमहुताशनैश्च मिथुनः कर्कः कुवेदोऽग्निभिः । मिथुनं पुंस्त्रियोर्युगे । पुंस्त्रियोरिति सौत्रो निर्देशः । यथा—परस्पराक्रंदिनि चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती । मुंडनं रक्षणे क्षौरे । मुडुङ् मज्जने । मुडु खंडने वा । मुंड्यते मुंडनं । क्षुरस्येदं क्षौरं कर्म तत्र यथा—राज्ञो हि दुष्टनिग्रहः शिष्टपालनं च धर्मो न पुरः शिरोमुंडनं जटाधारणं वा । मेहनं मूत्रशिश्नयोः । मिह्यते मेहति वा मेहनं । द्वयोर्यथा—मेहनं देहिनां गोप्यं ॥ ३९२ ॥ मैथुनं रतसंगत्योः । मिथुनस्य भावः कर्म वा मैथुनं । युवादेरण् । रते यथा आहारो मैथुनं निद्रा सेवमानस्य वर्द्धते । संगतिः संबन्धमात्रं । तत्र यथा—मैथुनं कुथकंथयोः । यमनं यम-बंधयोः । यम्यते यमनं । यमः संयमः । द्वयोर्यथा—मर्कटस्येव मनसो विदध्याद्यमनं मुनिः । यापनं कालविक्षेपे निरासे वर्तने-ऽपि च । याप्यते यापयति वा यापनं । कालविक्षेपे वर्तने च यथा—मुक्त्यर्थी यत्र तत्रस्थः कुर्याज्जीवस्य यापनम् । निरसनं निरासः । त्याग इत्यर्थः । तत्र यथा प्रबलशक्रपराभवशंकया यदि करोति धनस्य स यापनम् ॥ ३९३ ॥ योजनं चतुष्क्रोश्यां स्याद्योगपरमात्मनोः । युज्यते युंजंति वा योजनं । चतुष्क्रोश्यां यथा—युक्तो नु क्रोशसंपन्नैर्योजनैरिव योजनैः । योगः संबन्धमात्रं । तत्रं यथा- करपंकजयोजनम् । रसनं ध्वनिते स्वादे रसज्ञारास्नयो-रपि । रस्यते रसंत्यनेन वा रसनं । रसज्ञायां स्त्रीक्लीबः ।

रंजनं रजके रक्तचंदनेप्यथ रंजनी ।
मंजिष्ठारोचनानीलीगुंडासु रजनी निशि ॥ ३९५ ॥

लाक्षानीलीहरिद्रासु राधनं प्राप्तितोषयोः ।
साधने रेचनी गुंडा दंती रोचनिका त्रिवृत् ॥ ३९६ ॥

रोदनं त्वश्रुणि क्रंदे रोचनः कूटशाल्मलौ ।
रोचना रक्तकल्हारे गोपित्ते वरयोषिति ॥ ३९७ ॥

ध्वनिते यथा—जलदरसनभीता कांतमालिंगति स्वम् । स्वादे आस्वादने यथा—शृंगाररसनान्नाट्ये । रसज्ञायां यथा—यदमी दशंति दशना रसना तत्स्वादसुखमवाप्नोति । रास्ना औषधिः ॥ ३९४ ॥ रंजनं रंजके रक्तचंदनेऽपि । रंजयति रज्यतेऽनेन वा रंजनं ॥ रंजके वाच्यलिंगः । तत्र यथा—राजा सज्जनरंजनः । अथ रंजनी मंजिष्ठारोचनानीलीगुंडासु । चतस्रोऽप्योषधयः । रजनी निशि । लाक्षानीलीहरिद्रासु । रज्यति रजनी । रंजः किदिति (उ० ६८१) अनिः । ङ्यां रजनी । निशि यथा—द्विगुणीभूता रजनी वृद्धेव शनैः शनैः याति ॥ ३९५ ॥ राधनं प्राप्तितोषयोः । साधने । राध्यते राधनं । त्रिष्वपि यथा—धनराधनदुर्व्विधः । रेचनी गुंडा दंती रोचनिका त्रिवृत् । रेचयति रेचनी । चतस्रोऽप्योषधयः ॥ ३९६ ॥ रोदनं त्वश्रुणि क्रंदे । रोदित्यनेन रुद्यते वा रोदनं । अश्रुणि यथा—लोचने रोदनाताम्रे । क्रंदे यथा—करुणो रोदनध्वनिः । रोचनः कूटशाल्मलौ । रोचते रोचनः । इडितो व्यंजनाद्यंतादित्यवनः । कूटशाल्मलिभेदः । रोचना रक्तकल्हारे गोपित्ते वरयोषिति । रक्तकल्हारं जलजविशेषः । गोपित्तं गोरोचना । तत्र यथा—त्वं रोचनागौरशरीर-

लंघनं भोजनत्यागे प्लवने क्रमणेऽपि च ।
ललाम वल्ललामाश्वे शृंगे चिह्नपताकयोः ॥ ३९८ ॥
रम्ये प्रधाने भूषायां पुंड्रे पुच्छप्रभावयोः ।
ललना स्त्रीनाडिजिह्वाः लांछनं लक्ष्मसंज्ञयोः ॥ ३९९ ॥
लांगली स्याद्बलभद्रे नालिकेरेऽथ लेखनम् ।
भूर्जे च्छेदे लिपिन्यासे व्यसनं निष्फलोद्यमे ॥ ४०० ॥

यष्टिः । वरयोषित् वरस्त्री ॥ ३९७ ॥ लंघनं भोजनत्यागे प्लवने क्रमणेऽपि च । लंघ्यते लंघनं । भोजनत्यागे क्रमणे अतिक्रमे च यथा—भक्ते द्वेषो जडे प्रीती रुचितम् गुरुलंघनम् । मुखे च कटुता नित्यं धनिनां ज्वरिणामिव । प्लवने यथा—पोतो पायादिह हि बहवो लंघनेऽपि क्रमंते । ललाम वल्ललामाश्वे शृंगे चिह्नपताकयोः । रम्ये प्रधाने भूषायां पुंड्रे पुच्छप्रभावयोः । लाति ललाम । सात्मन्नात्मन्निति (उ० ९१६) साधुः । क्लीबे । रुक्मग्रीष्मेति (उ० ३४६) निपातनात् ललामं पुक्लीबः । द्वावपि रम्यप्रधानयोर्वाच्यलिंगौ । दशस्वर्थेषु । अश्वो हयः । शृंगं विषाणं । चिह्नं लक्षणं । पताका ध्वजः ॥ ३९८ ॥ रम्ये प्रधाने भूषायां च यथा—निर्मापितस्त्रिभुवनैकललामभूतः । पुंड्रोऽश्वस्य स्वाभाविकः श्वेतो मुखपट्टः । तत्र यथा—सिंदूरपूरपरिपूर्णललामभंग्या; पत्युः प्रतापमिव दर्शयते वराश्वः । पुच्छे यथा—लीलाविलोलितललामविलासभासः । ललनाः स्त्रीनाडिजिह्वाः । ललति ललना । नंद्यादिः । स्त्रियां यथा—हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नांतरात्मा नीत्वा खेदं ललितललनापादरागांकितेषु । नाडिः सिरा । जिह्वा रसना । लांछनं लक्ष्मसंज्ञयोः । लांछ्यतेऽनेन लांछनं । लक्ष्मणि यथा—कठोरताराधिपलांछनच्छवि । संज्ञा अभिधानं ॥ ३९९ ॥ लांगली स्याद्बलभद्रे नालि-

दैवानिष्टफले सक्तौ स्त्रीपानमृगयादिषु ॥
पापे विपत्तावशुभे व्यंजनं श्मश्रुचिह्नयोः ॥ ४०१ ॥

तेमनेऽवयवे कादौ वमनं छर्दनेऽर्दने ।
वसनं छादने वस्त्रे वर्जनं त्यागहिंसयोः ॥ ४०२ ॥

केरे । लांगलमस्त्यस्य लांगली । द्वयोर्यथा—लांगलिलीलाललिते माधवविच्छित्तिजनितसौभाग्ये । अथ लेखनं । भूर्जे च्छेदे लिपिन्यासे । लिख्यतेऽस्मिन् लेखनं । भूर्जो बहुत्वकः । तत्र लिपिन्यासे च यथा—विधेयं लेखने तज्ज्ञै राजादेशस्य लेखनम् । च्छेदे यथा—करोतु तत्र किं नाम वनिता नखलेखनम् । व्यसनं निष्फलोद्यमे । दैवानिष्टफले सक्तौ स्त्रीपानमृगयादिषु । पापे विपत्तावशुभे । व्यस्यति श्रेयोमार्गात् व्यस्तिर्वा व्यसनं । निष्फलोद्यमे यथा—पठकः पाठकश्चैव ये चान्ये शास्त्रचिंतकाः । तेऽमी व्यसनिनः सर्वे यः क्रियावान्स पंडितः ॥ ४०० ॥ दैवानिष्टफले यथा-ये प्राप्ते व्यसनेऽप्यना-कुलधियः संपत्सु नेवोन्नताः । सक्तिरासक्तिस्तत्र यथा—परोपकार-व्यसनं महात्मनाम् । स्त्रीपानमृगयादिषु । द्यूतं च मांसं च सुरा च वेश्या, पापर्द्धि चौर्यं परदारसेवा । एतानि सप्तव्यसनानि लोके, पापाधिके पुंसि सदा भवंति । पापे यथा—देवः स वो दिनमणिर्व्यसनानि हन्तु । विपत्तौ यथा—यदेंदोरन्वेति व्यसन-मुदयं वा निधिरपां । अशुभे यथा—व्यसने नियोजयेच्छत्रुं । व्यंजनं श्मश्रुचिह्नयोः । तेमनेऽवयवे कादौ । व्यज्यतेऽनेन व्यंजनं । पंचस्वर्थेषु श्मश्रुणि यथा—आकुंचितव्यंजनभक्तिभाजा मुखेन नारीनयनानि मुष्णन् । चिह्ने यथा—अमात्यव्यंजनराज्ञां दूष्यास्ते शत्रुसंज्ञिताः । अत्र हि अमात्यत्वं व्यंजनचिह्नमेवामि-व्यर्थः ॥ ४०१ ॥ तेमनं निष्ठानादि । तत्र कादौ च यथा—व्यं-

वर्द्धनं छेदने वृद्धौ वर्द्धनी तु गलंतिका ।
वपनं मुंडने बीजाधानेऽथ वर्त्तनी पथि ॥ ४०३ ॥
वर्त्तने तर्कुपिंडे च वनश्वा विप्रतारके ।
शार्दूले गंधमार्जारे वामनो दिग्गजेऽच्युते ॥ ४०४ ॥

जनैः प्रवृत्ते सुसंस्कृतैर्वागियं रसवती कवेरिव । अवयवः शरीरैकदेशः । तत्र यथा—उभयव्यंजना पोटा । वमनं छर्दनेऽर्दने । वम्यते वमनं । छर्दने यथा—षण्मास्यां कुरुते यस्तु वमनं वा विरेचनम् । अर्दनं पीडा । वसनं छादने वस्त्रे । वसिक् आच्छा-दने । वस्यतेऽनेन वसनं । छादने आच्छादने यथा—दशनवसन-भूमिबंधुजीवं दुनोति । वस्त्रे यथा—आत्मनैव रुरुधे कृतिनेव स्वेदसंगिवसनं जघनेन । वर्जनं त्यागहिंसयोः । वर्ज्यते वर्जनं । त्यागो दानं । परिहारो वा । दाने यथा—स्त्रीणां व्यधाद्वर्जन-मर्जितानां । परिहारे यथा—खलानां कृतिभिः कार्यं दूरादेव तु वर्जनम् । हिंसायां यथा—न स्यात्कलौ वर्जनमर्जुनोनां ॥ ४०२ ॥ वर्द्धनं छेदने वृद्धौ । वर्द्धण् छेदनपूरणयोः । वृधङ् वृद्धौ वा । भावेऽनटि वर्धनं । छेदने यथा—प्राक् नालवर्द्धनात्पुंसो जातकर्म विधीयते । वृद्धौ यथा—अवंध्यवचसा येन निरुद्धं विंध्यवर्द्धनम् । वर्द्धनी तु गलंतिका । वार्द्धियतेऽस्यां वर्द्धनी । पृषोदरादित्वात् । गलंतिका गर्गरी । तत्र यथा—न वृद्धा वर्द्धनीं वोढुं सुदृढा नीरपूरिताम् । संमार्जिन्यामपि । यथा—संमार्जनी बहुकरी वर्द्धनी च समूहिनी । वपनं मुंडने बीजाधाने । उप्यते वपनं । मुंडने यथा—तीर्थे वपनमाचरेत् । बीजाधाने यथा—कुर्वंति व्रीहिवपनं क्षेत्रे तप्तांबुपूरिते । अथ वर्त्तनी पथि । वर्त्तने तर्कुपिंडे च । वर्त्तन्ते-ऽस्यां अनया वा वर्त्तनी । पथि यथा—अकीर्तिवर्त्तनी चैषा कुकवित्वबिडंबना ॥ ४०३ ॥ वर्त्तने जीविकायां यथा—कां वर्त्तनी-

खर्वेऽङ्कोठे वाहिनी तु सेनातद्भेदसिन्धुषु ।
स्याद्वाणिनी तु नर्तक्यां छेकमत्तस्त्रियोरपि ॥ ४०५ ॥

वितानं कदके यज्ञे विस्तारे क्रतुकर्मणि ।
तुच्छे मंदे वृत्तभेदे शून्यावसरयोरपि ॥ ४०६ ॥

मनुसरत्विह साधुवर्गः । तर्कोरधस्तात्पाषाणादिमयः पिंडस्तर्कुपिंडः । वनश्वा विप्रतारके । शार्दूले गंधमार्जारे । वने श्वेव वनश्वा । त्रिष्वपि यथा—वनश्वा विश्वासे विशति न हि कस्यापि नितराम् । विप्रतारकोऽरण्यश्वेत्यन्ये । वामनो दिग्गजेऽच्युते । खर्वेऽङ्कोठे । वाम ह्रस्वावयवत्वमस्त्यस्य वामनः । नांगादेरिति नः । खर्वे वाच्यलिंगः । दिग्गजे दक्षिणाशाद्विपे यथा—काव्यालंकारभूरुर्वी वामनेनैव धारिता । अच्युते यथा—वामनाश्रमपदं ततः परं ॥ ४०४ ॥ खर्वे यथा—उद्बाहुरिव वामनः । अंकोठो वृक्षः । वाहिनी तु सेनातद्भेदसिंधुषु । वाहाः सन्त्यस्य वाहिनी । वहत्यवश्यं वा । आवश्यके णिन् । सेना सेनामात्रं । तस्याः सेनायाः भेदः प्रकारः । यदाह—त्रिभिर्गुल्मैर्गणस्तैस्तु वाहिनी त्रिभिरिष्यते । सिंधुर्नदी । त्रिष्वपि यथा—वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुंचन्त्यभीक्ष्णम् । स्याद्वाणिनी तु नर्तक्यां छेकमत्तस्त्रियोरपि । वणति अवश्यं वाणिनो । वानिनीत्यमरः । छेका विदग्धा । मत्ता उन्मत्ता । त्रिष्वपि यथा—यस्मिन्महीं शासति वाणिनीनां निद्रां विहारार्द्धपथे गतानाम् ॥ ४०५ ॥ वितानं कदके यज्ञे विस्तारे क्रतुकर्मणि । तुच्छे मंदे वृत्तभेदे शून्यावसरयोरपि । वितन्यते वितानं । नवस्वर्थेषु तुच्छमंदयोर्वाच्यलिंगः । वृत्तभेदे क्लीबे । अन्यत्र पुंक्लीबः ।

विज्ञानं कार्मणे ज्ञाने विलग्नं मध्यलग्नयोः ।
विक्लिन्ना जीर्णशीर्णार्द्राः विलीनौ लीनविद्रुतौ ॥ ४०७ ॥

विषघ्नः शिरीषतरौ विषघ्ना त्रिवृताऽमृता ।
विच्छिन्नं तु कुटिले स्यात्समालब्धविभक्तयोः ॥ ४०८ ॥

कदके उल्लोचः । तत्र शून्ये च यथा—बृहत्तुलैरप्यतुलैर्वितानमालावनद्धैरपि चावितानैः । यज्ञे क्रतुकर्मणि च यथा—सोमपायिनि भविष्यते मया वांच्छितोत्तमवितानयाजिना । विस्तारे यथा—विलुलितकमलौघः कीर्णवल्लीवितानः । तुच्छे मंदे च यथा—चित्रं तेऽतिवितानमारमति चेदेवं भवानीपतिम् । वृत्तभेदोऽष्टाक्षरजातौ छन्दः । यदाह—अन्यदतो हि वितानं । अवसरे यथा—वितानेतानेवं नटयति नटान्भूपतिलकः ॥ ४०६ ॥ विज्ञानं कार्मणे ज्ञाने । विज्ञायते विज्ञानं । द्वयोर्यथा—विज्ञानं योगिनामेव नैवान्यत्र विलोक्यते । विलग्नं मध्यलग्नयोः । विलगति स्म विलग्नं । क्ते क्षुब्ध विरिब्धेति (४।४।७०) साधुः । विलज्जते स्म वा । मध्ये पुंक्लीबः । तत्र यथा-मध्येन सा वेदिविलग्नमध्या । लग्नं सक्तं । राशीनामुदयो वा । सक्तेर्वाच्यलिंगः । तत्र यथा—नमंति यं मौलिविलग्नपाणयः । राशीनां मेषादीनामुदये यथा—विलग्नभुवनं गते । विक्लिन्ना जीर्णशीर्णार्द्राः । विक्लिदयति विक्लिन्नः । वाच्यलिंगः । त्रिष्वपि यथा—विक्लिन्नान्नपरीभोगाद्रोगः स्यादंगिनां ध्रुवम् । जरया जीर्णे इत्यनः । विलीनौ लीनविदुतौ । विलीयते स्म विलीनः । वाच्यलिंगः । लीनं संश्लिष्टं । विदुतं विनष्टं द्रवीभूतं वा सर्वत्र यथा—स्वर्णं तत्किं न तत्रैव विलीनं दहनोदरे ॥ ४०७ ॥ विषघ्नः शिरीषतरौ । विषं हंति विषघ्नः । अचित्ते टगिति

विमानं देवतायाने सप्तभूमगृहेऽपि च ।
विधानं हस्तिकवले प्रेरणेऽभ्यर्चने धने ॥ ४०९ ॥
वेतनोपायविधिषु प्रकारे वैरकर्मणि ।
विपन्नो भुजगे नष्टे विश्वप्सा वह्निचंद्रयोः ॥ ४१० ॥
समीरणे कृतांते च विलासी भोगिसर्पयोः ।
विषयी विषयासक्ते वैषयिकजने नृपे ॥ ४११ ॥

(५।१।८३) टक् विषघ्ना त्रिवृताऽमृता॰ विषं हन्यतेऽनया विषघ्ना । स्थादित्वात्कः । द्वेऽपि लताभेदौ विषघ्नी इत्यन्ये । विच्छिन्नं तु कुटिले स्यात्समालब्धविभक्तयोः । विच्छिद्यते स्म विच्छिन्नं वाच्यलिङ्गः । कुटिलं वक्रं । समालब्धं वर्द्धितं विभक्तं पृथक्कृतं । त्रिष्वपि यथा—अविच्छिन्नतरुश्रेणिविच्छिन्नाप्ततपसंचरम् । समाप्तावपि मङ्खः । यथा—अविच्छिन्नोऽभवत् जलधिलहरी सङ्गसुभागे ॥ ४०८ ॥ विमानं देवतायाने सप्तभूमगृहेऽपि च । विमान्ति विमानं । पुंक्लीबः । देवतायाने यथा—खिलीभूते विमानानां तदापातनयात्यवि । सप्तभूमिगृहे यथा—नरेन्द्रकृतसन्मानो विमाने मानवेश्वरः । अश्वयानमात्रयोरपि । विधानं हस्तिकवले प्रेरणेऽभ्यर्चने धने । वेतनोपायविधिषु प्रकारे वैरकर्मणि । विधियतेऽनेन विधिर्वा विधानं । नवस्वर्थेषु यथा—स सिन्धुरविधानेन कुटुंबं परिपुष्यति ॥ ४०९ ॥ विपन्नो भुजगे नष्टे । विपद्यते स्म विपन्नः । नष्टः परासुः । तत्र वाच्यलिगः। द्वयोर्यथा—चंद्रचूडाभिधो जातो विपन्नः पन्नगाऽन्वये विश्वप्सा वह्निचंद्रयोः । समीरणे कृतांते च । विश्वं प्साति विश्वप्सा । श्वान्मातरिश्वान्निति (उ० ९०२) साधुः । पुंसि । चतुर्ष्वपि यथा—विश्वप्सा विश्वविश्रुतः ॥ ४१० ॥ विलासी

कामे विषयिहृषीके व्युत्थानं प्रतिरोधने ।
विरोधाचरणे स्वैरवृत्तौ समाधिपारणे ॥ ४१२ ॥
वृजिनः केशे वृजिनं भुग्नेऽघे रक्तचर्मणि ।
वेष्टनं मुकुटे कर्णशष्कुल्युष्णीषयोर्वृतौ ॥ ४१३ ॥

भोगिसर्पयोः । विलसतीत्येवं शीलो विलासी । विले आस्ते इति वा । अजातेः शील इति णिन् । भोगिनि वाच्यलिंगः । द्वयोर्यथा—विलासिनां लासक एष वायुः । विषयी विषयासक्ते वैषयिकजने नृपे । कामे । विषयः स्पर्शादिर्जनपदो वाऽस्त्यस्य विषयी । विषये स्पर्शादौ आसक्तः । विषयासक्तः । तत्र वाच्यलिंगः । वैषयिकजनो ग्रामकुंडादिः । नृपो राजा । कामः स्मरः । चतुर्ष्वपि यथा—नो शक्यते विषयिणा विषयो विमोक्तुम् ॥ ४११ ॥ विषयि हृषीके । हृषीके इन्द्रिये क्लीबः । व्युत्थानं प्रतिरोधने । विरोधाचरणे स्वैरवृत्तौ समाधिपारणे । विगतमुत्थानमत्र व्युत्थानं । विरुद्धं विशिष्टं वा उत्थीयतेऽस्मिन्निति वा । चतुर्ष्वर्थेषु प्रतिरोधने समाधिपारणे च यथा—समाधिर्मरुतां चापि व्युत्थाने योगिनां मनः । विरोधाचारणे स्वैरवृत्तौ च यथा—व्युत्थानं परिहृत्य भूमिपनयो यातास्तव प्रेष्यताम् ॥ ४१२ ॥ वृजिनः केशे । वृज्यते वृजिनः । वृजि तुहीति (उ० २८३) किदिनः । यथा—व्रजति वृजिनपाशः कामपाशत्वमस्याः । वृजिनं भुग्नेऽघे रक्त चर्मणि । भुग्नं कुटिलं । तत्र वाच्यलिंगः । तत्र अघे च यथा-शिवं दिशंतु वः सर्वे निरस्तवृजिना जिनाः । रक्तचर्मणि यथा-वृजिनजनितवेषः सैष शंभुर्ननर्त—वेष्टनं मुकुटे कर्णशष्कुल्युष्णीषयो-र्वृतौ । वेष्टंतेऽनेन वेष्टयते वा वेष्टनं । चतुर्ष्वर्थेषु मुकुटे उष्णीषे च यथा—तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना

वेदना ज्ञाने पीडायां शयनं स्वापशय्ययोः ।
रते शमनस्तु यमे शमनं शांतिहिंसयोः ॥ ४१४ ॥

श्वसनं श्वासे श्वसनः पवने मदनद्रुमे ।
शकुनं स्याद्दैवशंसि निमित्ते शकुनः खगे ॥ ४१५ ॥

सुतः । कर्णशष्कुली कर्णपुत्रिका । वृतिर्वरणं तत्र यथा—भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ॥ ४१३ ॥ वेदना ज्ञाने पीडायां वेद्यते वेदना । णिवे त्यासेत्यनः । (५।३।१११)। ज्ञाने यथा—संमूर्च्छिता हि सन्त्येव तिरश्चामपि वेदनाः । पीडायां यथा—व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः । शयनं स्वापशय्ययोः । रते । शय्यते शेरतेऽत्र वा शयनं । शय्यायां पुंक्लीबः । स्वापे यथा—शयनं मह्यास्तले केवले । शय्यायां यथा—संविष्टकुशशयने निशां निनाय । रते सुरते यथा—क्लान्तिं निहंति पवनः शयनावसाने । शमनस्तु यमे । शमयति शमनः । यथा—असि भुजगविभूषणस्तवासावरिशमनो जयति क्षितीशबाहुः । शमनं शान्तिहिंसयोः । शम्यते शमनं । शांतौ यथा—मुनीनां कोपशमनं मुख्यमंगं तपोविधिः । हिंसायां यथा—विवर्जयेद्यः शमनं पशूनाम् ॥ ४१४ ॥ श्वसनं श्वासे । श्वश्यते श्वसनं । यथा—श्वसनमुरजवं संत्यजोर्द्ध्वप्रवृत्तम् । पुल्लिंगोऽयमित्यन्यः । श्वसनः पवने मदनद्रुमे । श्वसिति श्वसनः । पवने यथा—कुंठकुहरे विमूढः श्वसनो यावन्न निर्याति । मेरुवकेपि मंखः । तत्र यथा—कामाग्निः श्वसनेन दीपितः । शकुनं स्याद्दैवशंसि निमित्ते । शक्यतेऽनेन शक्नोति वा शकुनं । यम्यजीत्पुनः । यथा—शकुनादिव मार्गवर्त्तिभिः पुरुषादुद्विजितव्यमीदृशः । शकुनः खगे । यथा—प्रभाते

शकुनिः खगे करणभेदे कौरवमातुले ।
शतघ्नी तु वृश्चिकाल्यां शस्त्रभेदकरंजयोः ॥ ४१६ ॥

शासनं नृपदत्तोर्व्यां शास्त्राज्ञालेखशास्तिषु ।
शिखरी कोट्टकोयष्टयोर्द्रुमेऽपामार्गशैलयोः ॥ ४१७ ॥

निर्भीकैर्विपिनशकुनैकूर्जितमितः ॥ ४१५ ॥ शकुनिः खगे करणभेदे कौरवमातुले । शक्नोति शकुनिः । शकेरुनिः । पुंसि । खगे यथा—वणिक्चक्राक्रन्दत्विषि शकुनिकोलाहलाकुले । करणभेदो ज्योतिःशास्त्रप्रसिद्धः । तत्र यथा—शकुनिचतुष्पदनागे । कौरवमातुले यथा— शात्रवं शस्त्रसंघातैर्दुनोति शकुनिः पुनः । शतघ्नी तु वृश्चिकाल्यां शस्त्रभेदकरञ्जयोः । शतं हंति शतघ्नी । संचित्ते टक् । वृश्चिकाली ओषधिः । शस्त्रभेदः शस्त्रविशेषः । यदाह—शतघ्नी तु चतुस्ताला लोहकंटकसंचिता । तत्र यथा—अयः संकुचितां रक्षः शतघ्नीमथ शत्रवे । करंजो वृक्षः ॥ ४१६ ॥ शासनं नृपदत्तोर्व्यां शास्त्राज्ञालेखशास्तिषु । शासत्यनेन शास्तिर्वा शासनं । पंचस्वर्थेषु । आज्ञा आदेशः । शास्तिः शिक्षणं पालनं वा । नृपदत्तोर्व्यां यथा—स्वदत्तं परदत्तं वा यो हरेदेवशासनम् । शास्त्रे यथा—शब्दशासनविदः समासयोर्विग्रहं व्यवसायुः स्वरेण ते । आज्ञायां शास्तौ च यथा—पाकशासनसमानशासनः । लेखे यथा—तमभ्यनदत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः । शिखरी कोट्टकोयष्टयोर्द्रुमेऽपामार्गशैलयोः । शिखरमस्त्यस्य शिखरी । पंचस्वर्थेषु कोट्टो दुर्गं तत्र यथा—शिखरिशिखरमेतन्मालितं भूमिपालैः । कोयष्टिः पक्षिविशेषः । द्रुमे यथा—विवर्द्धन्ते कष्टं गिरिशिखरिणो वातविधुताः । अपामार्ग ओषधिः । शैले यथा—

शिखण्डी कुक्कुटे चित्रमेखले बर्हिबर्हयोः ।
भीष्मारौ बाणे श्रृंगारी सुवेषे क्रमुके द्विपे ॥ ४१८ ॥
श्लेष्मघ्ना स्यान्मल्लिकायां कंपिल्यकफणिज्जयोः ।
शोभनः सुन्दरे योगे सवनं स्नानयागयोः ॥ ४१९ ॥
सोमनिर्दलने चापि सदनं जलसद्मनोः ।
स्तननं कुंथने मेघगर्जितध्वनिमात्रयोः ॥ ४२० ॥

शिखरिणि क्व नु नाम कियच्चिरम् । किमभिधानमसावकरोत्तपः ॥ ४१७ ॥ शिखंडी कुक्कुटे चित्रमेखले बर्हिबर्हयोः । भीष्मारौ बाणे । शिखंडोऽस्त्यस्य शिखंडी । चित्रमेखलः पक्षी । कुक्कुटे चित्रमेखले बर्हिणि च यथा—यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखंडिबर्हः । बर्हे कलापे यथा—केकिनोऽपि विराजन्ते नवोद्भिन्नैः शिखंडिभिः । भीष्मस्य अरिः शत्रुस्तत्र यथा—हते जरति गांगेये पुरस्कृत्य शिखण्डिनम् । बाणे यथा—शिखण्डिभिः खंडितमुडमंडलः । श्रृंगारी सुवेषे क्रमुके द्विपे । श्रृंगारोऽस्त्यस्य श्रृंगारी । सुवेषे वाच्यलिंगः । तत्र यथा—श्रृंगारी नागरो नरः । क्रमुकः पूगः । द्विपो हस्ती ॥ ४१८ ॥ श्लेष्मघ्ना स्यान्मल्लिकायां कंपिल्यकफणिज्जयोः । श्लेष्मा हन्यतेऽनया श्लेष्मघ्ना स्थादिभ्यः क इति कः । मल्लिका विचकिलः । कंपिल्यको वृक्षः । फणिज्जो मरुबकः । शोभनः सुन्दरे योगे । शोभते शोभनः । इडितो व्यंजनाद्यंतादित्यनः । सुन्दरे वाच्यलिंगः । तत्र यथा-शोभनाकृतिरयं नृपात्मजः । योगे यथा—सौभाग्यः शोभनस्तथा । सवनं स्नानयागयोः । सोमनिर्दलने चापि । सूयते सवनं । स्नाने यथा—मध्यंदिने नरपतिः सवनं विधाय । यागे यथा—समुच्चारितृतीयं सवनव्रतब्रह्मणि ब्रह्मणि ॥ ४१९ ॥ सोमस्य

स्पर्शनं हृषीके दाने, स्पशे च स्पर्शनोऽनिले ।
स्पंदनं श्रवणे तोये स्पन्दनस्तिनिशे रथे ॥४२१॥
संव्यानं छादने वस्त्रे समानो देहमारुते ।
वर्णभित्सत्समैकेषु संतानोऽपत्यगोत्रयोः ॥४२२॥

ओषधराजस्य निर्दलनं निर्मथनम् । तत्र यथा—एतस्मिन्सवनविधौ विधूतपापाः । सदनं जलसद्मनोः । सीदन्त्यत्र सदनं । जलं नीरं । सद्मनि यथा-अमरसदनादिभ्यो भूतानकीर्तिरनश्वरी । स्तननं कुंथने मेघगर्जितध्वनिमात्रयोः । स्तन्यते स्तननं । कुथनं संक्लेशः । मेघगर्जिते यथा—जलदपंक्तय इव उच्चैः स्तननाभिरम्याः । ध्वनितमात्रे यथा-दुंदुभिस्तननपुष्पवर्षणैरन्वमोघत महः सुरैरपि ॥४२०॥ स्पर्शनं हृषीके दाने स्पर्शे च । स्पृश्यते स्पर्शनं कर्मणि भावे वाऽनट् । हृषीके यथा—स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रमितींद्रियं । दाने स्पर्शे च यथा—अश्वत्थसेवा तिलपात्रदानं गोस्पर्शनं ब्राह्मणतर्पणं च । स्पर्शनोऽनिले । स्पृशति स्पर्शनः । नंद्यादित्वादनः । अनिले वायौ यथा—स्पर्शनं हि क उपैति चक्षुषा । स्पन्दनं श्रवणे तोये । स्पद्यते स्पंदनं । द्वयोर्यथा-स्वेदस्पंदनलीनचीनवसनै दृश्यांगयष्टिश्चिरम् । स्पन्दनस्तिनिशे रथे । तिनिशो वृक्षः । रथे यथा—रंहोभाजामक्षधूः स्पंदनानाम् ॥४२१॥ संव्यानं छादने वस्त्रे । संवीयते संव्ययति संवीयतेऽनेन वा संव्यानं । द्वयोर्यथा-संव्यानलीला तरुवल्कलानि । समानो देहमारुते । वर्णभित्सत्समैकेषु । समानीयते समानः । क्वचिदिति डः । समानित्यनेन वा । समानं तुल्यं मानं परिमाणमस्येति वा सह मानेन वर्त्तते इति वा । सत्समैकेषु वाच्यलिंगः । देहमारुते पुक्लीबः । समेऽपीति लिंगविदः । देहमारुते यथा-समानोऽग्निसमीपस्थः कोष्ठे चरति केवले । वर्णभिदि समे च यथा—समानानां भवेद्दैर्घ्यं संहतानां परस्परम् । सति साधौ यथा-समानो मान्यते न कैः । एकस्मिन् असाधारणे यथा—समानस्थानलाभेन जहर्ष मुनिकुंजरः । संतानोऽपत्यगोत्रयोः संततौ देववृक्षे च । संतन्यते संतानः । चतुर्ष्वर्थेषु । अपत्यं

संततौ देववृक्षे च संस्थानं त्वाकृतौ मृतौ
चतुष्पथे संनिवेशे सज्जनं घट्टगुल्मके ॥४२३॥
सज्जनस्तु कुलीने स्यात्सज्जनापि च कल्पना ।
संधानं तु संघटनेऽभिषवे संधेनी तु गौः ॥४२४॥
वृषाक्रांताऽकालदुग्धा स्थापनं तु निवेशने ।
पुंसवने समाधौ च साधनं सिद्धिसैन्ययोः ॥४२५॥

पुत्रपौत्रादिः । गोत्रं वंशः । संततिः प्रवाहः । अपत्ये यथा—संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा । गोत्रे यथा—संतानतानवकृतः पुरुषस्य जन्मः व्यर्थं भवेदिति किमत्र विचित्रता ते ॥४२२॥ संततौ यथा—अस्यां शरदि नदीनां संतानस्तानवं याति । देववृक्षे यथा—संतान-कतरुच्छाया-सुप्त—विद्याधराध्वगं । संस्थानं त्वाकृतौ मृतौ चतुष्पथे संनिवेशे । संस्थितिः संस्थीयतेऽत्र वा संस्थानं । आकृतौ टंके यथा—संस्थानमास्थानमनो जहार । मृतिर्मरणं । संनिवेशो रचना तयोर्यथा—मालाकार इव स्रजां स विदधे संस्थानमुच्चैर्द्विषाम् । चतुष्पथे यथा—विधेयः संस्थाने स्थिरतरमनोभिर्बलिविधेः । सज्जनं घट्टगुल्मके । सत् जनयति सज्जति वा सज्जनं । घट्टो नद्यवतारस्तत्र गुल्ममायस्थानं घट्टगुल्मकं सेनासंनिवेशविशेषो वा । तयोर्यथा—धीरोपि सज्जनमुखे मुखमेति कस्कः ॥४२३॥ सज्जनस्तु कुलीने स्यात् । संश्चासौ जनश्च सज्जनः । वाच्यलिंगः । यथा—साध्वी सदा सदाचारसज्जसज्जनसेविता । सज्जनापि च कल्पना । सज्जनं सज्जना । णिवेत्यासेत्यनः (५।३।१११) कल्पना इभसज्जीकरणं । तत्र यथा—किं दुष्करं भवति सज्जनया गजानां । संधानं तु संघटनेऽभिषवे । संधीयते संधानं । संघटने यथा—कामु केणेव गुणिना बाणः संधानमेष्यति। अभिषवे यथा-साधुभिर्मद्यसाधनं न विधेयं कदाचन । संधे(सेध)नी तु गौः वृषाक्रांताऽकालदुग्धा । संधा गर्भग्रहणमस्त्यस्याः संधेनी । शिखादित्वादिन् ॥४२४॥ वृषेणाक्रम्यते स्म

उपायेऽनुगमे मेढ्रे निवृत्तौ कारके वधे ।
दापने मृतसंस्कारे प्रमाणे गमने धने ॥४२६॥
सुकर्मा योगभेदे स्यात्सत्क्रिये देवशिल्पिनि ।
सुदामा पर्वते मेघे सुधन्वा त्वष्टृधन्विनोः ॥४२७॥

वृषाक्रांता लग्नगर्भा इत्यर्थः । न काले दुह्यते स्म अकालदुग्धा । य क्त्वात्पः । अदुग्धा दोहकाले तु संधेनी । वृषाक्रांता अकालदुग्धेति च गोविशेषणं । तेनार्थद्वयमेव । द्वयोर्यथा-आविकं संधेनी क्षीरं न भोक्तव्यं द्विजन्मभिः । स्थापनं तु निवेशने । पुंसवने समाधौ च। स्थाप्यते स्थापनं निवेशने यथा-द्विषां पुनः स्थापनमाततान । पुंसवने गर्भक्रियाविधौ यथा—संस्थापनं कारयते महिष्याः। समाधौ यथा-योगी सदा स्थापनवीत-मोहः । साधनं सिद्धिसैन्ययोः उपायेऽनुगमे मेढ्रे निवृत्तौ कारके वधे । दापने मृतसंस्कारे प्रमाणे गमने धने ॥ साध्यते साध्यतेऽनेन वा साधनं । त्रयीदशस्वर्थेषु । सिद्धौ निष्पत्तौ च यथा—स्वार्थहान्यापि कुर्वीत गुरोरेवार्थ-साधनं ॥ सैन्ये मेढ्रे च यथा—साधनं समुद्धयस्य यन्नान्यस्य विलोक्यते ॥४२५॥ उपाये यथा-कृतं तपः साधनमेतयावपुः । अनुगमे यथा-गुरूणां साधनं कार्यमुदकात्प्रागिति स्थितिः । निवृत्तौ निषेधे यथा-विधानमारब्ध ससाधनं मुधा । कारके साधकतमे यथा—प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता । वधे यथा--अहन्यहनि भूपालः कुरुते वैरिसाधनं । दापने यथा—साधनं द्विगुणं कार्यं मृणिकस्योत्तमर्णकैः । मृतसंस्कारे यथा—वह्निना देहसाधनं । प्रमाणे यथा—साधनं दूषणं चैव समासं परसंविदे । गमने यथा—गंगातीरे साधनं सिद्धिहेतुः । धने यथा—तपस्विनामुच्छिलं हि साधनं ॥४२६॥ सुकर्मा योगभेदे स्यात् । सत्क्रिये देवशिल्पिनि । शोभनं कर्माऽस्य सुकर्मा सत्क्रिये वाच्यलिंगः । शेषयोः पुंसि । योगभेदे यथा—अतिगंडः सुकर्मा च । सत्क्रिये यथा—सुकर्मनिर्माणेन हि । देवशिल्पिनि

सुपर्वा पर्वणि शरे त्रिदशे वंशधूमयोः ।
सूचना स्यादभिनये गंधने व्यधने दृशि ॥४२८॥
सेवनं सीवनोपास्त्योः सेनानीः सैन्यपे गुहे ।
[1]हायनोऽर्चिव्रीहिवर्षे ह्लादिनी वज्रविद्युतोः ॥४२६॥

यथा–सुकर्मनिर्मिते हर्म्ये सुपर्वाणः सदासते । सुदामा पर्वते मेघे । सुष्ठु ददाति सुदामा । मन् । पुंसि । द्वयोर्यथा–सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वी । अत्र सुदाम्ना पर्वतेन मेघेन वा एकदिक्सौदामनी । टस्तुन्यदिशीत्यणि ङीः । सुधन्वा त्वष्टृधन्विनोः शोभनं धन्वाऽस्य सुधन्वा । पुंसि । त्वष्टो देववर्द्धकिः । धन्विनि यथा–अंधकारं शरासारैः सुधन्वानो वितन्वते ॥४२७॥ सुपर्वा पर्वणि शरे त्रिदशे वंशधूमयोः । सुष्ठु पृणाति सुपर्वा । शोभनं पर्वास्य वा । पुंसि । पर्व महः । सर्वेषु यथा–अखर्वाः स्वगुणा यस्य स सुपर्वेव वर्ण्यते । सूचना स्यादभिनये गंधने व्यधने दृशि । सूचनं सूच्यतेऽनया वा सूचना । णिवेत्यासेत्यनः (५।३।१११) चतुष्वर्थेषु गंधनं द्रोहाभिप्रायेण परदोषोद्घट्टनं । व्यधनं सूच्यादि । दृक् दृष्टिः । सर्वेषु यथा–जहे मनः सूचनया न कस्य ॥४२८॥ सेवनं सीवनोपास्त्योः । डुषिवूच् ङतौ । षेवृङ् सेवने वा । भावेऽनटि सेवनं । द्वयोर्यथा–सेवनदृढीकृतानां स्वामिपटानां क्षतिः क्व संदृष्टा । सेनानीः सैन्यपे गुहे । सेनां नयति सेनानीः । पुंसि । सैन्यपे यथा–तदिच्छामः प्रभो स्रष्टुं सेनान्यं तस्य (तारकदानवस्य) शान्तये । गुहे षण्मुखे यथा–सेनान्यमालीढमिवासुरास्त्रेः । हायनोऽर्चिव्रीहिवर्षे । जहाति जिहीते वा हायनः । हः कालव्रीह्योरिति टनण् अर्चिषि तु बाहुलकात् । व्रीहौ पुंसि । अन्यत्र पुंक्लीबः । अर्चिषि दीप्तौ यथा–हव्यप्रवाह-बहु-हायनहव्यवाहस्यूर्जस्फुलिंगनिचयप्रकटीकृताशः । व्रीहौ

[1] मु॰मू॰–हसन्यङ्गारधान्यां स्याद्धसनं हसिते मतम् ।
हस्तिनी नायिकाभेदे मातङ्गस्य स्त्रियामपि ॥ हायनो॰

हिंडनं क्रीडारतयोर्यानेऽनूपस्तु सैरिभे ।
जलप्रायेऽप्यथावापः पातभेदालवालयोः ॥४३०॥
प्रक्षेपे भांडपचनेऽप्याक्षेपः परिभर्त्सने ।
काव्यालंकरणाकृष्ट्योः स्यादाकल्पस्तु मंडने ॥४३१॥

षष्टिकाख्ये यथा--यवका हायनाः पांसुवाप्यनैषधकादयः । वर्षे यथा--तत्रैकहायन–कुरंगविलोचनायाः । ह्लादिनीवज्रविद्युतोः । ह्लादः शब्दोऽस्त्यस्या ह्लादिनी । वज्रे यथा–ह्लादिनी ह्लादवित्रस्ता जग्मुः शैला महोदधिं । विद्युति यथा--तासामासीत्तमसि शरणं ह्लादिनीनां प्रकाशः । सल्लक्यां नद्यां नादवत्यां च–मंखः । सल्लक्यां यथा–मातंगा ह्लादिनी भंगं । नद्यां यथा--श्रांता याति त्वरितममरह्लादिनीपार्श्वमश्वाः । नादवत्यां यथा–निह्लादिन्या विपंच्यामिलितमलिरुतेनेव तंत्रीस्वनेन ॥४२९॥ हिंडनं क्रीडारतयोर्याने । हिंडतेऽस्मिन् हिंडयते वा हिंडनं । त्रिष्वपि यथा--भंडानां हिंडनस्थानं । अथ पान्ताः । अनूपस्तु सैरिभे । जलप्रायेऽपि । अनूपोऽस्त्यस्य अनूपः । अभ्रादित्वादः । अनुगता आपोऽत्र वा । कक्यूः पथ्यपोदिति समासान्ते अनोर्देशे उवित्युपादेशः । सैरिभो महिषः । जलप्राये वाच्यलिंगः । तत्र यथा--तामग्रतस्तामरतांतराभामनूपराजस्य गुणैरनूनां । अथावापः पातभेदालवालयोः प्रक्षेपे भांडपचनेऽपि । आवपंत्यस्मिन्नित्यावापः । आवपनं वा । पातभेदस्तालकालक्रियाविशेषः । आलवाले यथा–आवापेषु पिबन्ति यत्र सलिलं सायं समश्वासिनः ॥४३०॥ प्रक्षेपे यथा--शरावापैर्व्याप्तं गगनतलमेतद्रघुपतेः । भांडपचनं आपाकस्थानं । तत्र यथा--आवापधूमपरिधूसरमंतरिक्षं । अरिचिंतावलयोरपि । अरिचिंतायां यथा--परं प्रत्यावापः फलति कृतसेकस्तरुरिव । वलये पुंक्लीबः । तत्र यथा--प्रकोष्ठः शुशुभे तस्या गतोप्यावापशून्यतां । आक्षेपः परिभर्त्सने । काव्यालंकरणाकृष्ट्योः । आक्षेपणमाक्षेपः । परिभर्त्सने यथा–आक्षेपरुक्षै वचनैर्विलक्षं । काव्यालंकरणे

कल्पने चाप्युलपस्तु गुल्मिनी तृणभेदयोः ।
उडुपः प्लवशशिनोः कलापो बर्हतूणयोः ॥४३२॥
संहतौ भूषणे कांच्यां कच्छपो मल्लबंधके ।
कमठे कच्छपी वीणा कसिपुर्भोज्यवस्त्रयोः ॥४३३॥

यथा—निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया । वक्ष्यमाणोक्तविषयः । स आक्षेपो द्विधा मतः । आकृष्टौ यथा—यत्रांशुकाक्षेप-विलज्जितानां । स्यादाकल्पस्तु मंडने कल्पने चापि । आकल्पते आकल्पनं वा आकल्पः । मंडने यथा-आकल्पसंकल्पितरूपशोभान् ॥४३१॥ कल्पने उद्देशे यथा—आकल्पस्तस्य हविषः कर्तव्यो देवतां प्रति । उलपस्तु गुल्मिनी तृणभेदयोः । वलते उलपः । विष्टपोलपवातपादप (उ० ३•७) इति साधुः । गुल्मिनी वेरुद्भेदः । तत्र क्लीबे इत्यन्ये । तृणभेदे यथा—उत्तीर्णभारलघुनाप्यलघूलपौघेसौहित्यनिःसहतरेण तरोरधस्तात् । उडुपः प्लवशशिनोः । उड्ड संघाते सौत्रः । उड्यते उडुपः । उडेरुपक् । उडून्पाति वा । प्लवे पुंक्लीबः । तत्र यथा-तितीर्षुं दुस्तरं मोहादुडुपेनास्मि सागरम् । शशिनि यथा—उडुप त्वं पूर्णकं भीभव । कलापो बर्हतूणयोः संहतौ भूषणे कांच्यां । कल्पते कलापः कलेरापः । कलामाप्नोति वा । बर्हे यथा-दृष्ट्वेव निर्जितकलापभरामधस्ताद्व्याकीर्णमाल्यकवरां कवरीं तरुण्याः । तूणे यथा—कलापयुक्तं कवचं धनुश्च ॥ ४३२॥ संहतौ यथा—भुजंगमानद्धजटाकलापं । भूषणे यथा-ध्वनिमधिकं कलमेखला कलापः । कांच्यां यथा-श्यामा स्वर्णकलापेन विद्युतेव घनावलिः । कच्छपो मल्लबंधके । कमठे । कत् कुत्सितं शपति कच्छपः । कच्छेन पिबति वा । मल्लको बंधविशेषः । कमठे यथा-भेकैः कोटरशायिभिर्मृतमिव क्ष्मान्तर्गतं कच्छपैः । कच्छपी वीणा । यदाह-सरस्वत्यास्तु कच्छपी । तत्र यथा—तद्गच्छ कच्छपीध्वानश्रवणोत्सुक संसदि । कसिपुर्भोज्यवस्त्रयोः । एकैकस्मिन्द्वयोश्चापि । कस गतौ

एकैकस्मिन्द्वयौश्चापि काश्यपो मुनिमीनयोः ।
काश्यप्युर्व्यां कुतपस्तु छागकंबलदर्भयोः ॥४३४॥
वैश्वानरे दिनकरे द्विजन्मन्यतिथौ गवि ।
भागिनेयेऽष्टमांशेऽह्नौ वाद्येऽथ कुटपो मुनौ ॥४३५॥
निष्कुटे मानभेदे च कुणपः पूतगंधिनि ।
शवे बिह्वापस्तु शुनि व्याघ्रे द्वीपिबिडालयोः ॥४३६॥

दंत्यांत्यः । कसति कसिपुः । कस्त्यर्त्तिभ्यामिति पुक् । पुंक्लीबः । तालव्यमध्येऽयमित्यन्ये ॥४३३॥ एकैकस्मिन्निति भोज्ये वस्त्रे च पृथक् वर्त्तते । द्वयोरिति भोज्यवस्त्रयोः युगपदित्यर्थः । तेनार्थत्रयं सिद्धं । त्रिष्वपि यथा—सतां गृहे करोषि त्वं हिरण्यकसिपुस्थितिं । काश्यपो मुनिमीनयोः । कस्यापस्यापत्यं काश्यपः । बिदादे व्यद्धे इति अञ् । कश्यपस्यायमिति वा । तस्येदमित्यण् । द्वयोर्यथा—वने यास्यति काश्यपः । काश्यप्युर्व्यां । यथा—त्वं न धारयसे चेत्तदधो यास्यति काश्यपी । कुतपस्तु छागकंबलदर्भयोः । वैश्वानरे दिनकरे द्विजन्मन्यतिथौ गवि भागिनेयेऽष्टमांशेऽहनौ वाद्ये । कुतिः सौत्रः । कुत्यते कुतपः । भुजिकिदीति किदपः । कुं पृथ्वीं तपति वा । दशस्वर्थेषु-छागकंबलदर्भदिनाष्टमांशेषु पुंक्लीबः । शेषेषु पुंसि । दर्भे यथा—कुतपं चासने दद्यात्तिलैश्चावकरेन्मर्द्धीं ॥४३४॥ भागिनेये यथा—माद्यन्मित्र-कलत्र-पुत्रकुतप-श्रेणीरणच्छृंखला बंधध्वस्त-गतेर्निरुद्धवपुषः कोधीदिविद्वेषिभिः । अष्टमांशोऽह्नौ मध्याह्ना प्रवृत्तिः श्राद्धकालः । यत्स्मृतिः—दिवसस्याष्टमे भागे मन्दीभवति भास्करे । सकालः कुतपो यत्र पितृभ्यो दत्तमक्षयं । वाद्यभेदे यथा—कुतपस्य तु बिन्यासः प्रात्याहार इति स्मृतः । शेषेषु यथा-कुतप एष तपस्विजनप्रियः । चार्मे स्नेहपात्रेऽपि । यथा-चकोराणां ज्योत्स्नारसकुतपकौतूहलकृतां । अथ कुटपो मुनौ निष्कुटे मानभेदे च । कुटं पाति कुटपः । कुटति वा । भुजिकुतीति किदपः ॥४३५॥ निष्कुटो

पादपो द्वौ पादपीठे पादपा पादरक्षणे ।
रक्तपः स्याद्यातुधाने रक्तपा तु जलौकसि ॥४३७॥
विटपः पल्लवे स्तंबे विस्तारे षिङ्गशाखयोः ।
सुरूपस्तु बुधे रम्ये प्राप्तरूपाभिरूपवत् ॥४३८॥
कदंबः सर्षपे नीपे कदंबं निकुरुंबके ।
कलंबो नालिकाशाके पृषत्वे नीपपादपे ॥४३९॥

गृहारामः । मानभेदः प्रस्थचतुर्थभागः । कुणपः पूतगंधिनि । शवे । कुणति कुणपः । भुजि कुतीति किदपः । पूतगंधिनि वाच्यलिंगः । शवे पुंक्लीबः । द्वयोर्यथा–कुणपं कामिनी भक्ष्यमिति तिस्रो विकल्पनाः । जिह्वापस्तु शुनि व्याघ्रे द्वीपिबिडालयोः । जिह्वया पिबति जिह्वां पाति वा जिह्वापः । चतुर्ष्वर्थेषु यथा–जिह्वापः पापचेष्टितः ॥४३६॥ पादपो द्वौ पादपीठे । पादैर्मूलैः पिबति पादौ चरणौ पाति वा पादपः । द्वौ वृक्षे यथा--अद्रींद्रकुंजवरकुंजर--गंडकाष--संक्रांतदान--पयसो वनपादपस्य । पादपीठे पादासनं । पादपा पादरक्षणे । पादरक्षणं पादुका । तत्र यथा-न पंथा पांथसार्थेन सुगमः पादपां विना । रक्तपः स्याद्यातुधाने । रक्तं पिबति रक्तपः । यातुधानो राक्षसः । रक्तपा तु जलौकसि । यथा-ग्रसंते सर्वतो रक्तं कुटन्यो रक्तपा इव ॥४३७॥ विटपः पल्लवे स्तंबे विस्तारे षिड्गशाखयोः । विटति विटपः । भुजि कुतीति किदपः । विटं पाति वा । षिड्गे पुंसि । शेषेषु पुंक्लीबः । पल्लवः किसलयं । स्तंबो गुच्छः विस्तारोऽर्थाद्वृक्षस्य षिड्गो विटः । शाखा तरोः स्कन्धादूर्ध्वप्रसृता । षिड्गवर्जं शेषेषु यथा–द्रुतसमीरचलैः क्षणलक्षितव्यवहिता विटपैरिव मंजरी । षिड्गे यथा–नृपविविधविटपरूपस्तथापि विटपः कथं नासि । सुरूपस्तु बुधे रम्ये प्राप्तरूपाभिरूपवत् शोभनं रूपमस्य सुरूपः । प्राप्तं रूपमनेन प्राप्तरूपः । अभिमतो रूपेण अभिरूपः । त्रयोऽपि वाच्यलिंगाः । द्वयोर्यथा–हृदयावर्जनचतुराः केऽपि सुरूपाः विराजन्ते ॥४३८॥ अथ बांताः ।

कादम्बः कलहंसेष्वोः नितम्बः कटिरोधसोः ।
स्त्रियाः पश्चात्कटौ सानौ प्रलम्बस्तु प्रलम्बनम् ॥४४०॥
दैत्यस्तालाङ्कुरः शाखा प्रालम्बः स्यात्पयोधरे ।
त्रपुसे हारभेदे च भूजम्बूस्तु विकङ्कते ॥४४१॥
गोधूमाह्वयधान्ये च हेरम्बः शौर्यगर्विते ।
महिषे विघ्नराजे चारम्भस्तु वधदर्पयोः ॥४४२॥

कदम्बः सर्षपे नीपे । कद वैक्लव्ये सौत्रः । कदति कदंबः । कदेर्णिद्वेत्यम्बः । कुत्सितमम्बते वा । नीपे यथा–नवकदंबरजोऽरुणिताम्बरे ॥ कदम्बं निकुरुम्बके । यथा–छायानद्धकदंबकं मृगकुलं रोमन्थमभ्यस्य तु । कलंबो नालिकाशाके पृषत्वे नीपपादपे ॥ कलंबते कलंबः । नालिकाशाके स्त्रीपुंसः । त्रिष्वपि यथा–करकलितकलंबः कोयनेति. प्रलंबः ॥४३९॥

कादंबः कलहंसेष्वोः । कदिः सौत्रः । कदति कादंबः । कदेर्णिद्वेति णिदंबः । कलहंसो धूसरपक्षो हंसः । तत्र यथा–अब्जं चुम्बति कादम्बः । इषौ बाणे यथा–तावत्पूगैरन्यनागाधिरोहः । कादम्बानामेकपातैरसीव्यत् । नितंबः कटिरोधसोः । स्त्रियाः पश्चात्कटौ सानौ । नितन्यते नितंबः । वलिनितनिभ्यां वः । कटौ पुरुषस्यापि श्रोणौ यथा–नितंबबिंबसंबंधबंधुरच्छुरिकाधरः । रोधसि कूले यथा–रंतुं क्षतोत्तुंगनितंबभूमयो मुहुर्व्रजन्तः प्रमदं मदोद्धताः । स्त्रियाः पश्चात्कटौ सानौ च यथा–सेव्या नितंबाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् । प्रलंबस्तु प्रलंबनं, प्रलंबनं प्रलंबते वा प्रलम्बः ॥४४०॥

दैत्यस्तालांकुरः शाखा । दैत्यतालांकुरशाखासु यथा–कपिः प्रलम्बं मुसलीव कृन्तति । प्रालम्बः स्यात्पयोधरे । त्रपुसे हारभेदे च । प्रालम्बते प्रालम्बः । पयोधरः स्तनः । त्रपुसं त्रपुसीफलं । त्रिष्वपि यथा–सगुणः शीतलो नव्यः प्रालम्बः कस्य न प्रियः । भूजंबूस्तु विकंकते । भुवि जंबूरिव भूजम्बूः । स्त्रियां । विकंकतः स्रुवावृक्षः ॥४४१॥

गोधूमाह्वयधान्ये च । हेरम्बः शौर्यगर्विते । महिषे विघ्नराजे च ।

त्वरायामुद्यमे चाप्यात्मभूः ब्रह्मणि मन्मथे ।
ऋषभः स्यादादिजिने वृषभे भेषजे स्वरे ॥४४३॥
कर्णरंध्रे कालपुच्छे श्रेष्ठे चाप्युत्तरस्थितः ।
ऋषभी तु शूकशिंब्यां पुरुषाकारयोषिति ॥४४४॥
विधवायां सिरालायाँ करभो मय उष्ट्रके ॥
अंगूलेश्च कनिष्ठायां मणिबन्धस्य चान्तरे ॥४४५॥

हिनोति हेरम्बः । तुंबस्तंबादय इति (उ० ३२०) साधुः । शौर्यगर्विते वाच्यलिंगः । तत्र यथा—हेरम्बडिम्बं विरलः सहेत । महिषे यथा—हेरम्बवाहनभयं भजते न कस्कः । विघ्नराजे विनायके यथा—हे हेरम्ब किमम्ब रोदयसि रे पुत्रं किमित्येष मे । कर्णौ मोटयते कुमार किमिदं ज्येष्ठेऽप्यनुष्ठीयते । अथ भान्ताः । **आरम्भस्तु वधदर्पयोः** ॥ आरम्भणमारंभः । उद्यमः उत्साहः । चतुर्ष्वपि यथा—निरारंभास्तपस्विनः । आदिकर्मण्यपि । तत्र यथा—महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥४४२॥

त्वरायामुद्यमे चापि । आत्मभूः ब्रह्मणि मन्मथे । आत्मना आत्मनो वा भवति आत्मभूः । पुंसि ब्रह्मणि यथा—वचस्यवसिते तस्य ससर्ज गिरिमात्मभूः । मन्मथे कंदर्पे यथा—जितमात्मभुवा विश्वमाक्रमेरा च ब्रह्मणः । **ऋषभः स्यादादिजिने वृषभे भेषजे स्वरे कर्णरंध्रे कोलपुच्छे श्रेष्ठे चाप्युत्तरस्थितः** । ऋषति ऋषभः । ऋषि वृषोति (उ०३३१) किदभः । आदिजिने यथा—आदिमं तीर्थनाथं च ऋषभस्वामिनं स्तुमः । वृषभे बलीवर्दे यथा—विमुग्धैर्दुग्धोऽपि स्रवति बत दुग्धं किमृषभः । स्वरे स्वरविशेषे यथा—सततमृषभहीनं भिन्नकीकृत्य **षड्जम्** ॥४४३॥

कर्णरंध्र श्रोत्रविवरं । कोलपुच्छं सूकरलांगूलं । उत्तरपदस्थितः श्रेष्ठे च यथा—धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ । ऋषभी तु शूकशिंब्यां **पुरुषाकारयोषिति** गौरादित्वाङ्डीः । शूकशिंबी कपिकच्छूः ॥४४४॥

विधवायां सिरालायां । सिराला ओषधिः । **करभो मय उष्ट्रके** । अंगु-

ककुभो वीणाप्रसेवे रागभेदेऽर्जुनद्रुमे ।
कुसुम्भं तु शातकुम्भे स्याल्लब्धायां कमण्डलौ ॥४४६॥
गर्दभो रासभे गन्धे गर्दभी जन्तुरुक्भिदोः ।
गर्दभं कुमुदभेदे दुर्लभः कच्छुरे प्रिये ॥४४७॥
दुष्प्रापेऽपि दुन्दुभिस्तु भेर्यां दितिसुते विषे ।
अक्षबिन्दुत्रिकद्वन्द्वे निकुम्भः कुम्भकर्णजे ॥४४८॥

लेश्च **कनिष्ठायां मणिबन्धस्य चान्तरे** । किरति कीर्यते वा करभः । कृ शृ गृ इत्यभः (उ० ३२९) । करे भाति वा । मय उष्ट्रः । ह्रस्व उष्ट्र उष्ट्रकः । यदाह-करभस्तु त्रिहायणः द्वयोर्यथा—संविस्पुरं वरविकासि चमूसमुत्थं । पृथ्वीरजः करभकंठकडारमाशाः । कनिष्ठा मणिबंधांतरे यथा—क्व प्रस्थितासि करभोरूघने निशीथे ॥४४५॥

ककुभो वीणाप्रसेवे रागभेदेऽर्जुनद्रुमे । कक्यते ककुभः । ककेरुभः । वीणाप्रसेवे पुंक्लीबः । वीणाप्रसेवे बोणाधस्तात् तंत्रोनिबन्धनस्थाने (चर्मपुटः) । रागभेदे च यथा—नारदेन मनो जह्रे ककुभध्वनिभिर्विभोः । अर्जुनवृक्षे यथा—कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते । **कुसुम्भं तु शातकुम्भे स्याल्लब्धा-(द्धा)यां कमण्डलौ** ॥ कुसच् श्लेषे । दंत्यान्तः । कुस्यति कुसुंभः । काकुसिभ्यां कुंभः । पुंक्लीबः । शातकुंभे सुवर्णे यथा—कुसुंभकुंभंपरस्तः स शंभो । लब्धायां यथा—विकसत्कुसुम्भकुसुमारुणताम् । कमण्डलौ यथा—विस्रम्भेण कुसुम्भसंभृतजलैर्यात्रासु जग्मुर्जनाः ॥४४६॥

गर्दभो रासभे गंधे । गर्द्दति गर्द्दभः । कृ शृ गृ इत्यभः (उ० ३२९) । रासभे यथा—गर्द्दभयानमसज्जनसेवा । गंधो गंधविशेषः । **गर्दभी जंतुरुक्भिदोः** । गौरादित्वाङ्डीः जंतुभेदे रोगभेदे च । **गर्दभं कुमुदभेदे** । यथा—इति गर्दभकोदभेदे कमलैर्मुकुलायितं । **दुर्लभः कच्छुरे प्रिये । दुष्प्रापेऽपि** । दुःखेन लभ्यते दुर्लभः । वाच्यलिंगः । कच्छुरः पामनः । त्रिष्वपि यथा—स दुर्लभः सर्ववधूभिरिष्यते ॥४४७॥

दुन्दुभिस्तु भेर्यां दितिसुते विषे । अक्षबिन्दुत्रिकद्वन्द्वे । द- तम-

दन्त्यां च वल्लभोऽध्यक्षे कुलीनाश्वे प्रियेऽपि च ।
वर्षाभूः पुनर्नवायां स्याद् गण्डूपदभेकयोः ॥४४९॥
विष्कम्भो विस्तृतौ योगविशेषप्रतिबंधयोः ।
योगिनां च बन्धभेदे रूपकाऽवयवेऽपि च ॥४५०॥

दुंदुभिः । दमेर्डुभिर्डुम् च । अक्षबिन्दुत्रिकद्वन्द्वेऽस्त्रियां । अन्यत्र पुंसि । भेर्यां यथा—केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् । दितिसुते यथा—दुंदुभिं नाम दैत्येन्द्रं निष्पिपेष कपोश्वरः । विषं विषभेदः । अक्षबिंदुत्रिकद्वन्द्वे यथा—दुन्दुभ्या किल तत्कृतं पतितया यद्द्रौपदी हारिता । **निकुम्भः कुम्भकर्णजे दन्त्यां च ।** नितरां स्कुम्नाति निकुम्भः । पृषोदरादित्वात् सलोपः । कुंभकर्णजे कुम्भकर्णसुते यथा-निशुंभिता निकुम्भेन कपयः कंपनिर्भराः ॥४४८॥

दन्ती ओषधिः । **वल्लभोऽध्यक्षे कुलीनाश्वे प्रियेऽपि च ।** वल्लते वल्लभः । कॄ शॄ गॄ (उ० ३२९) इति अभः । प्रिये वाच्यलिंगः अध्यक्षेऽत्र गवामधिकृतः । तत्र यथा-गोष्ठेषु बल्लभकृतातिथिसत्क्रियेषु । कुलीनाश्वे यथा-स्तोकेन नाक्रमत वल्लभपालमुच्चकैः । श्रीवृक्षकीपुरुषकोन्नमिताग्रकायः । प्रिये यथा—उपनीविकमरुद्ध किल स्त्रीवल्लभस्य करमात्मकराभ्यां । **वर्षाभूः पुनर्नवायां स्यात् गण्डूपदभेकयोः** ॥ वर्षासु भवति वर्षाभूः । पुनर्नवायां स्त्रियां । शेषयोः पुंसि । **वैजयन्तीकारस्तु** "भेक्यां पुनर्नवायां स्त्री वर्षाभू दर्दुरे नपुं (नखे) इत्याह । गंडूपदः कृमिभेदः । भेके यथा—वर्षाभूनिवहा इव काले कोलाहलं कृत्वा ॥४४९॥

विष्कम्भो विस्तृतौ योगविशेषप्रतिबन्धयोः । योगिनां च बंधभेदे रूपकावयवेऽपि च । विष्कंभणं विष्कम्नाति वा विष्कंभः । वेः स्कम्न इति षत्वं । विस्तृतौ यथा—विष्कंभषष्टभागश्च विष्कंभस्त्रिगुणश्च यः । योगविशेषे यथा—विष्कंभः प्रीतिरायुष्मान् । प्रतिबंधे यथा--न कार्यः कार्यविष्कंभः । बंधभेदे यथा--योगी पवनविष्कंभाभ्यासनिर्भरमानसः । रूपकस्य नाट-

विस्रम्भः केलिकलहे विश्वासे प्रणये वधे ।
वृषभः स्यादादिजिने वृषपुंगवयोरपि ॥४५१॥
सनाभिर्ज्ञातिसदृशोः सुरभिर्हेम्नि चंपके ।
जातीफले मातृभेदे रम्ये चैत्रवसन्तयोः ॥४५२॥

कादेरंशेऽवयवे यथा-वृत्तवर्त्तिष्यमाणानां अर्थांशानां निदर्शकः । संक्षेपार्थस्तु विष्कंभो मध्यपात्रप्रयोजितः ॥४५०॥

विस्रम्भः केलिकलहे, विश्वासे प्रणये वधे । विस्रंभणं विस्रंभः । केलिकलहे यथा--कोयं विस्रंभसंरंभो दंपत्योः प्रेमगग्नयोः । प्रणयः प्रेम । विश्वासे प्रणये च यथा--तस्यां क्षणिकचित्तायां विस्रम्भः कोऽन्ययोषिति । वधे यथा--चंडो निशुंभविस्रंभजृम्भिताद्भुतशक्तिका । **वृषभः स्यादादिजिने वृषपुंगवयोरपि** । वृषो धर्मस्तेन भाति वृषभः । वर्षति वा । ऋषि वृषोति किदभः । आदिजिने यथा--पातु वो वृषभः स्वामी । वृषे यथा-उच्छृङ्गितान्यवृषभाः सरितां नदन्तो । रोधांसि धीरमपचस्किरिरे महोक्षाः । पुंगवे प्रधाने यथा--मुखे सत्या वाणी पुरुषवृषभाणां व्रतमिदम् ॥४५१॥

सनाभिर्ज्ञातिसदृशोः । समाना नाभिरस्य सनाभिः । समानस्य धर्मादिष्विति स भावः । सदृशे तु उपचारात् । ज्ञातौ पुंसि । सदृशि वाच्यलिंगः । ज्ञातिः स्वजनस्तत्र यथा—भ्रातरो ये च संसृष्टा भगिन्याश्च सनाभयः । भगिनीपतिभागिनेयादयः । सदृशि यथा वक्त्रमिन्दोः सनाभि । **सुरभिर्हेम्नि चंपके । जातीफले मातृभेदे रम्ये चैत्रवसन्तयोः** । सुरभते सुरभिः । पदिपठीति बहुवचनादिः । आगमशासनमनित्यमित्यनागमाभावः । दशस्वर्थेषु रम्ये सुगन्धौ च वाच्यलिंगः । मातृभेदे गवि सल्लक्यां च स्त्रियां । अन्यत्र पुंसि । हेम्नि चंपके च यथा--तस्याः शरीरं सुरभेः सनाभि । जातीफलं जातिकोशः । मातृभेदे यथा--आरम्भसिद्धिं सुरभिस्तनोतु । रम्ये श्रेष्ठे यथा-तां सौरभेयीं सुरभिर्यशोभिः । चैत्रे वसंते सुगन्धौ च यथा-मृदुलतांतलतांतमलोकयत समुरभिं सुरभिं सुमनोभरैः ॥४५२॥

सुगन्धौ गवि सल्लक्यामधमो न्यूनगर्ह्ययोः ।
आगमस्त्वागतौ शास्त्रेऽप्याश्रमो व्रतिनां मठे ॥४५३॥
ब्रह्मचर्यादिचतुष्केप्युत्तमा दुग्धिकौषधे ।
उत्तमं तु प्रधाने स्यात्कलमः शालिचौरयोः ॥४५४॥
कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः ।
कृत्रिमं लवणभेदे कृत्रिमः कृतसिल्हयोः ॥४५५॥

सुगन्धौ गवि सल्लक्यां । गवि यथा--उर्जस्वलेन सुरभीमनुनिःसपत्नं जग्मे जयोद्धुरविशालविषाणमुक्ष्णा । सल्लक्यां यथा--सुरभिजंभमना वरकुञ्जरः । अथ मान्ताः । **अधमो न्यूनगर्ह्ययोः** अद्यतेऽधमः अवेर्घवेत्यमः । अधो भव इति वा । अमौंतावोधस इत्यमः । वाच्यलिंगः ॥ द्वयोर्यथा--वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यांतिकम् । **आगमस्त्वागतौ शास्त्रेपि** । आगमनं आगच्छत्यस्मादिति वा आगमः । युवर्णेत्यल् । शास्त्रं आप्तवचनम् । द्वयोर्यथा--कस्य नानंदनिष्यंदं, विदधाति सदागमः ॥ **आश्रमो व्रतिनां मठे** । एत्य श्राम्यति अस्मिन्निति आश्रमः । पुंक्लीबः । मठेति स्थानोपलक्षणम् । तत्र यथा--तौ दम्पती वशिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥४५३॥

ब्रह्मचर्यादिचतुष्केऽपि । ब्रह्मचर्यादिचतुष्कं--ब्रह्मचारी गृहस्थो वानप्रस्थो यतिरिति चत्वारः । तत्र यथा--पंचविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः । **उत्तमा दुग्धिकौषधे** । उत्कृष्टा उत्तमा । उदःप्रकृष्टे तमप् ॥ **उत्तमं तु प्रधाने-स्यात्** । वाच्यलिंगः । यथा--परितप्यत एव नोत्तमः । परितप्तोप्यपरः ससंवृत्तिः । **कलमः शालिचौरयोः** । कडत् मदे सृपृप्रधीत्यमेलत्वे च कलमः । शालौ यथा--आपादपद्मप्रणताः कलमा इव ते रघुम् । **चौरे** यथा--कलमैः कमलाहृता ॥४५४॥

कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः । कुसच् श्लेषे दंत्यान्तः । कुस्यति कुसुमं । उद्वटिकुल्पलीति कुमः । पुष्पे पुंक्लीबः । शेषेषु क्लीबः । स्त्रीरजसि यथा--कुसुमवतीमिह वल्लीं मधुपादन्यो भजेत को नाम । नेत्ररोगे यथा--

गोधूमो भेषजे नागरंगव्रीहिप्रभेदयोः ।
गोलोमी वारयोषायां षड्गन्धासितदूर्वयोः ॥४५६॥
गौतमो गणभृद्भेदे शाक्यसिंहर्षिभेदयोः ।
गौतम्युमायां रोचन्यां तलिमं तल्पखड्गयोः ॥४५७॥
विताने कुट्टिमे चापि दाडिमः करकैलयोः ।
निष्क्रमो निर्गमे बुद्धिसम्पत्तौ दुष्कुलेऽपि च ॥४५८॥

विज्ञेयस्तिंतिडीबीजरसः कुसुमनाशनः । फलपुष्पयोर्यथा--समभिसृत्य रसादवलंबितः प्रमदया कुसुमावचिचीषया । **कृत्रिमं लवणभेदे** । करणेन निर्वृत्तं कृत्रिमं । द्वितस्त्रिमक् तत्कृतमिति त्रिमक् । यथा--न रोचते भोज्यमकृत्रिमं नृणाम् । **कृत्रिमः कृतसिल्हयोः** । कृते वाच्यलिङ्गः । तत्र यथा--जिघृक्षया कृत्रिमपत्रपंक्तेः । सिल्हो गन्धद्रव्यम् ॥४५५॥

गोधूमो भेषजे नागरंगव्रीहिप्रभेदयोः । गुध्यते गोधूमः । कुधिगृधिभ्यामः । नागरंगव्रीहिप्रभेदयोर्यथा--गोधूमसदृशाकृतिः ॥ **गोलोमी वारयोषायां षड्गन्धासितदूर्वयोः** । गां लुनाति गोभिर्लूयते वा गोलोमी । रुक्म-ग्रीष्मेति साधुः । वारयोषा वारस्त्री । षड्गन्धा वचा । सितदूर्वा दूर्वाभेदः ॥४५६॥

गौतमो गणभृद्भेदे शाक्यसिंहर्षिभेदयोः । गोतमस्यापत्यं गौतमः । ऋषिवृष्ण्यंधकेत्यण् गौतम एव वा प्रज्ञादित्वादण् । गणभृद्भेदः श्रीमहावीरस्य प्रथमगणधर इन्द्रभूतिनामा तत्र यथा-तापसान् भोजयामास गौतमो गणभृद्वरः । शाक्यसिंहे बुद्धे यथा-गौतमेन यदुदस्यता शयं प्रोद्धृतं जगदुपप्लुताशयम् । ऋषिभेदे यथा--प्रत्यपद्यत चिरस्य यत्पुनश्चारु गौतमवधूः शिलामयी ॥ **गौतम्युमायां रोचन्यां** । प्रकृष्टा गौर्गोतमा तस्या इयं गौतमी । उमा गौरी । रोचनी ओषधिः ॥ **तलिमं तल्पखड्गयोः** । **विताने कुट्टिमे चापि** । तलति तलिमं वयिमस्त्विमादयः (उ० ३५०) इति साधुः । वितानं चंद्रोदयः खड्गे यथा--तलिनतलिमदंडैः शात्रवं खंडयन्ति ॥४५७॥

शेषेषु यथा--श्रीखंडद्रवधौतसौधतलिमो रम्यः क्षणो वर्तते । **दाडिमः करकैलयोः** । दलति पित्तमिति दाडिमः । करको (करज--करञ्ज) वृक्षभेदः । यदाह-

नियमः स्यात्प्रतिज्ञायां निश्चये यन्त्रणे व्रते ।
निगमाः पूर्वणिग्वेदनिश्चयाध्ववणिक्पथाः ॥४५९॥
नैगमो नयपौरोपनिषद्द्यूतिषु वाणिजे ।
प्रथमः स्यात्प्रधानाद्योः प्रक्रमोवसरे क्रमे ॥४६०॥

दाडिमो दालिमः सारः कुट्टिमः फलखाडवः । स्वाद्वम्लो रक्तबीजश्च करकः शुकवल्लभः ॥ तत्र त्रिलिंगे यथा--पाकारुणस्फटितदाडिमकांति वक्त्रम् । एला वृक्षभेदः ॥ **निष्क्रमो निर्गमे बुद्धिसंपत्तौ दुष्कुलेऽपि च ।** निष्क्रमणं निष्क्रामत्यनेन निष्क्रामति वा निष्क्रामः । निर्गमे यथा--प्रवेशो निष्क्रमो वापि कार्यो राजकुले क्रमात् । बुद्धिसंपत्तौ यथा--निष्क्रमोऽक्रमवतां दुरात्मनाम् सज्जनापकृतये सनातनः। दुष्कुले यथा--निमंत्री निष्क्रमः कार्यो राज्ञा विक्रममिच्छता॥४५८॥

नियमः स्यात्प्रतिज्ञायां निश्चये यन्त्रणे व्रते । नियमनं नियमः । संनिव्युपाधम इत्यल्ट । प्रतिज्ञायां यथा--इति कृतनियमो जघान शत्रून् । निश्चये यथ--यमोऽयं नियमादेव हिनस्ति भुवनत्रयीम् । यंत्रणे बंधने यथा--विभ्रमं रमणी धत्ते नीवीनियमनिर्भरा । व्रते यथा--अह्नाय सा नियमजं क्लमुत्ससर्ज ॥ **निगमाः पूर्वणिग्वेदनिश्चयाध्ववणिक्पथाः ।** निगच्छत्यत्र अनेन वा निगमः। गोचर संचरेति घः । षट्स्वर्थेषु पुरि वणिजे च यथा--न खलु निगममार्गं याति साध्वी कदाचित् । वेदे यथा--साम्राज्यं निगमस्य सर्वविषये शंभोरिवोज्जृम्भते। निश्चये अध्वनि वणिक्पथे च यथा--सतां सज्जनसाहाय्यात् सुगमो निगमः खलु ॥ ४५९ ॥

नैगमो नयपौरोपनिषद्द्यूतिषु वाणिजे । निगमे भवो नैगमः पञ्चस्वर्थेषु । नयो निरवधारणः पक्षपरिग्रहः । तत्र यथा--नैगमादयः सप्त नयाः । पौरे वाणिजे च यथा--पुराणि श्रेणयश्चैव शिल्पिनो नैगमास्तथा । उपनिषत् वेदान्तः। द्यूतिश्चर्मप्रसेवकः ॥ **प्रथमः स्यात्प्रधानाद्योः ।** प्रथमते प्रथमः । सृपृप्रथिचरीत्यमः । वाच्यलिङ्गः । प्रधाने यथा--गरिष्ठागोष्ठी प्रथमैः प्रमाथैः परिवारितः । आदौ यथा--प्रथमबिदुभिरम्बुमुचोंभसाम् ॥ **प्रक्रमोऽवसरे क्रमे ।** प्रक्रम्यते प्रक्रमः । अवसरे यथा--दोलाकेलिनिसण्णपन्नगविधौ गीतोत्सवप्रक्रमे । क्रमे यथा--नागतश्च स इहा कोऽयं विधेः क्रमः ॥४६०॥

पञ्चमो रुचिरे दक्षे पञ्चानामपि पूरणे ।
रागभेदे पंचमी तु द्रौपद्यां परमः परे ॥४६१॥
अग्रेसरप्रथमयोरोंकारे परमं पुनः ।
स्यादव्ययमनुज्ञायां प्रतिमा प्रतिरूपके ॥४६२॥
गजस्य दन्तभेदे च मध्यमो मध्यजस्वरे ।
देहमध्ये मध्यदेशे मध्यमा कर्णिकांगुलिः ॥४६३॥

पञ्चमो रुचिरे दक्षे पञ्चानामपि पूरणे । रागभेदे । पञ्चयते पञ्चमः । रुक्म--ग्रीष्मेति (उ० ३४६) साधुः । पञ्चानां पूरण इति वा । "नोमट्" (७।१।१६९) । रागभेदे पुंसि, शेषेषु वाच्यलिंग । रुचिरे दक्षे च यथा--पञ्चमोऽयं विपश्चिताम् । पञ्चानां पूरणे यथा--पञ्चमं पञ्चतपसस्तपनो जातवेदसाम् । रागभेदे यथा--प्रीति पञ्चमरागगोतिषु ॥ **पञ्चमी तु द्रौपद्याम् ॥** यथा प्रपञ्चः पञ्चमीगिराम् ॥ **परमः परे अग्रेसरप्रथमयोरोंकारे ॥** पृणाति परमः । सृपृप्रथीत्यमः । ॐकारे पुंसि शेषेषु वाच्यलिङ्गः । परे उत्कृष्टे यथा--परमं यो महत्तेजः ॥४६१॥ अग्रेसरे प्रथमे च यथा--परमः स मनीषिणा । **परमं पुनः स्यादव्ययमनुज्ञायाम् ।** यथा--ततः परममित्युक्त्वा **प्रतस्थ** मुनिमण्डली ॥ **प्रतिमा प्रतिरूपके ।** प्रतिमीयते प्रतिमा प्रतिरूपके यथा--रत्नस्तंभेषु संक्रान्तप्रतिमाश्च चकासिरे ॥ ४६२ ॥ **गजस्य दन्तभेदे ।** गजस्य दन्तभेदे(बन्धे) यथा--दन्तै सुवर्णनिहितप्रतिमैर्गजेन्द्रै । **मध्यमो मध्यजे स्वरे देहमध्ये मध्यदेशे ।** मध्ये जातो मध्यमः मध्यान्मः । मध्यजे वाच्यलिंगः । तत्र यथा--सर्वेषामेष तेषां समरमखभुवि क्रोधवह्नौ जुहोति । द्विरैहुंकारमत्रैरभिजनसमिधो मध्यमः पांडवेयः ॥ स्वरे स्वरविशेषे यथा--क्रौञ्चः क्वणति मध्यमम् । देहमध्ये पुंक्लीबः । तत्र यथा--शुचौ चतुर्णां ज्वलतां शुचिस्मिता हविर्भुजां मध्यगता सुमध्यमा । मध्यदेशे यथा--हिमवद्विंध्ययोर्मध्यं यत् प्राक् विनशनादपि । प्रत्यगे च प्रयागाच्च मध्यदेश स

राका रजस्वला चापि व्यायामः पौरुषे श्रमे ।
वियामे दुर्गसंचारे विलोममरघट्टके ॥४६४॥
विलोमो वरुणे सर्पे प्रतापे कुक्कुरेऽपि च ।
विलोमी स्यादामलक्यां विक्रमः शक्तिसंपदि ॥४६५॥
क्रांतौ च विद्रुमो वृक्षे प्रवालेऽप्यथ विभ्रमः ।
शोभायां संशये हावे सत्तमः श्रेष्ठपूज्ययोः ॥४६६॥

मध्यमः ॥ **मध्यमा कर्णिकांगुलिः राका रजस्वला चापि ।** कर्णिका बीजकोशः । अंगुलौ मध्यमांगुली यथा—अंगुष्ठमध्यमाभ्यां तु चक्षुषी समुपस्पृशेत् ॥४६३॥ राका पूर्णिमा तत्र यथा-अमृतममृतरश्मिर्मध्यमा मध्यरात्रे । रजस्वलायां यथा—मध्यमा न विवाह्या स्यात् कुलदोषकरी हि सा ॥ **व्यायामः पौरुषे श्रमे । वियामे दुर्गसंचारे ॥** व्यायमनं व्यायच्छंतेऽत्र व्यायामः । पौरुषे श्रमे च यथा—स्थाने शमवतां शक्त्या व्यायामे वृद्धिरंगिनाम् । वियामस्तिर्यक् बाहू प्रसारितौ व्याम इति यावत् । **यच्छेशः**—अथ व्यायामे वियामः स्यात् बाहू चापस्तनूनल । तत्र यथा—व्यायाममात्रीं परिखां खनंति । दुर्गसंचार इति चाणाक्योक्तकृत्यांतराणामुपलक्षणम् । तत्र यथा— शमव्यायामाभ्यां प्रतिविहिततंत्रस्य नृपतेः । परं प्रयावापः फलति कृतसेकस्तरुरिव । **विलोममरघट्टके ॥** विलूयते विलूनाति वा विलोमम् रुक्म ग्रीष्मेति साधुः । अरघट्टको घटीयंत्रम् ॥४६४॥ **विलोमो वरुणे सर्पे प्रतीपे कुक्कुरेऽपि च ॥** विपरीतं लोमकरोति णिचि अचि च विलोमः । प्रतीपे वाच्यलिंगः । वरुण यादपतिः । प्रतीपे यथा—गुणयेद्विलोमगत्या ॥ **विलोमी स्यादामलक्याम् ॥** गौरादित्वात् ङीः आमलकी धात्री । **विक्रमः शक्तिसंपदि क्रांतौ च ।** विक्रमणं विक्रमः शक्तिसंपदि यथा—अनुस्मृताखंडलसूनुविक्रमः ॥४६५॥ क्रांतिः पादविक्षेपः तत्र यथा—हंसेभ्यः क्रमविक्रमश्चलदृशो किं शिक्षितः सर्वतः ॥ **विद्रुमो वृक्षे प्रवालेऽपि ।** विशिष्टो द्रुमो विद्रुमः विद्रवति वा कुंदुमर्लिदुमेति साधुः । वृक्षे यथा— वेलातटेषूद्गतविद्रुमेषु । प्रवाले यथा—लेखया विमलविद्रुमभासा । **अथ विभ्रमः । शोभायां संशये हावे ।** विभ्रमणं विभ्राम्यत्यनेन वा विभ्रमः । शोभायां यथा—इंदोर्विभ्रममाननं वितनुते । संशये यथा—पुंसोऽपि मृगतृष्णायां यस्यास्ति जलविभ्रमः । हावे विलासे यथा—रुरुचिरे रुचिरे क्षणविभ्रमाः ॥ **सत्तमः श्रेष्ठपूज्ययोः साधिष्ठे ।** अतिशयेन सत् सत्तमः वाच्यलिंगः । श्रेष्ठः प्रशस्यतमः साधिष्ठः साधुतमः । त्रिष्वपि यथा—शृणु त्वं मुनिसत्तम ॥४६६॥ **संभ्रमो भीतौ संवेगादरयोरपि ।** संभ्रमणं संभ्रमः । भीतो यथा-कुसुमसौरभलोलपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया । संवेगो भयादिभिश्चित्तव्याक्षेपात् त्वरणम् तत्र यथा—गृह्णन् केशेष्वपास्तचरणनिपतितो नेक्षितः संभ्रमेण । आदरे यथा—संभ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ॥ **सुषीमः शिशिरे रम्ये ।** शोभना सीमाऽस्य सुषीमः । पृषोदरादित्वात् षत्वम् । वाच्यलिंगः ॥ **सुषमं रुचिरे समे ।** शोभनं समं सुषमं सुष्ठु समेति वा ।' निर्दुः सुवेः समसूतेरिति षत्वम् वाच्यलिंगः । द्वयोर्यथा—सुषमे भूप्रदेशे तु बद्ध्वा निश्चलमासनम् ॥४६७॥ **सुषमा तु स्यात्परमशोभायां कालभिद्यपि ।** कालभिदि यथा—सुषमातो दुःषमायां कृपा फलवती तव ॥ अथ यांताः ॥ **अत्ययोऽतिक्रमे दोषे विनाशे दंडकृच्छ्रयोः ॥** अत्ययनं अत्ययः पंचस्वर्थेषु । अतिक्रमस्तूल्लंघनम् तत्र यथा—पर्वात्यये सोम इवोष्णरश्मेः । दोषे यथा— निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम् । विनाशे यथा—प्राणात्यये सर्वधनापहारः । दंडे यथा—वाक्पारुष्य इत्ययः शतम् । कृच्छ्रे क्लेशे यथा—अत्ययो यस्य नैवास्ति शीते वाप्यातपेऽपि वा ॥४६८॥ **अवध्यमवधार्हे स्यादनर्थकवचस्यपि ।** वधमर्हति वध्यम् । दण्डा-

साधिष्ठे संभ्रमो भीतौ संवेगादरयोरपि ।
सुषीमः शिशिरे रम्ये सुषमं रुचिरे समे ॥४६७॥
सुषमा तु स्यात्परमशोभायां कालभिद्यपि ।
अत्ययोऽतिक्रमे दोषे विनाशे दंडकृच्छ्रयोः ॥४६८॥
अवध्यमवधार्हे स्यादनर्थकवचस्यपि ।
अभयमुशीराभीत्योरभया तु हरीतकी ॥४६९॥

अनयोऽशुभदैवे स्याद्विपद्व्यसनयोरपि ।
अश्वीयमश्वसंघेऽश्वहितेऽधृष्यः प्रगल्भके ॥४७०॥
अधृष्या निम्नगाभेदेऽहल्या गौतमयोषिति ।
सरोभेदेऽप्यभिख्या तु शोभायां कीर्तिसंज्ञयोः ॥४७१॥

देर्यः । न वध्यम् अवध्यं वाच्यलिङ्गः । अवधार्हे यथा—रतिपतिर्वृद्धाद् ह्यवध्यो यतः ॥ **अभयमुशीराभोत्योः** । नास्ति भयमस्मादस्य वा न भयं वा अभयम् । उशीरं वीरणीमूलम् । अभीतिरिति बहुव्रीहिस्तत्पुरुषो वा । बहुव्रीहिपक्षे अभयशब्दो वाच्यलिंगः । तत्र यथा— अभयाः सन्तु पन्थानः । तत्पुरुषपक्षे क्लिबे: तत्र यथा—यो भूतेष्वभयं दद्यात् भूतेभ्यस्तस्य नो भयम् ॥ **अभया तु हरीतकी** ॥ ॥ हरीतकी पथ्या ॥४६९॥ **अनयोऽशुभदैवे स्यात् विपद्व्यसनयोरपि** । अयः शुभं दैवं तद्विरोधी अनयः विरुद्धो नयः इति वा । अशुभदैवे यथा—सर्वमेतदनयस्य जृम्भितम् । विपदि यथा—किं न पापमनयेन कुर्वते । व्यसने स्त्रीमद्यादौ यथा—अनयेनैव राजश्रीः क्षीयते क्ष्माभृतां क्षणात् । **अश्वीयमश्वसंघेऽश्वहिते** । अश्वानां समूहोऽश्वीयम् । वाश्वादीय इति ईयः । अश्वेभ्यो हितं वा तस्मै हिते इति इयः । अश्वहिते वाच्यलिंगः । अश्वसंघे यथा— अश्वीयं च खुरोद्धतावनितलम् । अश्वहिते यथा—अश्वीयेषु यवांकुरेषु कुरुते वाहावलीविक्रमम् । **अधृष्यः प्रगल्भके** । न धृष्यतेऽधृष्यः । ऋदुपांत्येति क्यप् । प्रगल्भकः प्रौढोऽनाकलनीय इति यावत् । तत्र वाच्यलिंगः तत्रयथा—अधृष्यश्चाभिगम्यश्च यादो रत्नैरिवार्णवः ॥४७०॥ **अधृष्या निम्नगाभेदे** ॥ निम्नगाभेदो नदीविशेषः । **अहल्या गौतमयोषिति सरोभेदेऽपि** । न हल्यते अहल्या । नञो हलिपतेरिति यः । गौतमयोषिति यथा—त्रिदशपतिरहल्यां तापसीं यः सिषेवे । सरोभेदस्तडागविशेषः । **अभिख्या तु शोभायां कीर्तिसंज्ञयोः** । अभिख्यायतेऽनया अभिख्यानं वा अभिख्या । शोभायां यथा—काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः । कीर्तौ यथा—अभिख्या सांमुख्यं नयति रिपुमप्याशु नृपतेः । **संज्ञायां** यथा—असौ रामाभिख्यः स्मृति-

अहार्यो हर्तुमशक्ये शैलेऽथाशय आश्रये ।
अभिप्रायपनसयोरादित्यस्त्रिदशार्कयोः ॥४७२॥
आत्रेयो मुनिरात्रेयी पुष्पवत्यां सरिद्भिदि ।
आतिथ्योऽतिथौ तद्योग्येप्याम्नायः कुल आगमे ॥४७३॥
उपदेशे चैंद्रियं तु चक्षुरादिषु रेतसि ।
उदयः पर्वतोन्नत्योरुर्णायुरविकंबले ॥४७४॥

पथमगान्नैव भवतः ॥४७१॥ **अहार्यो हर्तुमशक्ये शैले** ॥ न हर्तुं शक्यो अहार्यः हर्तुमशक्ये वाच्यलिङ्गः द्वयोर्यथा—विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिः प्रविलुप्तचंदनम् ॥ **अथाशय आश्रये अभिप्रायपनसयोः** ॥ आशेरतेऽस्मिन्निति आशयः पुंनाम्नि इति घः आशीतिर्वा भावे अट् । आशये अभिप्राये च यथा—लोलत्वादपहरतां तदङ्गरागम् संजज्ञे सकलुष आशयो जलानाम् । पनसो वृक्षभेदः ॥ **आदित्यस्त्रिदशार्कयोः** ॥ अदितेरपत्यमादित्यः । अनिदम्पणेति ज्यः । त्रिदशे यथा—आदित्या व्यत्ययं हित्वा त्वां स्तुवंति पुरातनम् । अर्के यथा—अमी च कथमादित्याः प्रतापक्षितिशीतलाः ॥४७२॥ **आत्रेयो मुनिः** ॥ अत्रेरपत्यं आत्रेयः इतोऽनिञ इति अयण् यथा—जीर्णभोजनमात्रेयः ॥ **आत्रेयी पुष्पवत्यां सरिद्भिदि** ॥ अतति आत्रेयी गयद्दयेति साधुः । गौरादित्वात् डीः । पुष्पवती रजस्वला तत्र यथा—आत्रेयी गमनाद्धरेरपि विभोर्लक्ष्मीः परावर्तते । सरिद्भिदि यथा—रेवे कावेरि सिप्रे बत बत यमुने कष्टमात्रेयि कष्टम् । **आतिथ्योऽतिथौ तद्योग्येऽपि** ॥ अतिथिरेव आतिथ्यः भेषजादित्वात् स्वार्थे ष्यण् । अतिथयेऽयं वा णौ तिथिरिति ण्यः तद्योग्ये अतिथ्यर्थं तत्र वाच्यलिङ्गः द्वयोर्यथा—आतिथ्यानां प्रथितमहसां कार्यमातिथ्यमार्यैः ॥ **आम्नायः कुल आगमे उपदेशे च** ॥ आम्नायते आम्नायः कुले अन्वये यथा—आम्नायायातमेतद्भवति न विफलं जातुचिद्रत्नजातम् । आगमे वेदे यथा—अधीती चरणाम्नाये सोऽध्वर्युः श्रेष्ठ उच्यते ॥४७३॥ उपदेशे यथा— निराम्नायो मंत्रः स्फुरति न हि कस्यापि नियतम् ॥ **इंद्रियं**

ऊर्णनाभे च मेषे चौर्णेयमेणीत्वगादिके ।
रतबंधभिदि स्त्रीणां कषायः सुरभौ रसे ॥४७५॥
रागवस्तुनि निर्यासे क्रोधादिषु विलेपने ।
वर्णे कालेयस्तु दत्ये कालेयं कुंकुमं यकृत् ॥ ४७६ ॥

तु चक्षुरादिषु रेतसि। इन्द्रस्यात्मनो लिङ्गं इंद्रियं इंद्रियमिति साधुः। चक्षुरादिष्वित्यादिशब्दात् श्रोत्रं त्वक्नासिका जिह्वा चेति। तत्र यथा—एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः। रेतसि यथा—बाल्यं वृद्धिर्बलं प्रज्ञा चक्षुः श्रोत्रं त्वगिन्द्रियम्। (दशभिर्दशभिर्वर्षै रेतद्बाल्यादिक्रमेण हीयते ॥) **॥ उदयः पर्वतोन्नतयोः ॥** उदेति अस्मिन् उदनयनं वा उदयः पर्वते यथा—उदयशिखरशृङ्गप्राङ्गणेष्वेष रिंखन्। उन्नतौ यथा—उदयप्रतापनाशा ममापि किमुतापरस्य लोकस्य ॥ **ऊर्णायुरविकंबले उर्णनाभे च मेषे च ॥** ऊर्णास्त्यस्य ऊर्णायुः। ऊर्णाहं शुभमो युस्। **पुंसि।** अविकंबले यथा—मालिन्यमूर्णायुरिवातनोति खलो जनानामुपलालितोऽपि ॥४७४॥ ऊर्णनाभे मर्कटके यथा—जूर्णोर्णायुपुटोपमां प्रकटयत्यस्तक्षणे चंद्रमाः। मेषे यथा—ऊर्णायोर्गृहगस्य किं न कुरुते गोमायुरारादपि ॥ **ऐणेयमेणीत्वगादिके। रतबंधभिदि स्त्रीणाम् ॥** एण्या विकारोऽवयवो वा ऐणेयं एण्या एयञ्। रतबंधे तूपचारात्। एणी त्वगादिके वाच्यलिंगः तत्र यथा—ऐणेय्यां त्वचि संविशन्ति वसते चापि त्वचं तारवीम्। स्त्रीणां रतबंधभेदः कामशास्त्रप्रसिद्धः। **कषायः सुरभौ रसे। रागवस्तुनि निर्यासे क्रोधादिषु विलेपने। वर्णे।** कषति कषायः। कुलिलुलिकलिकषिभ्यः कायः। सुरभौ वर्णे च गुणे पुंसि तद्वति वाच्यलिंगः। अन्यत्र पुंक्लीबः सुरभौ यथा—प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः। रसस्तुवराख्यः तत्र यथा—कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ॥४७५॥ रागवस्तुनि यथा—अधरो वीतरागस्ते कषाये ते विलोचने। निर्यासे क्वाथरसे यथा—पीतः शीतकषायोऽयं शर्करारससंयुतः। क्रोधादिषु यथा—स्युः कषायाः क्रोधमानमायालोभाः शरीरिणाम्। विलेपने अवस्नेहने

कुलायः पक्षिणां स्थानगेहयोः क्षेत्रियास्त्रयः ।
अन्यदेहचिकित्साऽर्होऽसाध्यरुक्–पारदारिकाः ॥ ४७७ ॥
क्षेत्रियं क्षेत्रजे तृणे गांगेयं स्वर्णमुस्तयोः ।
कसेरुण्यथ गांगेयो गाङ्गवत् स्कंदभीष्मयोः ॥ ४७८ ॥

यथा—कर्णार्पितो रोध्रकषायरूक्षे गोरोचनाभेदनितान्तगौरे। वर्णो रक्तपीतवर्णयोगः तत्र यथा—जातं कषायितं व्योम नानाकुसुमरेणुभिः। स्निग्धवासितयोरपि **मंखः।** स्निग्धे यथा—चूतांकुरास्वादकषायकंठः पुंस्कोकिलो यन्मधुरं चुकूज। वासिते भाविते यथा—निद्राकषायमुकुलीकृतताम्रनेत्रः। **कालेयस्तु दैत्ये।** कलिर्देवता अस्य कालेयः। कल्यग्ने रेयण् यथा—कालयोपद्रुताः काले। **कालेयं कुङ्कुमं यकृत।** कु ईषल्लीयते कालेयम् यएच्चते इति ये अल्पे इति कादेशः। कुंकुमे यथा—कालेयकक्षोदविलेपनश्रियम् दिशन् दिशामुल्लसदंशुभद्युतिः। यकृत कालखण्डम्। **कुलायः पक्षिणां स्थानगेहयोः।** कोलति कुलायः कुञ्ञोलुलीति कायः द्वयोर्यथा—दधतमंतरितां हिमदीधितिं खगकुलायकुलायनिलायिताम् ॥ **क्षेत्रियास्त्रयः। अन्यदेहचिकित्साऽर्होऽसाध्यरुक्-पारदारिकाः ॥** क्षेत्रेऽन्यस्मिन् नाश्यः क्षेत्रियः। क्षेत्रेऽन्यस्मिन् नाश्ये इयः वाच्यलिंगः। चिकित्स्यशरीरात् परशरीरे संक्रमय्य यश्चिकित्स्यते विषभूतग्रहादिः। सोऽन्यदेहचिकित्सार्हः तत्र यथा—क्षेत्रियं विषमवातिदुसहं जन्मांतरशरीरे नाश्यो न इहत्ये यो व्याधेः सोऽसाध्यरुक्। तत्र यथा—आवेदयति नितांतं क्षेत्रियरोगं सखि हृदंतः। पारदारिकः स्वक्षेत्रात् स्वकलत्रात् अन्यस्मिन् क्षेत्रे प्रर्वतमानो नाश्यो निग्राह्यो भवति। तत्र यथा—स्वक्षेत्रात् क्षेत्रिया रक्ष्याः ॥४७७॥ **क्षेत्रियं क्षेत्रजे तृणे ॥** तृणमपि स्वक्षेत्रात् अन्यस्मिन् धान्यक्षेत्रे नाश्यं भवति। तत्र यथा—क्षेत्रियेष्विव दवानलस्य ते दाहशक्तिरतुला विरोधिषु। **गांगेयं स्वर्णमुस्तयोः। कसेरुणि।** गंगाया अपत्यमिव गांगेयम्। शुभ्रादेः यण्। **स्वर्णे** यथा—गांगेयाभरणप्रभाव्यतिकरप्राप्तप्रकृष्टश्रियम्। मुस्ताकशेरु च कंदविशेषे।

१ मु० मू०—कुकृत्यमनुतापे स्यादयुक्तकरणेऽपि च। कुलायः।

चक्षुष्यः सुभगे पुण्डरीकवृक्षे रसांजने ।
कतकेऽक्षिहिते चापि चक्षुष्या तु कुलच्छिका ॥ ४७९ ॥
चांपेयो हेम्नि किञ्जल्के चंपके नागकेसरे ।
जघन्यं शिश्नगर्ह्येऽन्त्ये जटायुर्गुग्गुलौ खगे ॥४८० ॥
तपस्यः फाल्गुने मासे तपस्या नियमस्थितौ ।
द्वितीया तिथिगेहिन्योर्द्वितीयः पूरणे द्वयोः ॥ ४८१ ॥

गांगेयो गांगवत् स्कन्दभीष्मयोः । गंगाया अपत्यं गांगः शिवाद्यण् । स्कंदे यथा—गांगेयमम्युद्धरताऽनुगंगम् । भीष्मे यथा—गांगेयः स बभूव यस्य पुरतो यातास्तृणं शत्रवः । एवं गांगोऽपि ॥४७८॥ **चक्षुष्यः सुभगे पुण्डरीकवृक्षे रसांजने । कतकेऽक्षिहिते चापि** । चक्षुषे हितश्चक्षुष्यः प्राण्यंगे तियः । सुभगाक्षिहितयोर्वाच्यलिंगः । तयोर्यथा—नित्यं प्रसारितकरः सवितापि भवत्यचक्षुष्यः । रसांजनसंजनविशेषः । कतकस्थाने केतके इत्यन्ये । **चक्षुष्या तु कुलच्छिका** । कुलच्छिका तु नेत्रौषधम् ॥ ४७९ ॥ **चांपेयो हेम्नि किञ्जल्के चंपके नागकेसरे** । चम्पते चांपेयः । गेयह्रदयादय इति साधुः । हेम स्वर्णम् । किञ्जल्कम् केसरम् । चंपकनागकेसरौ वृक्षौ । **जघन्यं शिश्नगर्ह्येऽन्त्ये** । जघने भवम् जघन्यम् दिगादिदेहंशोद्यः । जघन्यस्य तुल्यं वा शाखादेर्यः । शिश्ने यथा—स्वेवानुतप्यते साधुः कृत्वा कर्म जघन्यजम् । गर्ह्ये वाच्यलिंगः तत्र यथा— धर्मार्थकामाः सममेव सेव्याः यस्त्वेकसक्तः स नरो जघन्यः । अन्त्ये पश्चादर्थे यथा—उत्तिष्ठेत्तु गुरोः पूर्वं जघन्यं संविशेदपि । अन्त्ये वाच्यलिंगः इत्यन्ये ॥ **जटायुर्गुग्गुलौ खगे** ॥ जटामेति जटायुः । कृवापाजी त्युण् । पुंसि । गुग्गुलुर्महिशाक्षः । खगे यथा—चापे तात जटायुजीवितकथापर्यन्तधूमायितक्रोधोत्पीडनिपीतशोकजडिमा दृष्टिस्तु विश्राम्यति ॥ ४८० ॥ **तपस्यः फाल्गुनमासे** । तपा एव तपस्यः मर्तादिभ्यो यः । यथा—भ्रश्यंति पत्राणि तरोस्तपस्ये ॥ **तपस्या नियमस्थितौ** । तपसः करणं तपस्या । तपसः क्यनिति क्यनि शंसि प्रत्ययादित्यः । यथा—वने तपस्यां तनुते तपस्वी । **द्वितीया तिथिगेहिन्योः** ॥ द्वयोः पूरणी द्वितीया । द्वेस्तीयः । तिथौ यथा—शुक्रेण

नादेयी जलवानीरे भूजंबूनागरंगयोः ।
कांगुष्ठे च जपायां च निकायः सद्मसंघयोः ॥ ४८२ ॥
परमात्मनि लक्ष्ये च प्रणयः प्रेमयाञ्चयोः ।
विस्रंभे प्रसरे चापि प्रत्ययो ज्ञानरंध्रयोः ॥ ४८३ ॥
विश्वासे शपथे हेतावाचारप्रथितत्वयोः ।
अधीने निश्चये स्यादौ प्रणाय्यः कामवर्जिते ॥४८४॥

प्रतिपदा श्रेष्ठा द्वितीया सोमसूनुना । गेहिन्यां भार्यायां यथा—स सद्वितीयो वनमाजगाम ॥ **द्वितीयः पूरणे द्वयोः** ॥ वाच्यलिंगः यथा—तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ॥४८१ ॥ **नादेयी जलवानीरे भूजंबूनागरंगयोः ॥ कांगुष्ठे च जपायां च** ॥ नद्यां भवा नादेयी । नद्यादेरेयण् । पंचापि वनस्पतयः । नदी समुद्रवेऽपि । तत्र वाच्यलिंगः तत्र यथा—नादेयं नादेयी शरदि वसन्ते च नादेयम् ॥ **निकायः सद्मसंघयोः । परमात्मनि लक्ष्ये च** ॥ निचीयति निकायः । सद्मन्यर्थे चिति देहावासिनि धञ् कादेशश्च । संघे तु संघेन्तद्वे इति । निर्वृतो नियतो वा कायोऽत्रेति वा । सद्मनि निवासे यथा—कायोऽप्यपायनिचयस्य निकाय एव । संघे यथा—नाकनायकनिकायकामिनीकोपकंपकुटिलैर्विलोचनैः ॥ ४८२ ॥ परमात्मनि लक्ष्ये वेद्ये च यथा—निकाये योगिनां चित्तं धातुक्वाणामिवोचकैः ॥ **प्रणयः प्रेमयाञ्चयोः । विस्रंभे प्रसरे चापि** ॥ प्रणयनं प्रणयः । प्रेम्णि यथा—प्रणयकुपितां दृष्ट्वा देवीं स संभ्रमविस्मृतः । याञ्चायां यथा—प्राप्ते नैव पराङ्मुखाः प्रणयिनि प्राणोपयोगैरपि । विस्रंभे विश्वासे यथा—अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु । प्रसरे यथा—प्रेमप्रणयसंजातहर्षगद्गदया गिरा । परिचयेऽपि यथा—कृतोऽक्षसूत्रप्रणयी तया करः ॥ **प्रत्ययो ज्ञानरंध्रयोः । विश्वासे शपथे हेतावाचारप्रथितत्वयोः ॥ अधीने निश्चये स्यादौ** ॥ प्रतीयतेऽनेन प्रत्ययनं प्रत्येति वा प्रत्ययः । ज्ञाने यथा—विकल्पप्रत्ययोत्पन्ना न शब्दा सत्त्वदर्शने । रंध्रे छिद्रे यथा—रिपोः प्रत्ययमासाद्य प्रहरेत् कालधर्मवित् ॥ ४८३॥

१ मु. मू. निलयोऽस्तमये गृहे । गोपनस्य प्रदेशेऽपि नेपथ्यं तु प्रसाधने । रङ्गभूमौ वेषभेदे प्रणयः ।

असंमते प्रसव्यस्तु प्रतिकूलानुकूलयोः ।
प्रतीक्ष्यः प्रतिपाल्ये स्यात्पूज्ये च प्रलयो मृतौ ॥४८५॥
संहारे नष्टचेष्टत्वे पर्य्यायोऽवसरे क्रमे ।
निर्माणद्रव्यधर्म्मे च पर्जन्यो गर्जदंबुदे ॥४८६॥

विश्वासे यथा—तत्प्रत्ययाच्च कुसुमायुधबन्धुरेनामाश्वासयत् सुरचितार्थपदैर्वचोभिः । शपथे यथा—प्रत्ययो वचनमेव साधुषु । हेतौ यथा—अपेक्षते प्रत्ययमुत्तमं त्वां बीजांकुरः प्रागुदयादिवाम्भः । आचारे यथा—साधुप्रत्यय एवायं कृते प्रतिकृतं हि यत् । प्रश्रितत्वे प्रथायां यथा—प्रायः प्रत्ययमाधत्ते स्वद्गुणेषूत्तमादरः । स्यादौ यथा—सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसंनिभः ॥ **प्रणाय्यः कामवर्जिते । असम्मते** ॥ प्रणीयते प्रणाय्यः प्रणाय्यो निष्कामा संमते इति ध्यणि साधुः वाच्यलिङ्गः । कामवर्जितो विषयेष्वनासक्तः । तत्र यथा—ज्येष्ठाय पुत्राय पिता ब्रह्म ब्रूयात् प्रणाय्याय वांतेवासिने ॥४८४॥ असंमते चौरादिके यथा—अवाप्नुयात्सोप्यविचारनिग्रहं यदि प्रणाय्यैः सह संवसेन्नरः ॥ **प्रसव्यस्तु प्रतिकूलानुकूलयोः** ॥ प्रतीपः सव्यात् प्रगतः सव्यं वा प्रसव्यः वाच्यलिंगः । प्रतिकूले यथा—प्रसव्यो भ्रातृव्यो व्यसनशतवांछामलिनधीः । अनुकूले यथा—प्रसव्योग्निरिवाहुतिम् । वामेऽपि मंत्रः यथा—प्रसव्यमंजलिं दद्यात् ॥ **प्रतीक्ष्यः प्रतिपाल्ये स्यात् पूज्ये च** ॥ प्रतीक्ष्यते प्रतीक्ष्यः वाच्यलिंगः द्वयोर्यथा—प्रतीक्ष्यं च प्रतीक्ष्यायै पितृश्वस्रे सुतस्य ते ॥ **प्रलयो मृतौ** ॥ **संहारे नष्टचेष्टत्वे** ॥ प्रलयनं प्रलयः । मृतौ यथा—महाजनविरोधेन कुंजरः प्रलयं गतः ॥४८५॥ संहारे यथा—प्रलयोल्ललितस्य वारिधेः परिवाहो जगतः करोति किम् । नष्टचेष्टत्वे सात्त्विकभावे यथा—भ्रमिमरतिमलसहृदयतां प्रलयं मूर्छां तमः शरीरसादम् । मूर्छायामपि यथा—अवधानपरे चकार सा प्रलयांतोन्मिषिते विलोचने ॥ **पर्यायोऽवसरे क्रमे । निर्माणद्रव्यधर्म्मे च** ॥ पर्ययणं पर्यायः । परेः क्रमे इति घञ् पर्येति वा तन् व्यधाति णः । अवसरे यथा—पर्याये विहितं कार्यं सिध्यत्येव न संशयः । क्रमे यथा—पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः

वासवे मेघशब्दे च पयस्यं तु पयोभवे ।
पयोहिते पयस्या तु काकोली दुग्धिकापि च ॥ ४८७ ॥
प्रक्रिया तूत्पादने स्यादधिकारप्रकारयोः ।
पानीयं पेयजलयोः पारुष्यस्तु बृहस्पतौ ॥ ४८८ ॥
पारुष्यं परुषभावे संक्रंदनवनेऽपि च ।
पौलस्त्यो रावणे श्रीदे भ्रातृव्यो भ्रातृजे रिपौ ॥४८९॥

श्लाघ्यतरो हि वृद्धेः । निर्माणं निर्मितिः । द्रव्यधर्मो नवपुराणादिः । तत्र यथा—गुणपर्य्यायवद् द्रव्यम् ॥ **पर्जन्यो गर्जदंबुदे ॥ वासवे मेघशब्दे च** ॥ गर्जति पर्जन्यः । हिरण्यपर्जन्यादय इति साधुः । गर्जदंबुदे यथा—स्फूर्जन्मा गर्ज पर्जन्य दर्पोऽयं यदि तेऽम्भसा ॥ ४८६ ॥ वासवे यथा—अजन्यं सौजन्यं यदि भवति पर्जन्य भवतः । मेघशब्दो मेघध्वनिः ॥ **पयस्यं तु पयोभवे ॥ पयोहिते** । पयसि भवं पयस्यम् । दिगादित्वाद्यः । पयसे हितं वा । उवर्णयुगादेर्य इति यः । वाच्यलिंगः । **पयस्या तु काकोली दुग्धिकापि च** ॥ द्वे अपि ओषधी ॥ ४८७॥ **प्रक्रिया तूत्पादने स्यादधिकारप्रकारयोः** । प्रकरणं प्रक्रिया उत्पादने यथा—शब्दानां प्रक्रिया ज्ञेया । अधिकारो व्यवस्थापनम् । प्रकारे यथा—ऐश्वर्यप्रक्रियामात्रकृतार्थाः संतु हेतयः ॥ **पानीयं पेयजलयोः** ॥ पीयते पानीयम् पेये वाच्यलिंगः । द्वयोर्यथा—पानीयं पानीयं शरदि वसन्ते तु पानीयम् ॥ **पारुष्यस्तु बृहस्पतौ** ॥ परुष एव पारुष्यः । भेषजादित्वाद्यण् ॥४८८॥ **पारुष्यं परुषभावे संक्रंदनवनेऽपि च** ॥ परुषस्य भावः पारुष्यम् । पृणाति वा । गयहृदयेति साधुः । परुषभावे यथा—पारुष्यं वचसा रुषापि कुरुषे यत्तन्नते पौरुषम् । संक्रंदनवनं इन्द्रवनम् ॥ **पौलस्त्यो रावणे श्रीदे** ॥ पुलस्तेरपत्यं पौलस्त्यः । गर्गादित्वाद्यञ् । रावणे यथा—पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान् । श्रीदे धनदे यथा—पौलस्त्येन सुधांशुमौलिसुहृदा प्रस्तं समस्तं धनम् ॥ **भ्रातृव्यो भ्रातृजे रिपौ** ॥ भ्रातुरपत्यं भ्रातृव्यः । भ्रातुर्व्य इति व्यः । रिपौ तु एकद्रव्याभिलाषित्वनिमित्तोपचारात् । द्वयोर्यथा— भ्रातृव्ये

भुजिष्यः स्यादनाधीने किंकरे हस्तसूत्रके ।
भुजिष्या गणिकादास्योः मलयः पर्वतान्तरे ॥ ४९० ॥
शैलांशे देश आरामे मलया त्रिवृतौषधौ ।
मंगल्यो रुचिरेऽश्वत्थे त्रायमाणे मसूरके ॥ ४९१ ॥
बिल्वे मंगल्यं तु दध्नि मंगल्या रोचना शमी ।
शतपुष्पा शुक्लवचा प्रियंगुः शंखपुष्प्यपि ॥ ४९२ ॥
अधःपुष्पी मृगयस्तु फेरौ ब्रह्मणि लुब्धके ।
रहस्यं गोपनीये स्याद्रहस्या सरिदंतरे ॥ ४९३ ॥

नैव विश्वासः ॥ ४८९ ॥ **भुजिष्यः स्यादनधीने किंकरे हस्तसूत्रके** ॥ भुङ्क्ते भुज्यते वा भुजिष्यः । रुचिभुजिभ्यां किष्यः । अनधीनकिंकरयोर्वाच्यलिंगः । अनधीने यथा—भुजिष्या भूभुजः सर्वे । किंकरे यथा—हरौ चरति चारकाश्रमतपस्वितां तां शचीं भुजिष्यदयितेति यः परिरिरंसुमप्यस्तवान् । हस्तसूत्रके यथा—भुजिष्यभूषितभुजः ॥ **भुजिष्या गणिकादास्योः** । द्वयोर्यथा—कामांधाः कामिनः पश्य भुजिष्यामपि भुंजते ॥ **मलयः पर्वतान्तरे** ॥ **शैलांशे देश आरामे** ॥ मलते मलयः कुगुवलीत्ययः । मलं याति वा पर्वतांतरे पुंक्लीबः । तत्र यथा—मूर्छयत्येष पथिकान् मधौ मलयमारुतः ॥ ४९० ॥ शैलस्यांऽशोऽवयवः । देशे यथा—मलयकोसलकेकयशासिनां दुहितरो हितरोपितमार्गणम् । आरामे यथा—एतेऽलयो मलयवंजुलमंजरीषु गुंजंति मंजु घनसौरभलाभमत्ताः ॥ **मलया त्रिवृतौषधौ** ॥ त्रिवृता विषघ्ना ॥ **मंगल्यो रुचिरेऽश्वत्थे त्रायमाणे मसूरके** ॥ **बिल्वे** ॥ मंगले साधुर्मंगल्यः । रुचिरे मंगलहेतौ वाच्यलिंगः । तत्र यथा—अथांगुल्यां हरितालमार्द्रं मंगल्यमादाय मनःशिलां च । अश्वत्थबिल्वौ वृक्षौ । त्रायमाणमौषधम् । मसूरको धान्यभेदः॥४९१॥ **मंगल्यं तु दध्नि** ॥ यथा—मंगल्यतिलकं चक्रुर्वरस्य कुळयोषितः ॥ **मंगल्या रोचना शमी** । **शतपुष्पा शुक्लवचा प्रियंगुः शंखपुष्प्यपि** ॥ **अधःपुष्पी** ॥ सप्तापि ओषधिभेदाः ॥ ४९२ ॥ **मृगयस्तु फेरौ ब्रह्मणि लुब्धके** ॥ मृगयते मृग्यते वा

१ महेन्द्रो मलयः सह्यः शक्तिमानृक्षपर्वतः। विन्ध्यश्च पारिजातश्च सप्तैते कुलपर्वताः॥

लौहित्योऽब्धौ नदे व्रीहौ ब्रह्मण्यो ब्रह्मणे हिते ।
शनैश्चरे व्यवायस्तु मैथुनव्यवधानयोः ॥ ४९४ ॥
वदान्यः प्रियवाग्दानशीलयोरुभयोरपि ।
वक्तव्यो वाच्यवद्गर्ह्ये वचोऽर्हेहीनयोरपि ॥ ४९५ ॥
वलयः कंकणं कंठरुक् वालेयस्तु गर्दभे ।
वल्यर्थे कोमलेंगारे वल्ल्यां विजयो जये ॥ ४९६ ॥

मृगयुः । केवयु भुरण्णेति (उ० ७४६) साधुः । मृगान् याति वापी मृगेति किदुः पुंसि । फेरुः शृगालः । ब्रह्मा वेधाः । लुब्धके यथा—हंति नो पशयस्थोऽपि शयालुर्मृगयुर्मृगम् । **रहस्यं गोपनीये स्यात्** ॥ रहसि भवं रहस्यम् । दिगादीति यः ॥ यथा—रहस्याध्यायीय स्वनसि मृदुकर्णान्तिकचरः । **रहस्या सरिदंतरे** ॥ सरिदंतरं नदीभेदः ॥४९३ ॥ **लौहित्योऽब्धौ नदे व्रीहौ** ॥ लोहित एव लौहित्यः । भेषजादित्वात्ष्यञ् । नदे यथा—चकंपे तीर्णलौहित्ये तस्मिन् प्राग् ज्योतिषेश्वरः ॥ **ब्रह्मण्यो ब्रह्मणे हिते । शनैश्चरे** । ब्रह्मणे हितो ब्रह्मण्यः । प्राण्यंगरथस्वलेति यः । ब्रह्मणि साधुर्वा ब्रह्महिते वाच्यलिंगः तत्र यथा—ब्रह्मण्योऽपि ब्रह्मवित्तापहारी । शनैश्चरो रविसुतः ॥ **व्यवायस्तु मैथुनव्यवधानयोः** ॥ व्यवायनं व्यवायः । मैथुने यथा—अतिव्यवायादिव राजयक्ष्मा । व्यवधाने तिरस्करणे यथा—दुःखव्यवायकुशलस्य विशालबुद्धेः ॥४९४॥ **वदान्यः प्रियवाग्दानशीलयोरुभयोरपि** ॥ वदति वदान्यः । वदिसहिभ्यामान्यः । त्रिष्वपि वाच्यलिंगः तत्र यथा—गतो वदान्यांतरमित्ययं मे माभूत् परोवादनवावतारः । **वक्तव्यो वाच्यवद्गर्ह्ये वचोऽर्हेहीनयोरपि** ॥ उच्यते वक्तव्यः उच्यते वाच्यः वाच्यलिंगौ । त्रिष्वपि वक्तव्यशब्दो यथा—सवक्तव्यो न वक्तव्यः । वाच्यशब्दो गर्ह्ये यथा—न यथा वाच्यतामेति । वचोर्हे यथा—तद्वाच्यः स दशाननो मम गिरा । हीने यथा—तूणं नाराचवाच्यं वहसि किमु मुधा ॥ ४९५॥ **वलयः कंकणं कंठरुक्** ॥ वलते वलयः । कुगुवलीत्ययः पुंक्लीबः । कंकणे यथा—कनकवलयभ्रंशरिक्तप्रकोष्ठः । **कंठरुक्** कंठरोगः ।

पार्थे विमाने विजयोमातत्सख्योस्तिथावपि ।
विषयो यस्य यो ज्ञातस्तत्र गोचरदेशयोः ॥ ४९७ ॥
शब्दादौ जनपदे च विस्मयोऽद्भुतदर्पयोः ।
विनयः शिक्षाप्रणत्योर्विनया तु वलौषधौ ॥४९८॥

समूहेऽपि यथा—अलिवलयसदक्षैः कुंतलैः पक्ष्मलाक्ष्याः ॥ **वालेयस्तु गर्दभे । वल्यर्थे कोमलेङ्गारे वल्लर्याम्** ॥ बलते वालेयः । गयहृदयादयेति साधुः । वलयेऽयं वा छदिर्वलेरेयण् । वल्यर्थे कोमले च वाच्यलिंगः । गर्दभे यथा—वहत्येव हि कालेयं वालेयो न तु भागभाक् । वल्यर्थे यथा—वालेयतंडुलविलोपकदर्थिताभिरेताभिरग्निशरणेषु सधर्मिणीभिः । कोमलं मृदु । अंगारवल्लरी भांगीनाम ओषधोः ॥ **विजयो जये** ॥ **पार्थे विमाने** ॥ विजयनं विजयते वा विजयः । जये यथा— विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् । गतावपि मेखः ॥४९६॥ तत्र पार्थेऽर्जुने च यथा—विजयो विजयोद्यतो यदा । विमाने यथा—विजयो वैजयंतश्च जयंतश्चापराजितः ॥ **विजयोमातत्सख्योस्तिथावपि** ॥ उमायां यथा—देवि स्तुवंति विजयेति जयेति उमेति । तत्सख्याम् यथा—कथयतु विजयानप्रमाणं यदीन्दुः । तिथौ तिथिविशेषे यथा—मंगलेन विजया जयावहा ॥ **विषयो यस्य यो ज्ञातः तत्र गोचरदेशयोः** ॥ **शब्दादौ जनपदे च** ॥ विसिनोति विषयः । सदसि तस्येति परवम् । शब्दादयः शब्दरूपरसगंधस्पर्शाः तत्र यथा—स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः । गोचरे यथा—सौमित्रेरपि पत्रिणामविषयस्तत्र प्रिया क्वापि मे । तयोर्यथा—रागोव सक्तिमधिकां विषयेषु वायुः ॥४९७॥ जनैर्वास्यमानो जनपदः । तत्र यथा—उत्सन्नविषयग्रामात्स्थानादुच्चलितद्विजाः ॥ **विस्मयोऽद्भुतदर्पयोः** ॥ विस्मयनं विस्मयः । विशिष्टः स्मय इति वा । अद्भुते यथा—यद्विस्मयस्तिमितमस्तमितान्यभावमानन्दमंदममृतप्लवनादिवाभूत् । दर्पे यथा—त्यागे तपसि शौर्ये च विज्ञाने विनये नये । विस्मयो हि न कर्तव्यो बहुरत्ना वसुंधरा ॥ **विनयः शिक्षाप्रणत्योः** । विनयनं विनयः शिक्षायां यथा—विनया-

विशल्या लांगली दंतीगुडूचीत्रिपुटासु च ।
शल्येन रहितायाश्च प्रियायां लक्ष्मणस्य च ॥४९९॥
श्वशुर्यौ देवरे श्याले शांडिल्यः पावकान्तरे ।
बिल्वे मुनौ च शालेयं शतपुष्पाह्वयौषधे ॥५००॥
क्षेत्रे च शालिधान्यस्य शीर्षण्यं शीर्षरक्षणे ।
शीर्षण्यो विशदे केशे शैलेयं शैलसंभवे ॥५०१॥

न्नयनिश्चयः । प्रणतौ यथा—गुणप्रकर्षो विनयादवाप्यते ॥ **विनया तु वलौषधौ** ॥ विनयति रोगान् विनया ॥४९८॥ **विशल्या लांगली दंती गुडूची त्रिपुटासु च । शल्येन रहितायां च प्रियायां लक्ष्मणस्य च** ॥ विगतं शल्यमतो द्रावकत्वात् विशल्या । विगतं शल्यं अस्या वा । षड्ष्वर्थेषु । लक्ष्मणस्य प्रिया हितकारिणी भार्या वा तत्र यथा—विशल्यां सौमित्रेरयमुपनिनायौषधिवराम् ॥४९९॥ **श्वशुर्यौ देवरे श्याले** ॥ श्वशुरस्यापत्यं श्वशुर्यः ॥ श्वशुराद्यः । द्वयोर्यथा—ज्येष्ठः श्वशुर्यः शाली च संमान्यौ गुरुवत्स्मृतौ ॥ **शांडिल्यः पावकान्तरे । बिल्वे मुनौ च** ॥ शंडिलस्यापत्यं शांडिल्यः । गर्गादित्वात् यञ् । शांडिल्ये साधुर्वा । पावकान्तरे वह्निविशेषः । बिल्वो वृक्षः । मुनौ यथा—क्रतुक्रियाकांडशौण्डस्य शांडिल्यनाम्नो महर्षेर्वंशः ॥ **शालेयं शतपुष्पाह्वयौषधे** ॥ **क्षेत्रे च शालिधान्यस्य** ॥ शालते शालेयम् । गयहृदयादय इति साधुः । शालीनां क्षेत्रमिति वा । व्रीहि शालेरेयञिति एयञ् । द्वयोर्यथा—विशालः शालेयैः फलपरिणतिस्फातिसुभगैः । **शीर्षण्यं शीर्षरक्षणे** ॥ शिरसि भवं शीर्षण्यम् । दिगादित्वाद्यः । शिरसः शीर्षन्निति शीर्षन्नादेशः । शीर्षरक्षणे शिरस्त्राणे यथा—शीर्षण्यानां दिनकरकरस्पर्शनिर्यद्रुचीनाम् ॥५००॥ **शीर्षण्यो विशदे केशे** ॥ विशदो यः केशस्तत्र यथा—जराजरठशीर्षण्यो धन्यो ध्यायति शंकरम् । मंखस्तु विशदे केशे चेति अर्थद्वयमाह । तत्र विशदे यथा—शीर्षण्यास्तत्र कीर्तयोऽत्र भुवने राजंति राजन् सदा । शिरोभवशिरोहितप्रधानेष्वपि मंखः । तत्र तु वाच्यलिंगः । क्रमेण यथा—शीर्षण्यान्मुच्यते व्याधेः । उष्णं

सिंधूत्थे तालपर्ण्याश्च शैलेयस्तु मधुव्रते ।
समयः शपथे भाषासंपदोः कालसंविदोः ॥५०२॥
सिद्धांताचारसंकेतनियमावसरेषु च ।
क्रियाकारे च निर्देशे संस्त्यायो विस्तृतौ गृहे ॥५०३॥
संनिवेशे सन्नयस्तु समवायानुसैन्ययोः ।
सामर्थ्यं योग्यताशक्त्योः सौरभ्यं[1] गुणगौरवे ॥५०४॥

पयो न शीर्षण्यम् ! शीर्षण्ये त्वयि पुण्यपण्यविभवैर्लभ्ये भयं मे कुतः ॥ शलेयं शैलसंभवे ॥ सिंधूत्थे तालपर्ण्याश्च ॥ शैले भवं शैलेयम् । नद्यादो रयण् । शिलायास्तुल्यं वा शिलाया एयच्चेति एयञ् । शिलासंभवे यथा—शैलेयनद्धेषु शिलातलेषु ।५०१॥ सिंधूत्थं लवणम् । तालपर्णी ओषधिः ॥ शैलेयस्तु मधुव्रते ॥ मधुव्रतो भ्रमरः स्त्रीपुंसः ॥ समयः शपथे भाषासंपदोः कालसंविदोः ॥ सिद्धांताचारसंकेतनियमावसरेषु च । क्रियाकारे च निर्देशे ॥ समीयते समेति वा समयः । द्वादशस्वर्थेषु । काले पुंक्लीबः । शपथे यथा—तनयसमयं सायं कृत्वा ययौ मम वल्लभा । भाषायां यथा—निःशेषदेशसमयस्य नृपः स विज्ञः । संपदि यथा—उपकारो हि कर्तव्यः कृतिभिः समये सति ॥ ५०२ ॥ काले आचारे च यथा—स्पृशन् सशंकः समये शुचावपि स्थितः कराग्रैरसमग्रपातिभिः । संवित् ज्ञानं तत्र यथा—समयेन मया ज्ञातं परं ब्रह्म क्षणादपि । सिद्धांते यथा—न पक्षपाती समयस्तथाते । संकेते यथा—सायं तत्र त्वया गम्यं मयेति समयः कृतः । नियमे यथा—वक्तव्यं सत्यमेवेति गृहीतः समयो मया । अवसरे यथा—यावत् स एव समयः सममेव तावदव्याकुलाः पटमयान् यमितौ वितन्य । क्रियाकारो व्यवस्थापनम् तत्र यथा—समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः । निर्देश आज्ञा तत्र यथा—दीयतां शासनं तस्मै समयोऽयं महीपते ॥ संस्त्यायो विस्तृतौ गृहे । संनिवेशे ॥ संस्त्यानं संस्त्यायतेऽसौ वा संस्त्यायः । विस्तृतौ संघाते यथा-संस्त्यायेन चरंति हंत हरिणा व्यस्ताभिशंकास्ततः । गृहे संनिवेशे च यथा—संस्त्याये निवसन्नुपेतमतिथिं कालेऽवजानाति कः ॥५०३॥ सन्नयस्तु

१. मु. सौकर्यं तु विना श्रमे । सूकरस्य क्रियायां च सौरभ्यम्० ।

सौगन्ध्ये चारुतायाश्च हिरण्यं पुनरक्षये ।
प्रधानधातौ कनके मानभेदे कपर्दके ॥५०५॥
द्रविणाकुप्ययोश्चापि हृच्छायो मन्मथात्मनोः ।
हृदयं वक्षसि स्वान्ते वृक्कायाममरः सुरे ॥५०६॥

समवायानुसैन्ययोः ॥ संनीयते सन्नयः । युवर्णे त्यल् । समवाये द्रव्यमीलने यथा—आसोमयागात् कार्यः स्यात् सन्नयो नाहिताग्निना । अनुसैन्यं पश्चादवस्थायिबलम् तत्र यथा—सन्नयो हि न धातव्यो नयज्ञेन महीभुजा ॥ सामर्थ्यं योग्यताशक्त्योः ॥ समर्थस्य भावः सामर्थ्यम् । द्वयोर्यथा—सामर्थ्यं भवतः पुरंदरमतोच्छेदं विधातुं कुतः ॥ सौरभ्यं गुणगौरवे ॥ सौगन्ध्ये चारुतायां च ॥ सुरभेर्भावः सौरभ्यम् । गुणगौरवचारुतयोर्यथा—सौरभ्यं लभ्यते पुण्यैः । सौगन्ध्ये यथा—गतास्ते विस्तीर्णस्तबकभरसौरभ्यलहरो, परीतव्योमानः प्रकृतिगुरवः केऽपि तरवः ॥ हिरण्यं पुनरक्षये ॥ प्रधानधातौ कनके मानभेदे कपर्दके ॥ द्रविणाकुप्ययोश्चापि ॥ ह्रियते हिरण्यम् । हिरण्यपर्जन्यादय इति साधुः । सप्तस्वर्थेषु । कनके पुंक्लीबः । अक्षयमविनश्वरम् । प्रधानधातुः शुक्रम् । कनके यथा—हिरण्मयी सा ललनेव जंगमा । अत्र हि हिरण्यस्य विकारो हिरण्मयी । अभक्ष्याच्छादने इति मयट् सार्वैस्वाकेति साधुः । मानभेदे यथा—हिरण्यमेकं गामेकां भूमेरप्येकमंगुलम् । हरन्नरकमाप्नोति ॥ अकुप्यमुत्कृष्टधनं रूप्यहेमादि, कपर्दके द्रविणे अकूप्ये च यथा—हिरण्यमेवार्जय निष्फलाः कलाः ॥५०५॥ हृच्छायो मन्मथाऽऽत्मनोः ॥ हृदि शेते हृच्छयः । आधारादित्यः । द्वयोर्यथा—हृच्छयः कथमनात्मतां गतः ॥ हृदयं वक्षसि स्वांते वृक्कायां (बुक्कायाम्) ॥ ह्रियते हरति वा हृदयम् गयहृदयादय इति साधुः । वक्षसि स्वांते च यथा—राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी । वृक्काऽग्रमांसम् ॥ अथ रांताः ॥ अमरः सुरे ॥ स्नुहीवृक्षेऽस्थिसंहारेऽपि ॥ न म्रियते अमरः अमति वा । ऋच्छि चदित्यरः । सुरे यथा—

स्नुहीवृक्षेऽस्थिसंहारेऽप्यमरा त्वमरावती ।
स्थूणा दूर्वा गुडूची चान्तरं रन्ध्रावकाशयोः ॥५०७॥
मध्ये विनार्थे तादर्थ्ये विशेषेऽवसरेऽवधौ ।
आत्मीयाऽऽत्मपरीधानांतर्द्धिबाह्येष्वथावरम् ॥५०८॥

मुदे मुरारेरमरैः सुमेरोरानीय यस्योपचितस्य शृंगैः ॥५०६॥ स्नुहीवृक्षो वज्रतरुः । अस्थिसंहारो गंगादिक्षेप्याणामस्थनामेकत्रमीलनम् ॥ अमर त्वमरावती । स्थूणा दूर्वा गुडूची च ॥ अमरावत्यां यथा—अमरायां सुरो भावी समरे संमुखो हतः । स्थूणा स्तंभः । दूर्वा गुडूचो च ओषधिः ॥ अन्तरं रन्ध्रावकाशयोः ॥ मध्ये विनार्थे तादर्थ्ये विशेषेऽवसरेऽवधौ ॥ आत्मीयात्मपरीधानांतर्द्धिबाह्येषु ॥ अनिति अंतरम् । अनिकाभ्यां तरः त्रयोदशस्वर्थेषु । पुंक्लीबः । रंध्रे यथा—चलत्पलाशांतरगोचरास्तगेस्तुषारमूर्तेरिव नक्तमंशवः । अवकाशे यथा—मध्ये यथा—श्यामुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ॥५०७॥ मध्ये यथा—तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या । विनार्थे यथा—धर्मांतरेण विभवः कृतिनां कुतस्त्यः । तादर्थ्ये यथा—अर्थैस्तैर्विषयांतरैः किमिव नः कृत्यं सुधासंभवैः । विशेषे यथा—इक्षुक्षीरगुडादीनां माधुर्यस्यांतरं महत् । अवसरे यथा—इदमंतरमुपकृतये प्रकृतिचलायावदस्ति संपदियम् । अवधौ भगवत्तौ यथा—गीतांतरे च श्रमवारिलेशैः किञ्चित्समुच्छ्वासितगंडलेखम् । आत्मीये यथा—ये भक्ति परिशीलयन्ति विबुधास्तेऽभ्यंतरास्ते विभोः । आत्मनि आत्मोपलक्षिते मनः प्रभृतौ यथा—व्यतिषजति पदार्थानंतरः कोऽपि हेतुः । परीधाने यथा—तूणान्वेव पुनस्तरां द्रढयति स्वादंतरस्मात्पटादाकृष्टैः कुशचीरतन्तुभिरभिक्रुद्धो मुनिर्भार्गवः । अंतर्धौ व्यवधाने यथा—दधतमंतरिता हिमदीधितम् । बाह्ये यथा—अंतरेषु न देशेषु विचरेत् दुर्गतोऽपि सन् ॥ अथावरम् ॥ चरमे ॥ अव्यते अवरम् । अवेर्ध च वेत्परः । वाच्यलिंगः । चरमं नियम् दिश्यपि मंखः तत्र तु स्त्रियाम् । तयोर्यथा—दिननाथोऽवरासंगं

चरमेऽवरा तु गौरीगजजंघांत्यदेशयोः ।
अक्षरं स्यादपवर्गे परमब्रह्मवर्णयोः ॥५०९॥
गगने धर्मतपसोरध्वरे मूलकारणे ।
अधरोऽनूर्ध्वहीनोष्ठेष्वंबरं व्योमवस्त्रयोः ॥५१०॥
कर्पासे सुरभिद्रव्येऽररं छदकपाटयोः ।
अंकुरो रोम्णि सलिले रुधिरेऽभिनवोद्गमे ॥५११॥

प्राप्याऽधोमुखतां गतः ॥५०८॥ अवरा तु गौरी गजजंघांत्यदेशयोः ॥ गौरी उमा । गजजंघायाः अंत्यदेशः पश्चाद् भागः तत्र यथा—मग्नोऽवराम्यामवरीबभूव । गजजंघांत्यदेशे क्लीबे इति लिंगविदः ॥ अक्षरं स्यादपवर्गे परमब्रह्मवर्णयोः ॥ गगने धर्मतपसोरध्वरे मूलकारणे ॥ न क्षरति अक्षरम् । अश्नुते वा । मीज्यजोति सरः । अपवर्गे मोक्षे यथा—स याति परमो योगी प्रियं धामाक्षरं परम् । परमब्रह्मणि यथा—यमक्षरं वेदविदो विदुस्तमात्मानमात्मन्यवलोकयंतम् । वर्णे यथा—तान्यक्षराणि हृदये किमपि ध्वनन्ति ॥५०९॥ गगनं व्योम, धर्म्मः पुण्यं, तप उपवासादिः, अध्वरो यागः, मूलकारणं परमाण्वादिः, अक्षयेऽपि मंखः यथा—तमक्षरं ब्रह्मपरं पवित्रम् । अधरोऽनूर्ध्वो हीनोष्ठेषु ॥ अव्यते अधरः । अवेर्ध च वेत्परः । अनूर्ध्वे हीने च वाच्यलिंगः । अनूर्ध्वो अवरतनः तत्र यथा—अधरोत्तरतां प्रपन्नयोः प्रिययोः पार्श्वनिवेशिनोस्तथा । होने यथा—अधरो धर्मं न पश्यति संक्लेशाकुलो मूर्खः । ओष्ठे यथा—निवार्यतामालि किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः ॥ अम्बरं व्योमवस्त्रयोः ॥ कर्पासे सुरभिद्रव्ये ॥ अमति अंबरम् । जठरककरेति साधुः । व्योम्नि वस्त्रे च यथा—येनैवांबरखंडेन संवीतो निशि चंद्रमाः ॥५१०॥ सुरभिद्रव्यम् तार्यिकप्रसिद्धम् तत्र यथा—सुरभितांबरमंबरधूपतः ॥ अररं च्छदकपाटयोः । इयर्ति अररम् । ऋच्छि चटीत्यरः । छदः पत्रम् कपाटे यथा—अररपुटचीत्कारविरुतैः । वैजयंतीकारस्तु न ना कपाटेत्कोलोहे सोम्ये स्यादररः

१ मु० अध्वरः सावधानके वसुभेदे क्रतौ चाप्यम्बरं० ।

अजिरं दर्दुरे काये विषये प्राङ्गणेऽनिले ।
अशिरोऽर्के राक्षसेऽग्नौ अंगारोऽलातभौमयोः ॥५१२॥
अंडीरः शक्तनरयोरसुरः सूर्यदैत्ययोः ।
असुरा रजनीवास्योरगुरुस्त्वगुरौ लघौ ॥५१३॥
शिंशपायामथाहारो हार आहरणेऽशने ।
आसारो वेगवद्वर्षे सुहृद्बलप्रसारयोः ॥५१४॥

पुमान् इत्याह । अंकुरो रोम्णि सलिले रुधिरेऽभिनवोद्गमे ॥ अंकयते अंकुरः । वास्यत्यसीत्युरः । अभिनवोद्गमः प्ररोहस्तत्र यथा — बीजाङ्कुरः प्रागुदयादिवांभः ॥५११॥ अजिरं दर्दुरे काये विषये प्रांगणेऽनिले ॥ अजंत्यस्मिन् अजिरम् । स्थविरेति साधुः । दर्दुरो भेकः । काये प्रांगणे च यथा—अजिरमजिरं पापानां तत् कथं बत रज्यसे । विषये रूपादौ यथा—अजिराण्यजराणि यः पुमान् तनुते तस्य भवेन्न मुक्तता । अनिलो वातः ॥ अशिरोऽर्के राक्षसेऽग्नौ ॥ अश्नुते अश्नाति वा अशिरः । स्थविरेति साधुः । आशिर इत्यन्ये । त्रिष्वपि यथा— अशिरः शिरस्तापकः ॥ अंगारोऽलातभौमयोः ॥ अंगत्यंगारः । अंग्यंगीत्यारः । अलाते पुंक्लीबः तत्र यथा—अंगारचुंबितमिव व्यथमानमास्ते । भौमे यथा—अंगारेणाश्विनी श्रेष्ठा ॥५१२॥ अंडीरः शक्तनरयोः ॥ अंडे अस्त्यस्य कांडांडभांडादीर इति श्लिष्टनिर्देशादीरः । शक्ते वाच्यलिंगः । तत्र तथा—चिरादंडीरेण त्वयि तदपि रामेण गुणितम् ॥ असुरः सूर्यदैत्ययोः ॥ न सुरति असुरः अस्यति वा । वास्यसीत्युरः । दैत्ये यथा— समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयताम् ॥ असुरा रजनीवास्योः ॥ रजनी रात्रिः वासी तक्षोपकरणम् ॥ अगुरुस्त्वगुरौ लघौ शिंशपायाम् ॥ न गुरुरगुरुः । अगुरौ शिंशपायाश्च पुंक्लीबः लघौ वाच्यलिंगः । अगुरौ लघौ च यथा—अगुरुरिति वदतु लोको गौरवमात्रैव पुनरहं मन्ये ॥५१३॥ शिंशपा वृक्षः ॥ अथाहारो हार आहरणेऽशने ॥ आहरणमाह्रियते वा

१. मु. अवीरा तु नारी पतिसुतोज्झिता । रजसा संयुताप्युक्ताहार० ।

आकार इङ्गिताकृत्योराधारो जलधारणे ।
आलवालेऽधिकरणेऽप्याकरो निकरे खनौ ॥५१५॥

इतरः पामरेऽन्यस्मिन्नित्वरः क्रूरकर्मणि ।
पथिके दुर्विधे नीचे स्यादित्वर्यभिसारिका ॥५१६॥

आहार । हारे अशने च यथा— चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् । आहरणे आनयने यथा—वंठोऽयं निष्ठुराकारः काष्ठाहारेण जीवति । आसारो वेगवद्वर्षे सुहृद्बलप्रसारयोः । आसरणं आसरंत्यनेन वा आसारः । वेगवद्वर्षे यथा— त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना । सुहृद्बले यथा—निरुद्धवीवधासारप्रसारांगा इव व्रजम । प्रसारस्तृणकाष्ठादिहेतवे प्रसरणम् ॥५१४॥ आकार इंगिताकृत्योः ॥ आक्रियते आकारः । इंगितं भावसूचकं चेष्टितम् । तत्र यथा— न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः । आकृतिः वैवर्ण्यादिः । तत्र यथा— गूढाकारेंगितस्य च ॥ आधारो जलधारणे ॥ आलवालेऽधिकरणेऽपि ॥ आध्रियतेऽस्मिन्नित्याधारः । न्यायावायेति घञ् । जलधारणे अंभसां बंधे यथा— समुद्रः प्रलयोन्मुद्रः किमाधारेण धार्यते । आलवाले यथा— आधारबंधप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् । अधिकरणे यथा— किमाधारो धाता सृजति किमुपादान इति च ॥ आकरो निकरे खनौ ॥ आकीर्यतेऽस्मिन्निति एत्य कुर्वंत्यत्र वा आकरः । पुंनाम्नि घः । निकरे यथा— आमूलं गुणसंग्रहव्यसनिता द्वेषश्च दोषाकरे । खनौ यथा— दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥५१५॥ इतरः पामरेऽन्यस्मिन् । एति इतरः इण् पूभ्यां किदिति कित् तरः वाच्यलिंगः । पामरे यथा—नार्यां कामो महतामितरानभिलषति सापि न प्रसभम् । अन्यस्मिन् यथा— शुभेतराचारविपक्रिमापदो विपादनीया हि सतामसाधवः । इत्वरः क्रूरकर्मणि ॥ पथिके दुर्विधे नीचे ॥ अयनशील इत्वरः । सृजीण् न शब्दरप् । वाच्यलिंगः । चतुर्ष्वपि यथा— किमित्वरैः सत्वरगत्वरैस्तैः ॥

ईश्वरः स्वामिनि शिवे मन्मथेऽपीश्वराद्रिजा ।
उदरं तुंदरणयोरुत्तरं प्रवरोद्र्ध्वयोः ॥५१७॥
उदीच्यप्रतिवचसोरुत्तरस्तु विराटजे ।
उद्धारः स्यादृणोद्धृत्योरुदारो दक्षिणो महान् ॥५१८॥

स्यादित्वर्यभिसारिका । चत्वरेष्वित्वरी याति वेगविह्वलकुंतला ॥५१६॥ **ईश्वरः स्वामिनि शिवे मन्मथेऽपि** ॥ ईशनशील ईश्वरः । स्थेशभासपिसकसो वरः । आढ्येऽपि तत्र स्वामिनि च वाच्यलिंगः । स्वामिनि शिवे आढ्ये च यथा— प्रालेयशीतमचलेश्वरमीश्वरोऽपि सांद्रेभचर्मवसनाभरणोऽधिशेते । मन्मथः कामः ॥ **ईश्वरा अद्रिजा** । अद्रिजा गौरी तत्र यथा— विघ्नच्छिदे चरणपंकजमीश्वरायाः ॥ **उदरं तुंदरणयोः** ॥ उनत्ति उदरम् । मृदॄंदीति किदरः । तुंदे यथा— रक्ताशोककृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनम् । रणे संग्रामे यथा— कस्य स्यान्नोदरे दरः ॥ **उत्तरं प्रवरोद्र्ध्वयोः** ॥ **उदीच्य प्रतिवचसोः** ॥ अतिशयेन उत्कृष्टं ऊद्र्ध्वम् । धा उत् उत्तरम् । द्वयोर्विभज्ये वतरप् । उत्तरति वा । प्रवरोद्र्ध्वोदीच्येषु वाच्यलिंगः । प्रवरे यथा— लोकोत्तरं चरितमर्पयति प्रतिष्ठाम् । ऊद्र्ध्वे यथा— पुनर्विविक्षुः स्फुरितोत्तराधरः ॥५१७॥ उदीच्ये यथा— पितुरनंतरमुत्तरकोसलान् । प्रतिवचसि यथा— वीक्षितेन परिगृह्य पार्वती-मूर्द्धकंपमयमुत्तरं ददौ ॥ **उत्तरस्तु विराटजे** ॥ विराटजो विराटराजसूनुः । तत्र यथा— वैराटे उत्तरस्यैव तवैतत् कथनं वृथा ॥ **दिक्नक्षत्रयोरपि** ॥ तत्र तु स्त्रीलिंगः । दिशि यथा— अस्त्युत्तरस्यां दिशि देवतात्मा । नक्षत्रे यथा— हस्ताद्याः पञ्चवस्त्रेषु प्रशस्तं चोत्तरात्रयम् ॥ **उद्धारः स्यादृणोद्धृत्योः** ॥ उद्ध्रियते उद्धारः । ऋणे यथा—लावण्यमुद्धारतया गृहीत्वा मन्ये विधात्रा विहिता मृगाक्षी । उद्धृतौ यथा—कैलासोद्धारधोरं दशवदनभुजामंडलीयंत्रबंधम् रेरेकोदंडदंडप्रतिपरुरदलन्नासि सोढा दढोसि । संग्रहभुकोच्छिष्टयोरपि मंखः संग्रहे यथा— सूकोद्धारं करिष्यामि । भुकोच्छिष्टे यथा—यत्रोद्धारो भवति शतशः कोऽपि कर्पूरपूरः ॥ **उदारो दक्षिणो महान् दाता** ॥ उदर्यते उदारः

१ मु० उत्तरा दिगुदीच्यां स्यात्स्नुषायामर्जुनस्य च । उद्धारः ।

दातोर्वरा तु भूमात्रे सर्वसस्याढ्यभुव्यपि ।
ऋक्षरं वारिधारायामृक्षरः पुनरृत्विजि ॥५१९॥
एकाग्रौ तद्गताव्यग्रावौशीरं शयनासने ।
उशीरजे चामरे च दंडे कररः खगे ॥५२०॥
करीरे क्रकचे दीने कर्बुरं कांचने जले ।
कर्बुरो राक्षसे पापे शबले कंदरोंऽकुशे ॥५२१॥

घञ् वाच्यलिंग । दक्षिण सरल तत्र यथा—उदारचरितानां तु वसुधैव कुटुम्बकम् । महति यथा—स तथेति विनेतुरुदारमते प्रतिगृह्य वचो विससर्ज मुनिम् ॥५१८॥ दातरि यथा—किं ददातु किमश्नातु भर्तव्यभरणाकुलः । उदारसन्तान्तो जगत्त्रितयमात्रके ॥ **उर्वरा तु भूमात्रे सर्वसस्याढ्यभुव्यपि** । उरु ईयर्ति । अचि उर्वरा । भूमात्रे यथा—यद्दंष्ट्राचंद्रखंडेऽभूल्लांछनच्छविरुर्वरा । सर्वसस्याढ्यभुवि यथा—स पश्यन्नुर्वरानुर्वीमुर्वीशोऽधूनयच्छिर ॥ **ऋक्षरं वारिधारायाम्** ॥ ऋषति कृधूतनृषिभ्य किदिति कित सर ॥ **ऋक्षरः पुनरृत्विजि** ॥ ऋत्विक् याज्ञिक ॥५१९॥ **एकाग्रौ तद्गताव्यग्रौ** ॥ एकं अग्रं प्रधानमस्य एकाग्र । वाच्यलिंग । द्वयोर्यथा—जडीभवंति चेतांसि नित्यमेकाग्रचिंतया ॥ **उशीरं शयनासने** ॥ **उशीरजे चामरे च दंडे च** ॥ वष्टि उशीरम् । वसि घसीति किदीर । वशेरयडीति दत् । उशीरमेव ऊशीरम् । प्रज्ञाद्यण् । उशीरस्येदं वा शयनं च आसनं च शयनासनम् । तत्र युगपद्वर्तते । उशीरं वीरणमूलम् तत्र जातम् उशीरजं तत्र वाच्यलिंग । दंडो यष्टिः । तत्र शयनासने तु यथा—राजाभिधानाक्षरमुद्रितं तदौशीरमालोक्य न कस्य भीति । चामरे यथा— शुभ्रौशीरमिषादतीव विमला कीर्तिं स्थिता तेऽग्रत ॥ **कररः खगे** ॥ **करीरे क्रकचे दीने** ॥ करेति शब्दं राति करर । कीर्यंते वा । जठरेति साधु । चतुर्ष्वपि यथा—उद्वेजनीयाः करेरा नराणाम् ॥५२०॥ **कर्बुरं कांचने जले** ॥ कर्वति कर्बुरं वास्यसीत्युर । द्वयोर्यथा—कर्बुरमकर्बुरात्मा कश्चिद दातुं प्रगल्भते

विवरे च गुहायाश्च कर्करो मकुरे दृढे ।
कदरः श्वेतखदिरे क्रकचक्षुद्ररोगयोः ॥५२२॥
कर्परस्तु कटाहे स्याच्छस्त्रभेदकपालयोः ।
कंकरं कुत्सिते तक्रे कडारो दासपिंगयोः ॥५२३॥
कंजारः कुञ्जरे सूर्ये जरठे द्रुहिणे मुनौ ।
करीरः कलशे वंशांकुरवृक्षविशेषयोः ॥ ५२४ ॥

जगति । कर्बुरो राक्षसे पापे शबले ॥ पापशबलयोर्धर्ममात्रे पुंसि तद्वति वाच्यलिंगः । राक्षसे पापे च यथा—कर्बुरमकर्बुरात्मा । शबले कल्मषे यथा—भास्वत्कौस्तुभकांतिकर्बुरपरिस्त्राजिष्णुवक्षःस्थल ॥ कंदरोऽकुशे ॥ विवरे च गुहायाश्च ॥ कं शिरो दृणाति कंदरः । कंदते वा । ऋछि चटीत्यरः । गुहायां त्रिलिंग । अंकुशे यथा— कंदरादंतिनां दरः ॥५२१॥ विवरे यथा— विद्रथः प्रतिभयमास्यकंदरं ललत्फणाधरमिव कोटरं तरु । गुहायां यथा— गायंति किन्नरगणा गिरिकंदरेषु ॥ कर्करो मकुरे दृढे ॥ किरति कर्करः । ऋतष्टिदित्यप्रत्यय । सरुपद्वित्वश्च । मकुर कोरकः । दृढो बलीयान् तत्र वाच्यलिंग । क्षुद्र पक्षेऽपि यथा— प्रहितकर्करमाकुरवर्करम् गलंति कायां कर्करीत्यपि ॥ कदरः श्वेतखदिरे क्रकचक्षुद्ररोगयोः ॥ कदिः सौत्रः कदति कदर । ऋछि चटीत्यरः । कुत्सितमियर्ति वा कं दृणाति वा ॥ ५२२ ॥ कर्परस्तु कटाहे स्याच्छस्त्रभेदकपालयोः ॥ कल्पते कर्परः । जठरक्कंकरेति साधुः । कटाहे यथा—सावष्टंभनिशुंभनिर्भरनमद्भूगोलनिष्पीडनन्यंचत्कर्परकूर्मकंपविकलब्रह्मांडभांडस्थिति । शस्त्रभेदे यथा—स कर्परं कुत्सदशेन वाससा । कपाले यथा—तस्मै वहेयमुदकं घटकर्परेण ॥ कंकरं (कच्चरं) कुत्सिते तक्रे ॥ कंकते कंकरम् । जठरेति निपादनादरः । कं सुखं करोति वा हेत्वा दौहः । कुत्सिते वाच्यलिंग । तक्रं मथितम् ॥ कडारो दासपिंगयोः ॥ कडति कडार । अर्त्यंगीत्यारः । पिंगे गुणे पुंसि तद्वति वाच्यलिंगः । तत्र यथा—पृथ्वीरजः करभकंठकडारमाशा ॥५२३॥ कंजार कुंजरे सूर्ये जरठे द्रुहिणे मुनौ कंजिः सौत्रः । कंजति कंजारः अर्त्यंगीत्यारः । पञ्चस्वर्थेषु जरठे गुणे पुंसि

कलत्रं तु श्रोणौ भार्यायां दुर्गस्थाने च भूभुजाम् ।
कटित्रं तु कटीवस्त्रे रसनाचर्मभेदयोः ॥ ५२५ ॥
कच्छुरः पुंश्चले पामासहिते कच्छुरा शठी ।
दुःस्पर्शा शूकशिंबी च कवरं लवणाम्लयोः ॥ ५२६ ॥
कबरी केशविन्यासशाकयोः कंधरोऽम्बुदे ।
कंधरा तु शिरोधौ स्यात् कशेरुः पृष्ठकीकसे ॥५२७॥

तद्वति वाच्यलिंगः ॥ करीरः कलशे वंशाङ्कुरवृक्षविशेषयोः ॥ कीर्यते करीरः । कृशृगॄदृतोरः पुंकलबः कलशे यथा—करीरो जडसंगेऽपि तापहारी शरीरिणाम् । वंशांकुरे यथा—रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः । वृक्षविशेषे यथा—जानन्त्युपकर्तुममर्मा मार्गकरीराः शरीरेण ॥ ५२४ ॥ कलत्रं श्रोणौ भार्यायां दुर्गस्थाने च भूभुजाम् ॥ कडति कडत्रम् । वृगून-क्षीत्यत्रः । लत्वे कलत्रम् । कलं त्रायते वा । श्रोणौ भार्यायाञ्च यथा—साधोरिवोरुयुगलस्य कलत्रसंगस्तस्याः स्वतंत्रगतिभंगकरोऽद्य जातः । दुर्गस्थाने यथा—निर्विकमो महोनाथः कलत्रैस्त्रायते कियत् ॥ कटित्रं तु कटीवस्त्रे रसनाचर्मभेदयोः ॥ कटिं त्रायते कटित्रम् । कटति आवृणोति वा । बंधिवहीतीत्रः त्रिष्वपि यथा—रेजे कटित्रेण कुटो कटो च ॥५२५॥ कच्छुरः पुंश्चले पामासहिते ॥ कच्छूरस्त्यस्य कच्छुरः । कच्छवा छुरः वाच्यलिंगः । पुंश्चलः कामकंडूलः । द्वयोर्यथा—कच्छुरे वच्छलाः स्त्रियः । कच्छुरा शठी (शटी) । दुःस्पर्शा शूकशिंबी च ॥ त्रिष्वोऽप्योषधयः ॥ कवरं लवणाम्लयोः ॥ क्वयते कवरम् । ऋछिचटीत्यरः । धर्ममात्रे क्लीबे तद्वति वाच्यलिंगः । द्वयोर्यथा—वर्वराः कवरप्रियाः । कर्बुरेऽपि मंखः ॥५२६॥ कबरी केशविन्यासशाकयोः ॥ केशविन्यासे भाजगोणेति डोः । शाके तु-कबरीव कबरी । केशविन्यासे यथा—व्याकीर्णमाल्यकबरां कबरीं तरुण्यः । शाकं शाकविशेषः ॥ कंधरोऽम्बुदे ॥कं जलं धरति कंधरः । आयुधादिभ्य इत्यच् यथा—जलदुर्धरधारामिर्धरां प्रीणाति कंधरः ॥ कंधरा तु शिरोधौ स्यात् ॥ कं शिरो धरति

तृणजातौ कंदभेदे कणेरुस्तु गणेरुवत् ।
वेश्येभीकर्णिकारेषु कटप्रू रक्षदेवने ॥५२८॥
विद्याधरेऽस्रपे रुद्रे कांतारं दुर्गवर्त्मनि ।
महारण्योपसर्गाद्योः काननेक्षुविशेषयोः ॥५२९॥
काश्मीरं पुष्करमूले टंककुङ्कुमयोरपि ।
कावेरी तु हरिद्रायां विश्यायां सरिदंतरे ॥५३०॥
किर्म्मीरः शबले दैत्ये किशोरो हयशावके ।
सूर्ये यून्यथकिंशारुर्धान्यशूके शरेऽपि च ॥५३१॥

कंधरा । शिरोऽधिग्रावा । तत्र यथा— न चक्रमस्याक्रमताधिकंधरम् ॥ **कशेरु पृष्ठकीकसे तृणजातौ कंदभेदे** ॥ के शेते कशेरु । शिग्रुगेरुनामर्वादय इति साधुः । क्लीबे । वैजयंती तु पृष्ठस्यास्थिकशेर्वेता इति स्त्रियामप्याह । पृष्ठकीकसे यथा—सदंडनिषिष्टकशेरुखंडः ॥५२७॥ **कणेरुस्तु गणेरुवत्** । **वेश्येभी कर्णिकारेषु** ॥ कणति गणयति च कणेरुः । गणेरुः । शिग्रगेरुनमेर्वादय इति साधू । कर्णिकारे पुंसि । शेषयोः स्त्रियाम् । वेश्या गणिका । इभी हस्तिनी ॥ **कटप्रू रक्षदे वने** ॥ **विद्याधरेऽस्रपे रुद्रे** ॥ कटेन प्रवते कटप्रूः । दियूद्दद्दिति साधुः । चतुष्वर्थेषु पुंसि । अक्षैः पाशकैर्देवनमक्षदेवनम् । अस्रपो राक्षसः ॥५२८॥ **कांतारं दुर्गवर्त्मनि** । **महारण्योपसर्गाद्योः काननेक्षुविशेषयोः** ॥ काम्यते कांतारं द्वारशृंगारेति साधुः । कांतमियर्ति वा । दुर्गवर्त्मनि महारण्ये कानने च पुंक्लीबः । त्रिष्वपि यथा—क्रव्याद्द्विपसर्पभाजिशवरी कांतारदुर्गे गिरौ । उपसर्गो विघ्नं आदिशब्दाद् दुर्भिक्षादिपरिग्रहः । इक्षौ पुंसि इत्येके ॥५२९॥ **काश्मीरं पुष्करमूले टंककुंकुमयोरपि** ॥ कश्मीरेषु भवं काश्मीरम् । कोपांत्याच्चाणित्यण । पुष्करमूलटंकौ औषधभेदौ । कुंकुमे यथा—काश्मीरच्छुरिताच्छांडस्थलका मंदोदरी नंदतु ॥ **कावेरी तु हरिद्रायाम् वेश्यायां सरिदन्तरे** ॥ काव्यते कावेरी । शतेरादय इत साधुः । सरिदंतरे यथा— कावेरीतटबंधवः सरभसं लग्नास्तमालद्रुमाः ॥५३०॥ **किर्म्मीरः**

१ मु० कर्चरं शटितालयोः कठोरी पूर्णकठिनौ कान्तारं० ।

कुहरं गह्वरे छिद्रे कुक्कुरं ग्रंथिपर्णके ।
कुक्कुरः श्वा कुबेरस्तु धनदे नंदिपादपे ॥५३२॥
कुर्परो जानुकफणी कुमारोऽश्वानुचारके ।
युवराजे शिशौ स्कंदे शुके वरुणपादपे ॥५३३॥

शबले दैत्ये । किरति किर्म्मीरः । जंबीराभीरेति साधुः । शबले गुणे पुंसि तद्वति वाच्यलिंगः । तत्र यथा— क्ल्सतांगरागवनिता जलकेलिकर्म्मकिर्म्मीरनीरपरिपूरिततीरदेशाः । दैत्ये यथा— किर्म्मीरबीरवधदुर्धरबाहुदण्डः ॥ **किशोरो हयशावके** । **सूर्ये यूनि** ॥ कृश्यति किशोरः । कोरचोरेति साधुः । हयशावके यथा— नवजातकिशोराणामेकवासरजन्मनाम् । यूनि तरुणे यथा— मध्यं मृगीदृशः सिंहकिशोरोदरसोदरम् ॥ **अथ किंशारुर्धान्यशूके शरेऽपि च** ॥ किंचित् कुत्सितं शृणाति किंशारुः किमः श्रोणिदित्युः पुंसि । धान्यशूके यथा— चकासे शलिकिंशारुकपिशाशामुखा शरत् । शरे इषौ यथा— किंशारुनिकराकीर्णे बाहुशालिभिरन्विते ॥५३१॥ **कुहरं गह्वरे छिद्रे** ॥ कुह्यते कुहरम् मृधुंदीति किदरः । कुं हरति वा । गह्वरे यथा—अद्रिद्रोणी कुटीरे कुहरिणि हरिणारातयो यापयंति । छिद्रे यथा—कंठकुहरे विमूढः श्वसनो यावन्न निर्याति ॥ **कुक्कुरं ग्रंथिपर्णके** ॥ कूकयते कुक्कुरम् । श्वसुरकुर्कुंदरेति साधुः । ग्रंथिपर्णकं गंधद्रव्यम् ॥ **कुक्कुरः श्वा** ॥ यथा— मूढस्य न स्थितिं याति मतिरंधेव कुक्कुरी ॥ **कुबेरस्तु धनदे नंदिपादपे** ॥ कुत्सितं वेरमस्य कुबेरः । कौ लि वा कुकुगुपतीति करः । धनदे यथा—कुबेरगुप्तां दिशमुष्णरश्मौ गंतुं प्रवृत्ते समयं विलंघ्य । नंदिनामापादपो नंदिपादपः ॥५३२॥ **कुर्परो जानुकफणी** ॥ कुरति कुर्परः जठरककरेति साधुः द्वयोर्यथा— उल्ललन् पतितोदर्पा कुर्परेषूद्गतव्रणः ॥ **कुमारोऽश्वानुचारके । युवराजे शिशौ स्कंदे शुके वरुणपादपे** ॥ काम्यते कुमारः । कमेरत उच्चेत्यारः । कुत्सितो मारोऽस्य कुमारयति वा कुमारः । अश्वानुचारके यथा— सोऽन्वीयमानो बहुभिः कुमारैः । युवराजे यथा— अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्यपुष्पैः । शिशौ

कुमारं जात्यकनके कुमारी त्वपराजिता ।
नदीभिद्रामतरणी कन्यका नवमाल्युमा ॥५३४॥
जम्बुद्वीपविभागश्च कुटारं केवले रते ।
कुंजरोऽनेकपे केशे कुंजरा धातकीद्रुमे ॥५३५॥
पाटलायां कुठारुर्दुकीशयोः कूवरः पुनः ।
कुब्जे युगंधरे रम्ये केसरो नागकेसरे ॥५३६॥

स्कंदे च यथा— ब्राह्मे मुहूर्त्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् । शुके यथा—कुमारं सारिकां चैव पंजरस्थां जगाद सा ॥५३३॥ **कुमारं जात्यकनके** ॥ यथा कुमारचामीकरमुद्रिकांकितैः ॥ **कुमारी त्वपराजिता** ॥ **नदीभिद्रामतरणी कन्यका नवमाल्युमा** ॥ **जंबूद्वीपविभागश्च** ॥ अपराजिता रामतरणी नवमाली च ओषधयः । नदीभिद् नदीभेदः । कन्यकायां यथा— पश्येत् कश्चित् चलचपल रे का त्वराऽहं कुमारी । उमायां यथा— ह्रींकारी त्रिपुरा परा परमयो माता कुमारोत्यसि ॥५३४॥ जंबूद्वीपविभागः कुमारीद्वीपाख्यः ॥ **कुटारं केवले रते** ॥ कुटति कुटारः । द्वारशृंगारेति साधुः । केवलोऽसहायः । तत्र वाच्यलिंगः । रतम् सुरतम् ॥ **कुंजरोऽनेकपे केशे** ॥ कुंजावस्य स्तः कुंजरः मध्यादिभ्यो रः ॥ कौ पृथिव्यां जीर्यति वा पृषोदरादित्वात् अनेकपे हस्तिनि पुंक्लीबः तत्र यथा—ते माधवदनोककुंजरकुलैः कुंजत्क्वणत्कुत्कुहाः । केशः कचः ॥ **कुंजरा धातकीद्रुमे** ॥ **पाटलायाम्** ॥ द्वावपि वृक्षविशेषौ ॥५३५॥ **कूठारुर्दुकीशयोः** ॥ कुठिः सौत्रः । कोठति कुठारः । कुपि क्षुधीति बहुवचनादारुः पुंसि । द्रुर्वृक्षः । कोशः कपिः ॥ **कूवरः पुनः कुब्जे युगंधरे रम्ये** ॥ कूयते कूवरः । नोमो कुतुचेति दीर्घश्चेति वरट् । कुब्जरम्ययोर्वाच्यलिंगः । युगंधरं युगं तत्र पुंक्लीबः । कुब्जे रम्ये च यथा—चीवरैः कूवरो भाति । युगंधरे यथा—अक्षं नक्षत्रनाथोऽरुणमपि वरुणः ॥ कूवराग्रं कूबेरः **केसरो नागकेसरे** ॥ **तुरंगसिंहयोः स्कंधकेशेषु बकुलद्रुमे** । **पुंनागवृक्षे किञ्जल्के स्यात्** ॥ कि इति जुहोत्यादौ स्मरन्ति । चिकेति केसरः । मीज्य जीति ।

तुरंगसिंहयोः स्कंधकेशेषु बकुलद्रुमे ।
पुंनागवृक्षे किञ्जल्के स्यात्केसरं तु हिंगुनि ॥५३७॥
केदारः क्षेत्रभिद्यालवाले शंकरशैलयोः ।
केनारः कुंभिनरके शिरःकपालसंधिषु ॥५३८॥
केटिरुः शक्रगोपे स्यान्नकुले पाकशासने ।
कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके ॥५३९॥

सरः किञ्जल्कस्कंधकेशयोः पुंक्लीबः । नागकेसरे पुंनागे बकुलद्रुमे च यथा— असौ मरुच्चुंबितचारुकेसरः ॥५३६॥ तुरगस्कंधकेशेषु यथा—वल्गुवल्गत्यसावश्वः पाण्डुकेसरवालधिः । सिंहस्कधकेशेषु यथा—सिंहकेसरसटासु भूभृतां पल्लवप्रसविषु द्रुमेषु च । तुरंगसिंहयोरित्युपलक्षणमेतत् । तेन अन्येषामपि स्कंधकेशे केसरशब्दो वर्तते यथा—उन्मृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः । किञ्जल्के यथा—दधानमम्भोरुहकेसरद्युतीर्जटाः ॥ **केसरं तु हिंगुनि** । यथा—कुसराकेसरामोदप्रीणितघ्राणगह्वरा ॥५३७॥ **केदारः क्षेत्रभिद्यालवाले शंकरशैलयोः** ॥ कदिः सौत्रः । कद्यते केदारः द्वारशृङ्गारेति साधुः । क्षेत्रभिदि पुंक्लीबः । तत्र यथा—न मिताः फलभारेण न मिता शालिमंजरी । केदारेषु हि पश्यन्तः केदारेषु विनिस्पृहाः । आलवाले यथा—वासितमुपवनमेतत् मरुवककेदारमेदुरामोदैः । शंकरे यथा—वर्त्म केदारदेवस्य सुस्थं चक्रे महाभुजः । शैले यथा—पिबंति पारदं मुक्त्यै गत्वा केदारपर्वतम् ॥ **केनारः कुंभिनरके शिरःकपालसंधिषु** ॥ कनति केनारः । द्वारशृङ्गारेति साधुः । चतुर्ष्वर्थेषु । कुंभिनरको नरकभेदः ॥५३८॥ **केटिरुः शक्रगोपे स्यात् नकुले पाकशासने** ॥ केटति केटिरुः । शिग्रुगेरुनमेर्वादय इति साधुः । पुंसि त्रिष्वर्थेषु । शक्रगोप इंद्रगोपः ॥ **कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके** ॥ कोट्टमियर्ति कोट्टारः । कर्मणोऽण् । नागरो नगररक्षिता । पुष्करिण्या

खर्परस्तस्करे भिक्षापात्रे धूर्तकपालयोः ।
खपुरो मुस्तके पूगे लसके खपुरं घटे ॥५४०॥

खर्जूरं रूप्यफलयोः खर्जूरः कीटवृक्षयोः ।
खंडाभ्रमभ्रावयवे स्त्रीणां दंतक्षतांतरे ॥५४१॥

खदिरी शाके खदिरो दंतधावनचंद्रयोः ।
खिंखिरस्तु शिवाभेदे खट्वांगे वारि वालके ॥५४२॥

नगर्याः । पाटके एकदेशे ॥५३९॥ **खर्परस्तस्करे भिक्षापात्रे धूर्तकपालयोः ॥** खदति खादत्यनेन वा खर्परः । जठरकर्करेति साधुः । तस्करे यथा—मुष्णात्यवंर्ती रजनीषु खर्परः । भिक्षापात्रे कपाले च यथा—भवंति योगिनः प्रायः खंडखर्परभोजिनः । धूर्तो वंचकः तत्र वाच्यलिंगः ॥ **खपुरो मुस्तके पूगे लसके ।** खपुरति खपुरः । लसको वृक्षभेदः । त्रिष्वपि यथा— मुखरंजनकोविदस्य कः खपुरस्यात्र न संमुखोऽभवत् ॥ **खपुरं घटे ।** यथा—कूपांतः परिपूरयन्ति खपुरं पौराङ्गना वारिभिः ॥५४०॥ **खर्जूरं रूप्यफलयोः ॥** खर्जति खर्जूरम् । मोमत्सीत्यूरः । रूप्ये यथा— खर्जूरादर्शतुलां याति स्फटिकाश्मभित्तिषु विवस्वान् । फले फलविशेषे यथा—जरसा जर्जरस्यापि खर्जूः खर्जूरभक्षणे ॥ **खर्जूरः कीटवृक्षयोः ॥** कीटे यथा—खर्जूरवृश्चिकसरीसृपभीषणेषु । वृक्ष यथा—खर्जूरद्रुमदध्नजंघमसितत्वक्नद्धविश्वक् ततः स्नायुग्रंथिघनास्थिपंजरजरत्कंकाळमालोक्यते ॥ **खंडाभ्रमभ्रावयवे स्त्रीणां दन्तक्षतांतरे ॥** खंड च तत् अभ्रं च खण्डाभ्रम् । खंडाभ्रमदशं वा । द्वयोर्यथा—दंताग्रक्षेत्र्यं परिमंडलं यत् खंडाभ्रतुल्यं विषमोन्नतं च । खंडाभ्रकं तद्विबुधैः प्रयोज्यं सीमंतिनीनां स्तनमण्डलेषु ॥५४१॥ **खदिरी शाके ॥** खद हिंसायाम् चखदति खदरी (खदिरि) । मंदिभंदीति इरः । गौरादित्वाङ्ङीः ॥ **खदिरो दन्तधावनचंद्रयोः ॥** दंतधावनो वृक्षविशेषः । तत्र यथा—ज्वलितखदिरकाष्ठांगारगौरं विवस्वान् ॥ **खिंखिरस्तु शिवाभेदे खट्वांगे वारि वालके ॥**

खिखिरावद्बहुत्वे च गह्वरो बिलदंभयोः ।
कुंजेऽथ गर्गरो मोने स्याद्गर्गरी तु मंथनी ॥५४३॥

गांधारो रागसिंदूरस्वरेषु नीवृदंतरे ।
गायत्री खदिरे छंदोविशेषे गोपुरं पुनः ॥५४४॥

मुस्तके द्वारि पूर्द्वारे घर्घरस्तु नदांतरे ।
चलद्वारिध्वनौ घूके चंदिरश्चंद्रहस्तिनोः ॥५४५॥

खिखिरावद्बहुत्वे च । खिंखि इति शब्दं राति खिंखिरः । खन्यते वा । स्थविरपिठरेति साधुः । एवं खिखीरा । शिवाभेदः शृगालीविशेषः । खट्वांगः शिवहस्तोपकरणम् । वाः पानीयम् । वालकं ह्रीवेरम् ॥५४२॥ बहुत्वं बहुसंख्या । एतेष्वर्थेषु । यथा—स्त्रीलिंगः, खिखीरा शब्दो वर्तते, तथा खिंखिरशब्दोऽपीत्यर्थः ॥ **गह्वरो बिलदंभयोः ॥ कुंजे ॥** गाह्यते गह्वरः । तीवरधीवरेति साधुः । पुंक्लीबः बिले कुंजे च यथा—गौरीगुरोर्गह्वरमाविवेश । दंभे यथा—स गह्वरं कूबरदेवनं तत् ॥ **अथ गर्गरो मोने स्यात् ॥** गिरति गर्गरः ऋलक्षिदिति अप्रत्ययः स्वरूपद्वित्वं च । मीनो मत्स्यभेदः ॥ **गर्गरी तु मंथनी ॥** यथा—आलोडयमानगुरुगर्गरिकानिनादैः ॥५४३॥ **गांधारो रागसिंदूरस्वरेषु निवृदंतरे ॥** गांधारयति गांधारः पृषोदरादित्वात् । रागे यथा—गंधारोद्धारबंधुरम् । सिंदूरं नागजम् । स्वरे यथा—अजाविकं तु गांधारं क्रौञ्चः कणति मध्यमम् । नीवृदंतरं देशविशेषः ॥ **गायत्री खदिरे छंदोविशेषे ॥** गायतस्त्रायते गायत्री । खदिरो वृक्षः । छंदोविशेषः षडक्षराजातिर्मंत्रविशेषो वा । मंत्रविशेषे यथा—गायत्रीमात्रमप्येते न विदंति द्विजब्रुवाः ॥ **गोपुरं पुनः ॥ मुस्तके द्वारि पूर्द्वारे ॥** गुप्यते गोपुरम् । श्वशुरेति साधुः ॥५४४॥ मुस्तकः ओषधिभेदः । द्वारि सामान्यद्वारे यथा—पुरः पुरन्ध्रीगृहगोपुरांतरे । पूर्द्वारे यथा—लंकापुरी गोपुरतोरणानाम् ॥ **घर्घरस्तु नदांतरे । चलद्वारिध्वनौ घूके ॥** घरति घर्घरः । बाहुलकादप्रत्ययः । सरूपद्वित्वं च । नदांतरं ह्रदविशेषः । चलद्वाश्चलत्पानीयम् । ध्वनौ यथा—घर्घराद्यचकघोषान् । घूक उलूकः । किंकिणीष्वपि माघः ।

चत्वरं स्यात्पथां श्लेषे स्थंडिलांगणयोरपि ।
चंकुरः स्यंदने वृक्षे चतुरो नेत्रगोचरे ॥५४६॥
चाटुकारे चक्रगंडावपि चातुरके यथा ।
चमरश्चामरे दैत्ये चमरी तु मृगान्तरे ॥५४७॥
चिकुरोऽद्रौ गृहबभ्रौ केशे चंचलशैलयोः ।
पक्षिवृक्षभिदोश्चापि छिदिरोऽग्नौ परश्वधे ॥५४८॥

ऋज्वीर्दधानै रवतत्यकंधराश्चलावचूला कुलधर्षरा रवैः ॥ चंदिरश्चंद्रहस्तिनोः ॥ चंदति चंदिरः । मदिमंदिचंदीति इरः ॥५४५॥ **चत्वरं स्यात्पथां श्लेषे स्थंडिलांगणयोरपि** ॥ चत्यते चत्वरम् । कृगृश्रृ इति चरट् । पथांश्लेषे यथा– गेहे गहे विपणिषु तथा चत्वरे पानगोष्ठ्याम् । स्थंडिलं संस्कृता भूमिः । अंगणमजिरं यथा–त्रस्तैणनेत्रा नवकुंकुमेन सेकं प्रचक्रुर्गृहचत्वरेषु ॥ **चंकुरः स्यंदने वृक्षे** ॥ चकिः सौत्रः । चंकति चेष्टते चंकुरः । वास्यसि वासीत्युरः । **चतुरो नेत्रगोचरे ॥ चाटुकारे चक्रगंडावपि चातुरके यथा** ॥ चतति चत्यते वा चतुरः । वास्यसीत्युरः । प्रज्ञादित्वात् स्वार्थेऽणि चतुरः । ततः स्वार्थे के शतुरकः । नेत्रगोचरो घटादिर्विषयः । तत्र चाटुकारे च वाच्यलिंगः ॥५४६॥ चाटुकारे यथा–हरंति चतुराश्चित्तं कामिनां स्वामिनां तथा । चक्रगंडवश्चक्रखंण्डानि । एवं चातुरकशब्दोऽपि । वेगिदक्षयोरपि **मंखः** । वेगिनि यथा–चतुरं चतुरंगमं ततः स्वयमारुह्य ययौ दिदृक्षया । दक्षे यथा–परोपकारचातुर्यमार्याणामेव विद्यते । **चमरश्चामरे दैत्ये** ॥ चमति चमरः । झटि चटीत्यरः । चामरे यथा–तवेंदुधामधवला चकास्ति चमरावली । दैत्ये यथा–यो रक्षश्चमरं महेन्द्रभीते ॥ **चमरी तु मृगान्तरे** ॥ मृगान्तरं आरण्यः पशुविशेषः । तत्र यथा–बालप्रियत्वं शिथिलं चमर्यः ॥५४७॥ **चिकुरोऽद्रौ गृहबभ्रौ केशे चंचलशैलयोः । पक्षिवृक्षभिदोश्चापि** ॥ चकते चिकुरः । श्वशुरकुकुंदरेति साधुः । सप्तस्वर्थेषु । चंचले वाच्यलिंगः । शेषेषु पुंसि । गृहबभ्रुर्गृहनकुलः । केशे यथा–लंपाकीनां किरंतश्चिकुरविरचनां

करवाले च रज्जौ च छित्वरो वैरिधूर्तयोः ।
छित्वरं छेदनद्रव्ये जठरः कुक्षिवृद्धयोः ॥५४९॥
कठिने च जर्जरं तु वासवध्वजजीर्णयोः ।
जंबीरः प्रस्थपुष्पाख्यः शाके दंतशठद्रुमे ॥५५०॥

रलकान् लासयंतः । चंचले यथा–करगकुशांकुरचिकुराः । कुरंगका मेकदा स्युर्वा । शैलः शैलविशेषः । भ्रूवलयेऽपि मंखः । यथा–तां वीक्ष्य लीला चिकुरामनंगः स्वचापसौंदर्यमुदं मुमोच । लीलाचतुरामिति पाठान्तरम् ॥ **छिदिरोऽग्नौ परश्वधे ॥ करवाले च रज्जौ च** ॥ छिनत्ति छिद्यते व छिदिरः । शुषोषीति किदिरः । परश्वधे करवाले च यथा–छिदिरछेदितच्छत्रः ॥५४८॥ **छित्वरो वैरिधूर्तयोः** ॥ छिनत्ति छित्वरः । छिद्यते अनेन वा । तीवरधीवरेति साधुः । वाच्यलिंगः । द्वयोर्यथा–जित्वरश्छित्वरो नेष्टः । **छित्वरं छेदनद्रव्ये** ॥ छेदनद्रव्यं वास्यादि । **जठरः कुक्षिवृद्धयोः । कठिने च** ॥ जायते जठरः । जठरक्ककरेति साधुः । कुक्षौ पुंक्लीबः कठिने गुणे पुंसि । तद्वति वृद्धे च । वाच्यलिंगः । कुक्षौ यथा–जठरपिठरीदुष्पूरेयं करोति विडंबनाम् ॥५४९॥ कठिने यथा–जठरं पिठरं वोढा वठरः पाठमंथरः ॥ **जर्जरं तु वासवध्वजजीर्णयोः** ॥ जीर्यति जर्जरम् । ऋति छिदिति अप्रत्ययः । सरूपद्वित्वं च यंत्रशांत्यर्थं पार्थिवैरिंद्रः पूज्यते इंद्रद्वादश्यां स वासवध्वजः । तत्र यथा–द्वादश्यां भूभुजः शांत्यै वरिवस्यंति जर्जरम् । जीर्णे वाच्यलिंगः । यथा–जरसा जर्जरस्यापि खर्जूः । खर्जूरभक्षणे । विशीर्णसछिद्रयोरपि **मंखः** । विशीर्णे यथा–कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यो मूर्ध्नि ग्राव्णां जर्जरा निर्झरौघाः । सछिद्रे यथा–नैवं चेद्दीर्घमास्तां नटबटुवदने जर्जरा काव्यकंथा ॥ **जंबीरः प्रस्थपुष्पाख्यः (पुष्पदन्ताख्यः) शाकेदंतशठद्रुमे** ॥ जायते जंबीरः । जंबीराभीरेति साधुः । प्रस्थपुष्पः फणिज्जुकः । दंतशठो जंभलः कपित्थेऽपि । द्वयोर्यथा– भंक्त्वा जंबीरझाटे (काटे) दिनमनुसरणि प्राज्य(प्राश्य)वानीर-

जलेंद्रो जंभकेऽम्भोधौ वरुणेऽप्यथ झर्झरः ।
वाद्ये नदे कलियुगे झलरीवत्तु झल्लरी ॥५५१॥
वाद्यभेदे केशचक्रे टंकारो ज्यारवेऽद्भुते ।
प्रसिद्धौ चाथ टगरष्टंकणकेकराक्षयोः ॥५५२॥
टट्टरी त्वनृताख्यानलंपापटहवाद्ययोः ।
तमिस्रं तिमिरे कोपे तमिस्रा दर्शयामिनी ॥५५३॥

शय्याम् ॥५५०॥ **जलेंद्रो जंभकेऽम्भोधौ वरुणेऽपि** ॥ जलस्येंद्रो जलेंद्रः जंभको वृक्षः । अम्भोधिः समुद्रः । वरुणः प्रतीचीपतिः ॥ **अथ झर्झरः वाद्ये नदे कलियुगे** ॥ झीर्यति झर्झरः ऋतष्ठिदिति अप्रत्ययः । सरूपद्वित्वं च ॥ वाद्ये नदे च यथा—झर्झरध्वनितजर्जरकर्णः ॥ **झलरीवत्तु झल्लरी** ॥ **वाद्यभेदे केशचक्रे** ॥ झल्लेति झल्लेति च शब्दं गति झलरी झल्लरी । नाम्युपांत्येति बहुवचनातिकदिः । इतोक्त्यर्थादिति ङीः (२–४–३२) ॥५५१॥ वाद्यभेदे यथा—झात्कारैर्झल्लरीणां वदधति गणकाः पाणिना पाणियोगम् । केशचक्रं गुलुंछीभूताः केशाः । छत्रांतलम्बमानवस्त्रेऽपि । यद्वैजयंती । छत्रांतालंबिवस्त्रे तु झल्लरीः केशवाद्ययोः ॥ **टंकारो ज्यारवेऽद्भुते । प्रसिद्धौ च** ॥ टनितिकरणं टंकारः । ज्यारवे यथा—टंकारं स्मरकार्मुकस्य सुरतक्रीडा पिकीनां रवः । अद्भुते प्रसिद्धौ च यथा—शक्रसंहारटंकारो धराधर तव स्फुटम् ॥ **अथ टगरष्टंकणकेकराक्षयोः** ॥ टंक्यते टगरः । जठरकर्करेति साधुः । केकराक्षो वकाक्षः ॥५५२॥ **टट्टरी त्वनृताख्यानलंपापटहवाद्ययोः** ॥ तन्यते टट्टरोजठरेति साधुः । टिट्टेति शब्दं राति वा । अनृताख्यानं मृषाभाषणम् । लंपापटहः पटहविशेषः । तदाख्यं वाद्यम् ॥ **तमिस्रं तिमिरे कोपे** ॥ तमोऽस्त्यत्र तमिस्रम् । तमिस्रार्णवज्योत्स्नेति साधुः । द्वयोर्यथा—नभ इव वितमिस्रं भासते साधुवित्तम् ॥ **तमिस्रा दर्शयामिनी** ॥ तमस्ततिः । दर्शयामिनी अमावास्या रात्रिस्तत्र यथा—तमिस्रया शुक्लनिशेवनात्र ॥५५३॥ तमस्ततौ यथा—तमिस्रा

तमस्ततिः तिमिरं तु दृष्टिरोगान्धकारयोः ।
तित्तिरिः पक्षिणि मुनौ तुषारो हिमदेशयोः ॥५५४॥
शीकरे हिमभेदे च तुंबुरी धान्यकंशुनी ।
तूवरोऽश्मश्रुपुरुषे प्रौढाऽशृंगानडुह्यपि ॥५५५।
दहरो मूषिका स्वल्पभ्रात्रोर्डिम्भेऽथ दंतुरः ।
उन्नतदंते विषमे दर्दुरो भेकमेघयोः ॥५५६॥

मूर्छातिजगदगदकारकिरणैः ॥ **तिमिरं तु दृष्टिरोगांधकारयोः** ॥ तिम्यताव तिमिरम् । इषुदीषाति किदेरः । अंधकारे पुंक्लीबः । द्वयोर्यथा—हिमधवलदंतकेशी मंदद्युतितारका बृहत्तिमिरा । द्विगुणीभूता रजनी वृद्धेव शनैः शनैर्याति ॥ **तित्तिरिः पक्षिणि मुनौ** ॥ तरति तित्तिरिः । दम्भीति इ प्रत्ययः । तित्तिरादेशश्च पुंसि । पक्षिणि यथा—कुक्कुटतित्तिरिलावकमेषैर्मद्विषैश्च या रणक्रीडा । मुनिर्वेदशाखयोः प्रवक्ता । तत्र यथा—कठिनात्कठिनो जातः शरगुल्माच्च गौतमः । द्रोणाचार्यस्तु कलशात् तित्तिरिस्तित्तिरीसुतः ॥ **तुषारो हिमदेशयोः** ॥ **शीकरे हिमभेदे च** ॥ तुष्यत्यनेन तुषारः । तुषिकुठिभ्यां किदेत्यारः । तुषमियर्ति वा । हिमे पुंक्लीबः । तत्र यथा—पदं तुषारस्रुतिधौतरक्तम् । देशभेदे यथा—तुषारजातैश्चतुरैस्तुरंगैः ॥५५४॥ शीकरे यथा—स्तनवनवारितुषारभृतः स्तनाः । हिमभेदोऽवश्यायः । तत्र यथा—असरलजनाश्लेषः क्रूरस्तुषारसमीरणः ॥ **तुंबुरी धान्यकंशुनी** ॥ तुंबति अर्दयति तुंबरी । श्वशुरकुकुंदरेति साधुः । धान्यकं कुस्तुंबुरु । शुनो सरमा ॥ **तूवरोऽश्मश्रुपुरुषे प्रौढाऽशृंगानडुह्यपि** ॥ तवीति तूवरः । नीमीकुतुचेर्दीर्घश्चेति वरट् । अश्मश्रुपुरुषो निष्कूर्चः पुमान् । प्रौढो यौवनस्थो योऽशृंगोऽनड्वान् बलीवर्दस्तत्र । द्वयोर्यथा—तूवरस्य हृदयेऽपि संस्थितं शौर्यमत्र न विभाव्यते जनैः ॥ ५५५ ॥ **दहरो मूषिका स्वल्पभ्रात्रोर्डिम्भे** ॥ दहति दहरः । दहरजठरेति बहुवचनात् साधुः त्रिष्वर्थेषु । मूषिका उंदरी । स्वल्पभ्राता लघुभ्राता । डिंभः शिशुः । **अथ दंतुरः** ॥ **उन्नतदंते विषमे** ॥ उन्नता दंता

वाद्यभांडे शैलभेदे दर्दुरं ग्रामजालके ।
दर्दुरोमा दर्दरः स्यादीषद्भग्ने गिरावपि ॥५५७॥
दंडारो वहने मत्तवारणे शरयंत्रके ।
कुंभकारस्य चक्रे च द्वापरं संशये युगे ॥५५८॥
दासेर उष्ट्रे चेटे च दुर्धरस्त्वृषभौषधौ ।
दुःखधार्ये धूसरस्तु रासभे स्तोकपाण्डुरे ॥५५९॥

अस्य संति दंतुरः । दंतादुन्नतादिति डुरः । विषमे तूपचारात् । वाच्यलिंगः । उन्नतदंते यथा — ह्रस्वोष्ठं दंतुरं वक्रं वक्त्रं यस्य स दुर्भगः । विषमे यथा— अनेन ससृजेतरां तुरगमेघमुक्तभ्रमत्तुरंगखुरचंद्रकप्रकरदंतुरा मेदिनी ॥ **दर्दुरो भेकमेघयोः । वाद्यभांडे शैलभेदे** ॥ दणाति दर्दुरः । श्वशुरेति साधुः । दर्दुशब्दं राति वा । मेके यथा— स नरः कूपदर्दुरः । मेघे यथा— स्वैरं वर्षति दर्दुरः ॥५५६॥ वाद्यभांडे यथा— पर्यंतवर्त्मसु विचक्रमिरे महाश्वाः शैलस्य दर्दुरपुटानिव वादयंतः । शैलभेदे यथा — स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ **दर्दुरं ग्रामजालके** ॥ ग्रामजालकं ग्रामसमूहः ॥ **दर्दुरोमा** ॥ उमा गौरी ॥ **दर्दरः स्यादीषद्भग्ने गिरावपि** ॥ दीर्यते दर्दरः । ऋतष्टिदिति अप्रत्ययः । सरूपद्वित्वं च । ईषद्भग्ने वाच्यलिंगः । वाद्यभांडेऽपि । दर्दरी सस्यलुंटावपि ॥५५७॥ **दंडारो वहने मत्तवारणे शरयंत्रके । कुंभकारस्य चक्रे च** ॥ दंडेन ईयर्ति दंडारः । चतुर्ष्वर्थेषु । वाहनं यानपात्रम् । मत्तवारणो मतांगजः । शरयंत्रकं शरक्षेपको यंत्रविशेषः ॥ **द्वापरं संशये युगे** ॥ द्वौ पक्षौ परौ यत्र द्वाभ्यां कृतयुगत्रेताभ्यां परं वा द्वापरम् । पृषोदरादित्वात्साधुः । संशये पुंक्लीबः युगे तु क्लीबेपुंसीति **गौरः** । संशये यथा— स्थाणुर्वा पुरुषो वेति द्वापरः परमो मम । युगे यथा— द्वापरे द्रोणपार्थौ च ॥५५८॥ **दासेर उष्ट्रे चेटे च** ॥ दासी रीर्यते दासेरः । दास्या अपत्यं वा । क्षुद्राभ्य एरण् वा इति एरण् प्रत्ययः । द्वयोर्यथा— तुभ्यं दासेरदासीयं बदरी यदि रोचते । एतावतापि किं द्राक्षा न साक्षादमृतप्रदा(पा) ॥ **दुर्धरस्त्वृषभौषधौ** ॥ **दुःखधार्ये** ॥

नरेन्द्रो वार्तिके राज्ञि विषवैद्येऽथ नागरम् ।
शुंठीमुस्तकपौरेषु निर्जरस्त्वजरे सुरे ॥५६०॥
निर्जरा तु तालपत्र्यां गुडूच्यां तत्त्वभिद्यपि ।
निर्नरोऽर्काश्वे तुषाग्नौ निकरः सारसंचयोः ॥५६१॥

दुःखेन ध्रियते दुर्धरः । खल्व । दुःखधार्ये वाच्यलिंगः । तत्र यथा— वन्येभदानानिलगंधदुर्धराः ॥ **धूसरस्तु रासभे स्तोकपांडुरे** ॥ धुवति धूसरः । कृधूतन्मृषिभ्यः किदिति सरः । रासभे यथा— धूसरे प्रसरः कुतः । स्तोकपांडुरे गुणे पुंसि तद्वति वाच्यलिंगः तत्र यथा— वसुधालिंगनधूसरस्तनी ॥५५९॥ **नरेंद्रो वार्तिके राज्ञि विषवैद्ये** ॥ नरेष्विंद्रो नरेन्द्रः । वार्तिको धातुवादी तत्र यथा— रसेंद्रबंधं विदधौ नरेंद्रः । राज्ञि विषवैद्ये च यथा— सुनिग्रहा नरेंद्रेण फणींद्रा इव शत्रवः ॥ **अथ नागरम् । शुंठीमुस्तकपौरेषु** ॥ नगरे भवं नागरम् । पौरे वाच्यलिंगः । शुंठ्यां मुस्तके च यथा— मुमूर्षो किं तवाद्यापि चव्यचित्रक-नागरैः । पौरे यथा— यः पुण्य(पण्य)श्रीरतिपरिमलोद्गारिभिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि । यानपात्रस्तंभनोपकरणेऽपि । यथा— सैन्यं तैः स्थापितं स्थाने वहित्रमिव नागरैः ॥ **निर्जरस्त्वजरे सुरे** ॥ निर्गता जरा अस्मात् निर्जरः । अजरे वाच्यलिंगः । तत्र यथा— अमरो निर्जरो भूया वत्स बांधववत्सला । सुरे यथा— आलानकर्म खलु निर्जरकुंजरस्य ॥५६०॥ **निर्जरा तु तालपत्र्यां गुडूच्यां तत्त्वभिद्यपि** ॥ निर्जीर्यति निर्जरणं वा निर्जरा । तालपत्री गुडूच्यौ ओषधी । तत्त्वभिदि यथा— संसारबीजभूतानां कर्मणां जरणादिह । निर्जरा सा स्मृता द्वेधा सकामाकामवर्जिता ॥ **निर्नरोऽर्काश्वे तुषाग्नौ** ॥ निर्नृणाति निर्नरः । अर्काश्वः सूर्याश्वः । तुषाग्निः करीषाग्निः ॥ **निकरः सारसंचयोः** ॥ **न्यायदातव्यवित्ते च** ॥ निकीर्यते असौ निकरः नियतः कारो वा । सारे यथा—प्रियं सत्यं वाच्यं सुदति वचसामेष निकरः । संघे यथा—कुहूशब्दो जातः पिकनिकरकंठैकशरणः ॥५६१॥

न्यायदातव्यवित्ते च निर्वरं तु गतत्रपे ।
कठिने निर्भये सारे निकारस्तु पराभवे ॥५६२॥
धान्याक्षेपे नीवरस्तु वास्तव्येऽपि वणिज्यपि ।
प्रवरं संततौ गोत्रे श्रेष्ठे च प्रखरः पुनः ॥५६३॥
वेसरे हयसन्नाहे कुक्कुरेऽतिभृशं खरे ।
प्रकरः कीर्णदुष्पादौ संहतौ प्रकरं पुनः ॥५६४॥
जोंगके प्रकरीत्वर्थप्रकृतौ चत्वरावनौ ।
प्रस्तरः प्रस्तारे ग्राव्णि मणौ च प्रदरः शरे ॥५६५॥

न्यायदातव्यवित्ते यथा—निकरं नृपतेर्ददौ ॥ **निर्वरं तु गतत्रपे । कठिने निर्भये सारे** ॥ निर्व्रियते निर्वरम् । वाच्यलिंगः । चतुर्ष्वपि यथा— निर्वरा वर्वरा युधिः ॥ **निकारस्तु पराभवे ॥ धान्याक्षेपे** ॥ निकृतिर्निकारः । भावकर्त्रोरिति घञ् । निकीर्यते वा किरोधान्ये इति घञ् । पराभवे यथा—सुदुःसहं प्राप्य निकारमीदृशम् ॥ ५६२ ॥ धान्याक्षेपे यथा—निकारो धान्यानां रचयति विशुद्धि दृढतराम् ॥ **नीवरस्तु वास्तव्येऽपि वणिज्यपि** ॥ नयति नीवरः । नीमीकृतुचेदीर्घश्चेति वरट् । वास्तव्ये वाच्यलिंगः ॥ **प्रवरं संततौ गोत्रे श्रेष्ठे च** ॥ प्रव्रियते प्रवरम् । अल्ल । गोत्रे पुंक्लीबः । श्रेष्ठे वाच्यलिंगः । संततौ यथा—प्रवराध्यायपाठकः । गोत्रं गोत्रविशेषः तत्र यथा—समानप्रवरास्तथा । श्रेष्ठे यथा—वाल्मीकिना कविजनप्रवरेण गोते ॥ **प्रखरः पुनः ॥ वेसरे हयसन्नाहे कुक्कुरेऽतिभृशं खरे** ॥ अतिशयेन खरः प्रखरः चतुर्ष्वर्थेषु ॥५६३॥ वेसरे कुक्कुरे च यथा— श्रवणो सव्रणो जातौ प्रखरस्य खरस्वरैः । हयसन्नाहे यथा— प्रखरैर्वाजिनो रेजुर्गरुत्मंत इवाधिकम् । अतिभृशं खरे गुणे पुंसि तद्वति वाच्यलिंगः । तत्र यथा—तावत् खरः प्रखरमुल्लमयां चकार ॥ **प्रकरः कीर्णपुष्पादौ । संहतौ** ॥ प्रकीर्यते प्रकरः । कीर्णपुष्पादौ यथा—चतुष्कपुष्पप्रकरावकीर्णयोः । संहतौ यथा—अनेन ससृजेतरां तुरगमेघमुक्तभ्रमत्तुरंगखुरचंद्रकप्रकरदंतुरा मेदिनी ॥ **प्रकरं पुनः ॥५६४॥ जोंगके ॥** जोंगकम् अगरु ॥ **प्रकरी त्वर्थप्रकृतौ चत्वरावनौ** । गौरादीत्वाङ्डीः ।

भंगे रोगे प्रसरस्तु संगरे प्रणये जवे ।
प्रकारः सदृशे भेदे पंकारो जलकुब्जके ॥५६६॥
सोपाने शैवले सेतौ पदारः पादधूलिषु ।
पादालिंदे पवित्रं तु मेध्ये ताम्रे कुशे जले ॥५६७॥

अर्थप्रकृतौ यथा—बीजं बिंदुः पताका च प्रकरी कार्यलक्षणा । अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः ॥ चत्वरावनिश्चत्वरभूमिः ॥ **प्रस्तरः प्रस्तारे ग्राव्णि मणौ च** ॥ प्रस्तीर्यते प्रस्तरः । प्रस्तारे यथा—कुवलयदलशस्तप्रस्तरे स्रस्तरेऽस्याः । ग्राव्णि यथा—असावहं लोहमयः स यस्या जातः पुनः प्रस्तर एव कांतः । आकर्षकद्रावकचुंबकानां नैकोऽप्यसो भ्रामक इत्यवैमि ॥ मणौ यथा—प्रशस्तप्रस्तरोद्दंडखंडमंडितकुंडलः ॥ **प्रदरः शरे ॥ भंगे रोगे** ॥ प्रदीर्यते अनेन प्रदरः । पुंनाम्नि घः । प्रदरणं वा । शरे यथा—प्रदरदारितसंतहनोदरहूतगलद्रुधिरारुणवक्षसः ॥५६५॥ भंगो भयं द्वैधीभावो वा । तत्र यथा—स बोरकुंजरो यस्य प्रदरो नैव संगरे । रोगो रोगविशेषः स्त्रीणां रुधिरप्रवाहलक्षणः । तत्र यथा—नारीणां प्रदराद्दरः ॥ **प्रसरस्तु संगरे प्रणये जवे** ॥ प्रसरंत्यत्र प्रसरः । पुंनाम्नि घः प्रसरणं वा बाहुलकादल् । संगरे संग्रामे यथा—दुर्वारो वैरिवीराणां प्रसरः कातरैर्जरैः । प्रणये प्रेम्नि यथा—परस्परं सप्रसरं वधूवरम् । जवे वेगे यथा—शक्येत प्रसरो रोद्धुं नानुरक्तस्य चेतसः । प्रपंचव्यायामायोरपि **मंखः** । प्रपंचे यथा—त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपत्प्रसरस्य सोमा । व्यायामे अभ्यासार्थं अंगपरिश्रमे यथा—प्रसरकर्मणि कर्मकृतानितस्तत इतः प्रसरत्यनिशं बलम् ॥ **प्रकारः सदृशे भेदे** ॥ प्रक्रीयते प्रकारः सदृशे धर्ममात्रे पुंसि । तद्वति वाच्यलिंगः तत्र यथा—विषप्रकारः पिशुनोपचारः । भेदे यथा—नानाप्रकाररसमध्यगतापि दर्वी ॥ **पंकारो जलकुब्जके । सोपाने शैवले सेतौ** ॥ पंकमियर्ति पंकारः । चतुर्ष्वर्थेषु ॥५६६॥ **पदारः पादधूलिषु ॥ पादालिंदे** ॥ पदमियर्ति पदारः । पादालिंदः पादपीठम् ॥ **पवित्रं तु मेध्ये ताम्रे कुशे जले । ओघोपकरणे चापि** ॥ पूयते

ओघोपकरणे चापि पवित्रा तु नदीभिदि ।
प्रांतरं कोटरेऽरण्ये दूरशून्यपथेऽपि च ॥५६८॥
पार्परो भस्मनि यमे जराटे नीपकेसरे ।
क्षयरोगे भक्तसिक्त्वे पामरो नीचमूर्खयोः ॥५६९॥
पाटीरो मूलके वंगे तितउः वातिकेंबुदे ।
केदारे वेणुसारे च पांडुरो वर्णतद्वतोः ॥५७०॥

अनेन पवित्रम् । ऋषिनाम्नोः करणे इतीत्रः । मेध्ये पावने पुंक्लीबः । वाच्यलिंगः इत्यन्ये । तत्र यथा–जगत्पवित्रैरपि तन्न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः । ताम्रे शुल्बे यथा–पवित्रेऽभ्युद्धरेन्मंत्रम् । कुशे कुशविकारे यथा–सदैव धारयेद्विप्रः पवित्रं दक्षिणे करे । जले यथा–विप्राः पवित्रैः सवनं वितन्वते ॥५६७॥ ओघोपकरणम् ऊर्णातंतुसंततिनिर्मितं जैनमुनीनां रजोहरणम् तत्र यथा–पवित्रपाणयोर्द्वित्रास्तत्राजग्मुर्मुनीश्वराः ॥ **पवित्रा तु नदीभिदि** ॥ नदीमित् नदाविशेषः ॥ **प्रांतरं कोटरेऽरण्ये दूरशून्यपथेऽपि च** ॥ प्रकृष्टम् अंतरं प्रगतमंतरेण वा प्रांतरम् । कोटरेऽरण्ये यथा– कृतं गिरिप्रांतरगोचरैस्तपः । दूरशून्यपथे यथा–सुरलोकादवतारप्रांतरखेदच्छिदं वंदे ॥५६८॥ **पार्परो भस्मनि यमे जराटे नीपके सरे । क्षयरोगे भक्तसिक्त्वे** ॥ पारयति पार्परः । जठरक्करेति साधुः । जराटो वृक्षः । नीपकेसरः कदम्बस्य किंजल्कः ॥ **पामरो मूर्खनीचयोः** ॥ पाति पामरः जठरककरेति साधुः । वाच्यलिंगः द्वयोर्यथा–किं पुष्पितेन विजहीहि विकासहाससुहामपामरघना मरुभूमिरेषा ॥५६९॥ **पाटीरो मूलके वंगे तितओ वातिकेम्बुदे ॥ केदारो वेणुसारे च** ॥ पाटयति पाटीरः । जंबीराभीरेति साधुः । मूलकं शाकभेदः । वंगं त्रपु । तितउः चालनी । वातिको गारुडिकः ॥ अंबुदो मेघः । केदारः क्षेत्रविशेषः । वेणुसारो वंशसारः ॥ **पांडुरो वर्णतद्वतोः** ॥ पंडते पांडुरः श्वशुरकुकुंदरेति साधुः । पांडुवर्णोऽस्त्यस्येति वा । मध्वादिभ्यो रः । तद्वति वाच्यलिंगः । वर्णे यथा–गंडयोः पांडुरो वर्णो विरहे हरिणीदृशाम् । तद्वति

पांडुरं तु मरुवके पिंडारो भिक्षुके द्रुमे ।
महिषीपालके क्षेपे पिठरं मथि मुस्तके ॥५७१॥
उखायां च पिंजरस्तु पीतरक्तेऽश्वभिद्यपि ।
पिंजरं शातकुंभे स्यात्पीवरः स्थूलकूर्मयोः ॥५७२॥
पुष्करं द्वीपतीर्थाहिखगरागौषधांतरे ।
तूर्यास्येऽसिफले कांडे शुंडाग्रे खे जलेऽम्बुजे ॥५७३॥

यथा–समूढकर्पूरपरागपांडुरम् ॥५७०॥ **पांडुरं तु मरुवके** ॥ मरुवकः फणिज्जकः ॥ **पिंडारो भिक्षुके द्रुमे । महिषीपालके क्षेपे** ॥ पिंडाय पिंडं वा इयर्ति पिंडारः । महिषीपालके यथा – महिषीदोहवैदग्ध्यं पिंडारे न तु पंडिते । क्षेपो निंदा ॥ **पिठरं मथिमुस्तके ॥ उखायां च** ॥ पिठ हिंसासंक्लेशयोः । पिठति पिठरम् मृद्धुन्दीति किदुरः (किदरः) उखायां त्रिलिंगः । मंथा मथानकः । मुस्तकः कंदभेदः पुस्तके लेप्यकर्मणोति मंखः ॥५७१॥ उखायां यथा – भक्तापूर्णे जठरविवरे देहिनां संभवंति ॥ **पिंजरस्तु पीतरक्तेऽश्वभिद्यपि** ॥ पिजुण् हिंसादौ पिंजयति पिंजरः । ऋछिचटीत्यरः । पीतरक्ते वर्णे पुंसि तद्वति वाच्यलिंगः तत्र यथा– गात्राण्यकुंकुमविलेपनपिंजराणि ॥ **पिंजरं शातकुंभे स्यात्** ॥ यथा– जरसा जर्जरं पश्य कीरं पिंजरपंजरे ॥ **पीवरः स्थूलकूर्मयोः** ॥ प्यायते पिबति वा पीवरः । तीवरधीवरेति साधुः । स्थूले वाच्यलिंगः तत्र यथा– पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी । कूर्मे कच्छपे यथा–धीवरैः पीवरो धृतः ॥५७२॥ **पुष्करं द्वीपतीर्थाहिखगरागौषधांतरे ॥ तूर्यास्येऽसिफले कांडे शुंडाग्रे खे जलेऽम्बुजे** ॥ पुष्णाति पुष्यति वा पुष्करम् । **स्फुपुषिभ्यां** क्रिदिति करः ॥ त्रयोदशस्वर्थेषु । द्वीपादीनां षण्णां अंतरशब्दः प्रत्येकं अभिसंबध्यते । तत्र द्वीपांतरे अंबुजे च यथा–द्वीपस्य तं पतिममुं भज पुष्करस्य निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि । तीर्थान्तरे यथा – मा गयां गच्छ कौन्तेय मा गंगां मा च पुष्करम् । अहिभेदे खगांतरे च यथा– दुष्करः पुष्करग्रहः । रागांतरे यथा– पुष्करः सुकरः कृतः । ओषधान्तरे यथा–क्षुद्रामृतानागरपुष्कराद्यैः । तूर्यास्ये यथा– क्रव्यात्पूगैः पुष्कराण्यानकानां प्रत्याशाभिः मेदसोदारितानि ।

वठरो वष्टशठयोः बंधूरो रम्यनम्रयोः ।
बंधुरस्तु तयोर्हंसे बंधुजीवविडंगयोः ॥५७४॥
बंधुरा पण्ययोषायां बर्बरा नीवृद्दंतरे ।
वर्वरस्तु हंजिकायां पामरे केशचक्रले ॥५७५॥
पुष्पे च बर्बरा शाके वर्करः पशुनर्मणोः ।
बदरा स्यादेलापर्ण्यां विष्णुकान्तौषधावपि ॥५७६॥

असिफले यथा– वक्षः पीठरात्सरोरात्मनैव क्रोधेनांधाः प्राविशन्पुष्कराणि । कांडे शरे यथा– पुष्कः पुष्करसारा न व रैर्दुष्करो रणे । शुंडाग्रे यथा– आलोलपुष्करमुखोल्ललितैरमीक्षणमुक्षां भूवुगजितो वपुरंवुवर्षैः । खे जले च यथा – निर्मलं पुष्करं जातमस्ते रुदये सति । मुरजेऽपि यथा – त्वद्गंभीरध्वनिपु शनकैः पुष्करेष्वाहतेषु ॥५७३॥ **वठरो वष्टशठयोः** ॥ वठस्थोऽल्पे ॥ वठति वठरः । ऋछिचटि इत्यरः । वाच्यलिंगः । वष्टो मूर्खः शठोऽनृजुः । द्वयोर्यथा– वठरश्च तपस्वी च शूरश्चाप्यकृतव्रणः ॥ **बंधूरो रम्यनम्रयोः** ॥ बंधुशब्दस्य बाहुलकाददार्धत्वे बंधूरः । वाच्यलिंगः ॥ **बंधुरस्तु तयोर्हंसे बंधुजीवविडंगयोः** ॥ बध्नाति चित्तमिति बंधुरः । वाश्यसात्युरः । तयोरिति रम्यनम्रयोरित्यर्थे । तत्र वाच्यलिंगः । रम्ये यथा – कंठस्य तस्याः स्तनबंधुरस्य । नम्रे यथा–वलगत्यश्वो बंधुरः कंधरायाम् । हंसः सितच्छदः । बंधुजीवो बंधूकः विडंगं कृमिघ्नमौषधम् ॥५७४॥ **बंधुरा पण्ययोषायाम्** ॥ पण्या योषा वेश्या यथा– बंधुरा बंधुराकारा ॥ **बर्बरा नीवृद्दंतरे** ॥ बर्बति बर्बरः । ऋछिचटीत्युरः । नीवृद्दंतरे देशविशेषे पुंभूम्नि॰ यथा – बर्बरा निर्बरा युधि ॥ **वर्बरस्तु हंजिकायां पामरे केशचक्रले॰** ॥ **पुष्पे च** ॥ हंजिका भाङ्गी । पामरो नीचः । केशानां चक्राकृति लाति केशचक्रलः केशविन्यासः ॥५७५॥ पुष्पं कुसुमविशेषः ॥ तत्र पुंक्लीबः ॥ **बर्बरा शाके** ॥ शाकं शाकविशेषः ॥ **वर्करः पशुनर्मणोः** ॥ वृणोति वर्करः । क्रि शृ वृ भ्यः करः (उ.४३५) पशुश्छागशिशुः । तत्र यथा – घोरवर्करवेत्कारः कर्कशः कर्णयोरयम् । नर्मणि यथा– प्रहित कर्कर मा कुरु वर्करम् ॥ **बदरा स्यादेला-**

बदरी कोलिकापार्स्योः बदरन्तु तयोः फले ।
बदरस्तु कर्पासास्थि भंगुरो वक्रनश्वरौ ॥५७७॥
भ्रामरं मधुदृषदोर्भास्करो वह्निसूर्ययोः ।
भार्योरुरन्यस्त्रीपुत्रोत्पादके मृगशैलयोः ॥५७८॥
भृङ्गारी तु चीरिकायां भृङ्गारः कनकालुका ।
मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि ॥५७९॥

पर्ण्यां विष्णुक्रान्तौषधावपि ॥ वद स्थैर्ये । बदति बदरा । ऋच्छि चटी (उ.३९७) त्यरः ॥५२६॥ **बदरी कोलिकापार्स्योः** ॥ अर्थविशेषे । गौरादित्वाङ्ङीः (२-४-१९) कोल्यां यथा–तुभ्यं दासेरदासीयं बदरी यदि रोचते । कार्प्पासी वमनी ॥ **बदरं तु तयोः फले** ॥ बदर्याः फलं बदरम् । यथा – करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ॥ **बदरस्तु कर्पासास्थि** ॥ कर्प्पास्यास्थि बीजं तत्र ॥ **भंगुरो वक्रनश्वरौ** । भज्यते इत्येवंशीलो भंगुरः । भंजि भासि मिदो घुरः (५-२-७४) वाच्यलिङ्गः । वक्रे यथा – केरलीचिकुरभंगिभंगुरम् । नश्वरे यथा – समागमाः सर्वमुत्पादि भंगुरम् ॥५७७॥ **भ्रामरं मधुदृषदोः** ॥ भ्रमरैः कृतं भ्रामरम् । नाम्नि मक्षिकादिभ्य (६-३-१९३) इत्यण् । भ्राम्यति वा । जठरककेरेति साधुः । मधुनि यथा–माक्षिकं तैलवर्णं स्यात् घृतवर्णं च पौत्तिकं (पौत्रिकम्) । भ्रामरं तु भवेच्छुक्लं क्षौद्रं तु कपिलं भवेत् । दृषद् पाषाणविशेषः । **भास्करो वह्निसूर्ययोः** ॥ भासः करोति भास्करः । संख्याहर्दिवेति टः । (५-१-१०२) कस्कादित्वात् सकारः । वह्नौ यथा–स्रुवविनिहितहव्यैर्भास्करं तर्पयन्ति । सूर्ये यथा–कल्याणं वः क्रियासु किसलयरुचयस्ते करा भास्करस्य ॥ **भार्योरुरन्यस्त्रीपुत्रोत्पादके मृगशैलयोः** ॥ भार्यामियर्त्ति भार्योरुः । अर्त्तेरुचेति । उप्रत्यय ऊकरादेशश्च । विभक्तिर्वा । शिम्रुगेरुनमेर्चादय इतिसाधुः । अन्यस्त्रीपुत्रोत्पादकः । क्षेत्रजपुत्रोत्पादयिता । मृगो मृगविशेषः । शैलः शैलभेदः ॥५७८॥ **भृङ्गारी तु चीरिकायाम्** ॥ भृङ्गवदियर्त्ति भृङ्गारी । भ्रियते वा । द्वारगृङ्गारेति साधुः । चीरिका झिल्लिका । भृङ्गारः

कृपणे मत्सरा तु स्यान्मक्षिका मकरो निधौ ॥
नक्रे राशिविशेषे च मन्दरो मन्थपर्वते ॥५८०॥
स्वर्गमन्दारयोर्मन्दे वहले मधुरं विषे ।
मधुरस्तु प्रिये स्वादौ रसे च रसवत्यपि ॥५८१॥

कनकालुका ॥ यथा—शृङ्गाररसभृङ्गारस्तस्याः सौन्दर्यवीरुधः ॥ **मत्सरः परसम्पत्यक्षमायां तद्वति क्रुधि ॥ कृपणे ॥** मॉद्यति अनेन, माद्यति वा मत्सरः । मीड्यतीति सरः । तद्वति कृपणे च वाच्यलिङ्गः । परसम्पत्यक्षमायां क्रुधि च यथा-निर्मत्सरा एव गुणेषु सन्तः । तद्वति यथा—व्यापका निजगुणेषु नियोगात् । मत्सराः परगुणेषु सदैव ॥५७९॥ कृपणे यथा—कृतविभवनिकारा मत्सराः कुत्र साराः ॥ **मत्सरा तु स्यान्मक्षिका** ॥ यथा—निदाघदिवस इव बहुमत्सरो वहात सन्तापं सुमनसाम् ॥ **मकरो निधौ ॥ नक्रे राशिविशेषे च ॥** मंकते मण्डयति वा मकरः । जठरक्ककरेति साधुः । निधौ यथा—महापद्मश्च पद्मश्च शंखो मकरकच्छपौ । नक्रे जलचरविशेषे यथा—कल्लोलवेल्लितदृषत्परुषप्रहारै रत्नान्यमूनि मकराकरमावमंस्थः । राशिभेदे यथा—मेषेऽर्को वृषे चन्द्रो मकरे भौम एव च ॥ **मन्दरो मन्थपर्वते** ॥ **स्वर्गमन्दारयोर्मन्दे वहले** ॥ मन्दते मन्दरः । ऋछिचटीत्यरः (उ. ३९७) । पञ्चस्वर्थेषु । मन्थपर्वते यथा -शोभैव मन्दरक्षुब्धक्षुभितांभोधिवर्णना ॥५८०॥ स्वर्गे यथा—सवधूकाः सुखिनोऽस्मिन्ननवरतममन्दरागतामरसदृशः । मन्दारः सुरतरुः । मन्दोऽलसः । वहलो बहुलः । अनयोर्वाच्यलिङ्गः ॥ **मधुरं विषे** ॥ माद्यत्यनेन मधुरम् । श्वशुरकुकुन्दरेति साधुः । यथा—मधुरं दुनोति कुष्ठम् । **मधुरस्तु प्रिये स्वादौ रसे च रसवत्यपि** । मधु विद्यतेऽत्र मधुरः ॥ मध्वादिभ्यो रः । रसवर्जं त्रिष्वपि वाच्यलिङ्गः । प्रियं मनोज्ञं तत्र यथा—किमिव मधुराणां मण्डनं नाकृतीनाम् । स्वादु मृष्टम् । तत्र यथा—ताम्बूलं कटुतिक्तमुष्णमधुरं क्षारं कषायान्वितम् ॥ रसा गुल्यः(गुल्मः) तत्र यथा—मधुनो मधुरो रसः ॥ रसवति यथा- मधुरमथ किं चूतस्यापि प्रसन्नरसं फलम् ॥५८१॥

मधुरा मथुरापुर्य्यां यष्टीमेदामधूलिषु ।
मधुकुक्कुटिकायां च मिश्रेया शतपुष्पयोः ॥५८२॥
मन्दिरो मकरावासे मन्दिरं नगरे गृहे ।
मन्थरः सूचके कोशे वक्रे मन्दे पृथौ मथि ॥५८३॥
मन्थरं तु कुसुम्भ्यां स्यान्मन्दारस्त्रिदशद्रुमे ।
परिभद्रेऽर्कपर्णे च मसूरो मसुरोऽपि च ॥५८४॥
मसुरा मसूरा च चत्वारो पण्ययोषिति ।
तथा व्रीहिविशेषेऽपि मर्मरो वसनान्तरे ॥५८५॥

मधुरा मथुरापुर्य्यां यष्टीमेदामधूलिषु ॥ मधुकुक्कुटिकायां च मिश्रेया-शतपुष्पयोः ॥ यष्टी यष्टिमधु । मेदा ओषधिः । मधूलिः शर्करा । मधुकुक्कुटिका मातुलिङ्गीवृक्षः । मिश्रेया शतपुष्पा च ओषध्यौ । **मन्दिरो मकरावासे** ॥ ५८२ ॥ मंद्यते स्तूयते मन्दिरः । मदि मन्दीति (उ. ४१२) इरः । मकरावासः समुद्रः ॥ **मन्दिरं नगरे गृहे** ॥ गृहे स्त्रीक्लीबः । नगरे यथा— प्रावेशयन्मन्दिरमृद्धमेनम् । गृहे यथा - तरुणतपनभासो मन्दिराभ्यन्तरेषु ॥ **मन्थरः सूचके कोशे वक्रे मन्दे पृथौ मथि** ॥ मथ्नाति मन्थरः । ऋछिचटी (उ. ३९७) ति अरः ॥ सूचके वक्रे मन्दे पृथौ च वाच्यलिङ्गः । सूचके यथा— मन्थरैर्मथ्यते जगत् । वक्रे मन्दे पृथौ च यथा — मदमन्थरमातङ्गकुम्भपाटनलम्पटः । कोशो भाण्डागारः । मन्थाः मन्थानकः ॥ ५८३॥ **मन्थरं तु कुसुंभ्यां स्यात्** ॥ कुसुम्भी ओषधिभेदः । **मन्दारस्त्रिदशद्रुमे ॥ प(पा)रिभद्रेऽर्कपर्णे च** ॥ मन्द्यते स्तूयते मन्दारः । अर्यंगीति (उ. ४०५) आरः ॥ त्रिदशद्रुमे यथा— करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोऽरुणांगुली । परिभद्रार्कपर्णौ वृक्षौ । **मसूरो मसुरोऽपि च ॥ मसुरा च मसूरा च चत्वारो पण्ययोषिति ॥ तथा व्रीहिविशेषेऽपि** ॥ मस्यति मसूरः । मीमसीत्यूरः (उ. ४२७) । वास्यसीत्युरे । मसुरः ॥ ५८४ ॥ स्त्रीपुंसलिङ्गत्वेनैव सिद्धे मसुरामसूराशब्दयोरुपादानं स्पष्टार्थम् । द्वयोर्यथा— मसूरपिष्टातकमृष्टदेहां दूरान्मसूरामवलोक्य शूरः ।

शुष्कपत्रध्वनौ चापि मर्मरी पीतदारुणि ।
मयूरः केकिचूडाख्यौषध्यपामार्गकेकिनोः ॥५८६॥
महेन्द्रो वासवे शैले मंजरी तिलकद्रुमे ।
वल्लर्य्यां स्थूलमुक्तायां माठरो व्यासविप्रयोः ॥५८७॥
सूर्यानुगेऽथ मार्जारः स्यात् खट्वांशबिडालयोः ॥
मिहिरोऽर्केऽम्बुदे बुद्धे मुद्गरः कोरकास्त्रयोः ॥५८८॥

एवं मसुरोऽपि । व्रीहिमेदे— मसुरः क्लीबेऽपीति गौरः ॥ **मर्मरो वसनान्तरे ॥ शुष्कपत्रध्वनौ चापि ॥** म्रियतेऽनेन मर्मरः । बाहुलकादप्रत्ययः । सरूपद्वित्वं च । मर्मरोऽस्यास्तीति वा । अभ्रादित्वादः । वसनान्तरं वसनभेदः ॥५८५॥ शुष्कपत्रध्वनौ यथा—मदोद्धताः प्रत्यनिलम्विचेरुर्वनस्थलीमर्मरपत्रमोक्षाः ॥ **मर्मरी पीतदारुणि ॥** पीतदारु द्रुमभेदः ॥ **मयूरः केकिचूडाख्यौषध्यपामार्गकेकिनोः ॥** मीनाति मयूरः । मीमसीत्यूरः (उ. ४२७) मह्यां रौति वा पृषोदरादित्वात् । केकिचूडा मयूरशिवानामौषधिः । अपामार्गः ओषधभेदः । केकिनि यथा— अपि तुरगसमीपादुत्पतन्तं मयूरम् ॥५८६॥ **महेन्द्रो वासवे शैले ॥** महानिन्द्रः महेन्द्रः । वासवे यथा— असौ महेन्द्रप्रभृतीनधिश्रियः । शैले यथा— असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च ॥ **मञ्जरी तिलकद्रुमे ॥ वल्लर्य्यां स्थूलमुक्तायाम् ।** मंजिः सौत्रः । मंजति मंजरी । ऋच्छिचटीत्यरः (उ. ३१७) । वल्लर्य्यां स्त्रीपुंसः । तत्र यथा— मृगाः प्रियालद्रुममंजरीणां रजःकणैर्विघ्नितदृष्टिपाताः । **माठरो व्यासविप्रयोः । सूर्यानुगे ॥** मठति मठरः । ऋच्छिचटीत्यरः । मठरस्यापत्यं माठरः । विदादित्वादञ् । व्यासः पाराशर्यः । विप्रो ब्राह्मणः । सूर्यानुगे यथा— माठरः पिंगलो दण्डश्चण्डांशोः पारिपार्श्विकाः ॥५८७॥ **अथ मार्जारः स्यात् खट्वांशबिडालयोः ।** मार्ष्टि मार्जारः । अर्य्यंगीत्यारः (उ. ४०५) बिडाले यथा— मार्जारमप्यानतनिश्चलाङ्गं यस्यां जनः कृत्रिममेव मेने । **मिहिरोऽर्केऽम्बुदे बुद्धे ॥** मेहति मिहिरः । शुषीषीति किदिरः (उ. ४१६) अर्के

लोष्टादिभेदने चापि मुहिरो मूर्खकामयोः ।
मुदिरः कामुके मेघे मकुरो मुकुरो यथा ॥५८९॥
कुलालदण्डे बकुले कोरकादर्शयोरपि ।
मुर्मुरो मन्मथे सूर्यतुरगे तुषपावके ॥५९०॥
रुधिरं घुसृणे रक्ते रुधिरो धरणीसुते ।
वल्लरं मंजर्यौः क्षेत्रेऽनम्भसि शाद्वले ॥५९१॥

यथा— महतोऽपि यन्न साध्यं करिष्यल्लघुरेव तत्प्रसाधयति । गौहंमिहिरैस्तिमिरं न हरति दीपस्तु नाशयति । अम्बुदो जलदः । बुद्धः सुगतः । **मुद्गरः कोरकास्त्रयोः ॥ लोष्टादिभेदने चापि ॥** मोदते मुद्गरः । मुदिगुरीभ्यां टिद्गजौ चान्तौ इत्यरः (उ. ४०४) । कोरके यथा— तगरमुद्गरसुन्दरकन्दराः । अस्त्रे यथा— उद्घूर्णमुद्गरः कोऽपि दधावे संगरांगणे ॥५८८॥ लोष्टभेदने स्त्रीपुंसः । तत्र यथा— काष्ठमुद्गरविचूर्णितलोष्टः । आदिशब्दात्कर्करादिग्रहः । **मुहिरो मूर्खकामयोः ।** मुह्यति मुहिरः । शुषीषीति किदिरः । मूर्खे वाच्यलिङ्गः । **मुदिरः कामुके मेघे ॥** मोदते मुदिरः । शुषीषीति किदिरः । कामुके वाच्यलिङ्गः । द्वयोर्यथा— मुदिरैः सुन्दरं वनम् । **मकुरो मुकुरो यथा कुलालदण्डे बकुले कोरकादर्शयोरपि ।** मकुङ् मण्डने । मंकते मकुरः मुकुरः । मंकेर्नलुक् वोच्चास्येत्युरः ॥५८९॥ कुलालदण्डः कुम्भकारोपकरणयष्टिः । बकुलो वृक्षः । कोरके यथा— माकन्दमुकुरामोदमेदुरीभूतभूतलम् । आदर्शे यथा — दिक्कान्ता मुकुरे चकोर सुहृदि प्रौढे तुषारे त्विषि ॥ **मुर्मुरो मन्मथे सूर्यतुरगे तुषपावके ।** कृ मृ शृ शॄ हिंसायाम् । मूर्यतेऽनेन मुर्मुरः । किच्चेति किदप्रत्ययः । सरूपद्वित्वं च । मन्मथः कामः । सूर्यतुरगोऽर्काश्वः । तुषपावके यथा— स्मरहुताशनमुर्मुरचूर्णतां दधुरिवाम्रवणस्य रजःकणाः ॥५९०॥ **रुधिरं घुसृणे रक्ते ॥** रुद्ध्यते रुणद्धि वा रुधिरम् । शुषीषीति किदिरः । द्वयोर्यथा— गन्धवद्रुधिरचन्द-

वल्लूरं तु वनक्षेत्रे वाहनोषरयोरपि ॥
शुष्कमांसे कोलमांसे वरत्रा वर्तिकक्षयोः ॥५९२॥
वागरो' वारके शाणे निर्नरे वाडवे वृके ।
मुमुक्षौ पण्डिते चापि परित्यक्तभयेऽपि च ॥५९३॥
वासरो रागभेदेऽह्नि वार्दरं कृमिजे जले ॥
काकचिञ्च्याश्च बीजे वाग् दक्षिणावर्तशंखयोः ॥५९४॥

नोक्षिता जीवीतेशवसतिं जगाम सा । रुधिरो धरणीसुते । धरणीसुते मङ्गले यथा— कर्मोद्युक्तो दशमे शूरोऽधृष्यः प्रधानजनसेवी । सुतसौख्ययुतो रुधिरे प्रतापबहुलः पुमान्भवति ॥ वल्ल ' कुंजमंजर्योः । क्षेत्रेऽनम्भसि शाद्वले । वल्लते वल्लरम् । जठरक्करेति साधुः । पञ्चस्वर्थेषु । मंजर्यां स्त्रीपुंस इति लिंगविदः । कुंजः कुडङ्गः । अनम्भा निर्जलः प्रदेशः । शाद्वलं हरितम् । तत्रोर्वा-च्यलिङ्गः । सर्वेषु यथा — वल्लरे वल्लवा वल्लवल्लरीवल्ललोलुषाः ॥५९१॥ वल्लूरं तु वनक्षेत्रे वाहनोषरयोरपि । शुष्कमांसे कोलमांसे । वल्लते वल्लूरम् मीमसोल्यूरः । पंचस्वर्थेषु शुष्कमांसे कोलमांसे च त्रिलिङ्गः । वने अरण्ये क्षेत्रं वनक्षेत्रम् । वाहनं यानविशेषः । ऊषरं क्षारक्षेत्रम् । शुष्कमांसे कोलमांसे च यथा— वल्लूरवल्ली जगळेच्छमल्लैः । वरत्रा वर्तिकक्षयोः ॥ वृणोति वरत्रा । वृग्नक्षीत्यत्रः । वरं त्रायते वा । वर्त्तिरिव वर्त्तिः । रज्जुरित्यर्थः । तत्र यथा— वितत पृथु वरत्रा तुल्यरूपैर्मयूखैः । कक्षा हस्तिमध्यवर्त्तिनो चर्मरज्जुः । तत्र यथा—वरत्रामालम्ब्य द्विरदवरमारोहति नृपः ॥५९२॥ वागरो वारके शाणे निर्नरे वाडवे वृके । मुमुक्षौ पंडिते चापि परित्यक्तभयेऽपि च ॥ वंचति वागरः । जठरक्करेति साधुः । वाचमियर्ति वा । लिहाद्यचि । अष्टस्वर्थेषु । वारकः कळशः(भः)शाणो निकषः निर्नरो रवितुरगः ॥ वाडव ऊर्वः(और्वः) । वृको मृगभेदः । मुमुक्षुपण्डितपरित्यक्तभयेषु वाच्यलिङ्गः ॥५९३॥ वासरो राग-भेदेऽह्नि ॥ वासयति वासरः । ऋच्छिचटीत्यरः । अह्नि पुंक्लीबः । तत्र यथा— नवकनकपिशङ्गं वासराणां विधातुं ककुलिकुलिशपाणेर्भाति भासां वितानम् ॥

१. मु. वशिरं किणिही सिन्धुलवणे कुम्भकेषु च । वागरो० ।

वासुरा वासिता रात्र्योर्भुवि विष्टर आसने ।
पादपे कुशमुष्टौ च विस्तारो स्तम्बविस्तृती ॥५९५॥
विदुरो नागरे धीरे धृतराष्ट्रानुजेऽपि च ।
विकारो विकृतौ रागे विहारस्तु जिनालये ॥५९६॥
लीलायां भ्रमणे स्कन्धे विदारो युधिदारुणे ।
विदारी रोगभेदे स्याच्छालपर्णीक्षुगन्धयोः ॥५९७॥

वार्दरं कृमिजे जले । काकचिञ्च्याश्च बीजे वाग्दक्षिणावर्त्तशंखयोः । वारयति वार्दरम् । जठरेत्यरे साधुः । वारिदोर्यते वा पञ्चस्वर्थेषु । कृमिजमगुरु काकचिंचो गुंजा तस्यबीजे, वाग्. वचनम् । दक्षिणावर्त्तशंखः शंखभेदः ॥५९४॥ वासुरा वासिता रात्र्योर्भुवि । वासण् उपसेवायाम् । वास्यते वासुरा । वास्य-सीत्युरः । वासिता स्त्री । विष्टर आसने पादपे कुशमुष्टौ च । विस्तृणाति, विस्तीर्यते वा विष्टरः । वस्त्रे इति षत्वं । आसने कुशमुष्टौ च पुंक्लीबः । आसने यथा— महामहानील शिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे । पादपे कुशमुष्टौ च यथा— तापसा विष्टरप्रियाः । विस्तारो स्तम्बविस्तृती । विस्तरणं विस्तारः । वेरशब्देप्रथने (५-३-६९) इति घञ् । स्तम्बे यथा—आविस्तारो-त्तरुषु विगता शंकमङ्के विशन्ति । विस्तृतौ यथा— विस्ताररुद्धवसुधोन्वचलं चचाल लक्ष्मीं दधत्प्रतिगिरेरलघुर्वलौघः ॥५९५॥ विदुरो नागरे धीरे धृतराष्टानु-जेऽपि च । वेत्तीत्येवंशीलो विदुरः । वेत्तिच्छिदभिदः किदिति । धुरः । नागर-धीरयोर्वाच्यलिङ्गः । नागरो नगरवासी । धीरो विद्वान् । तत्र यथा—वेदान्तविदुराः केऽपि केऽपि नैयायिकोत्तमाः । धृतराष्ट्रानुजः कौरवमन्त्री । तत्र यथा—श्रुत्वा विदुरवाक्यानि । विकारोविकृतौ रागे । विकरणं विकारः । द्वयोर्यथा—विकारः कोप्यन्तर्जडयति च तापं च कुरुते । विहारस्तु जिनालये । लीलायां भ्रमणे स्कन्धे । विहरत्यस्मिन् अनेन विहरणं वा विहारः । जिनालयभ्रमणयोः पुंक्लीबः । जिनालये यथा— अधरो वीतरागस्ते काषायेते विलोचने । विहारः कण्ठदेशस्ते दूति प्रव्रजितासि किम् ॥ लीलायां भ्रमणे यथा—सस्मार वारणपतिः परिमीलिताक्षमिच्छाविहारवनवासमहोत्सवानाम् । स्कन्धोऽशः समूहो वा ।

विधुरं स्यात्प्रविश्लेषे विकले विधुरा पुनः ।
रसालायां विसरस्तु समूहे प्रसरेऽपि च ॥५९८॥
शवरो म्लेच्छभेदेऽप्सु हरेऽथ शम्बरं जले ।
चित्रे बौद्धव्रतभेदे शम्बरो दानवान्तरे ॥५९९॥
मत्स्यैण गिरिभेदेषु शम्बरी पुनरोषधौ ।
शर्करा खण्डविकृतौ कर्परांशेरुगन्तरे ॥६००॥

विदारो युधि दारुणे । विदीर्यतेऽत्र विदारणम्वा विदारः । विदारी रोगभेदे स्याच्छालपर्णीक्षुगन्धयोः । विदारयति विदारी । (अचि रे) गौरादित्वाङ्डीः । शालपर्णीक्षुगन्धे ओषधी । विधुरं स्यात्प्रविश्लेषे विकले । विधत् विधाने । विधेः किदित्युरे विधुरः । विकले वाच्यलिङ्गः । प्रविश्लेष इष्टवस्तुवियोगः । तत्र यथा–मित्राणि तानि विधुरेषु भवन्ति यानि । विकले यथा– कः सन्नद्धे विरह-विधुरां त्वय्युपेक्षेत जायाम् । कष्टेऽपि यथा– सति मधावभवन्मदनव्यथाविधुरि-ताधुरिताः कुकुरस्त्रियः । विधुरा पुनः । रसालायाम् । रसाला शिखरिणी । विसरस्तु समूहे प्रसरेऽपि च । विसरणं विसरः । बाहुलकादल् । द्वयोर्यथा– करविसरनिरस्तध्वान्तराशिः खरांशु ॥५९८॥ शवरो म्लेच्छभेदेऽप्सु हरे । शवति शवरः । ऋछिचटी अरः । म्लेच्छभेदे यथा–अमी क्रूरा दूरात्क्वणितमिद-माकर्ण्यसुतरां त्वरन्ते हन्तुं त्वामहह शवराः पुंखितशराः । आपः सलिलम् हरः शम्भुः । कृतक्रीडा किरातवेषत्वात् । शम्बरं जले । चित्रे बौद्धव्रतभेदे । शाम्यति शम्बरम् । कृ गृ शृ इति बहुवचनाद्वरट् (उ. ४४१) शम्वृणोति वा । लिहादचू (५-१-५०) जले यथा–शम्बरमम्बरसदृशं विशदतरं तदभ्रंशं जलधि । चित्रं नानावर्णम् । तत्र- वाच्यलिङ्गः । शम्बरो दानवान्तरे । मत्स्यैणगिरि-भेदेषु । दानवान्तरे यथा– शम्बरारिरपरो विराजते ॥५९९॥ मत्स्यभेदे एणभेदे च यथा– उद्रकाकमार्जारगृध्रशंबरसूकराः । अहिवृश्चिकगोधाश्च जायन्ते रात्रि-भोजनात् ॥ गिरिभेदे यथा-शंबरः शिखरी सोऽयं शबराकोर्णगह्वरः । मायायामपि मंखः– शंबराडंबरं वीर जहीहि धीरगर्हितम् । शम्बरी पुनरोषधौ । ओषधि-

उपलायां शर्करायुग देशे च शकलेऽपि च ।
शर्वरी निशि नार्यां च शक्वरी सरिदन्तरे ॥६०१॥
छन्दोजातौ मेखलायां शारीरं देहजे वृषे ।
शार्वर घातुके ध्वान्ते शावरो रोध्रपापयोः ॥६०२॥
अपराधे शावरी तु शूकशिम्ब्यथ शाक्वरम् ।
छन्दोभित् शाक्वरस्तूक्षा शालारं पक्षिपंजरे ॥६०३॥

राखुकर्णी । शर्करा खण्डविकृतौ कर्परांशेरुगन्तरे । उपलायां शर्करायुग देशे च शकलेऽपि च । शृणोति शीर्यते वा शर्करा । कि शृ वृ भ्यः करः (उ. ४३५) शर्करायुग्देशे त्वभेदोपचारात् । षडर्थेषु स्त्रियाम् । खण्डविकृतौ यथा– कालिदासकविता नवं वयो माहिषंदधि सशर्करं पयः । कर्परांशो मृत्कपालखण्डम् ॥६००॥ उपला अश्मरूपामृत् । तयोर्यथा– नगतरुशिखरामर्दीत शर्करोमारुत-श्चण्डः । रुगन्तरे यथा–शर्करानाशकोषधम् । शर्करायुक्तोदिशः । शर्कयुग्देशः । तत्र यथा–शर्करायां ययौ कर्कः । शकलं खण्डम् । शर्वरी निशि नार्यां च ॥ शृणोति शर्वरी । कृ गृ शृ (सि. उ. ४४१) इति वरट् । निशायां यथा– रतिपरिचयनश्यन्नैद्रतन्द्रः कथंचिद्रमयति शयनीये शर्वरीं किं करोतु । शक्वरी सरिदन्तरे ॥ छन्दोजातौ मेखलायाम् । शक्नोति शक्वरी । स्नामदीति (उ, ९०४) वन् । णश्वराघोषेति डो (२–४–४) रश्चान्तादेशः ॥६०१॥ छन्दो-जातिश्चतुर्दशाक्षरा । तत्र मेखलायां च यथा– शक्वर्या ग्रथिता विभाति सुतनोः सारोमराजिस्तनौ । धत्ते या स्मर पार्थिवस्य रुचिरं भोगावली विभ्रमम् ॥ शव्यपि शारीरं देहजेवृषे । शरीरे भवं शारीरम् । देहजे वाच्यलिङ्गः । तत्र यथा–शारा-र्मानसैर्दुःखैः संसारे को न दुःखितः । वृषो मैथुनम् ॥ शार्वरं घातुके ध्वान्ते । शृणोति शर्वरम् । कृ गृ इति वरटि । स्वार्थेऽणि (उ. ४४१) शार्वरम् शर्वर्यां भवं वा । घातुको हिंस्रस्तत्र वाच्यलिङ्गः । घातुकहस्तिनी त्यमरः । द्वयोर्यथा– शर्वरी शार्वरैर्भीष्म । शावरोरोध्रपापयोः । अपराधे श्यति शावरः । तोवरशीवरेति वरट् । (उ. ४४४) रोध्रो वृक्षविशेषः । पापं

सोपानहस्तिनखयोः शिखरं पुलकाग्रयोः ।
पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च ॥६०४॥
वृक्षाग्रे पर्वताग्रे च शिशिरः शीतले हिमे ।
ऋतुभेदे शिलीन्ध्रस्तु तरुमीनप्रभेदयोः ॥६०५॥

पातकम् । अपराध आगः । **शावरी तु शूकशिम्बी** । शूकशिम्बी कपिकच्छूः । **अथ शाक्वरं छन्दोभित्** । शक्वर्येव शाक्वरम्, छन्दोभित्, चतुर्दशाक्षरा जातिः । **शाक्वरस्तूक्षा** । शक्वर्या धेनोरयं शाक्वरः । उक्षा वृषभः तत्र यथा—हरं शंकर शाक्वरः समभवत्प्राक्षेयशैलावनौ । यत्तंत्रक्षितिपालपंकजदृशां त्रासाय हासाय च ॥ **शालारं पक्षिपंजरे** । **सोपानहस्तिनखयोः** । शालामियर्त्ति शालारम् कर्मणोऽण् (५-१-७२) हस्तिनखो दुर्गद्वारावतरणार्थं क्रमनिम्नो मृत्कूटोपसोपानाद्यः ॥६०३॥ **शिखरं पुलकाग्रयोः । पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च । वृक्षाग्रे पर्वताग्रे च** । शाखति शिखरम् । शाखेरिदेतौचात इत्यरः । पंचस्वर्थेषु पुंक्लीबः । पुलको रोमांचः । अग्रं अग्रमात्रम् । तयोर्यथा—रुचिरैः शिखरैः काम्या गृहालीव मृगेक्षणा । **पक्वदाडिमबीजाभमाणिक्यशकले** यथा—तन्वी श्यामा शिखरदशना ॥६०४॥ वृक्षाग्रे यथा—एष वृक्षशिखरे कृतास्पदः । पर्वताग्रे यथा—यश्चाप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर्बिभर्ति । **शिशिरः शीतले हिमे । ऋतुभेदे** । शशति शिशिरः । शव शशे रिच्चात (उ. ४१३) इतीरः । शीतले गुणे पुंसि । तद्वति वाच्यलिङ्गः । अन्यत्र पुंक्लीबः । शीतले यथा—शिशिरशीकरवाहिनि मारुते चरति शीतभयादिव सत्वरम् । हिमे यथा—शिशिरकरमयूखैर्दह्यतेऽङ्गं सुमुख्याः । ऋतुभेदे यथा— शिशिरमासमपास्य गुणोऽस्य नः क इव शीतहरस्य कुचोष्मणः । **शिलीन्ध्रस्तु तरुमीनप्रभेदयोः** । इन्द्रे शिलीन्ध्रः । खुरक्षुरेति निपातनात् (उ. ३९६) साधुः । तरुप्रभेदे यथा—नवकदम्बरजो-

शिलीन्ध्रं कदलीपुष्पे कवकत्रिपुटाख्ययोः ।
शिलीन्ध्री विहगी गण्डूपदीमृदथ शीकरः ॥६०६॥
वातास्तजलेऽम्बुकणे शुषिरं वाद्यगर्त्तयोः ।
शुषिरोऽग्नौ सरन्ध्रे च भृङ्गारो गजमण्डने ॥६०७॥
सुरते रसभेदे च शृङ्गारं नागसम्भवे ।
चूर्णे लवङ्गपुष्पे च संस्तरः संस्तरे मखे ॥६०८॥

ऽरुणितांबरैरधिपुरन्ध्रि शिलीन्ध्र सुगन्धिभिः ॥६०५॥ **शिलीन्ध्रं कदलीपुष्पे कवकत्रिपुटाख्ययोः** । कवकं उद्भिद्विशेषः । तत्र यथा— कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रातपत्रम् । त्रिपुटाख्या ओषधिः । **शिलीन्ध्री विहगी गण्डूपदीमृत्** । विहगी पक्षिणीभेदः । गण्डूपदी जलौकास्तस्या मृत् मृत्तिका । **अथ शीकरः । वाता (त्या) स्त जलेऽम्बुकणे** । सीकते सिंचति शीकरः । ऋच्छि चटी (३९७ उ.) त्यरः ॥६०६॥ वातास्तजले यथा—पाश्चात्यो वाति वेगात् द्रुत(द्रव)तुहिनशिला शीकरा सारवर्षी । मातङ्गक्षुण्णसान्द्रश्रुतसरलसरलशारसारी समीरः ॥ अम्बुकणे यथा—भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः । **शुषिरं वाद्यगर्त्तयोः** । शुषिश्छिद्रमस्यास्ति शुषिरम् । मध्वादित्वात् (१७-१-२६) रः । शुष्यत्यनेन वा शुषीषीति किदिरः । वाद्यं वाद्यविशेषः । यदाह—वंशादिकं तु शुषिरमानद्धं मुरजादिकम् । गर्त्ते यथा—शुषिरेषु समीकृतेषु शंकुं प्रतिहन्याच्चतुरङ्गुलं तु भूमौ । **शुषिरोऽग्नौ सरन्ध्रे च** । सरन्ध्रे वाच्यलिङ्गः । तत्र यथा—अस्मिन्नंतः शुषिरे निःसारे देहपंजरे कास्था । **शृङ्गारो गजमण्डने । सुरते रसभेदे च** । शृणाति शृङ्गारः । द्वारशृङ्गारेति (४११) साधुः । रसभेदे पुंक्लीबः । गजमण्डने यथा—शृंगारितायतमहेभकराभमंभः ॥६०७॥ सुरते रसभेदे च यथा—शृङ्गारवल्लभः कामी । **शृङ्गारं नागसम्भवे । चूर्णे लवङ्गपुष्पे च** । नागसम्भवं सिन्दूरम् त्रिष्वपि यथा—निधत्ते सीमन्ते झगिति नवशृंगारमपरा । **संस्तरः संस्तरे (प्रस्तरे) मखे** । संस्तीर्यते संस्तरः, संस्तीर्यन्ते दर्भा अत्र वा । संस्तरे यथा—नवपल्लव

सङ्गरोऽङ्गीकृतौ युद्धे क्रियाकारे विषापदोः ।
संगरं तु फले शम्याः सम्भारः सम्भृतौ गणे ॥६०९॥
संस्कारः प्रतियत्नेऽनुभवे मानसकर्मणि ।
गुणभेदेऽथ संकारोऽवकरेऽग्निचटत्कृतौ ॥६१०॥
संकारी भुक्तकन्यायां सामुद्रं लवणान्तरे ।
लक्षणे च शरीरस्य सावित्रस्तु महेश्वरे ॥६११॥

संस्तरे रचयिष्यामि तनुं विभावसौ । मखे यथा–ससंस्तरं विस्तरतश्चकार ॥६०८॥ **सङ्गरोऽङ्गीकृतौ युद्धे क्रियाकारे विषापदोः** । संगरणं संगिरतेऽत्र वा संगरः ॥ सम्यक् गरो वा । अंगीकृतिः प्रतिज्ञा तत्र यथा–सृष्टिदोषविवर्जितात्र न मया कार्येत्ययं संगरः ॥ युद्धे यथा–यस्मिन् संगरभाजि कर्णपदवीं कर्णोऽपि नारोहती । क्रियाकारो व्यवस्थास्थापनं तत्र यथा–कृतेऽपि संगरे शत्रोराश्वासो न विधीयते । विषे यथा–असतां क्रूरचित्तानां गिरः संगरसोदराः । आपदि यथा–संगरे शरणमीश तवांघ्रीः । **संगरं तु फले शम्याः** । शमी वृक्षस्तस्य फले । **सम्भारः संभृतौ गणे** । संभ्रियते सम्भारः ॥ द्वयोर्यथा–प्रभासम्भारसम्भिन्नतमः स्तोमः प्रभापतिः ॥६०९॥ **संस्कारः प्रतियत्नेऽनुभवे मानसकर्मणि । गुणभेदे** । संस्करणं संस्कारः । प्रतियत्नः सतो गुणान्तराधानम् । तत्र यथा– दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ । अनुभवे यथा–फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव । मानसकर्मणि यथा – निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् । गुणभेदे यथा–यत्संस्कारकलानुवर्त्तनवशाद्वेलाच्छलेनांभसां यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ।**अथ संकारोऽवकरेऽग्निचटत्कृतौ** । समं ततः कारः संस्कारः । अवकरः सपांसुतृणपुंजः । अग्नेश्चटत्कृतिश्चटत्कारशब्दः ॥६१०॥ **संकारी भुक्तकन्यायाम्** ॥ संगतः कारोऽस्यां संकारी । गौरादित्वाङ्कीः । (२–४–१९) **सामुद्रं लवणान्तरे । लक्षणे च शरीरस्य** । समुद्रे भवं सामुद्रम् । समुद्रेण प्रोक्तं वा । लवणान्तरे यथा– असमुद्रसामु-

सावित्री देवताभेदे सिन्दूरं नागसम्भवे ।
सिन्दूरस्तु वृक्षभेदे सिदूरी रक्तचेलिका ॥६१२॥
रोचनी धातकी सुन्दर्य्यंगनायां द्रुमान्तरे ।
शुनारस्तु शुनीस्तन्ये सर्पान्ते चटकेऽपि च ॥६१३॥
सैरन्ध्री परवेश्मस्थशिल्पकृत्स्ववशस्त्रियाम् ।
वर्णसंकरसंभूतस्त्रीमहल्लिकयोरपि ॥६१४॥

द्रसप्रसूतिः । शरीरलक्षणे यथा– सामुद्रैर्लक्षणैः सर्वैर्लक्षिताङ्गः क्षितीश्वरः । **सावित्रस्तु महेश्वरे** । सवितैव सावित्रः । अष्टमूर्त्तित्वात् । प्रज्ञादित्वात् स्वार्थेऽण् (७-२-१६५) ॥६११॥ **सावित्री देवताभेदे** । सविता देवता अस्याः सावित्री । यथा–पवित्रा वटसावित्री मृगनेत्राभिरर्च्यते । **सिन्दूरं नागसम्भवे** । स्यन्दते सिन्दूरम् । सिन्दूरकर्च्चूरेति साधुः (उ. ४३०) यथा–सिन्दूरस्पृहया स्पृशन्ति करिणां कुम्भस्थमाधोरणाः । **सिन्दूरस्तु वृक्षभेदे** । वृक्षभेदे पुल्लिङ्गः । **सिन्दूरी रक्तचेलिका । रोचनी धातकी** । रक्तचेलिका वस्त्रविशेषः । कर्णाटदेशप्रसिद्धः ॥६१२॥ रोचनी ओषधिः । धातकी वृक्षः । **सुन्दर्य्यंऽगनायां द्रुमान्तरे** । सुन्दिः सौत्रः । सुन्दति सुन्दरो । ऋच्छिचटीत्यरः । (उ. ३९७) अङ्गनायां यथा–व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् । **शुनारस्तु शुनीस्तन्ये सर्पाण्डे (न्ते) चटकेऽपि च** । सुष्ठु न अर्यते सुनारः । घञि नस्वादित्वात्साधुः । सूयते वा । द्वारशृंगारेति साधुः (उ. ४११) त्रिष्वपि यथा–सुनारो न स्तु (सु)नारिभिः क्रियते करगोचरः ॥६१३॥ **सैरन्ध्री परवेश्मस्थशिल्पकृत्स्ववशस्त्रियाम् । वर्णसंकरसम्भूतस्त्रीमहल्लिकयोरपि** ॥ स्वैरं धायति सैरन्ध्री । क्वचिदिति (५-१-१७१) डे । पृषोदरादित्वात्साधुः । परवेश्मस्थशिल्पकृत् स्ववशस्त्रियामिति, या परवेश्मस्था शिल्पं कलाकौशलं करोति । स्ववशा स्वायत्ता च ननु एकायत्ताक्षो तस्यामित्येकोऽर्थः । वर्णसंकरसम्भूतस्त्रीति द्वितीयोऽर्थः । महल्लिका सौविदल्लेति तृतीयोऽर्थः ॥ त्रिष्वपि यथा–सरन्ध्र्या निजशिल्पकल्पनविधिं दध्रुर्निशीथे ध्रुवम् । काप्यस्तु चतुःषष्टिकलाभिज्ञा

सौवीरं कांजिकस्रोतांजनयोर्बदरीफले ।
स्यादर्गलं तु कल्लोले परिघेऽप्यनलोऽनिले ॥६१५॥
वसुदेवे वसौ वह्नावरालः समदद्विपे ।
वक्रे सर्जरसे चाप्यवेलस्तु स्यादपह्नवे ॥६१६॥
अवेला तु पूगचूर्णेऽचलस्तु गिरिकीलयोः ।
अचला भुव्यथाञ्जलिस्तु कुडवे करसम्पुटे ॥६१७॥

शीलरूपादिसेविनी प्रसाधनोपचारज्ञा सैरन्ध्रीत्याह ॥६१४॥ **सौवीरं कांजिकस्रोतांजनयोर्बदरीफले ।** सुवीराणामिदं सौवीरम् । कांजिके यथा— पुत्रं दद्यां पतिं दद्यां न तु सौवीरकं क्वचित् । स्रोतांजनं नयनप्रसाधनमौषधम् । देशेऽपि । तत्र पुंभूम्नि । उपचारात्तज्ज्ञपुरुषेऽपि । अथ लान्ताः । **स्यादर्गलं तु कल्लोले परिघे(दण्डोर्मिपारिघे)ऽपि** । इयर्त्ति अर्गलम् । ऋजनेऽङ्गेतिश्चेत्यलः । त्रिलिङ्गः । परिघे यथा— द्वारार्गलाबद्धसुरेश्वरां का लङ्केति या रावणराजधानी । **अनलोऽनिले । वसुदेवे वसौ वह्नौ** । अनित्यनलः । मृदिकंदीत्यलः । (उ. ४६५) अनिलो वायुः ॥६१५॥ वसुदेवो विष्णुपिता । वसुर्देवभेदः । यदाह— धरो ध्रुवश्च सोमश्च अहश्चैवानलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥ वह्नौ यथा—यदि दहत्यनलोऽत्र किमद्भुतम् । **अरालः समदद्विपे वक्रे सर्जरसे चापि** । इयर्त्ति अरालः । ऋ कृ मृ (उ. ४७५) इत्यालः । वक्रे वाच्यलिङ्गः । समदद्विपे यथा— अरालः कंकालं कवलयति कराग्रेण समरे । वक्रे यथा—करोति लक्ष्यं चिरमस्य चक्षुषो न वक्रमात्मीयमरालपक्ष्मणः । सर्जरसो रालः । **अवेलस्तु स्यादपह्नवे (स्यादुपद्रवे)** । नवेलत्यवेलः । अपह्नवो अपलापः ॥६१६॥ **अवेला तु पूगचूर्णे** । पूगस्य पूगफलस्य चूर्णं पूगचूर्णं तत्र । **अचलस्तु गिरिकीलयोः** । न चलति अचलः । गिरौ यथा— अचल एष भवानिव राजते । कीलः शंकुः । **अचला भुवि** । यथा—गायन्ति तत्र यदि नाम भुजंगयोषाः शेषः शिरांसि धुनुयादचला चला स्यात् । **अञ्जलिस्तु कुडवे करसम्पुटे** । अनक्ति, अज्यते वा अञ्जलिः । पार्थजिम्यामलिः ।

अङ्गुलिः करशाखायां कर्णिकायां गजस्य च ।
आभीलं भीषणे कृच्छ्रेऽपील्वलो मत्स्यदैत्ययोः ॥६१८॥*
इल्वलास्तारकाभेदेऽप्युपलो ग्रावरत्नयोः ।
उपला तु शर्करायामुत्पलं कुष्टभूरुहे ॥६१९॥

पुंसि । कुडवः प्रसृतिः । तत्र यथाः— अरण्यबीजांजलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः । करसम्पुटः प्रसृतपाणिद्वयपुटः । प्रणामार्थं मुकुलितं हस्तयुग्मं वा । प्रसृतपाणिद्वयपुटे यथा— इति चापि विधाय दीयतां सलिलस्यांजलिरेक एव नौ । प्रणामार्थं मुकुलितहस्तयुग्मे यथा— शतमखमुपतस्थे प्रांजलिः पुष्पधन्वा ॥६१७॥ **अङ्गुलिः करशाखायां कर्णिकायां गजस्य च** । अङ्गति अङ्गुरिः । मत्स्यसीत्यूरिः (उ. ६९९) ऋफिडादित्वाल्लत्वे (२-३-१०४) अङ्गुलिः । करशाखायां यथा— अथांगुलिभ्यां हरितालमार्द्रं मङ्गल्यमादाय मनःशिलां च । गजस्य कर्णिका शुण्डाग्रं तत्र यथा— शेते मुखान्तःस्थगितांगुलिर्गजः । **आभीलं भीषणे कृच्छ्रेऽपि** । आबिभेति अस्मात् आभीरम् । जम्बीराभीरेति (उ. ४२२) साधुः । लत्वे आभीलम् । धर्ममात्रे क्लीबे, तद्वति वाच्यलिंगः । कृच्छ्रं दुःखम् द्वयोर्यथा— आभीलनीलवनकुंजरगर्जितेन । **इल्वलो मत्स्यदैत्ययोः** । एलयति इल्वलः । तुल्वले ल्वलादय (उ. ५००) इति साधुः । मत्स्यो मत्स्यविशेषः । दैत्यो योऽगस्त्येन जग्धः ॥६१८॥ तत्र यथा— वातापि भक्षितो येन इल्वलश्च महासुरः । **इल्वलास्तारकाभेदेऽपि** । स्त्रियां भुम्नि । यथा— इल्वला मृगशीर्षस्य शिरस्यास्तारकाः स्मृताः । **उपलो ग्रावरत्नयोः** । उप्यते उपलः तृपिवपीति किदलः (उ. ४६८) उपलाति वा पुंक्लीबः । ग्रावणि यथा— येषामशेषभुवनाभरणस्य हेम्नस्तत्त्वं विवेक्तुमुपलाः परमं प्रमाणम् । रत्ने यथा— अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः । **उपला तु शर्करायाम्** । शर्करा पाषाणकणिका, इक्षुविकारो वा । तत्र पाषाणकणिकायां यथा— उपलावलितं वर्त्म सपदत्रे (उपानत्सहिते)करोतु किम् ॥ इक्षुविकारे यथा — सितोपलालोडितमेतदेव चूर्णाहितं

* मु. अमला कमालयां स्यादमलं विशदेऽभ्रके । आभीलं ।

इन्दीवरे मांसशून्येऽप्युज्ज्वलस्तु विकासिनि ।
शृङ्गारे विशदे दीप्तेऽप्युत्तालस्त्वरिते कपौ ॥६२०॥
श्रेष्ठोत्कटकरालेषूत्फुल्लः स्त्रीकरणान्तरे ।
विकस्वरोत्तालयोश्च कमलं क्लोम्नि भेषजे ॥६२१॥
पङ्कजे सलिले ताम्रे कमलस्तु मृगान्तरे ।
कमला श्रीवरनार्य्योः कपिलो वह्निपिङ्गयोः ॥६२२॥

पित्तनिवारणाय । **उत्पलं कुष्ठभूरुहे । इन्दीवरे मांसशून्येऽपि** । उत्पलति उत्पलं उत्पीयते वा । मुरलोरलेति (उ. ४७४) साधुः । उद्गतं पलं मांसमत्र वा ॥६१९॥ इन्दीवरे पुंक्लीबः । तत्र यथा— श्यामीचकार वनमाकुलदृष्टिपातैर्वातेरितोत्पलदलप्रकारैरिवाम्भः । **उज्ज्वलस्तु विकासिनि । शृंगारे विशदे दीप्तेऽपि** । उज्ज्वलति उज्ज्वलः । शृङ्गारे पुंसि । अन्यत्र वाच्यलिङ्गः । विकासिनि यथा—उज्ज्वलैर्बकुलचम्पकपुष्पैः । शृङ्गारो रसः । यदाह—शृङ्गारः शुचिरुज्ज्वलः । तत्र यथा—दम्पत्योरुज्ज्वलो रसः । विशदे यथा— कुन्दोज्ज्वलं त्वद् यशः । दीप्ते यथा— उज्ज्वलज्ज्वलनज्वालाकरालं गगनांगणम् । **उत्तालस्त्वरिते कपौ । श्रेष्ठोत्कटकरालेषु** । उत्तालयति उत्तालः । कपौ पुंसि । अन्यत्र वाच्यलिङ्गः । त्वरिते श्रेष्ठे च यथा— उत्तालतालरणितैः । कपौ यथा— उत्तालस्तालपादपे ॥६२०॥ उत्कटे कराले च यथा—उत्तालाः कटपूतनप्रभृतयः सांराविणं कुर्वते । **उत्फुल्लः स्त्रीकरणान्तरे । विकस्वरोत्तालयोश्च** । उत्फुल्लति उत्फुल्लः उत्फलति स्म वा । अनुपसर्गेति (४–२–८०) साधुः । विकस्वरोत्तालयोर्वाच्यलिङ्गः । स्त्रीकरणान्तरं वात्स्यायनप्रसिद्धम् । विकस्वरे यथा—उत्फुल्लकिंशुकतरुप्रतिमो मनोभूः । उत्ताले उत्कटे यथा—उत्फुल्लगल्लैरालापाः क्रियन्ते दुर्मुखैः सुखम् । **कमलं क्लोम्नि भेषजे । पंकजे सलिले ताम्रे** । काम्यते कमलम् । मृदिकन्दीत्यलः (उ. ४६५) कं मलते कुत्सित मलति वा पङ्कजे पुंक्लीबः ॥ क्लोमहृदयस्य दक्षिणपार्श्वे उदर्योजलाधारः । भेषजम् औषधविशेषः ॥६२१॥ पङ्कजसलिलयोर्यथा—सकमलं कमलं कमलेक्षणा हृदि दधाति मुधा विरहे तव । ताम्रं

कुक्कुरे मुनिभेदे च कपिला शिंशपातरौ ।
पुण्डरीककरिण्यां च रेणुकागोविशेषयोः ॥६२३॥
कपालं कुष्ठरुग्भेदे घटादिशकले गणे ।
शिरोऽस्थनि कन्दलं तु नवाङ्कुरे कलध्वनौ ॥६२४॥

शुल्वम् । **कमलस्तु मृगान्तरे** । यथा—सदृशे वनवृद्धानां कमलानां तवेक्षणे । **कमला श्रीवरनार्य्योः** । श्रियां यथा—साम्यमाप कमलासखविष्वक्सेनसेवितयुगान्तपयोधिः । वरनारी वराङ्गना । **कपिलो वह्निपिङ्गयोः । कुक्कुरे मुनिभेदे च** । कबृङ्, वर्णे, कप्यते कवते वा कपिलः । स्थण्डिलकपिलेति साधुः । (उ. ४८४) पिंगे वर्णे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा—घनकपिलजटांतभ्रान्तगङ्गाजलौघः ॥ ६२२ ॥ कुक्कुरः श्वा । मुनिभेदे यथा—गुरोर्यियक्षोः कपिलेन रोषात् रसातलं संक्रमिते तुरङ्गे । **कपिला शिंशपातरौ । पुण्डरीककरिण्यां च रेणुकागोविशेषयोः** । पुण्डरीको दिग्गजस्तस्य करिणी । रेणुका जमदग्निपत्नी । गोविशेषे यथा—सहस्रं कपिलानां यः सद्वर्णानां ददाति हि ॥६२३॥ **कपालं कुष्ठरुग्भेदे घटादिशकले गणे । शिरोऽस्थनि** । कपिः सौत्रः । कप्यते कपालम् । ऋकृमृवृ (उ० ४७५) इत्यालः । कं पालयति वा । पुंक्लीबः । घटादिशकले यथा— कपाले मार्जारः पय इति करान् लेढि शशिनः । गणः समूहः । मृतस्य जीवतो वा शिरसोऽस्थि तत्र । मृतस्य शिरोऽस्थनि यथा—इत्थं खट्वाङ्गकोटौ प्रकटितदशनं मंजुगुंजत्समीरं रागांधानामिवोच्चैरुपहसति महामोहजालं कपालम् । जीवतो यथा— विधिलिखिताक्षरभालं फलति कपालं न भूपालः । भिक्षु भाजनेऽपि तत्र च क्लीपुंक्लीबः । यथा— पुण्ये ग्रामे वने वा महति सितपटछन्न (छिन्न) पालीं कपालीम् । **कन्दलं तु नवाङ्कुरे कलध्वनौ । उपरागे मृगभेदे कलापे** ॥ कन्दते कन्दलम् । मृदिकन्दी (उ. ४६५) त्यलः । पंचस्वर्थेषु त्रिलिङ्गः । नवाङ्कुरे यथा—अंरुद्वयं कदलिकन्दलयोः सनाभि । कलध्वनिर्मधुरशब्दः ॥६२४॥ उपरागः

उपरागे मृगभेदे कलापे कंदलीद्रुमे ।
करालो रौद्रतुङ्गोरुधूणतैलेषु दन्तुरे ॥६२५॥
करालं तु कुठेरे स्यात्कम्बलः कृमिसास्नयोः ।
नागप्रभेदे प्रावारे वैकक्षे कम्बलं जले ॥६२६॥
कल्लोलोऽरौ हर्षवीच्योः कदली हरिणान्तरे ।
रम्भायां वैजयन्त्यां च कामलः कामिरोगयोः ॥६२७॥

उपप्लवः । मृगस्य मेदो विशेषःयदाह—कन्दली तु श्यामवर्णा ह्रस्ता यामा महोदरी। कलापः समूहः । कन्दली(कदली) द्रुमे । द्रुमो रम्भातरुः । करालो रौद्रतुङ्गोरु धूणतैलेषु दन्तुरे । करोति करालः । ऋकृमृ इत्यालः । (४९५) धूणतैले पुंसि । शेषेषु वाच्यलिङ्गः । रौद्रे यथा—दंष्ट्राकरालमकरालिकरालिताभिः । तुङ्गे यथा—करालताले द्रुमसोदराङ्गः । उरु पृथुलं तत्र यथा—नवेन्दुबिम्बं किरणैः करालम् । धूणतैलं तैलभेदः । दन्तुरे यथा—व्याघ्रव्याघ्रकरालवक्त्रकुहरं जिघ्रत्यजस्रं मृगः । चण्डिकाव्यात्तयोरपि मंखः । तत्र चण्डिकायां स्त्रियां, यथा—करालायतनाच्चायमुच्चरन् करणो ध्वनिः । व्यात्ते वाच्यलिङ्गः । तत्र यथा—नखकिरणलसत्केसरालीकरालः ॥६२५॥ करालं तु कुठेरे (कठोरः) स्यात् । कुठेरो अर्जकः । कम्बलः कृमिसास्नयोः । नागप्रभेदे प्रावारे वैकक्षे (क्ष्ये) । काम्यते कम्बलः । शमिकमोति वलः । (उ. ४९९) सास्नायां प्रावारे च स्त्र पुंसः । कृमिः कृमिविशेषः । सास्नायां यथा—कम्बलाप्रचलघण्टिको वृषः । नागप्रभेदे सर्पविशेषे यथा—कम्बलाश्वतरावुभौ । अत्र प्रावार ऊर्णमयं वासः । तत्र यथा—नव कम्बलसव्यानपीतशोतः सुतस्तव । वैकक्षमुत्तरासंगः । कम्बलं जले । यथा— लीलावापीषु खेलन्ति कम्बलैरबलासखाः ॥६२६॥ कल्लोलोऽरौ हर्षवीच्योः । कल्पते कल्लोलः । पिंछोलेकल्लोलेति (उ० ४९५) ॥ साधुः । त्रिष्वपि यथा—उत्कल्लोलः क्षितिपतिरयं वीचिमालेव भाति । कदली हरिणान्तरे । रम्भायां वैजयन्त्यां च । कदिः सौत्रः । कद्यते कदली । मृदिकंदीत्यलः । हरिणान्तरं मृगविशेषः ।

मरुदेशेऽवतंसे च काकोलो मौकुली विषे ।
कुलाले काहलन्तु स्याद् भृशे चाव्यक्तवाचि च ॥६२८॥
शुष्के च वाद्यभेदे च काहली तरुणस्त्रियाम् ।
किट्टालस्तु लोहगूथे ताम्रस्य कलशेऽपि च ॥६२९॥
कीलालं रुधिरे नीरे कुशलं क्षेमपुण्ययोः ।
पर्याप्तौ कुशलौऽभिज्ञे कुवलं बदरीफले ॥६३०॥

तत्र यथा—कदली तु बिले शेते मृदुभक्ष्योच्च कर्बुरैः । नीलाग्रै रोमभिर्युक्ता सा विंशत्यंगुलायता ॥ रम्भायां वैजयन्त्यां च यथा—तं सद्विपेन्द्रतुलितातुलतुंगशृङ्गमभ्युल्लसत्कदलिकावनराजिरुच्चैः । विस्तारुरुद्धवसुधोऽन्वचलं चचाल लक्ष्मीं दधत्प्रति गिरेरलघुर्बलौघः ॥ शाकादिनवनालेपि तत्र क्लीबः । कामलः कामिरोगयोः । मरुदेशेऽवतंसे च । कामं लाति कामलः । कामयते वा । मृदि कन्दीत्यलः । (उ. ४६५) कामिनि वाच्यलिङ्गः । कामिरोगयोर्यथा-कामलेन हृतं चक्षुश्चित्रं तस्या मृगीदृशः । अवतंसः शेखरः ॥६२७॥ काकोलो मौकुली (मौष्कुली)विषे । कुलाले । ईषत् कोलति वा काकोलः । अल्पे ३-२-१३६ । इति कादेशः । विषे पुंक्लीबः । मौकुलिर्द्रोणकाकः । तत्र विषे-च यथा— एष पक्षी कटुरटन् व्यथां हृदि तनोति मे । काकोलोऽयं किमाश्चर्यं विश्वस्योद्वेगकारकः ॥ कुलालः कुम्भकारकः । काहलं तु स्याद् भृशे चाव्यक्तवाचि (सन्त्यन्तवाचि) च शुष्के च वाद्यभेदे च । कणति कण्यते वा कोहलम् । मुरलोरलेति (उ. ४७४) साधुः । भृशे क्रियाविशेषणम् । अव्यक्त वाचि ॥६२८॥ शुष्के च वाच्यलिङ्गः । वाद्यभेदे स्त्रीक्लीबः । भृशे अव्यक्तवाचि वाद्य भेदे च यथा— तूर्यारावैराहितोत्तालतालैर्गायन्तीभिः काहलं दाहलाभिः । काहली तरुणस्त्रियाम् । यथा— काहली वाहुली नेयं वल्लभस्य विराजते । किट्टालस्तु लोहगूथे ताम्रस्य कलशेऽपि च । किट्टमलति-आलाति वा किट्टालः । लोहगूथं लोहमलः ॥६२९॥ कीलालं रुधिरे नीरे । कील्यते बध्यते कीलालम् । ऋ कृ मृ (उ.४७५) इत्यालः । रुधिरे यथा— कीलाल कुल्या सुतरंति योधाः । अमृतमण्डयोरपि

मुक्ताफलोत्पलयोश्च कुम्भिलो झषचौरयोः ।
श्लोकच्छायाहरे श्याले कुद्दालो भूमिदारणे ॥६३१॥
युगपत्रेऽथ कुटिलं भंगुरे कुटिला नदी ।
कुण्डलं वलये पाशे ताडङ्के कुण्डली पुनः ।६३२॥

मंखः । तत्र अमृते नीरे च यथा— कीलाला (समुद्र) लयलीनतामुपगते तस्मिन् रवेर्मण्डलो । मण्डे यथा—मध्याह्ने प्रतिकेतनं भजति यः कीलालपानोत्सवम् । **कुशलं क्षेमपुण्ययोः** । **पर्य्याप्तौ** । कुशच् । श्लेषणे तालव्यान्तः । कुश्यति कुशलम् । तृपिवपीत्यलः । क्षेमे यथा—अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः । पुण्ये यथा— कुशलैर्जायतेनणां मर्वशास्त्रेषु कौशलम् । पर्य्याप्तिः सामर्थ्यम् । तत्र यथा—महेलीनामविकलं कुशलं मुसलग्रहे । **कुशलोऽभिज्ञे** । वाच्यलिङ्गः यथा—विस्तारयंति कुशलाश्चित्रां वाचं पटोमिव । **कुवलं बदरीफले । मुक्ताफलोत्पलयोश्च** । कूयते कुवलम् कोर्वेति किदलः । कुवल्याः विकारः फलमिति वा । हेमादित्वादङ् । तस्य फलम् । इति लुप् । कौवलति वा । बदरीफले त्रिलिङ्गः ॥६३०॥ उत्पले पुंक्लीबः । त्रिष्वपि यथा—केवलं कुवलस्थूलैः सारोदित्यश्रुबिन्दुभिः । **कुम्भिलोझषचौरयोः** (मीनमूषयोः) **श्लोकच्छायाहरे श्याले** । स्कुम्नाति कुम्भिलः । स्थण्डिलकपिलेति साधुः । झषो मत्स्यः । श्लोकच्छायाहरः कविचौरः । चतुर्ष्वपि यथा—कुम्भिलस्तस्य वल्लभः । **कुद्दालो भूमिदारणे** । **युगपत्रे** । कुं पृथ्वीं, कुत्सितं वा दालयति कुद्दालः । पृषोदरादित्वात् साधुः । भूमिदारणे यथा—चखानवैरिणां कन्दं सकुद्दालैरिवासिभिः ॥६३१॥ युगपत्रः कोविदाराख्यो वृक्षः । **अथ कुटिलं भङ्गुरे** । कुटति कुटिलम् ॥ कल्यनीतीलः । भङ्गुरं वक्रम् । तत्र वाच्यलिङ्गः । यथा— पूर्वं (हरेः) स्मर्तुरवन्तु कोपकुटिलभ्रूभंगुरदृष्टयः । **कुटिला नदी** । नदी नदीविशेषः **कुण्डलं वलये पाशे ताडङ्के** । कुण्डते कुंडलम् । मृदिकन्दीत्यलः । ताडङ्क पुंक्लीबः । वलये यथा—यदोर्मण्डलकुण्डलीकृतधनुर्दण्डेन सिद्धाधिप । पाशे

काञ्चनाद्रौ गुडूच्यां च कुन्तलो हलकेशयोः ।
कुन्तलाः स्युर्जनपदे कुकूलं तु तुषानले ॥६३३॥
शंकुसंयुक्तगर्त्ते च कुलालो घूकपक्षिणि ।
कुक्कुभे कुम्भकारे च कुचेलः स्यात्कुवाससि ॥६३४॥

यथा—कुण्डलेर्पाततः शंडः । ताडङ्के यथा—प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा ॥ **कुण्डली पुनः । काञ्चनाद्रौ गुडूच्यां च** । स्त्रियां गौरादित्वाङ्गीः ॥६३२॥ **कुन्तलो हल(यव) केशयोः** । कुन्तं लाति कुन्तलः । कनति दीप्यते वा । मुरलोरलेति (उ.४७४) साधुः । हलं लाङ्गलम् । केशे यथा—एषा कुंचितकुन्तलाकुलवधूर्दोलासु लीलायते । **कुन्तलाः स्युर्जनपदे** । पुं भुम्नि । यथा—अविकलहसितत्वात्क्षालितानीव कान्त्या । मुकुलितनयनत्वाद् व्यक्तकर्णोत्पलानि । त्वयि विनिहितभारः कुन्तलानामधीशः पिबतिमधुसुगन्धीन्याननानि प्रियाणाम् ॥ तद्देशजे तूपचारात् । तत्र तु वाच्यलिङ्गसंख्यः यथा—वक्त्रे नागरखण्डमस्तु पुरतः प्रेमाकुलांकुन्तली । मधुपात्रेऽपि मंखः । तत्र तु क्लीबे । यथा—कुन्तलेषु कलितं ललिताङ्ग्यः कापि शायनमनन्यमनस्काः । वल्लभैः समरसा सह पीतिप्रीतयेऽप्यवसद्युः सु(स)विलासाः । **कुकूलं तु तुषानले । शंकुसंयुक्तगर्त्ते च** । कूयते कुकूलम् । दुकूलकुकूलेति (उ.४९१) साधुः । कुं पृथ्वीं कूलति आवृणोति वा । तुषानले पुंक्लीबः । तत्र यथा—वायुः कुकूलमिव वर्षति दक्षिणश्च कार्शा न वैरिवशरैर्मदनश्च हन्ति ॥६३३॥ शंकुसंयुक्तगर्त्ते यथा—वल्लभोक्तस्य पान्थस्य कुकूलमपि तूलिका । **कुलालो घूकपक्षिणि । कुक्कुभे कुम्भकारे च** । कोलति कुलालः । कुलिपुलीति (उ.४१०) किदालः । कुलमलति वा कुमृदं लालयति वा । कुक्कुभो पक्षी । कुम्भकारे यथा—मृदमिव बलात्पिण्डीकृत्य प्रगल्भकुलालवत् । **कुचेलः स्यात्कुवाससि** । कुत्सितं चेलो वासोऽस्य कुचेलः । वाच्यलिङ्गः यथा— कुचेलः कर्कशः स्तब्धः स्वाधीनः स्वयमागतः पञ्च लोके न

कुचेला त्वविद्धकर्ण्यां केवलं त्वेककृत्स्नयोः ।
निर्णीते कुहने ज्ञाने केवली ग्रन्थभिद्यपि ॥६३५॥
कोमलं मृदुले तोये कोहलो मुनिमद्ययोः ।
ग्रन्थिलो ग्रन्थिसहिते विकंकतकरीरयोः ॥६३६॥
गरलं पन्नगविषे तृणपूलकमानयोः ।
गन्धोली वरटाशुण्ठ्योर्भद्रायामथ गोकिलः ॥६३७॥

पूज्यन्ते बृहस्पतिसमाऽपि ॥६३४॥ **कुचेला त्वविद्धकर्ण्याम्** । कुत्सितं चेलति कुचेला न विद्धौ कर्णौ यस्या अविद्धकर्णी । **केवलं त्वेककृत्स्नयोः** । **निर्णीते कुहने ज्ञाने** । केवृङ् सेचने । केवते केवलम् । मृदिकन्दीत्यलः (उ.४६५) ज्ञाननिर्णीतयोः क्लीबे । अन्यत्र वाच्यलिङ्गः । एकोऽसहायः । तत्र यथा—केवलोऽपि स्फुरन्बाणः करोति विमदान् कवीन् । कृत्स्ने यथा—उन्निद्रचेण नयत्यनन्यचरिता रात्रिं बलात्केवलाम् । निर्णीते यथा—कृपणस्य कृपाणस्य च केवलमाकारतो भेदः । कुहन ईर्ष्यालुः । ज्ञानं सर्वथावरणविलये चेतनस्य स्वरूपाविर्भावलक्षणम् । तत्र यथा-केवलालोकभास्वते । निर्णीते केवलमित्यव्ययमपि । **केवली ग्रन्थभिद्यपि** । ग्रन्थभित् ज्योतिः शास्त्रविशेषः । तत्र स्त्रियाम् । केवलमामकेति (२-४-२९) ङीः । यथा—दुर्ज्ञानाकेवत्रोकलौ ॥६३५॥ **कोमलं मृदुले तोये** । काम्यते कोमलम् । मुरलोरलेति साधुः । (उ.४७४) मृदुलेवाच्यलिङ्गः तत्र यथा—कोपात्कोमललोल बाहुलतिकापाशेन बद्ध्वा दृढम् । तोये यथा—केवलं । कोमलाहारो जातस्तस्यास्तरोरिव । स्निग्धतुल्यवृत्तिष्वपि मंखः । स्निग्धतुल्ययोर्यथा—कमलकोमलपाणितलाततः । वृत्तौ तु स्त्रियाम् तत्र यथा—शोषैर्वर्णैर्यथायोगं कथिता कोमलाख्यया । **कोहलो मुनिमद्ययोः** । कूहयते कोहलः । मृदिकन्दी (उ. ४६५) त्यलः । बाहुलकाद् गुणः । मुनिर्भरतमुनितनयः । मद्यं शीधु । **ग्रन्थिलो ग्रन्थिसहिते विकंकतकरीरयोः** । ग्रन्थयः सन्त्यस्य ग्रन्थिलः । सिध्मादित्वात् लः । ग्रन्थिं लाति वा ग्रन्थिसहिते वाच्यलिङ्गः । तत्र यथा—ग्रन्थिला शिथिला वेणी मैथिल्या जग्रथे (जगृहे) कथम् । विकंकतकरीरौ वृक्षौ ॥६३६॥ **गरलं पन्नगविषे तृणपूलकमानयोः** । गीर्यते गरलम् । मृदिकन्दीति

मुसले लाङ्गले चापि गोपालो गोपभूपयोः ।
स्याद्गौरिलस्तु सिद्धार्थे लोहचूर्णेऽथ चन्द्रिलः ॥६३८॥
नापिते वास्तुके रुद्रे चंचलोऽनिलकामिनोः ।
चञ्चला तु तडिल्लक्ष्म्योश्चपलश्चोरके चले ॥६३९॥

(उ.४६५) बहुवचनादलः । पन्नगविषे पुंक्लीबः । तत्र यथा—व्यालः सैष पुरो निगीर्णगरलज्वालाकरालाननः । तृणपूलकस्तृणमुष्टिः । मानोऽहंकारः । विषमात्रेऽपि । **गन्धोली वरटा शुण्ठ्योर्भद्रायाम्** । गन्धयते अर्दयति गन्धोली । पिंछोलककोलेति साधुः (उ.४९५) । वरटातैलाधारव्याक्षुद्रजन्तुः । शुंठी ओषधिः । भद्रा करणविशेषः । **अथ गोकिलः** । **मुसले लाङ्गले चापि** । गोभिः किलति क्रीडति गोकिलः ॥६३७॥ मुसलम् अयोग्रम् । लाङ्गलं हलम् । **गोपालो गोपभूपयोः** (नृपगोपयोः) । गां सौरभेयीं पृथ्वीं वा पालयति गोपालः । द्वयोर्यथा—नद्यास्तीरे विदर्भायाः कापि गोपालबालिकाः । गाः समुच्चारयत्येषा क्षेत्रीकृत्य नलं वरम् ॥ **स्याद्गौरिलस्तु सिद्धार्थे लोहचूर्णे** । गौरो वर्णोऽस्य गौरिलः । पिच्छादित्वादिलः (उ.४९५) । सिद्धार्थः श्वेतसर्षपः । लोहचूर्णं लोहक्षोदः । **अथ चन्द्रिलः** (चण्डिलः) । **नापिते वास्तुके रुद्रे** । चन्दति चन्द्रिलः । स्थण्डिलकपिलेति (उ.४८४) साधुः ॥६३८ ॥ नापितो दिवाकीर्त्तिः । वास्तुकं शाकभेदः (क्षीरपत्रम्) । रुद्रः शम्भुः । **चंचलोऽनिलकामिनोः** । भृशं चलति चंचलः । यङन्तादच् । द्वयोर्यथा—वेपते चंचलेनात्तं कान्ताया वसनाऽञ्चलम् । चपलेऽपि यथा—चंचलदृगञ्चलविभ्रमेण । कामिचपलयोर्वाच्यलिङ्गः । **चञ्चला तु तडिल्लक्ष्म्योः** । द्वयोर्यथा—स्थास्नवः कुत्र चंचलाः । **चपलश्चोरके चले** । क्षणिके चिकुरे शीघ्रे पारते (पारदे) प्रस्तरान्तरे । **मीने च** । चप् सांत्वने । चप्यते चपलः । मृदिकन्दी (उ. ४६५)त्यलः । चले क्षणिके चिकुरे शीघ्रे च वाच्यलिङ्गः । चोरकं गन्धद्रव्यभेदः । चले क्षणिके

क्षणिके चिकुरे शीघ्रे पारते प्रस्तरान्तरे ।
मीने च चपला तु स्यात्पिप्पल्यां विद्युति श्रियाम् ॥६४०॥
पुंश्चल्यामथ चत्वालो यज्ञकुण्डकगर्भयोः ।
चूडालश्चूडया युक्ते चूडालाऽपि च चक्रला ॥६४१॥
छगलश्छागे छगली वृद्धदारकभेषजे ।
छगलं तु नीलवस्त्रे जगलो मदनद्रुमे ॥६४२॥
मेदके कितवे पिष्टमद्येऽथ जटिलो जटी ।
जटिला तु मांसिकायां जम्बूलः क्रकचच्छदे ॥६४३॥

च यथा— अलमतिचपलत्वात् स्वप्नमायोपमत्वात् ॥६२९॥ चिकुर इषन्निमीलिताक्षः । शीघ्रस्त्वरितः । पारते यथा— चपलपलशतानां बन्धकः सैष योगः । प्रस्तरान्तरं पाषाणविशेषः । मानो मत्स्यः । **चपला तु स्यात्पिप्पल्यां विद्युति श्रियाम्** । **पुंश्चल्याम्** । पिप्पली कणा । शेषेषु यथा— चित्रं किमत्र यज्जातं चपलानां पलायनम् ॥६४०॥ **अथ चत्वालो यज्ञकुण्डकगर्भयोः** । चत्यते चत्वालः । चत्वालकंकाळेति (उ. ४८०) साधुः । यज्ञकुण्डकं यज्ञगर्त्तः । गर्भो मध्यम् । **चूडालश्चूडया युक्ते** । चूडो विद्यतेऽस्य चूडालः । प्राण्यङ्गादातोलः । यथा—चूडालैः शिशुभिर्विलोडितमिदं क्रोडं पितुः सर्वतः । **चूडालाऽपि च चक्रला** ॥६४१॥ चक्रला क्षुद्रजन्तुभेदः । **छगलश्छागे** । छ्यति छगलः । छोडग्गादिर्वेत्यलः (उ. ४७१) । यथा— बध्नाति छगलं गळे । **छगली वृद्धदारकभेषजे** । गौरादित्वान्ङीः । **छगलं तु नीलवस्त्रे** । यथा— छगलच्छन्नगात्रोऽयं रात्रौ केनेह लक्ष्यते । **जगलो मदन(कनक)द्रुमे** । **मेदके कितवे पिष्टमद्ये** । जायते जगलः । मुरलोरलेति (उ. ४७४) साधुः । मेदको मद्यपंकः । कितवो धूर्त्तः । तत्र वाच्यलिङ्गः ॥६४२॥ मेदके कितवे पिष्टमद्ये च । यथा— अस्पृश्यं जगलं जगुः । मेचकेऽपि मंक्षः । यथा— अजगरजगलास्तरुवनगहनाः । **अथ जटिलो जटी** । जटाः सन्त्यस्य जटिलः ।

जम्बूद्रुमेऽथ जम्बालं कर्दमे शैवलेऽपि च ।
जङ्गलो निर्जले देशे पिशितेऽप्यथ जम्भलः ॥६४४॥
जम्बीरे देवताभेदे जाङ्गलः स्यात्कपिंजले ।
जाङ्गली तु शूकशिम्ब्यां जाङ्गुलं जालिनीफले ॥६४५॥
जाङ्गुली विषविद्यायां तरलो भास्वरे चले ।
हारमध्यमणौ षिड्गे तरला मद्यमुष्णिका ॥६४६॥

कालाजटाघाटाक्षेपे इतीलः । वाच्यलिङ्गः । यथा— विवेश कश्चिज्जटिलस्तपोवनम् । **जटिला तु मांसिकायाम्** । मांसिका गन्धद्रव्यम् । **जम्बूलः क्रकचच्छदे** । **जम्बूद्रुमे** । जायते जम्बूलः । दुकूलकुकूलेति (उ. ४९१) साधुः । क्रकचच्छदः केतकः ॥६४३॥ **अथ जम्बालं कर्दमे शैवलेऽपि च** । जायते जम्बालम् । चात्वाळकंकालेति (उ. ४८०) साधुः । पुंक्लीबः । द्वयोर्यथा— जम्बालजालजटिलासु सरित्तटीषु । **जङ्गलो निर्जले देशे पिशितेऽपि** । जायते जङ्गलः । ऋजनेगोन्तश्चे (उ. ४६७) त्यलः । निर्जलदेशे वाच्यलिङ्गः । तत्र यथा—अनूपः पित्तजे शस्तो जङ्गलः श्लेष्मजे पुनः । पिशिते पुंक्लीबः । तत्र यथा—हरति विनयं वामो यस्य प्रकाशितसाहसः । प्रति(वि)गलदसृक्पंकः पाणिर्ललन्नरजंगलः । **अथ जम्भलः** । **जम्बीरे देवताभेदे** । जम्भं लाति जम्भलः । जम्बीरो वृक्षः ॥ ६४४ ॥ **जांगलः स्यात्कपिंजले** । जंगलदेशे भवो जाङ्गलः । कपिंजलः पक्षिविशेषः । **जाङ्गली तु शूकशिम्ब्याम्** । शूकशिम्बी कपिकच्छूः । **जाङ्गुलं जालिनीफले** । जायते जाङ्गुलम् । कुमुलतुमलेति साधुः (उ. ४८७) । जालिनी लताभेदः तस्याः फले ॥ ६४५ ॥ **जाङ्गुली विषविद्यायाम्** । यथा—जाङ्गली नाम विद्याहमुत्तमा विषनाशिनी । **तरलो भास्वरे चले** । **हारमध्यमणौ षिड्गे** । तरति तरलः । मृदिकन्दीत्यल (उ.४६५) । भास्वरे चले च वाच्यलिङ्गः । भास्वरे यथा—सरलतरके आवां तावद् बहुश्रुतशालिनौ । चले यथा—तरलतरतरङ्गै रङ्गितं गाङ्गमम्भः । हारमध्यमणौ यथा—नाथं हारस्य मध्ये तरलमकृत नाभिदेशे कृशांग्याः । षिड्गो विटः । तत्र

तमालो वरुणे पुण्ड्रेऽसौ तापिच्छेऽथ तण्डुलः ।
विडङ्गे धान्यसारे च ताम्बूलं क्रमुकीफले ॥६४७॥
ताम्बूली नागवल्ल्यां स्यात्तुमुलं रणसंकुले ।
तुमलो बिभीतकद्रौ तैतिलं करणान्तरे ॥६४८॥

यथा–हस्यते कुटिलस्वान्तैस्तरलैः सरलो जनः । तरला मद्यमुष्णिका ॥६४६॥ उष्णिका यवागूः । तत्र क्लीबः । तत्र यथा– सेविततरले मध्ये सततनितम्बाधिवासिनिक्रुशत्वम् । युक्तं तुंगपयोधरतटतल्पीडासहव्रतिनि ॥ ६४६ ॥ **तमालो वरुणे पुण्ड्रेऽसौ तापिच्छे** । ताम्यति तमालः । ऋक्कम् इत्यालः (उ. ४७५) । वारुणो वृक्षः । पुण्ड्रस्तिलकम् । तत्र यथा–भाले तमालः **कुलबालिकानाम्** । असिः खड्गः । तापिच्छे पुंक्लीबः । तत्र यथा–तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वृक्षः । **अथ तण्डुलः** । **विडङ्गे धान्यसारे च** । तडुङ् ताडने । तंड्यते तण्डुलः । हषीवृतित्युलः (उ.४८५) । विडङ्गमौषधम् । धान्यसारो निस्तुषो व्रीह्यादिः । तत्र यथा–तुषैरपि विनिर्मुक्ता न प्ररोहन्ति तण्डुलाः । **ताम्बूलं क्रमुकी (क्रमुके) फले** । ताम्यतेऽनेन ताम्बूलम् । तमेर्वोन्तो दीर्घं स्तुचे स्थूलः (उ. ४८९) । ताम्बूलभृतगल्लोयं भल्लं जल्पति मानवः । पूगफलपर्णचूर्णसंयोगेऽपि । तत्र यथा–ताम्बूलस्य सखे त्रयोदश गुणाः स्वर्गेऽपि ते दुर्लभाः ॥६४७॥ **ताम्बूली नागवल्ल्यां स्यात्** । यथा– ताम्बूलीनां दलैस्तत्र रचिता पानभूमयः । **तुमुलं रणसंकुले** । ताम्यतेऽनेन तुमुलम् । कुमुलतुमुलेति (उ. ४८७) साधुः । वाच्यलिङ्गः । यन्मंस्तः–तुमुलं व्याकुले शब्दे त्रिषु स्यात्संकुले रणे । यथा– संग्रामस्तुमुलस्तस्य । **तुमुलो बिभीतकद्रौ** । बिभीतकद्रुः कलिद्रुमः । व्याकुलरवेऽपि । यथा–खगकुलं तुमुलं कुरुतेतराम् । **तैतिलं करणान्तरे** । तिलति तितिलः । जजलतितिलति (उ. १८) साधुः । तस्येदं तैतिलम् । यथा–बवं च बालवं चैव कौलवं तैतिलं तथा ॥६४८॥

तैतिलो गण्डकपशौ दुकूलं सूक्ष्मवाससि ।
क्षौमवस्त्रेऽथ धवलो महोक्षे सुन्दरे सिते ॥६४९॥
धवली गौर्नकुलस्तु पाण्डवप्राणिभेदयोः ।
नकुली कुक्कुटीमांस्योर्नाभीलं तूत्तमस्त्रियाः ॥६५०॥
वंक्षणे नाभिगर्भाण्डे नाकुली चव्यरास्नयोः ।
कुक्कुटीकन्दे निचुलस्त्विज्जलद्रौ निचोलके ॥६५१॥

ततिलो गण्डकपशौ । गण्डक एकशृङ्गः पशुः । **दुकूलं सूक्ष्मवाससि** । **क्षौमवस्त्रे** । दुनोति दुकूलम् । दुकूलकुकूलेति (उ. ४९१) साधुः । द्वयोर्यथा–तदवितथमवादीर्यन्ममत्वं प्रियेति प्रियजनपरिभुक्तं यद्दुकूलं दधानः । **अथ धवलो महोक्षे सुन्दरे सिते** । धुनोति धवलः । मृदिकन्दीत्यलः (उ. ४६५) । सिते गुणे पुंसि । तद्वति सुन्दरे च वाच्यलिङ्गः । महोक्षे यथा–धुनानेन स्कन्धं धवल किमु मुक्तः पथिभरः । सुन्दरे यथा–धवलकुचसमेतं यौवनं वा वनं वा । सिते यथा–तत्र हंस धवलोत्तरच्छदं जाह्नवी पुलिनचारु दर्शनम् ॥६४९॥ **धवली गौः** । गौरादित्वाङ्गीः । धवलेति गौरः । **नकुलस्तु पाण्डवे प्राणिभेदयोः** । नास्ति कुलमस्य न कोलति वा नकुलः । नरवादित्वात् । नञोऽदभावः । द्वयोर्यथा–पाण्डवसैन्यमिव सनकुलम् । **नकुली कुक्कुटीमांस्योः** । कुक्कुटी ताम्रचूडी । मांसी गन्धद्रव्यम् । **नाभीलं तूत्तमस्त्रियाः । वंक्षणे नाभिगर्भाण्डे** । नाभीं लाति नाभीलम् । वंक्षण ऊरुसन्धिः ॥६५०॥ नाभिगर्भाण्डं नाभिमध्ये अण्डकाकारकोशः । उत्तमस्त्रियाः इति द्वाभ्यामपि सम्बध्यते । द्वयोर्यथा–नाभीलमूलं स्पृशतः स्वभर्तुर्नाम्येति भीत्याभिमुखं नवोढा । **नाकुली चव्यरास्नयोः । कुक्कुटी कन्दे** । नकुलस्येयं नाकुली । नाकुलीनां कुल इति । नखादित्वात् साधुः । चव्यरास्ने ओषधिभेदौ । कुक्कुटीकन्दो रसोनभेदः । **निचुलस्त्विज्जलद्रौ निचोलके** । नेनेक्ति निज्यते वा निचुलः । कुमुलतुमुलेति साधुः । इज्जलद्रौ जलवेतसविशेषे यथा–स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खम् । निचोलकः कूर्पासस्तत्र यथा–निचुलमुकुलितांगो रङ्गगर्भे नताङ्गो ॥६५१॥

निस्तलन्तु बले वृत्ते निर्मलं विमलेऽभ्रके ।
निर्माल्ये च निष्कलस्तु नष्टबीजे कलोज्झिते ॥६५२॥
नेपाली मनःशिला स्यात् सुवहा नवमाल्यपि ।
प्रवालो विद्रुमे वीणादण्डेऽभिनवपल्लवे ॥६५३॥
प्रतलः पातालभेदे तताङ्गुलिकरेऽपि च ।
पटलः तिलके नेत्ररोगे च्छदिषि संचये ॥६५४॥

निस्तलं तु बले वृत्ते । निर्गतं तलमस्मात् निस्तलम् । बलं सैन्यम् । वृत्ते वर्तुले वाच्यलिङ्गः । तत्र यथा—कण्ठस्य तस्यास्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य । **निर्मलं विमलेऽभ्रके** । **निर्माल्ये च** । निर्गतो मलोऽस्मात् निर्मलम् । विमले वाच्यलिङ्गः । तत्र यथा—सम्भृतोपकरणेन निर्मलां कर्त्तु—मिष्टमभिवांछता मया । अभ्रके यथा—निर्मलेन धवलं कृतं गृहम् । निर्माल्य-मुपभुक्तपुष्पादि । **निष्कलस्तु नष्टबीजे कलोज्झिते** । निर्गतं कलं रतोऽस्य निर्गता कलाऽस्य वा । निष्कलः वाच्यलिङ्गः । द्वयोर्यथा—निष्कलः पुरुषोऽधमः ॥६५२॥ **नेपाली मनःशिला स्यात् सुवहा नवमाल्यपि** ॥ नेपालदेशभवत्वात् नेपाली । मनःशिला कुनटा । सुवहारास्ना नवमाला पुष्पलता । **प्रवालो विद्रुमे वीणादण्डे अभिनवपल्लवे** । प्रवलति प्रवालः । ज्वालादित्वाण्णः । प्रकृष्टं बलमस्य वा । पुंक्लीबः । विद्रुमे यथा—पुरः प्रवालैरिव पूरितार्द्धया । वीणादण्डे यथा—विलग्नमध्यां (तनुमध्यां) कुटिलप्रवालां तन्वीं कलालापमनोहरां सः । अङ्के निरातङ्कमनो निधाय रेमे विपंचीमिव चाटुकारः ॥ अभिनवपल्लवे यथा—पुष्पं प्रवालोऽपि(प)हितं यदि स्यात् मुक्ताफलं स्फुट-विद्रुमस्थम् ॥६५३॥ **प्रतलः पातालभेदे तताङ्गुलिकरेऽपि च** । प्रगतस्तलम् अधोभागं प्रकृष्टस्तलश्चपेटो (पटो) वा प्रतलः । पातालभेदः पाताल-भुवनान्तरम् । तताङ्गुलिकरे यथा—प्रतलताडितगण्डतलः खलः । **पटलं तिलके नेत्ररोगे च्छदिषि संचये । पिटके परिवारे च** । पटति पटलम् । मृदिकन्दी—त्यलः। पटं लाति वा । नेत्ररोगे च्छदिषि च त्रिलिङ्गः। संचये क्लीक्लीबः । अन्यत्र

पिटके परिचारे च पञ्चाला नीवृदन्तरे ।
पाञ्चाली पुत्रिकागीत्योः पललं पंकमांसयोः ॥६५५॥
तिलचूर्णे पललस्तु राक्षसे पाचलोऽनले ।
अनिले राधनद्रव्ये पाकलो द्विरदज्वरे ॥६५६॥
पाकलं कुष्ठभैषज्ये पातालं वाडवानले ।
रसातले पाटलं तु कुसुमश्वेतरक्तयोः ॥६५७॥

क्लीबे । पिटकेऽपि स्त्रीक्लीब इति मंखः । तिलके यथा—सा हाटकाङ्कपटलं प्रकटीचकार । नेत्ररोगे यथा—आत्मसममेव मन्दाः पटुमपि पश्यन्ति नयनयोः पश्य । परिनीलपटलभाजो हरितरुचिर्भाति हरिदश्वः ॥ छदिषि गृहाच्छादने यथा—पटलाधारकुड्येषु । संचये यथा—मंक्षूदपाति परितः पटलैरलीनाम् ॥६५४॥ पिटकं पुष्पादिभाण्डम् । तत्र यथा—कुसुमपटलपाणिः पाटलामुच्चिनोति । परिवारः परिच्छदः । अध्याये अवान्तरप्रकरणसमाप्तावपि मंखः । तत्र तु पुंसि यथा—प्रथमः पटलः । **पञ्चाला नीवृदन्तरे** । पंच्यन्ते पञ्चालाः । ऋकृमृवृ इत्यालः (उ. ४७५)। पुंभुम्नि । यथा—पाञ्चालेषु न वाचालाः (दरिणीदृशः) प्रायेण हरिणीदृशाम् । **पाञ्चाली पुत्रिकागीत्योः** । पुत्रिका पाषाणादिनिर्मिता । तत्र यथा—पांचाल्यः कलयन्ति लोलवलयैराश्चर्यमेणीदृशाम् । गीतिर्गीतिभेदः । **पललं पंकमांसयोः । तिलचूर्णे** । पलति पललम् । मृदिकन्दी (उ. ४६५) त्यलः । पङ्के यथा—कैः शक्यते वा पलले पलायितुम् । मांसे यथा—निःशङ्कं मदिरां पिबन्ति पललं स्वादन्ति ॥६५५॥ तिलचूर्णे यथा-कृसरां पललैः कीर्णाम् । **पललस्तु राक्षसे** । राक्षसो राक्षसविशेषः । **पाचलोऽनले । अनिले राधनद्रव्ये** । पाचयति पाचलः । मुरलोरलेति साधुः (उ. ४७४) । राधनद्रव्यमिन्धनम् । **पाकलो द्विरदज्वरे** । पच्यतेऽनेन पाकलः । मुरलो रलेति साधुः (उ. ४७४) । यथा—कलभं कठोर इव कूटपाकलः ॥६५६॥ **पाकलं कुष्ठभैषज्ये** । कुष्टभैषज्यं गन्धद्रव्यम् । रोगभेद इति मंखः । यथा—चर्चिकापाकलं पामा कण्डूश्च पिटका तथा । **पातालं वाडवानले** । **रसातले** ।

पाटलः स्यादाशुव्रीहौ पाटला पाटलिद्रुमे ।
पांशुलो हरखट्वाङ्गे पुंश्चले पांसुला भुवि ॥६५८॥
पातली मृत्तिकापात्रे नारीवागुरयोरपि ।
पिप्पलं सलिले वस्त्रच्छेदभेदेऽथ पिप्पलः ॥६५९॥
निरंशुले वृक्षपक्षिभेदयोः पिप्पली कणा ।
पिङ्गलः कपिले वह्नौ रुद्रेऽर्कपारिपार्श्विके ॥६६०॥

पतन्त्यत्र पातालम् । पतिकठ्यम्यो णिदित्यालः (उ. ४७९) । वडवानले यथा—तत्पातालोपयोम्येव पूरितं नोरधेर्जलम् । रसातले यथा—पातालान्न विमोचितो बत वलिर्नीतो न मृत्युः क्षयम् । **पाटलं तु कुसुमश्वेतरक्तयोः** । पाटलायाः पुष्पम् पाटलम् पाटयति वा । मृदिकन्दीत्यलः (उ. ४६५) । कुसुममत्र पाटलिपुष्पम् । तत्र क्लीबः । श्वेतरक्ते गुणे पुंसि । तद्वति वाच्यलिङ्गः । कुसुमे यथा—घटितषट्पदपेटकपाटला पटलसम्पुटपाटनपाटवम् । श्वेतरक्ते यथा— स पाटलायां गवि तस्थिवांसं धनुर्द्धरः केसरिणं ददर्श ॥६५७॥ **पाटलः स्यादाशुव्रीहौ** । आशुव्रीहिर्व्रीहिभेदः । **पाटला पाटलिद्रुमे** । यथा—पाटला पुष्पसन्मिश्रमल्लिका मालभारिणी । **पांशुलो हरखट्वाङ्गे पुंश्चले** । पांशुरस्त्यत्र पांशुलः । सिध्मादित्वाल्लः ॥७।२।२१॥ पांशुलयति दूषयति वा । पुंश्चलः स्वच्छदकामुकः । तत्र वाच्यलिङ्गः । तत्र तथा— तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरिकीर्त्तनीया । **पांसुला भुवि** । यथा— पांसुला पासुलैवेयं भुज्य (भक्ष्य)-माना नवैर्नवैः ॥६५८॥ **पातली मृत्तिकापात्रे नारी वागुरयोरपि** । पातयति पातली । मुरलोरलेति साधुः (उ. ४७४) । मृत्तिकापात्रं भाण्डविशेषः । नारी स्त्री । वागुरा मृगजालिका । **पिप्पलं सलिले वस्त्रच्छेदभेदे** । पलति पिप्पलम् । पृपलिभ्यां टित् पिप् च पूर्वस्येत्यः (उ. ११) द्वित्वं पूर्वस्य च पिप् आदेशः । सलिले यथा—कपिलः पिप्पलं पपौ । छिद्यतेऽनेन छेदो वस्त्रस्य छेदश्छेदोपकरणं, तस्य भेदाविशेषः । तत्र पुंक्लीबः । तत्र यथा—सीव्यति स्म सकूर्पासान् वस्त्रैः पिप्पलकल्पितैः । अथ **पिप्पलः** । **निरंशुले वृक्षपक्षिभेदयोः** । निरंशुलः श्वापदविशेषः । वृक्षभेदे यथा—विपुलपिप्पलपत्रसमाकृतेः ॥६५९॥ **पिप्पली कणा** ।

कपौ मुनौ निधेर्भेदे पिङ्गला कुमुदस्त्रियाम् ।
कारायिकायां वेश्यायां नाडीभेदेऽथ पित्तलम् ॥६६१॥
पित्तवत्यारकूटे च पित्तला तोयपिप्पली ।
पिचुलो निचुले तोयवायसे झावुकद्रुमे ॥६६२॥

तत्र यथा—कुष्ठमुत्पलपत्राणि पिप्पल्यो रक्तचन्दनम् । **पिङ्गलः कपिले वह्नौ रुद्रेऽर्कपारिपार्श्विके** । **कपौ मुनौ निधेर्भेदे** । पिङ्गो वर्णोऽस्त्यस्य पिङ्गलः । सिध्मादित्वात् लः ।७।२।२१। पिंजयति वा । मुरलो रलेति (उ. ४७५) साधुः । कपिले गुणे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा—उपेक्षते (याते) यः श्लथबन्धिनोर्जटाः (तेर्जटाः) कपोलदेशे कलमाग्रपिङ्गलाः । वह्नौ रुद्रे च यथा—स पिङ्गलः पिङ्गलनेत्रजन्मा । अर्कपारिपार्श्विके यथा—माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः ॥६६०॥ कपौ यथा—गले (गलो) पिङ्गलवत्तेन बलाद् बद्धा महीभुजः । मुनौ यथा—पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा । निधेर्भेदे यथा—नैसर्प्पः पाण्डुकश्चाथ पिङ्गलः सर्वरत्नकः । महापद्मः कालमहाकालौ माणवशंखकौ ॥ **पिङ्गला कुमुदस्त्रियाम्** । **कारायिकायां वेश्यायां नाडीभेदे** । कुमुदो दिग्गजः । तस्य स्त्री । कारायिका पक्षिणीभेदः । तत्र यथा—दक्षिणे न बहुशोऽथ पृष्ठतः पिङ्गला किलकिलायिता शुभा । वेश्यायां यथा—पिङ्गला कुररः सर्पाः सारंगा(भ्रमरा)-न्वेषणं वने । इषुकारः कुमारो च षडेते गुरवो मम ॥ नाडीभेदे यथा—इडा च पिङ्गला चैव सुषुम्णा चेति नाडिका । अथ **पित्तलम्** । **पित्तवत्यारकूटे च** । पित्तमस्यास्ति पित्तलम् । सिध्मादित्वाल्लः ।७।२।२१ पित्तं लाति वा ॥६६१॥ पित्तवति वाच्यलिङ्गः । आरकूटे स्त्रीक्लीबः । पित्तवति यथा—पित्तले मधुरं पथ्यम् । आरकूटे यथा—पित्तलस्य पलान्यष्टौ । **पित्तला तोयपिप्पली** । तोयपिप्पली लाङ्गली । **पिचुलो निचुले तोयवायसे झावुकद्रुमे** । पच्यते पिचुलः । कुमुलतुमुलें (उ. ४८७) ति साधुः । पिचुं लाति वा । निचुलो

पिंजलं स्यात्कुशपत्रे हरिद्राभेऽथ पिच्छिलः ।
विज्जले पिच्छिला पोतकिकायां सरिदन्तरे ॥६६३॥
शाल्मली शिंशपायां च पिण्डिलो गणनापटौ ।
स्थूलजङ्घे पुष्कलस्तु पूर्णे श्रेष्ठेऽथ पुद्गलः ॥६६४॥
काये रूपादिमद्द्रव्ये सुन्दराकार आत्मनि ।
पेशलः कुशले रम्ये फेनिलोऽरिष्टपादपे ॥६६५॥

वेतसः । तोयवायसो जलकाकः ॥६६२॥ पिंजलं स्यात्कुशपत्रे हरिद्राभे । पिंजरस्य लत्वे पिंजलम् । कुशपत्रं दर्भदलम् । हरिद्राभे गुणे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा–कुर्वाणमुत्पिंजलजातपत्रैर्विहङ्गमानां जलजातपत्रैः । अथ पिच्छिलः । विज्जले (निजले) । पिच्छाऽस्त्यस्य पिच्छिलः । लोमपिच्छादेः शेलम् वाच्यलिङ्गः । यथा–स्रोतोन्तरमावसु पिच्छिलेषु मत्स्यभ्रमाद् भ्राम्यति बालवर्गः । पिच्छिला पोतकिकायां सरिदन्तरे । शाल्मली शिंशपायां च । पोतकी दुर्गा । सरिदन्तरं नदीभेदः ॥६६३॥ शाल्मलिशिंशपे वृक्षौ । पिंडिलो गणनापटौ । स्थूलजङ्घे । पिंडुड संघाते । पिंड्यते पिंडिलः । कल्यनिमहीतीलः (उ. ४८१) । प्रवृद्धा पिंडिरस्त्यस्य वा । स्वाङ्गाद्विवृद्धात्ते इतीलः । वाच्यलिङ्गः । पुष्कलस्तु पूर्णे श्रेष्ठे । पुष्यति पुष्णाति वा पुष्कलः । बलिपुषेः कलक् । वाच्यलिङ्गः । द्वयोर्यथा– गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा । अथ पुद्गलः । काये रूपादिमद्द्रव्ये सुन्दराकार आत्मनि । पूयते पुनाति वा पुद्गलः । मुरलोरलेति (उ. ४७४) साधुः । पूरणगलनधर्मा वा । पृषोदरादित्वात् साधुः । चतुर्ष्वर्थेषु ॥६६४॥ कायः शरीरम् । रूपादिमद्द्रव्यं परमाणुलक्षणम् । यदाह– पूरणगलनधर्माणः स्पर्शरसगन्धवर्णवन्तः पुद्गलाः । सुन्दराकारो रम्याकृतिः । आत्मा चेतनः । पेशलः कुशले रम्ये । पिंशति पेशलः । मृदिकन्दीस्यलः (उ. ४६५) । वाच्यलिङ्गः । कुशले यथा– परिचरणपेशलत्वं यस्य समग्रेषु कार्येषु । रम्ये यथा–तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः । मृदौ स्निग्धे चापि मंखः । मृदौ यथा–अङ्गे शिरीषकुसुमादपि पेशलेऽस्मिन् । स्निग्धे

फेनिलं मदनफले बदरे फेनवत्यपि ।
बहुलं भूरिवियतोर्बहुलः पावके शितौ ॥६६६॥
कृष्णपक्षे बहुला तु सुरभ्यां नीलिकैलयोः ।
बहुलास्तु कृत्तिकासु विडालो वृषदंशके ॥६६७॥
पक्षिभेदेऽक्षिगोले च मण्डलो बिम्बदेशयोः ।
भुजङ्गभेदे परिघौ शुनि द्वादशराजके ॥६६८॥

यथा–पादानते प्रणयपेशलवाचिकान्ते त्यक्तस्तया मदति कोपनया न मन्युः । फेनिलोऽरिष्टपादपे । फेनोऽस्त्यत्र फेनिलः । प्रज्ञापर्णोदकफेनाल्लेलौ ७।२।२२। यथा– चीनांशुकैः फेनिलफेनशुभ्रैः ॥६६५॥ फेनिलं मदनफले बदरे फेनवत्यपि । मदनस्य वृक्षस्य फलं मदनफलम् । बदरं कुवलम् । फेनवति वाच्यलिङ्गः । तत्र यथा–वैदेहि पश्यामलयाद्विभिन्नं मत्सेतुना फेनिलमम्बुराशिम् । बहुलं भूरि वियतोः । बंहते बहुलम् । स्थावंकिवंहीति (उ. ४८६) उलो नलोपश्च । बहून् अर्थान् लाति वा । भूरि प्रभूतम् । तत्र वाच्यलिङ्गः । यथा– क्लेशाकुलं बहुलदोषमिदं शरीरम् । वियति व्योम्नि यथा–बहुलं जलदाकीर्णम् । बहुलः पावके शितौ । कृष्णपक्षे । पावकेऽग्नौ यथा–सन्मन्त्रेन्धनसुप्रदीप्रबहुलज्ज्वालावलीवेल्लितः । शितौ कृष्णे वर्णे पुंसि । तद्वति वाच्यलिङ्गः यथा–बहुलकुन्तलवल्लिविभूषिता ॥६६६॥ कृष्णपक्षे यथा–बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग मोक्ष्यति । बहुला तु सुरभ्यां नीलिकैलयोः । सुरभिर्गौः । तत्र यथा– बहुला बहुला भरतैः सेव्यते पुण्यकर्मभिः पुम्भिः । नीलिका एला च औषधी । बहुलास्तु कृत्तिकासु । स्त्रियां भूम्नि । यथा–बाहुलेयविजये भृगूद्वहः । अत्र बहुलानामपत्यं बाहुलेयः कार्त्तिकेयः । बिडालो वृषदंशके । पक्षिभेदेऽक्षिगोले च । बिड् आक्रोशे । बिड्यते बिडालः । कुलिपिलीति (उ.४१०) कित् आलः । बिलं दारयति वा । पृषोदरादित्वात् ।३।२।१५५। वृषभदंशके यथा–बिम्युर्बिलाडेक्षणभीषणाभ्यो वैडर्यकुडचेषु शशिद्युतिभ्यः ॥६६७॥ मण्डलो बिम्बदेशयोः । भुजङ्ग(ग)भेदे परिघौ शुनि द्वादशराजके । संघाते कुष्ठभेदे च । मण्डयति मंड्यते वा मण्डलः । मृदिक-

संघाते कुष्टभेदे च मञ्जुलन्तु जलाञ्चले ।
रम्ये कुञ्जे मञ्जुलस्तु दात्यूहे मङ्गलं पुनः ॥६६९॥
कल्याणे मङ्गलो भौमे मङ्गला श्वेतदूर्विका ।
महिला नार्यां गुन्द्रायां मातुलो मदनद्रुमे ॥६७०॥

न्दीत्यलः (उ. ४६५)। भुजङ्गभेदे शुनि च पुंसि । अन्यत्र त्रिलिङ्गः। अष्टस्वर्थेषु । बिम्बे यथा—परिवेषभीषणमिवार्कमण्डलम् । देशे यथा—देशानां दक्षिणोदिशेस्तत्र वैदर्भमण्डलम् । भुजङ्गभेदे सर्पभेदे यथा—मण्डलः शंखपालश्च । परिधौ परिवेषे यथा—मण्डलं धूमधूम्राभं रवेः स्यात् वृष्टिसूचकम् । शुनि यथा—उपेक्ष्य लोष्टक्षेप्तारं लोष्टं दशति मण्डलः । द्वादशराजके यथा—नाभावात्मानमायच्छेत् नेता प्रकृतिमण्डले ॥६६८॥ संघाते यथा—ततः परमित्युक्त्वा प्रतस्थे मुनिमण्डलम् । कुष्टभेदे यथा—वपुर्मण्डलदूषितम् । स्थानकवर्त्तुलकर्माङ्गेष्वपि मंखः । स्थानके यथा—स्थानान्यालीढवैशाखप्रत्यालीढानि मण्डलम् । वर्त्तुले यथा—उद्यन्नादं धन्विभिर्निष्ठुराणि स्थूलान्युच्चैर्मण्डलत्वं दधन्ति । कर्माङ्गं यन्त्रादि उपलेपादि च । यन्त्रादौ यथा—तन्त्रावाप विदायोगैर्मण्डलान्यधितिष्ठता । उपलेपादौ यथा—चतुरस्रं मण्डलन्तु कार्यं विप्रस्य भोजने । **मञ्जुलं तु जलांचले । रम्ये कुञ्जे ।** मञ्जुर्मनोज्ञत्वमस्त्यस्य मंजुलम् । सिध्मादित्वाल्लः । मञ्जेः सौत्रस्य । कुमुलतुमुलेत्युले वा (उ. ४८७) । रम्ये वाच्यलिङ्गः । जलाञ्चलः(लं) शेवालं तत्र पुंक्लीबः । रम्ये कुंजे च यथा—कोकिला मंजुलालापैर्मंजुले(लं) मंजु गुंजति । **मञ्जुलस्तु दात्यूहे ।** दात्यूहो जलरंकुः । **मङ्गलं पुनः । कल्याणे ।** मङ्गति मङ्गलम् । मृदिकन्दी (उ. ४६५) त्यलः । पुंक्लीबः । यथा—आविर्भवन्तु परमाणि च मङ्गलानि ॥ ६६९ ॥ **मङ्गलो भौमे ।** यथा—वृष्टिश्चलति मङ्गलैः । **मङ्गला श्वेतदूर्विका ।** श्वेतवर्णा दूर्वा श्वेतदूर्विका । **महिला नार्यां गुन्द्रायाम् ।** मह्यते महिला । कल्यनोमहीति (उ ४८१) इलः । नार्यां यथा—मिलन्मानग्रन्थिग्रहिलमहिला मोहनकला विलासं गाहन्ते रजनिमुखमित्राणि मरुतः । गुन्द्रा मुस्ताभेदः । **मातुलो मदनद्रुमे । धत्तूरेऽहिव्रीहिभिदोः पितुः**

धत्तूरेऽहिव्रीहिभिदोः पितुः श्यालेऽथमाचलः ।
बन्दि चौरे रुजि ग्राहे मुसलं स्यादयोग्रके ॥६७१॥
मुसली तालमूल्याखुकर्णिका गृहगोधिका ।
मेखलाद्रिनितम्बे स्याद्रसनाखड्गबन्धयोः ॥६७२॥

श्याले । मां तुलयति मातुलः । मातुः भ्राता वा । पितृमातुर्व्याड्डुलं भ्रातरीति ।६ । २ । ६२ । ड्डुलप्रत्ययः ॥ ६७० ॥ धत्तूरे यथा—दारिकाबीजमाज्यं च राजसर्षप एव च । मातुलेन समायुक्तो धूपः सर्वज्वरापहः ॥ अहिव्रीहिभिदोरिति अहिभेदे व्रीहिभेदे च । पितुः श्याले यथा—अधमा मातुलैः ख्याताः श्वशुरैस्त्वधमाधमाः । **अथ माचलः । बन्दिचौरे रुजिग्राहे ।** मा लक्ष्मीः, तदर्थं चलति न चलति वा माचलः । बन्दिग्राहीचौरो बन्दिचौरः । रुक् रोगभेदः । ग्राहो मत्स्यादिः । **मुसलं स्यादयोग्रके ।** मुसच् खण्डने दन्त्यान्त्यः । मुस्यत्यनेन मुसलम् । तृपिवपीति (उ. ४६७) किदलः । मुहुः स्वनं लाति मुहुर्मुहुर्लसति वा । पृषोदरादित्वात् ।३।२।१५५। पुंक्लीबः । अयोग्रं आयुधविशेषः । क्षोदोपकरणं वा । आयुधविशेषे यथा— सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना । क्षोदोपकरणे यथा—मुसलक्षेपहुंकारस्तोभैः कमलखण्डिनि । कुचविष्कम्भमुत्तम्भन्निष्कुम्भातीव ते स्मरः ॥६७३॥ **मुसली तालमूल्याखुकर्णिका गृहगोधिका ।** तालमुली आखुकर्णी च ओषधिः । गृहगोधिका पल्ली । तत्र यथा—मद्गेहे मुसलीव मूषिकवधू मूषीव मार्जारिका मार्जारीव शुनी शुनीव गृहिणी वाच्यः किमन्यो जनः । **मेखलाद्रिनितम्बे स्याद्रसना खड्गबन्धयोः ।** मिन(नो)ति मेखला । मिगः खलश्च एच्चेति । खलः । मेहनस्य खन्तस्य माला वा । पृषोदरादित्वात् । अद्रिनितम्बे यथा—बन्धैः पुंसां रघुपतिपदैरङ्कितं मेखलासु । रसना कांची । खड्गबन्धः प्रत्याकारवर्धिका, यया खड्गो निःसरन् रक्ष्यते । यया अश्ववाराः कक्षादौ खड्गं लम्बयति वा । रसनाखड्गबन्धयोर्यथा—पाणिग्रहणमेतस्या विधिना विहितं त्वया । निर्मेखला त्वसिलता गळे लगति विद्विषाम् । मौञ्ज्यामपि मंखः । यथा—मेखलामजिनं दण्डमुपवीतं कमण्डलुम् । अप्सु प्रास्य विनष्टानि

रसाल इक्षौ चूते च रसालं बोलसिल्हयोः ।
रसाला दूर्वाविदार्योर्जिह्वामार्जितयोरपि ॥६७३॥
रामिलो रमणे कामे लाङ्गूलं शिश्नपुच्छयोः ।
लाङ्गलं तालहलयोः पुष्पभिद्गृहदारुणोः ॥६७४॥
लाङ्गली जलपिप्पल्यां लोहलोऽस्फुटवादिनि ।
शृंखलाधार्ये वञ्जुलस्त्वशोकतिनिशद्रुमे ॥६७५॥

ग्रहीतव्यानि कोविदैः ॥६७२॥ **रसाल इक्षौ चूते च** । रसमालाति रसालः । इक्षौ यथा—नरजन्मरसालस्य मध्यभागः प्रशस्यते । चूते यथा—मलयपवनाकम्पोत्फुल्लद्रसालरसालसाः सपदि मधुपाः पुष्पेष्वन्येष्वनादरमासते । नवमुपनतं (नयमुपवनं) भुंजानानां मनाक् मलिनात्मनां चिरपरिचितेऽवज्ञावास्यादिहेति किमद्भुतम् ॥ **रसालं बोलसिल्हयोः** । बोलः सिल्हश्च ओषधे । **रसाला दूर्वाविदार्योर्जिह्वामार्जितयोरपि** । दूर्वा विदारी च ओषधिः । जिह्वा रसना । तत्र यथा— रदानां चर्वणक्लेशो रसालैव रसालयः । मार्जिता शिखरिणी । तत्र यथा—एषा वृकोदरकृता सुरसा रसाला ॥६७३॥ **रामिलो रमणे कामे** । रमते रमयति वा रामिलः । स्थण्डिलकपिलेति (उ. ४८४) साधुः । रमणो भर्ता । कामः स्मरः । **लाङ्गूलं शिश्नपुच्छयोः** । लङ्गति लाङ्गूलम् । दुकूलकुकूलेति (उ. ४९१) साधुः । पुंक्लीबः । द्वयोर्यथा—को हि शार्दूललाङ्गूलसमूलोन्मूद्धने बली । **लाङ्गलं तालहलयोः पुष्पभिद्गृहदारुणोः** । लंगति लांगलम् । नहिलंगेदीर्घश्च (उ. ४६६) इत्यलः । तालो वृक्षस्तत्फलम्वा । हले यथा—हलमगुवलस्यैकोनड्वान् हरस्य न लाङ्गलम् ॥ क्रमपरिमिता भूमिर्विष्णो न गौर्नेच लाङ्गलम् ॥६७४॥ **लांगली जलपिप्पल्याम्** । गौरादित्वात् ।२।४।१९। ङीः । **लोहलोऽस्फुटवादिनी** । **शृंखलाधार्ये** । लुहेः सौत्रस्य मुरलोरलेति (उ. ४७४) निपातनात् लोहलः । लोहं लाति वा । वाच्यलिङ्गः । अस्फुटवादी अव्यक्तवक्ता । शृंखलया यत् ध्रियते तत् शृंखलाधार्यम् । **वञ्जुलस्त्वशोकतिनिशद्रुमे** । **वानीरे च** । वजति वंजुलः । कुमुलतुमुलेति (उ.४८७)

वानीरे चाथ वण्ठालः शूरयुन्नौखनित्रयोः ।
वातूलो वातले वातसमूहे मारुतासहे ॥६७६॥
वामिलो दाम्भिके वामे विपुलः पृथ्वगाधयोः ।
विपुलाऽऽर्याभिदि क्षोण्यां विमलोऽर्हति निर्मले ॥६७७॥
वृषलस्तुरगे शूद्रे शकलं रागवस्तुनि ।
वल्कले त्वचि खण्डे च शम्बलं मत्सरे तटे ॥६७८॥

साधुः । त्रिष्वपि यथा—याते द्वारवतीं तदा मधुरिपौ तद्दत्तझम्पानतां कालिन्दीतटरूढवंजुललतामालिंग्य सोत्कण्ठया ।।६७५।। अथ **वण्ठालः शूरयुन्नौखनित्रयोः** । वण्ठयोरालमत्र वण्ठैरल्यते वा वण्ठालः । शूरयोर्युत् युद्धम् शूरयुत् । नावः खनित्रं नौखनित्रत् । तयोः । **वातूलो वातले वातसमूहे मारुतासहे** । वातोऽस्त्यस्य वातूलः । वलवातदन्तललाटादूलः ।७।२।१९। वातानां समूहो वा । गोरथवातादित्यूलः ।६।२।२४। वातस्य समूहो वा । वलवातादूलः । वातसमूहे पुंसि । शेषयोर्वाच्यलिङ्गः । वातले यथा—सुतनुर्वातूलतां लम्भिता । वातसमूहे यथा—वातूलसंचालिततूललवावलीभिर्जातो जनो युवजरन् पथिकश्चलन्ति (चकास्ति) । मारुतमासहते इति सहेराडप्रश्लेषः । मारुतं न सहते इत्यर्थे तु कुलप्रत्ययो बाहुलकात् ॥६७६॥ **वामिलो दाम्भिके वामे** । वामः प्रतिकूलत्वं सव्यत्वं वा अस्त्यस्य वामिलः । बाहुलकादिलः । वाच्यलिङ्गः । **विपुलः पृथ्वगाधयोः** । विपुलति विपुलः । वाच्यलिङ्गः । पृथौ यथा-विपुलतरनितम्बा भोगरुद्धे रमण्याः । शयितुमनधिगच्छन् जीवितेशोऽवकाशम् । अगाधे यथा—विपुलमतिभिः कैश्चिदेतज्जगज्जनितं पुरा । **विपुलाऽऽर्याभिदि क्षोण्याम्** । आर्याभेदे यथा—आद्येषु त्रिषु पादो भवति भवति तु पथ्या विपुला तु यान्यथा पादभाक् । क्षोण्यां यथा—भूप त्वदीययशसां विपुलापि हि संकटैवेयम् । **विमलोऽर्हति निर्मले** । विगतो मलोऽस्य विमलः । अर्हन् त्रयोदशस्तीर्थङ्करः । तत्र यथा—विमलस्वामिनो वाचः कतकक्षोदसोदराः । निर्मले वाच्यलिङ्गः । तत्र यथा—केलया विमलविद्रुमभासा सन्ततं तिमिरमिन्दुरुदासे ॥६७७॥ **वृषलस्तुरगे शूद्रे** । वर्षति वृषलः । तृपिवपीति (उ. ४६७) किदलः । वृषं लाति

पाथेये च शयालुस्तु निद्रालौ वाहसे शुनि ।
श्यामलः पिप्पले श्यामे शार्दूलो राक्षसान्तरे ॥६७९॥
व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थितिः ।
शाल्मलिः पादपे द्वीपे शीतलः शिशिरेऽर्हति ॥६८०॥

वा । मनुस्तु वृषो हि भगवान् धर्मस्तस्य यः कुरुते स्वलम् (निषेधम्)। वृषलं तं विजानीयादित्याह । तुरगे यथा—अकृत्ववृषणैर्बीजं वृषलैर्क्षिप्यते खलु । शूद्रे यथा—न पाठ्यो वृषलैर्वेदः । **शकलं रागवस्तुनि । वल्कले त्वचि खण्डे च ।** शक्नोति शक्यते वा शकलम् । मृदिकन्दी (उ. ४६५) त्यलः । खण्डे पुंक्लीबः । रागवस्तुनि यथा—वस्त्रैः शाकलिकैः कलां कलयसि स्मेराक्षि लोकोत्तरम् । अत्र हि शकलेन रक्तानि शाकलिकानि वस्त्राणि । शकलकर्दमाद्वे ।६।२।३। ति इकण् । वल्कले त्वचि च यथा— तरुशकलैरपि मुनयः कालं गमयन्ति कानने यस्मात् । खण्डे यथा—शीतलेन निरवाप यत्क्षणं मौलिचन्द्रशकलेन शूलिनः । **शम्बलं मत्सरे तटे । पाथेये च ।** शाम्यति शम्बलम् । शमिकमिपलिभ्यो वलः (उ. ४९९) । शं सुखेन वलतेऽस्माद्वा । पाथेये पुंक्लीबः । मत्सरो रोषः । तटं कूलम् ॥६७८॥ पाथेये यथा—धर्म एव परे लोके शम्बलं गदितं बुधैः । **शयालुस्तु निद्रालौ वाहसे शुनि ।** शयनशीलः शयालुः । शीङ्श्रद्धानिद्रेत्यालुः ।५।२।३७। निद्रालौ वाच्यलिङ्गः । तत्र यथा—हन्ति नो पशयस्थोऽपि शयालुर्मृगयुर्मृगम् । वाहसोऽजगरः । श्वा कुक्कुरः । **श्यामलः पिप्पले श्यामे ।** श्यामो वर्णोऽस्य श्यामलः । सिध्मादित्वाल्लः ।७।२।२१। पिप्पलोऽश्वत्थः । श्यामे गुणे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा—स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः । **शार्दूलो राक्षसान्तरे । व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थीतिः ।** शृणोति शार्दूलः । दुकूलकुकूलेति (उ. ४९१) साधुः ॥६७९॥ व्याघ्रे पशुभेदे च यथा—सदेवदारुद्रुमवेदिकायां शार्दूलचर्मण्यवधानवत्याम् । उत्तरपदस्थः सत्तमे यथा—उत्तिष्ठ नरशार्दूल समुन्मूलयविद्विषः । **शाल्मलिः पादपे द्वीपे ।** शालते शाल्मलिः । माशालिभ्यामोकलिमली (उ. ७०३) स्त्रीपुंसः । पादपे यथा—

श्रीखण्डे पुष्पकासीसासनपर्ण्योः शिलोद्भवे ।
शृगालो दानवे फेरौ शृगाली स्यादुपप्लवे ॥६८१॥
शृंखलं पुंस्कटीकांच्यां लोहरज्जौ च बन्धने ।
शौष्कलः शुष्कमांसस्य पिंडके पिशिताशिनि ॥६८२॥

हं हो शाल्मलिपादप प्रतिदिनं को न त्वया वंचितः । द्वीपे यथा—द्वीपस्य शाल्मलिरिति प्रथितस्य नाथः पाथोधिना वलयितस्य सुराम्बुनायम् । **शीतलः शिशिरेऽर्हति । श्रीखण्डे पुष्पकासीसासनपर्ण्योः शिलोद्भवे ।** शीतमस्त्यस्य शीतलः । सिध्मादित्वात् ।७।२।२१। लः शेते वा । शिङस्तलगिति (उ. ५०१) तलक् । शिशिरे गुणे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा—तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन । अर्हन् दशमस्तीर्थंकरः । तत्र यथा—स्याद्वादामृतनिस्यन्दी शीतलः पातु वो जिनः ॥६८०॥ श्रीखण्डं चन्दनम् । पुष्पकासीसं कासीसविशेषः । आसनपर्णी ओषधिः । शिलोद्भवं धातुविशेषः । गौडस्तु श्रीखण्डपुष्पकासीसशैलेयेषु नपुंसकम् । पुमानासानपर्ण्यां स्याच्छीतलः शिशिरे त्रिष्वित्याह । **शृगालो दानवे फेरौ ।** शृणो(णा)ति शृगालः । चात्वालेति (उ. ४८०) साधुः । फेरौ यथा—वरं वृन्दावने रम्ये शृगालत्वं परीप्सति । फेरौ दन्त्यादिरप्ययम् । तत्र असृग् गिलति पृषोदरादित्वात् साधुः । **शृगाली स्यादुपप्लवे ।** उपप्लवो डमरः । तत्र स्त्रियाम् ॥६८१॥ **शृंखलं पुंस्कटीकाञ्च्यां लोहरज्जौ च बन्धने ।** शृणो(णा)ति शृंखलम् । श्रोनोत्तो ह्रस्वश्चेति (उ. ४९८) खलः । त्रिलिङ्गः । **पुंस्कटीकांच्यां** यथा—कपालमालाखट्वाङ्गधारी लोलास्थिशृंखलः । महापाशुपतो भीमः श्मशानस्य च विग्रहः ॥ लोहरज्जौ यथा—कलत्रं निगडं दत्वा न सन्तुष्टः प्रजापतिः । भूयोऽप्यपत्यदानेन बबन्ध गलशृंखलम् । बन्धाने बन्धमात्रे यथा—विशृंखलं शृंखलकाः प्रतस्थिरे । **शौष्कलः शुष्कमांसस्य पणिके पिशिताशिनि ।** शुष्कं मांसं लाति शुष्कलः । प्रज्ञादित्वात् (७ । २ । १६५) अणि ॥ शौष्कलः वाच्यलिङ्गः ।

षण्डाली सरसीतैलमानयोः कामुकस्त्रियाम् ॥
संकुलोऽस्पष्टवचने व्याप्ते च सरलस्त्वृजौ ॥६८३॥
उदारे पूतिकाष्ठे च सप्तला नवमालिका ।
सातला पाटला गुञ्जा सन्धिलोकः सुरङ्गयोः ॥६८४ ॥
नांद्यां सिध्मलः किलासी सिध्मला मत्स्यचूर्णके ।
सुतलोऽट्टालिकाबन्धे पातालभुवनान्तरे ॥६८५ ॥

पणोऽस्त्यस्य पणिकः । विक्रेता इत्यर्थः । पिशिताशी मांसाशी ॥ ६८२ ॥ **षण्डाली सरसो तैलमानयोः कामुकस्त्रियाम्** । षंडंसमूहम् अलति आलाति वा षण्डाली त्रिष्वर्थेषु । सरसी कासारः । तिलं मीयते येन तत्तैलमानं कर्षादि । कामुकी चासौ स्त्री च कामुकस्त्री । **संकुलोऽस्पष्टवचने व्याप्ते च** । संकोलति संकुल : । वाच्यलिङ्गः । अस्पष्टवचने यथा--निन्दया न विदितं न शंसयात् दुर्जनो वदति संकुलं सताम् । व्याप्ते यथा- अलं स्थित्वा श्मशानेऽस्मिन् गृध्र गोमायुसंकुले । व्याकुलेऽपि मन्त्रः । यथा—न तत्र स्वः परो वापि ददृशे रणसंकुले । **सरलस्त्वृजौ । उदारे पूतिकाष्ठे च** । सरति सरलः । मृदिकन्दी (उ.४६५) त्यलः । ऋजूदारयोर्वाच्यलिङ्गः । ऋजौ यथा— नात्यन्तं सरलैर्भाव्यं गत्वा पश्य वनस्पतीन् । सरलास्तत्र छिद्यन्ते कुब्जास्तिष्ठन्ति पादपाः । उदारे यथा— विभवे सत्यपि प्रायः सरलो विरलः पुमान् । पूतिकाष्ठं देवदारुद्रुः । तत्र यथा—कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् । **सप्तला नवमालिका ॥ सातला पाटला गुंजा** । सपति समवैति सप्तला । मुरलोरलेति (उ.४७४) साधुः । चत्वारोऽपि लताभेदाः । **सन्धिलौ कः सुरङ्गयोः । नान्द्याम्** । सन्धिं लाति सन्धिला । ओको गृहम् । सुरङ्गा भुवोन्तरे गूढमार्गः ॥६८४ ॥ नान्दी द्वादशतूर्यनिर्घोषः । **सिध्मलः किलासी** । सिध्मानि सन्त्यस्य सिध्मलः । सिध्मादित्वाल्लः ।७।२।२१। वाच्यलिङ्गः । किलासी त्वक्पुष्पी । तत्र यथा- [illegible] पुरः । **सिध्मला मत्स्यचूर्णके** । शुष्काणां मत्स्यानां च चूर्णं मत्स्यचूर्णकः । तत्र स्त्रि-

सुवेलः प्रणते शान्ते गिरिभेदेऽथ हेमलः ।
कलादे शरटे ग्रावभिद्यभावः पुनर्मृतौ ॥६८६॥
असत्तायामथाक्षीवं वशिरे मदवर्जिते ।
आहवः समरे यज्ञेऽप्याश्रवो वचनस्थिते ॥६८७॥
प्रतिज्ञायां च क्लेशे च स्यादार्तवमृतूद्भवे ।
नारी रजसि पुष्पे चोद्भवः केशवमातुले ॥६८८॥

याम् । **सुतलोऽलिट्टाकाबन्धे पातालभुवनान्तरे** । शोभनं तलमस्य सुतलः । अट्टालिकाबन्धः प्राकारशिखरे योधरक्षाहेतुः सन्निवेशविशेषः ॥६८५॥ पातालभुवनान्तरं पुराणप्रसिद्धम् । **सुवेलः प्रणते शान्ते गिरिभेदे** । सुष्ठुवेलति शोभना वेलाऽत्र वा सुवेलः । प्रणतशान्तयोर्वाच्यलिङ्गः । त्रिष्वपि यथा—बलाक्रान्तः शत्रुः समजनि सुवेलो गिरिरिव । **अथ हेमलः॥ कलादे शरटे ग्रावभिदि** । हेमं लाति हेमलः । हिनोति वा । मुरलोरलेति (उ.४७४) साधुः । कलादः सौवर्णिकः । सरटः कृकलासः । ग्रावभित् दृषद्भेदः । **अभावः पुनर्मृतौ । असत्तायाम्** । न भवनमभावः । मृतौ यथा— कष्टं मातुरभावेन जीवन्ति शिशवः खलु ॥ ६८६ ॥ असत्तायां यथा— सान्निध्ययोगात्किल तत्रशच्याः स्वयम्वरक्षोभकृतामभावः । **अथाऽक्षीवं वशिरे मदवर्जिते** । अक्षोति अक्षीवम् । प्रह्वाह्वेति (उ. ५१४) साधुः । न क्षीवते स्म वा । अनुपसर्गाः क्षीवेति साधुः ।४।२।८०। वशिरः (रं)सामुन्द्रं लवणम् । मदवर्जिते वाच्यलिङ्गः । तत्र यथा— अक्षीवं तत्क्षणाज्जातं नाम्नैव तव शात्रवम् । **आहवः समरे यज्ञेऽपि** । आहूयन्ते योद्धारोऽत्रेति आहवः । आहो युद्धे इत्यल्दवा । शब्दस्य चोत्वम् । आजुहृत्यत्र वा । पुंनाम्निः घः । समरे यथा—बाणाहवव्याहतशम्भुशक्तेरासत्तिमासाद्य जनार्दनस्य । यज्ञे यथा—समाजुहावाहवहव्यलोलुपान् । **आश्रवो वचनस्थिते । प्रतिज्ञायां च क्लेशे च** । आशृणोति आश्रवणं वा आश्रवः । वचनस्थिते वाच्यलिङ्गः । त्रिष्वपि यथा- धीराणामाश्रवे तोषः ॥६८७॥ **स्यादार्त्तवमृतूद्भवे । नारीरजसि पुष्पे च** । ऋतौ भवं आर्त्तवम् । ऋतुः प्राप्तोऽस्येति वा । ऋत्वादिभ्योऽण् । ऋतुरेव

उत्सवे ऋतुवह्नौ चोत्सवोऽमर्षे महेऽपि च ।
इच्छाप्रसर उत्सेके कारवीकृष्णजीरके ॥ ६८९ ॥
दीप्ये मधुरात्वक्पत्र्योः कितवः कनकाह्वये ।
मत्ते च वञ्चके चापि केशवः केशसंयुते ॥ ६९० ॥

वा । प्रज्ञादित्वादण् । ऋतूद्भवे वाच्यलिङ्गः । तत्र यथा—पुष्पं फलं चार्त्तवमाहरन्त्यः काले च बीजं यदि कृष्टरोहि । नारीरजसि यथा—आर्त्तवं द्वादशे वर्षे योषितां वर्त्तते खलु । पुष्पं कुसुमम् । **उद्धवः केशवमातुले । उत्सवे ऋतुवह्नौ च** । उत्कर्षेण जुहोति हूयते वा उद्धवः । केशवमातुले यथा—सार्द्धमुद्धवसोरिभ्यामथासावासदत्सदः ॥ ६८८ ॥ उत्सवे यथा—नृत्यद्वरवधूलोलवलयावलिशिञ्जया । विद्ध उद्धवसम्बद्धो गीतिशब्दो हरत्यसौ । ऋतुवह्नौ च यथा—भालमुद्धूलितं तेन समिद्धोद्धवभस्मभिः । **उत्सवोऽमर्षे महेऽपि च । इच्छाप्रसर उत्सेके ।** उत्सूयते उत्सवनं वा उत्सवः । चतुःष्वर्थेषु । अमर्षो रौद्रभावः । उत्सेको वीरभावः । तयोर्यथा—ववृते मरणोत्सवोऽस्य चित्ते यदितो वाग्भिरसावसारयत्तम् । महेक्षणे यथा—उत्सवोऽपि दरिद्रस्य दुःखाय न सुखाय च । इच्छाप्रसरे यथा—आलिङ्गनोद्दामविलासवन्ध्यं रतोत्सवं चुम्बनमात्रशेषम् । इच्छायाः प्रसवे उत्पत्तौ इत्यमरटीका । **कारवी कृष्णजीरके । दीप्ये मधुरात्वक्पत्र्योः ।** करोति कारवो । कैरवभैरवेति साधुः । गौरादित्वाङ्ङीः ॥६८९॥ दीप्योऽजमोदा । मधुरा शतपुष्पा । त्वक्पत्री ओषधिः । **कितवः कनकाह्वये मत्ते च वंचके चापि** । कित् निवासे इत्यस्य किति कुर्डाति । कित्यवे कितवः किं तवास्ति वा । पृषोदरादित्वात् । कनकाह्वयो धत्तूरः । मत्ते वञ्चके च वाच्यलिङ्गः तयोर्यथा—दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति । द्यूतकारेऽपि मंखः । यथा हि—वंचितास्मि कितवेति कलं वदन्ती । **केशवः केशसंयुते । पुन्नागे वासुदेवे च** । प्रशस्ता केशा वालाः शिफा वा अस्य सन्ति केशवः । केशाद्व इति वः । केशसंयुते वाच्यलिङ्गः । तत्र वासुदेवे च यथा—केशवोऽपि न कृष्णो यः ॥६९०॥ पुन्नागो

पुन्नागे वासुदेवे च कैतवं द्यूतदम्भयोः ।
कैरवः कितवे शत्रौ कैरवं सितपङ्कजे ॥६९१॥
कैरवी तु चन्द्रिकायां गन्धर्वस्तु नभश्चरे ।
पुंस्कोकिले गायने च मृगभेदे तुरङ्गमे ॥६९२॥
अन्तरा भवदेहे च गालवो मुनिलोध्रयोः ।
गाण्डीवगाण्डिवौ चापमात्रे पार्थधनुष्यपि ॥६९३॥

वृक्षः । **कैतवं द्यूतदम्भयोः** । कितवस्य भावः कर्म वा कैतवम् । युवादित्वादण् । द्वयोर्यथा—कैतवेन कुरुभिर्विजिता भूः । **कैरवः कितवे शत्रौ** । करोति कैरवः । कैरवभैरवेति (उ. ५१९) साधुः । कितवः शठः । शत्रुररिः । तयोर्यथा—त्वयि भास्वत्युदिते सर्वतेजोभिभाविनि । उन्मीलति धरानाथ किं कैरवकुलं क्वचित् । **कैरवं सितपङ्कजे** । कैरवो हंसस्तस्येदं कैरवः । यथा—अर्द्धमुन्मिषति कैरवाकरे साधुपंकजवने निमीलति ॥६९१॥ **कैरवी तु चन्द्रिकायाम्** । कैरवं देवताऽस्याः कैरवी । यथा—कैरवी भैरवीभूता वियोगे हरिणीदृशः । **गन्धर्वस्तु नभश्चरे । पुंस्कोकिले गायने च मृगभेदे तुरङ्गमे । अन्तरा भवदेहे च** । गन्धयतेऽर्दयते गन्धर्वः । गन्धेरर्चान्त (उ.५०८) इति वः । नभश्चरे यथा—अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितम् । पुंस्कोकिले गायने च यथा—सहकारवनस्यांतश्चार्व्यो गन्धर्वगीतयः । मृगभेदे तुरङ्गमे च यथा—गन्धर्वैः सर्वतो व्याप्तां महिषीपरिवारिणीम् । राजधानीमिव निजां वनभूमिममन्यत ॥६९२॥ अन्तरा मरणजन्मनोर्मध्ये यो देहो यातनाशरीरं सोऽन्तराभवदेहः । यदाहुः—अन्तराभवदेहादि नेष्यते विन्ध्यवासिना । तत्र यथा—गन्धर्वदेहेन दिवं जगाम । **गालवो मुनिलोध्रयोः** । गलति गालवः । कैरवभैरवेति साधुः । मुनिर्मुनिविशेषः । लोध्रा वृक्षविशेषः । **गाण्डीवगाण्डिवौ चापमात्रे पार्थधनुष्यपि** । गाण्डी गाण्डिश्च पर्व विद्यतेऽस्य गाण्डीवः । गाण्डिवः मण्यादित्वाद्वः । पुंक्लीबौ । चापमात्रे यथा—गाण्डीवदण्डेन विखण्डिता श्वो भूपालमौलिर्युधि कुन्तलेशः । पार्थधनुषि यथा—राज-

ताण्डवं तृणभिन्नाट्यभेदयोः त्रिदिवन्तु खे ।
स्वर्गे च त्रिदिवा नद्यां द्विजिह्वः खलसर्पयोः ॥६९४॥
निह्नवः स्यादविश्वासेऽपलापे निकृतावपि ।
निष्पावः पवने शूर्पपवने निर्विकल्पके ॥६९५॥
वल्ले कडङ्गरे शिम्ब्यां प्रभवो जन्मकारणे ।
आद्योपलब्धये स्थानेऽपांमूले मुनिभिद्यपि ॥६९६॥

न्यानां शितशरशतैर्यत्रगाण्डीवधन्वा धारापातैस्त्वमिव कमलान्यल्पवर्षन् मुखानि । गाण्डिवशब्दो द्वयोर्यथा—गाण्डिवेन हि रिपून् कुरु षितान् कुर्वता—र्जुन यशस्त्वयार्जितम् ॥ ६९३ ॥ ताण्डवं तृणभिन्नाट्यभेदयोः । तण्डोरिदं तण्डुना प्रोक्तं वा ताण्डवम् । पुंक्लीबः । नाट्यभेदे यथा—चण्डीशः पातु वो यस्य ताण्डवे क्षितिमण्डलम् । त्रिदिवन्तु खे स्वर्गे च । तृतीयं दिवं त्रिदिवम् । मयूरव्यंसकादित्वात् । स्वर्गे पुंक्लीबः । द्वयोर्यथा—श्रियो वासांभोजे त्रिदिवसरिदम्भोजकुहरे हरेर्नाभीपद्मे मधुमधुकरो यः किल पपौ । त्रिदिवा नद्याम् । त्रिषु दीव्यति त्रिदिवा । यथा पिबत्वं देव यदि वा त्रिदिवाम्बु दिवानिशम् । द्विजिह्वः खलसर्पयोः । द्वे जिह्वे वचने रसने वाऽस्य द्विजिह्वः । द्वयोर्यथा वाग्विषस्य द्विजिह्वस्य विश्वासं कोऽधिगच्छति ॥६९४॥ निह्नवः स्यादविश्वासेऽपलापे निकृतावपि । निह्नवनं निह्नवः । अविश्वासोऽप्रत्ययः, । निकृतिः शाठ्यं तयोर्यथा—को मे निरपराधस्य सखे निह्नव एषते । अपलापे यथा—तेन माधवमालत्योः दार्यः स्वमतिनिह्नवः । निष्पावः पवने शूर्पपवने निर्विकल्पके । वल्ले कडङ्गरे शिम्ब्याम् । निष्पवनं निष्पूयते वा निष्पावः । निरभेः पूल्व (५.३.२१) इति घञ् । षट्स्वर्थेषु । पवनम् सामान्यपवनम्, । शूर्पेण पवनम् शूर्पपवनम् । निर्विकल्पके कृतनिश्चये वाच्यलिङ्गः ॥६९५॥ वल्लो धान्यभेदः । कडङ्गरो बुसम् । शिम्बी बीजकोशी । सर्वेषु यथा—निष्पाव—निष्पावकृतः कृषीवलान् । प्रभवो जन्मकारणे । आद्योपलब्धये स्थानेऽपांमूले मुनिभिद्यपि । प्रभवनं प्रभवत्यस्मात् । प्रभवति वा प्रभवः । चतुःष्व-

प्रसवः पुष्पफलयोरपत्ये गर्भमोचने ।
उत्पादे च प्रसेवस्तु वीणाङ्गस्यूतयोर्दृतौ ॥६९७॥
प्रभावस्तेजसि शक्तौ पल्लवः किसले वले ।
विटपे विस्तरेऽलक्तरागे शृङ्गारषिङ्गयोः ॥६९८॥

र्थेषु । जन्मकारणं पित्रादि । तत्र यथा—क सूर्यप्रभवो वंशः क चाल्पविषयामतिः । आद्या प्रथमा । उपलब्धिर्दर्शनम् । गंगादीनां तदर्थं स्थानम् हिमवदादिः । तत्र यथा—सुरापगायाः प्रभवो हिमाचलः । अपां मूले यथा— प्रभवन्ति प्रभवे नद्यः संकीर्णाः पृथवः पुरः । मुनिभेदे यथा— शिष्यो जम्बुमहामुनेः प्रभव इत्यासीत् । सम्वत्सरभेदेऽपि । यथा— प्रभवे यज्ञकर्मणि ॥६९६॥ प्रसवः पुष्पफलयोरपत्ये गर्भमोचने । उत्पादे च । प्रसूयते प्रसवनं वा प्रसवः । पंचस्वर्थेषु । पुष्पे यथा— गणा न मेरुप्रसवावतंसाः । फले यथा— माकन्दपुष्पप्रसवैर्विहस्ताम् । अपत्ये यथा— दुस्त्यजः प्रसवस्नेहः पशूनामपि पश्यत । गर्भमोचने यथा— न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् । उत्पादे यथा—जातः क्रमेण मदनप्रसवः कृशाङ्ग्याः । प्रसेवस्तु वीणांगस्यूतयोर्दृतौ । प्रसीव्यते प्रसेवः । वीणांगं ककुभाख्यं दण्डाधः शव्दगाम्भीर्यार्थं दारुमयं भाण्डम् । यद् भस्त्रयाच्छाद्यते । तत्र यथा— प्रसवमूले स बबन्ध तन्त्रीम् । स्यूतो वस्त्राद्यावपनम् । दृतिराख्यश्चर्ममयी । तयोर्यथा— प्रसेवसंस्थापितदेववस्त्रैः ॥६९७॥ प्रभावस्तेजसि शक्तौ । प्रभवत्यनेन प्रभावः । बाहुलकाद् घञ् । तेजसि प्रतापे यथा— यत्पुनः स्तीर्यतेऽम्भोधिः प्रभावप्राभवो हि सः । शक्तिः सामर्थ्यम् । तत्र यथा— अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः । पल्लवः किसले वले । विटपे विस्तरेऽलक्तरागे शृंगारषिङ्गयोः । पल्लति पल्लवः । वडिवटी (उ. ११५) त्यवः । सप्तस्वर्थेषु । किसले पुंक्लीबः । तत्र यथा— तेनामरवधूहस्तसदयालूनपल्लवाः । वलं स्थाम । विटपे शाखायां यथा— सहस्रशो मंजरिताश्च पल्लवाः । कला च पुंस्कोकिलवाचि वर्त्तते । विस्तारे यथा— वाचः पल्लविता इव । अलक्तरागे शृंगारे षिड्गे च यथा— पल्लवः कामिवल्लभः । पत्र मात्रे वस्त्रैकदेशे रहसि च मंखः । पत्रमात्रे यथा— तन्वीमेकजलार्द्रपल्लवतया । वस्त्रैकदेशे

पञ्चत्वं भावे पंचानां प्राणानामत्ययेऽपि च ।
पार्थिवो नृपतौ भूमिविकारे पार्थिवी तुका ॥६९९॥
पुङ्गवो गवि भैषज्ये प्रधाने चोत्तरस्थितः ।
फेरवो राक्षसे फेरौ बान्धवो बन्धुमित्रयोः ॥७००॥
भार्गवः परशुरामे सुधन्विनि मतंगजे ।
दैत्यगुरौ भार्गवी तु कृष्णदूर्वोमयोः श्रियाम् ॥७०१॥

यथा— रोषादधानाऽभिनिहितैककोणकमनीयेन पृष्ठतः । कक्षानिक्षिप्तपल्लवेन । रहसि यथा— नीलीभवन्नूतनशाद्वलेषु ध्यायन्ति धन्या नवपल्लवेषु ॥६९८॥ पंचत्वं भावे पंचानां प्राणानामत्ययेऽपि च । पंचानां भावः पञ्चत्वम् । देहस्य महाभूतारब्धत्वेन मरणेऽपि । प्रत्येकं स्वांशसंक्रमात् पंचभावः । द्वयोर्यथा— एकोऽपि प्राप पंचत्वम् । पार्थिवो नृपतौ भूमिविकारे । पृथिव्या ईशः पार्थिवः । पृथिवी सर्वभूमेरीशज्ञातयोश्चाञ् (६-४-१५६) । पृथिव्या अयं पृथिव्यां भव इति वा । पृथिव्याञाञ् (६.१.१८) । नृपतौ यथा—बालोऽपि नावमन्तव्यो मनुष्य इति पार्थिवः । भूमिविकारे वाच्यलिङ्गः । तत्र यथा पर्वताः पार्थिवाः खलु । पार्थिवी तुका । तुका वंशरोचना ॥६९९॥ पुङ्गवो गवि भैषज्ये प्रधाने चोत्तरस्थितः । पुमांश्चासौ गौश्च पुंगवः । गोरतत्पुरुषात् इत्यट् समासान्तः । गवि यथा— स्वेदोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिपुंगवकेतुरासीत् । भैषज्यमौषधम् । उत्तरपदस्थितः प्रधाने यथा— स एष भृगुपुंगवो गिरिशबालशिष्यो मुनिः । फेरवो राक्षसे फेरौ । फे इति रवोऽस्य फेरवः । द्वयोर्यथा— श्मशाने रजनीं निन्ये भैरवो फेरवारवैः । बान्धवो बन्धुमित्रयोः । बन्धुरेव बान्धवः । प्रज्ञादित्वादण् । बन्धौ यथा— ये यान्त्यभ्युदये प्रीतिं नोज्झन्ति व्यसनेषु च । ते बान्धवास्ते सुहृदो लोकः । स्वार्थपरो परः । मित्रे यथा— मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे ॥७००॥ भार्गवः परशुरामे सुधन्विनि मतंगजे दैत्यगुरौ । भृगोरपत्यं भार्गवः भृगो-

भैरवो भीषणे रुद्रे रागभेदेऽथ माधवः ।
विष्णौ वसन्ते वैशाखे माधवी मधुशर्करा ॥७०२॥
वासन्ती कुट्टनी हाला राघवोऽब्धेर्झषान्तरे ।
रघुजेऽप्यथ राजीवो मीनसारङ्गभेदयोः ॥७०३॥

रयं वा । परशुरामे यथा— भार्गवस्य सुकृतोऽपि सोऽभवत् स्वर्गमार्गपरिघो दुरत्ययः । सुधन्विनि—सुधनुर्धरे वाच्यलिङ्गः । मतङ्गजो गजः । दैत्यगुरौ शुक्रे यथा— अवतेरतुर्नयननन्दनौ नभः शशिभार्गवावुदयपर्वतादिव । भार्गवी तु कृष्णदूर्वोमयोः श्रियाम् । त्रिष्वपि यथा—सा भार्गवो स्वर्गसदां सदार्च्या ॥७०१॥ भैरवो भीषणे रुद्रे रागभेदे । बिभ्यत्यस्मात् भैरवः । कैरवभैरवेति साधुः । भीषणे वाच्यलिङ्गः । तत्र यथा—रवः श्रवणभैरवः स्थगितरोदसी कन्दरः । रुद्रे यथा— पायात्स वो भैरवः । रागभेदे यथा— श्रीरागोऽथ वसन्तश्च भैरवः पञ्चमस्तथा । अथ माधवः । विष्णौ वसन्ते वैशाखे । मा लक्ष्मीस्तस्या धवो माधवः मधुरेव वा । प्रज्ञादित्वादण् । विष्णौ यथा—परिणतिमिति रात्रेर्मागधा माधवाय । वसन्ते यथा—परलोकविधौ च माधवस्मरमुद्दिश्य विलोलपल्लवाः । वैशाखे यथा— रेजतुर्गतिवशप्रवर्त्तिनौ भास्करस्य मधुमाधवाविव । माधवी मधुशर्करा । वासन्ती कुट्टनी हाला । मधुनो विकारो माधवी । मधौ चैत्रे पुष्यति वा मधुनि भवा वा । मधुशर्करा शर्करामेदः ॥७०२॥ वासन्त्यां यथा—प्रत्यासन्नः कुरबकचूतैर्माधवीमण्डपस्य । कुट्टनी शम्भली । हाला सुरा । तयोर्यथा—माधवी माधवीप्रिया । राघवोऽब्धेर्झषान्तरे । रघुजेऽपि । राघृ सामर्थ्ये । राघते राघवः । कैरवभैरवेति साधुः (उ. ५१९) । रघोरपत्यमिति वा । अब्धेः समुद्रस्य झषान्तरं मत्स्यभेदः । रघुजे यथा—त्रपां क्षणमुपेक्ष्य हे नयत राघवं लाघवं पुरन्दरपराक्रमग्लपनचञ्चावाहवः (चञ्चवो वाहवः) । अथ राजीवो मीनसारङ्गभेदयोः । राज्यो रेखाः सन्त्यस्य राजीवः । मण्यादित्वाद्वः (उ०५१६) । मीनो मत्स्यः सारङ्गो मृगस्तयोर्भेदे यथा—राजीव राजीवित(ते)ते वनांते ॥७०३॥

राजीवमञ्जे रौरवो भीषणे नरकान्तरे ।
वल्लवः स्यात्सूपकारे गोदोग्धरि वृकोदरे ॥७०४॥
वडवाऽश्विन्यां स्त्रीभेदे कुम्भदास्यां द्विजस्त्रियाम् ।
वाडवं करणे स्त्रीणां वाडवौघे रसातले ॥७०५॥
वाडवो विप्र और्वे च विद्रवो धीः पलायनम् ।
विभावः स्यात्परिचये रत्यादीनां च कारणे ॥७०६॥

राजीवमञ्जे । यथा– प्राचीमंकुरयन्ति किञ्चन रुचो राजीवजीवातव । रौरवो भीषणे नरकान्तरे । रौ इति रवोऽस्य रौरवः, रोरवीति रोरवस्तस्यायमिति वा । भीषणे वाच्यलिङ्गः । तत्र यथा–कौरवा रौरवा येषां तेऽपि किं वीरकुञ्जराः । नरकान्तरे यथा–स याति नरके घोरे रौरवे पच्यते ध्रुवम् । वल्लवः स्यात्सूपकारे गोदोग्धरि वृकोदरे । वल्लते सम्वृणोति वल्लवः । वडिवटीत्यवः (उ. ५१५) । सूपकारे यथा– वल्लवैर्वल्लपाकोऽपि कृतः स्यान्नृपवल्लभः । गोदोग्धरि यथा–कलशिमुदधिगुर्वीं वल्लवा लोडयन्तः । वृकोदरोऽपि विराटगृहे सूपकारत्वात् वल्लवः ॥७०४॥ वडवाऽश्वायां स्त्रीभेदे कुम्भदास्यां द्विजस्त्रियाम् । वड आग्रहणे सौत्रः । वडति वडवा । वडिवटीत्यवः (उ.५१५) । चतुर्ष्वर्थेषु । अश्वायां कुम्भदास्यां च यथा–पूर्णगर्भेव वडवा वडवा वत् (बत) सीदति । समग्रग्रामणी गेहविहितोदकपूरणा । स्त्रीभेदे यथा–नायिका त्रिधा मृगी वडवा हस्तिनी च । द्विजस्त्रियां यथा–वेदेषु वडवा जडा । वाडवं करणे स्त्रीणां वाडवौघे रसातले । वडवाया इदं वाडवम् । वडवानां समूहो वा । षष्ट्या समूहे इत्यण् ।६।२।९। स्त्रीणां करणं वात्स्यायनप्रसिद्धम् । वाडवौघे यथा–भृशमकृशकशाभिर्वाडवं ताडयन्ति । रसातलं पातालं । तत्र पुंक्लीबः ॥७०५॥ वाडवो विप्र और्वे च । वडवा अश्विनी ब्राह्मणी वा तदपत्यं वाडवः । शिवाद्यण् । द्वयोर्यथा–तृप्तिं न याति मन्ये श्राद्धशतेनाप्यग्निमुखो विप्रः । जलमपि वाडवमुखगं भस्मीभवतीति नो चित्रम् ॥ विद्रवो धीः पलायनम् । विद्रवत्यनेन विद्रवणं वा विद्रवः । धीर्बुद्धिः । तत्र

विभवो धननिर्वृत्योः शात्रवं शत्रुसंचये ।
शत्रुत्वे च शात्रवः सम्भवः कारणे जनौ ॥७०७॥
आधेयस्याधारानतिरिक्तत्वे च जिनेऽपि च ।
सचिवः सहायेऽमात्ये सुषवी कृष्णजीरके ॥७०८॥

यथा– अयो द्रवति विद्रवात् । पलायने यथा–त्वत्कीर्त्तनं द्रुतमुपद्रवविद्रवाय । विभावः स्यात्परिचये रत्यादीनां च कारणे । विभावनं विभावः । वागाद्यभिनयसहिताः । स्थायिव्यभिचारिलक्षणाश्चित्तवृत्तयो विभाव्यन्ते ज्ञायन्तेऽनेन वा । परिचये यथा–विभावेन विभूनां हि वैभवं स्यान्न संशयः । रत्यादेः कारणे यथा–बहवोऽर्था विभाव्यन्ते वागंगाभिनयाश्रयाः । अनेन यस्मात्तेन विभाव इति संज्ञितः ॥७०६॥ विभवो धननिर्वृत्योः । विभवत्यनेन विगमो भवस्य अत्रेति विभवः । निर्वृतिर्निर्वाणम् । द्वयोर्यथा–प्रभाते पादयोः स्पृष्टा प्रभाते शिरसा प्रभो । विभवं वितनोत्याशु विभवं च पदं नृणाम् । शात्रवं शत्रुसंचये । शत्रुत्वे च । शत्रूणां समूहः शात्रवम् । षष्ठ्या समूह इत्यण् । शत्रोर्भाव इति वा । युवादेरण् ।७।१।६७। द्वयोर्यथा– वितनोति न संग्रामे शात्रवं यस्य शात्रवम् । शात्रवः शत्रौ । शत्रुत्वे च शात्रवः । प्रज्ञादित्वादण् ।७।२।१६५। यथा–सैन्यं विजिग्यो युधि शात्रवाणाम् । सम्भवः कारणे जनौ । आधेयस्याधारानतिरिक्तत्वे च जिनेऽपि च । सम्भवत्यस्मात् सम्भूतिर्वा सम्भवः सम्भवनमिति वा । चतुर्ष्वर्थेषु । कारणं हेतुः । जनिरुत्पत्तिः । जिनस्तृतीयस्तीर्थंकरः । तेषु यथा–दिश्याद्वः सम्भवः सोऽयं निरस्तभवसम्भवः ॥७०७॥ आधेयस्य वस्तुन आधारात् अनतिरिक्तत्वमनाधिक्यम् । यथा–सम्भवति द्रोणः स्थाल्याम् । तत्र यथा-अस्मिन् क्षत्रियवंशजेन महतो वीर्यस्य नो सम्भवः । उपपत्तावपि मंख्वः । तत्र यथा–तेजस्तिमिरयोर्नास्ति सहावस्थानसम्भवः । समयेऽपि । सचिवः सहायेऽमात्ये । सचते सचिवः । पलिसचेरिवः (उ.५२२) सहाये यथा–धत्ते वक्षः कुचसचिवतामद्वितीयन्तु वक्त्रम् । अमात्ये यथा–तेन धूर्जगतो

१. शत्रौ पाण्डवो रसभावयोः । सम्भवो जनने हेतौ मेलके चारुजन्मनि ।

जीरके कारवेल्ले च सैन्धवः सिन्धुदेशजे ।
सिन्धुस्थे स्यादथादर्शष्टीकायां प्रतिपुस्तके ॥७०९॥
दर्पणे चाप्यथोड्डीशश्चण्डीशे शास्त्रभिद्यपि ।
उपांशुर्जापभेदे स्यादुपांशु विजनेऽव्ययम् ॥७१०॥
कर्कशो निर्दये क्रूरे कम्पिल्यककृपाणयोः ।
इक्षौ साहसिके कासमर्दके पुरुषे दृढे ॥७११॥

गुर्वी सचिवेषु निचिक्षिपे । **सुषवी कृष्णजीरके । जीरके कारवेल्ले च** । सुष्ठु सुनोति अचि गौरादित्वात् ङ्यां सुषवी त्रीण्यप्यौषधानि ॥७०८॥ **सैन्धवः सिन्धुदेशजे । सिंधुस्थे स्यात्** । सिंधुषु भवः सैन्धवः । सिन्धुदेशजे वाच्यलिङ्गः । सिन्धुस्थं लवणभेदः । तत्र पुंक्लीबः । सिन्धुदेशजे यथा–तं सैन्धवं क्षितिधवः सहसाधिरूढः । सिन्धूस्थे यथा– विडसौवर्चलसैन्धवहिंग्वजमोदायवक्षारम् । **अथादर्शष्टीकायां प्रतिपुस्तके। दर्पणेचापि** । आसमन्ताद् दृश्यतेऽस्मिन् आदर्शः टीका निरन्तरव्याख्या । तत्र प्रतिपुस्तके यथा–आदर्शदर्शितदिशा न शठा लिखन्ति ॥७०९॥ दर्पणे यथा–निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते । **अथोड्डीशश्चण्डीशे शास्त्रभिद्यपि** । उद्दिश्यते उड्डीशः । पृषोदरादित्वात् । चण्डीशे यथा–उड्डीशः पातु वश्चण्डो सनाथैः प्रमथैर्वृतः । (उड्डीशः पातु वश्चण्डी समाधैः प्रथमैर्वृतः ।) शास्त्रभेदे यथा–उड्डीशं यो न जानाति स रुष्टः किं करिष्यति । **उपांशुर्जापभेदे स्यात्** । उपाश्नुते उपांशुः । अशेराङ्पोन्तश्चेत्युः पुंसि । जापभेदः किंचित् स्फुरदोष्ठो जापः । यथा–जाप्यन्तु त्रिविधं प्रोक्तं वाचिकोपांशुमानसम् । **उपांशु विजनेऽव्ययम्** (ये) । विजने एकान्ते । वर्तमान-उपांशुशब्दोऽव्ययम् तत्र यथा–परिचेतुमुपांशुधारणम् कुशपूतं प्रवयास्तु विष्टरम् । पूर्वाचार्यानुरोधेन उपांशुशब्दस्यानेकार्थत्वं दर्शितम् ॥७१०॥ **कर्कशो निर्दये क्रूरे कम्पिल्यककृपाणयोः । इक्षौ साहसिके कासमर्दके परुषे दृढे** । कर्कोऽस्त्यस्य कर्कशः । लोमादित्वात् शः कर्कं श्यति वा । नवस्वर्थेषु [1] कम्पिल्यके कृपाणे इक्षौ कासमर्दके च पुंसि । परुषे गुणे पुंक्लीबः । तद्वति शेषेषु

१. सुग्रीवो वानराधिपे चारुग्रीवे सैन्धवः ।

कपिशौ सिल्हकश्यावौ कपिशा माधवी सुरा ।
कीनाशः क्षुद्रयमयोः कर्षकोपांशुघातिनोः ॥७१२॥
कुलिशो मत्स्यभित्पव्योः गिरिशो वाक्पतौ हरे ।
अद्रिराजेऽथ तुङ्गीशः शशाङ्के शशिशेखरे ॥७१३॥

वाच्यलिङ्गः । निर्दयो निष्कृपः । क्रूरः क्षुद्रः । कम्पिल्यकं रागद्रव्यभेदः । कृपाणः खड्गः । इक्षुः पुण्ड्रः । साहसिकोऽविमृश्यकर्ता । कासमर्दक औषधम् । परुषो दुःस्पर्शः । दृढो बली स्थूलो वा । निर्दये क्रूरे साहसिके परुषे दृढे च यथा–समराय निकामकर्कशं क्षणमाकृष्टमुपैति यस्य च । धनुषा सममाशु विद्विषां कुल–माशंकितभंगमानतिम् ॥७११॥ **कपिशौ सिल्हकश्यावौ** । कपिर्वर्णोऽस्त्यस्य कपिशम् । लोमादित्वात् शः । सिल्हको गन्धद्रव्यम् । श्यावे वर्णविशेषे पुंसि । तद्वति वाच्यलिङ्गः । तत्र यथा–चकाशे शालिकिंशारु कपिशा शामुखा शरत् । **कपिशा माधवी सुरा** । माधवी वासन्ती । सुरा हाला । द्वयोर्यथा–व्याकोशकोशकपिशां मधुपाः पिबन्ति । माधव्यां कपिशीत्यन्ये । **कीनाशः क्षुद्रयमयोः । कर्षकोपांशुघातिनोः** । कनति कीनाशः । कनेरीश्चात (उ. ५३४) इत्याशः । कीनं आममांसं अश्नाति वा । यमे पुंसि । अन्यत्र वाच्यलिङ्गः । राक्षसेऽपि । क्षुद्रः कृपणो लुब्धः कृतघ्नो वा । यदाह–लुब्धः कीनाशः स्यात् कीनाशोऽप्युच्यते कृतघ्नश्चयोऽश्नाति वाममांसं स कीनाशो यमश्चैव कीनाशस्तद्वतः क्षुद्र इति च । क्षुद्रे कर्षे च यथा–न क्षिपन्ति फलं क्षिप्रं कीनाशाः खलधाम सुक्षणाचूर्णबुसप्रायक्षोदो यत्र न जायते । यमे यथा–त्वदेनमुल्लंघितशासनं विधेर्विधेहि कीनाशनिकेतनातिथिम् । उपांशुघाती पररहस्यभेदी । छलघातुको वा (छलघातको वा) ॥ ७१२ ॥ **कुलिशो मत्स्यभित्पव्योः** । कुलिनंश्यति कुलिशः । कोलति वा । कुलिकनीति किशः कौलिश्यते वा । पवौ वज्रे पुंक्लीबः । तत्र यथा–परिशिशिलषुः क्षितिपतीन् क्षितीश्वराः कुलिशात्पारणगिरयो गिरीनिव । (यावत् वज्रेण न छिन्ना इति संबन्धः ।) **गिरिशो वाक्पतौ हरे । अद्रिराजे** । अद्रिराजे गिरामीशो गिरीशः । बाहुलकाद्दीर्घाभावः गिरेर्गिरीणां वा

[1]निस्त्रिंशो निर्घृणे खड्गे निर्देशः कथनाज्ञयोः ।
निर्वेशः स्यादुपभोगे मूर्च्छने वेतनेऽपि च ॥७१४॥
निवेशः सैन्यविन्यासे न्यासे द्रङ्गविवाहयोः ।
निदेशः स्यादुपकण्ठे शासने परिभाषणे ॥७१५॥

ईश इति वा । त्रिष्वपि यथा– दौरथ्यं गिरीशोऽपि न हर्तुमीशः । **अथ तुंगीशः । शशाङ्के शशिशेखरे**। तुङ्गी रात्रिगौरी वा तस्याः ईशस्तुङ्गीशः । तुङ्गीशश्चन्द्रो विद्यतेऽस्येति वा । अभ्रादित्वादः । शशिशेखरः शम्भुः ॥७१३॥ **निस्त्रिंशो- निर्घृणे खड्गे** । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः । नञ् व्ययात् संख्याया डः । निर्घृणे तूपचारात् । तत्र वाच्यलिङ्गः द्वयोर्यथा–द्विषद्विनाशनिस्त्रिंशे निस्त्रिंशे यस्य संयति । **निर्देशः कथनाज्ञयोः** । निर्देशनम् निर्देशः । द्वयोर्यथा– लघुसंग्रहकारी च साधुशब्दप्रसिद्धकृत् । निर्देशः प्रथते देव तवायं पाणिनेरिव ॥ **निर्वेशः स्यादुपभोगे मूर्च्छने वेतनेऽपि च** । निर्विश्यते भुज्यते निर्विशत्यनेन निर्वेशः। उपभोगे यथा–संसारे नास्ति निर्वेशः सद्भिः सत्कथनात्परः। सर्वकालं समरसे यत्र तृप्तिर्न जायते ॥ मूर्छनं मोहः। वेतने कर्ममूल्ये यथा–क्रीडासरस्यामथ सन्नताङ्ग्यो हाराद्यलङ्कारशतानि ता ये । तास्तत्यजुर्वास्तव कान्तिशिल्पकारस्य निर्वेशमिव स्मरस्य ।। प्रसारेऽपि मंखः । यथा–पतितस्य शुद्धसलिले तैलस्य भवेद् भृशं हि निर्वेशः ॥७१४॥ **निवेशः सैन्यविन्यासे न्यासे द्रंगविवाहयोः** । निवेशनं निवेशः निवसन्तेऽत्र वा । सैन्यविन्यासे यथा–न शून्यतामगमदसौ निवेशभूः प्रभुततां दधति बले चलत्यपि । न्यासमात्रे यथा–निवेशः स्वःसिन्धोस्तुहिनगिरिवीथीषु जयति । द्रङ्गो नगरम् । तत्र यथा–द्विषां निवेशेषु चरप्रवेशः कार्यो नृपैः । विवाहे यथा–विनिर्ममे सुरेशेन निवेशः केशवश्रियोः । **निदेशः स्यादुपकण्ठे शासने परिभाषणे** । निकटो देशो निदेशः । निदेशनं वा । उपकण्ठं समीपम् । शासनमाज्ञा । परिभाषणं संकथा । उपकण्ठे परिभाषणे च यथा–वेश्यानिदेशे विवशो न कस्कः (कस्वः)। शासने यथा–

१. दुःस्पर्शस्तु खरस्पर्शे कण्टकायां यवासके निस्त्रिंशो

नीकाशो निश्चये तुल्ये प्रकाशः स्फुटहासयोः ।
उद्योतेऽतिप्रसिद्धे च प्रदेशो देशमात्रके ॥७१६॥
भित्तौ मानविशेषे च पलाशः किंशुकेऽस्त्रपे ।
हरिते पलाशं पत्रे पिंगाशं जात्यकाश्चने ॥७१७॥

तौ निदेशकरणोद्यतो पितुः । **नीकाशो निश्चये तुल्ये** । नितरां काशते नीकाशः ॥७१५॥ नामिनः काशे इति दीर्घः । तुल्ये वाच्यलिङ्गः । तत्र यथा–यशः शशाङ्कनीकाशं भृशं हासयते दिशः । **प्रकाशः स्फुटहासयोः । उद्योतेऽतिप्रसिद्धे च** । प्रकाशते प्रकाशनं वा प्रकाशः । स्फुटातिप्रसिद्धयोर्वाच्यलिङ्गः । स्फुटे यथा–उन्निद्रप्रियकमनोरमं रमण्याः संरेजे सरसि वपुः प्रकाशमेव । हासे यथा–सप्रकाशो शरत्काशैरं भोजैः स्मेरलोचना । उद्योते यथा– ऐन्द्र्यामसौ रोध्ररजःसवर्णो यथा प्रकाशो दिशि दृश्यतेऽत्र (दिदृश्यतेऽत्र)। अतिप्रसिद्धे यथा–श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः । **प्रदेशो देशमात्रके । भित्तौ मानविशेषे च** । प्रदिश्यतेऽसौ अनेन वा प्रदेशः । देशमात्रके यथा– पितुः प्रदेशास्तव देवभूमयः ॥७१६॥ भित्तिः कुड्यम् । मानविशेषे यथा–साङ्गुष्ठया प्रदेशिन्या श्रवणौ समुपस्पृशेत् । अत्र हि प्रदेशो मानविशेषः । परिच्छेद्यत्वेन विद्यते यस्या इति कृत्वा तर्जनीप्रदेशिनीत्युच्यते । प्रादेश इति तु प्रज्ञादित्वात् स्वार्थे अण् । स्थानविशेषेऽपि मंखः । त्वत्प्रदेशपरिमार्जनपूतः पाणिरीश्वर कदा मम भूयात् । **पलाशः किंशुकेऽस्त्रपे हरिते** । पलति पलाशः । पलेराशः (उ. ५३३) पलं मांसमश्नाति वा । किंशुकस्त्रिपत्रकः । अस्त्रपो राक्षसः । हरितो नीलकपिशो वर्णस्तत्र पुंसि । तद्वति वाच्यलिङ्गः । त्रिष्वपि यथा– यत्र पलाशा बहवः पदे पदे प्रोल्लसत्पलाशशिखाः कथमिव संचरसि वने तत्राऽस्मिन्न द्वितीयस्त्वम् । **पलाशं पत्रे** । यथा– वहति स्फुटमेकमेव ते वचनं शाकपलाशदेश्यताम् । **पिंगाशं जात्यकाश्चने** । पिंगत्व-

१. पलाशं छेदनेर मृतम् पक्षीशो गरुडे विष्णौ पिङ्गाशम् ।

पिंगाशौ मत्स्यपल्लीशौ पिंगाशी स्यात्तु नीलिका ।
बालिशस्तु शिशौ मूर्खे भूकेशः शैवले वटे ॥७१८॥
लोमशो[1] लोमयुक्तेऽवौ लोमशा शाकिनीभिदि ।
महामेदा काकजङ्घा शृगाली जटिलासु च ॥७१९॥
कासीसेऽतिबला शूकशिम्बी मर्कटिकासु च ।
विवशः स्यादवश्यात्माऽनिष्टदुष्टमतिश्च यः ॥७२०॥
विकाशो रहसि व्यक्ते विपाशः पाशवर्जिते ।
विपाशा तु शरिद्भेदे सदेशोऽन्तिकदेशयोः ॥७२१॥

मश्नुते पिंगाशम् ॥७१७॥ **पिंगाशौ मत्स्यपल्लीशौ** । मत्स्यो मत्स्यभेदः । पल्लीशः पल्लीपतिः । **पिंगाशी स्यात्तु नीलिका** । नीलिका औषधिः । **बालिशस्तु शिशौ मूर्खे** । बलते बालिशः । बलेर्णिद्वेतोशः (उ. ५३६) । मूर्खे वाच्यलिङ्गः । द्वयोर्यथा— निरर्थकं परस्यापि गृहे विशति बालिशः । **भूकेशः शैवले वटे** । भुवः केश इव भूकेशः । शैवले पुंक्लीबः ॥७१८॥ **लोमशो लोमयुक्ते । (लोमशो लोमसंयुते) । अवौ** । लोमानि सन्त्यस्य लोमशः । लोमादित्वाच्छः लोमानि श्यति वा । लोमयुक्ते वाच्यलिङ्गः । तत्र यथा—स्तनकेशवती स्त्री स्यात् लोमशः पुरुषः स्मृतः । अवौ यथा— निर्मलः कम्बलश्लक्ष्णैर्यूतो लोमशरोमभिः । **लोमशा शाकिनीभिदि । महामेदा काकजङ्घा शृगालीजटिलासु च । कासीसेऽतिबलाशूकशिम्बी मर्कटिकासु च** ॥ शकिनीभिदि शृगाल्यां च यथा— जृम्भते लोमशा निशि । कासीसं धातुभेदः । शेषाः षडोषधयः ॥७१९॥ **विवशः स्यादवश्यात्माऽनिष्टदुष्टमतिश्च यः** ॥७२०॥ विगतो वश आयत्तत्वं यस्य स विवशः । विरुद्धं वष्टिकामयते वा वाच्यलिङ्गः । द्वयोर्यथा— अथ मोहपरायणा सतो विवशा कामवधूर्विबोधिता ॥७२०॥ **विकाशो रहसि व्यक्ते** । विकाशते विकाशः । एकदेशविकृतत्वात् वीकाशोऽपि । व्यक्ते वाच्यलिङ्गः । द्वयोर्यथा— उपविश्य विकाशेषु रहस्यानि प्रकाशयेत् । **विपाशः पाशवर्जिते** । विगतः पाशोऽस्य विपाशः । वाच्यलिङ्गः । यथा— विपाशमाधाय सकीरपाशम् ।

१. भूकेशी वल्वजेषु स्यात् लोमसो०

सदृशं तूचिते तुल्ये सङ्काशः सदृशोऽन्तिके ।
सम्वेशः शयने पीठे सुखाशस्तु प्रचेतसि ॥७२२॥
शुभाशे राजतिनिशे हताशो निष्कृपे खले ।
अध्यक्षोऽधिकृतेऽन्वक्षेऽभीषु प्रग्रहरोचिषोः ॥७२३॥

विपशा तु सरिद्भिदे । वसिष्ठं विपाशयति मोक्षमापादयति विपाशा । यथा— वसिष्ठसंसेविततीरदेशाधुनी धुनीते कलुषं विपाशा । **सदेशोऽन्तिकदेशयोः** । समानो देशोऽस्य सदेशः । समानस्य धर्मादिष्विति । समानस्य सभावः । अन्तिके वाच्यलिङ्गः । द्वयोर्यथा—नद्या सदेशे गिरिगह्वरेषु ॥७२१॥ **सदृशं तूचिते तुल्ये** । समानमिव दृश्यते सदृशम् । तदाद्यनेतिटकिदृग्दृशदक्षे इति समानस्य सभावः । वाच्यलिङ्गः । उचिते यथा— मां लोकवादश्रणादहासोः, श्रुतस्य किं तत्सदृशं कुलस्य । तुल्ये यथा—सरोजसदृशीं दृशाम् (दृशम्) । **संकाशः सदृशोऽन्तिके** । समं संगतं वा काशते संकाशः । वाच्यलिङ्गः । सदृशे यथा— वस्त्रायन्ते नदीनां सितकुसुमधराः शक्रसंकाशकाशाः । अन्तिके निकटे यथा— राजसंकाशमासाद्य कश्चो न स्वं प्रकाशयेत् । **सम्वेशः शयने पीठे** । सम्वेशनम् संविशन्त्यत्र वा सम्वेशः । शयने यथा—अथ प्रदोषे दोषज्ञः सम्वेशाय विशांपतिः (रतिम्) । पीठे यथा— सम्वेशे समुपाविशत् । **सुखाशस्तु प्रचेतसि । शुभाशे राजतिनिशे** । सुखाढ्यायां पुरि शेते सुखाशः । कचिदिति डः सुखहेतुराशाऽस्य वा । सुष्ठु खमश्नुते वा । प्रचेता वरुणः ॥७२२॥ शुभाशः शुभेच्छः । तत्र वाच्यलिङ्गः । राजतिनिशो वृक्षः । **हताशो निष्कृपे खले** । हता आशा यस्य स हताशः । वाच्यलिङ्गः । द्वयोर्यथा—हतो हताशेन शिशुर्यमेन । अथ षान्ताः । **अध्यक्षोऽधिकृतेऽन्वक्षे** अक्षेषु आयस्थानेष्वधिकृतः । अधिकान्यक्षाण्यस्य अध्यक्षणोति वा । अक्षैरधिगतो वा । अध्यक्षः वाच्यलिङ्गः । अधिकृतो नियुक्तः । अन्वक्षं प्रत्यक्षम् । द्वयोर्यथा— शुल्काध्यक्षैः स्वयमहि कृतं भाण्डमध्यक्षमेतत् । **अभीषुः प्रग्रहरोचिषोः** । अभिष्यते अभीषुः । "पृकाहृषीति' (उ० ७२९ ॥) उः । पुंसि । प्रग्रहो

१. नष्टवाञ्छे हुताशस्तु पावके बहुभोजिनी । अध्यक्षो०

आरक्षो रक्षके हस्तिकुम्भाधश्चामिषं पले ॥
सुन्दराकार रूपादौ सम्भोगे लोभलञ्चयोः ॥७२४ ॥
आकर्षः पाशके धन्वाभ्यासाङ्गे द्यूत इन्द्रिये ॥
आकृष्टौ शारिफलकेऽप्युष्णीषं लक्षणान्तरे ॥ ७२५ ॥

वल्गादि । रोचिर्मयूखः तत्र यथा—अभीषूणां नरेन्द्रस्य योधानामुदयैषिणः । अभीषूणां चमूर्यस्य (च सूर्यस्य) वैमुख्यं न कदाप्यभूत् । आरक्षो रक्षके हस्तिकुम्भाधश्च । आरक्षति आरक्ष्यते वा आरक्षः । रक्षके वाच्यलिङ्गः । तत्र यथा—आरक्षाद्भय मुत्पन्नं, नराणां को हि रक्षति । हस्तिकुम्भाधो भागे-यथा—आरक्षमग्नमवधूय सृणिं सृणिं सितासमेकः पलायत जवेन कृतार्तनादः । आमिषंपले । सुन्दराकाररूपादौ सम्भोगेलोभलञ्चयोः । अम्यते आमिषं, "अमिमृभ्यां णिदितीषः" (उ० ५४९) ॥ आमिषतिवा । पञ्चस्वर्थेषु पुंक्लीबः । पले मांसे यथा—उपानयत्पिण्डमिवामिषस्य । सुन्दराकाररूपादौ भोग्यवस्तुनि यथा—आदास्यमानः प्रमदामिषं तत् । सम्भोगे लोभलञ्चायाञ्च यथा—आमिषार्थे भवेद्युद्धम् ॥७२४॥ आकर्षः पाशके धन्वाभ्यासाङ्गेद्यूत इन्द्रिये । आकृष्टौ (आकृष्टे)—(आकृष्टौ) शारिफलकेऽपि । आकृष्यतेऽसौ आकर्षणम् । आकर्षन्ति अस्मिन्न् वा आकर्षः । पाशको देवनः । धन्वाभ्यासाङ्गं धनुष्काणां बाहु दृढी करणार्थं व्वालुकादिभृतकुतपादियन्त्रं । द्यूतं दुरोदरं । शारिफलकं अष्टापदः । चतुर्ष्वपि यथा—आकर्षात्सदुराकर्षः सखे मास्मकृथाग्रहम् । इन्द्रियं चक्षुरादि । आकृष्टौ यथा—आकर्षं जनमिव चक्षुषो जनानाम् । अन्ये तु पाशकशब्देन उष्ट्राणां दारूमयं रज्जु बन्धनार्थं पादकटकमुच्यते इत्याहुः यथा—आकर्षेणेव विभो शब्दादिसुदीर्घे रज्जुविषयेण मनसा पशुमिव परवशममृतेश विपाशयाशुत्वम् । उष्णीषं लक्षणान्तरे । शिरोवेष्टे किरीटे च । उषति अशुभं उष्णीषम् । "उष्णेर्णोन्तश्चतीषः" (उ० ५५६) ॥ पुंक्लीबः । लक्षणान्तरं देहलक्षणविशेषः । तत्र यथा—मौलिच्छत्रे महेशस्य जगदीशित्वशं-

शिरोवेष्टे किरीटे च कलुषं त्वाविलांहसोः ॥
कल्माषो राक्षसे कृष्णे शबलेप्यथ किल्विषम् ॥७२६ ।
पापे रोगेऽपराधे च कुल्माषं स्यात्तु काञ्चिके ।
कुल्माक्षोऽन्नर्द्ध स्विन्ने धान्ये गवाक्षो जालके कपौ ॥ ७२७ ॥

सिनि । वृत्तमुत्तुङ्ग मुष्णीषं शिश्रिये कलशश्रियम् ॥७२५॥ शिरोवेष्टे यथा—ऋत्विजोलो हि तोष्णोषाः प्रविशन्तु यथाक्रमम् । किरीटे यथा-विकीर्णमुष्णोषमणिप्रभाभिः । कलुषं त्वाविलांहसोः । कल्पते (कल्यते) कलुषं । ऋं "प महि हनी त्युषः" (उ० ५५७) ॥ आविले वाच्यलिङ्गः । तत्र यथा—विभिन्नशंरवः कलुषी भवन् मुहुर्मदेन दन्तीव मनुष्यधर्मणः । अंहसि पापे यथा-धुनी धुनीते कलुषं विपाशा । कल्माषो राक्षसे कृष्णे शबलेऽपि । कल्पते (कल्यते) कल्माषः । "कुलेश्च माषक्,, (उ० ५६३) । राक्षसो राक्षसभेदः । कृष्णशबलयोर्वर्णयोः । पुंसि तद्वपि वाच्यलिङ्गः । कृष्णे यथा—सकल्मा षः कण्ठस्तवन कुरुते न श्रिपमहो विकारोऽपि श्लाध्यो भुवनभयभंगव्यसनिनः । शबले यथा—सरोजाक्षीं कक्षा मणिकिरण कल्माष वपुषं । अथ किल्विषम् । पापे रोगेऽपराधे च । कल्यते किल्विषम् । "कलेः किल्वेचेतीषः" (उ० ५५१) ॥७२६॥ पापे यथा सभायां न प्रवेष्टव्यं वक्तव्यं नाऽसमंजसम् सभा या न प्रवेष्टव्या वक्तव्यं वा समंजसम् । अब्रुवन् विब्रुवन् वापि नरो भवति किल्विषी । रोगो गद : । अपराधे यथा तस्य किल्विषमपेक्षसेऽथ चेन्नो भवेत्सखि स एव ते प्रियः । स्नेहवृत्तिमनुरुध्यसे स्फुटं गृह्यतां निरपराध एव सः । कुल्माषं स्यात्तु काञ्चिके । कोलति कुल्माषं । "कुलेश्च माषक्,,(उ०५६३)यथा—कुल्माषपाणं प्रणिहन्ति वित्तं कुल्माक्षोऽर्द्ध स्विन्नधान्ये ॥अर्धस्विन्नधान्यं माषादि । तत्र यथा—भ्रमन्ना सादयामास. कुल्माषान् कुत्रचिद्गृहे । गवाक्षो जालके कपौ ॥ गोरक्षीव गवाक्षः ॥ "अक्ष्णोऽप्राण्यङ्गे (७।३।८५) इत्य. समासान्तः ॥ गोरिवाक्षस्य वा "सक्थ्यक्ष्णः स्वाङ्गे " (७।३।१२६) इति टः ॥ जालके यथा—विद्युद्गर्भस्तिमितनयनां त्वत्सनाथे गवाक्षे वक्तुं धीरस्तनितवचनैर्मानिनीनां प्रक्रमेथाः । कपिः प्लवगविशेषः । यथा—गवो गवाक्षो—गवयः । शरभो गन्ध-

पिंगाशौ मत्स्यपल्लीशौ पिंगाशी स्यात्तु नीलिका ।
बालिशस्तु शिशौ मूर्खे भूकेशः शैवले वटे ॥७१८॥
लोमशो[1] लोमयुक्तेऽवौ लोमशा शाकिनीभिदि ।
महामेदा काकजङ्घा शृगाली जटिलासु च ॥७१९॥
कासीसेऽतिबला शूकशिम्बी मर्कटिकासु च ।
विवशः स्यादवश्यात्माऽनिष्टदुष्टमतिश्च यः ॥७२०॥
विकाशो रहसि व्यक्ते विपाशः पाशवर्जिते ।
विपाशा तु शरिद्भेदे सदेशोऽन्तिकदेशयोः ॥७२१॥

मश्नुते पिंगाशम् ॥७१७॥ पिंगाशौ मत्स्यपल्लीशौ । मत्स्यो मत्स्यभेदः । पल्लीशः पल्लीपतिः । पिंगाशी स्यात्तु नीलिका । नीलिका औषधिः । बालिशस्तु शिशौ मूर्खे । बलते बालिशः । बलेर्णिद्वेतोशः (उ. ५३६) । मूर्खे वाच्यलिङ्गः । द्वयोर्यथा– निरर्थकं परस्यापि गृहे विशति बालिशः । भूकेशः शैवले वटे । भुवः केश इव भूकेशः । शैवले पुंक्लीबः ॥७१८॥ लोमशो लोमयुक्ते । (लोमशो लोमसंयुते) । अवौ । लोमानि सन्त्यस्य लोमशः । लोमादित्वाच्शः लोमानि श्यति वा । लोमयुक्ते वाच्यलिङ्गः । तत्र यथा–स्तनकेशवती स्त्री स्यात् लोमशः पुरुषः स्मृतः । अवौ यथा– निर्मलः कम्बलश्लक्ष्णैर्व्यूतो लोमशरोभभिः । लोमशा शाकिनीभिदि । महामेदा काकजङ्घा शृगालीजटिलासु च । कासीसेऽतिबलाशूकशिम्बी मर्कटिकासु च ॥ शकिनीभिदि शृगाल्यां च यथा– जृम्भते लोमशा निशि । कासीसं धातुभेदः । शेषाः षडोषधयः ॥७१९॥ विवशः स्यादवश्यात्माऽनिष्टदुष्टमतिश्च यः ॥७२०॥ विगतो वश आयत्तत्वं यस्य स विवशः । विरुद्धं वष्टि कामयते वा वाच्यलिङ्गः । द्वयोर्यथा– अथ मोहपरायणा सतो विवशा कामवधूर्विबोधिता ॥७२०॥ विकाशो रहसि व्यक्ते । विकाशते विकाशः । एकदेशविकृतत्वात् वीकाशोऽपि । व्यक्ते वाच्यलिङ्गः । द्वयोर्यथा– उपविश्य विकाशेषु रहस्यानि प्रकाशयेत् । विपाशः पाशवर्जिते । विगतः पाशोऽस्य विपाशः । वाच्यलिङ्गः । यथा– विपाशमाधाय सक्षीरपाशम् ।

१. भूकेशी वल्वजेषु स्यात् लोमसो०

सदृशं तूचिते तुल्ये सङ्काशः सदृशोऽन्तिके ।
सम्वेशः शयने पीठे सुखाशस्तु प्रचेतसि ॥७२२॥
शुभाशो राजतिनिशे हताशो[1] निष्कृपे खले ।
अध्यक्षोऽधिकृतेऽन्वक्षेऽभीषु प्रग्रहरोचिषोः ॥७२३॥

विपशा तु सरिद्भेदे । वसिष्टं विपाशयति मोक्षमापादयति विपाशा । यथा– वसिष्ठसंसेविततीरदेशाधुनी धुनोते कलुषं विपाशा । सदेशोऽन्तिकदेशयोः । समानो देशोऽस्य सदेशः । समानस्य धर्मादिष्विति । समानस्य सभावः । अन्तिके वाच्यलिङ्गः । द्वयोर्यथा–नद्या सदेशे गिरिगह्वरेषु ॥७२१॥ सदृशं तूचिते तुल्ये । समानमिव दृश्यते सदृशम् । तदाद्यनेतिटक्किदग्दृशदक्षे इति समानस्य सभावः । वाच्यलिङ्गः । उचिते यथा– मां लोकवादश्रणादहासोः, श्रुतस्य किं तत्सदृशं कुलस्य । तुल्ये यथा–सरोजसदृशीं दृशाम् (दृशम्) । संकाशः सदृशोऽन्तिके । समं संगतं वा काशते संकाशः । वाच्यलिङ्गः । सदृशे यथा– वस्त्रायन्ते नदीनां सितकुसुमधराः शक्रसंकाशकाशाः । अन्तिके निकटे यथा– राजसंकाशमासाद्य कस्को न स्वं प्रकाशयेत् । सम्वेशः शयने पीठे । सम्वेशनम् संविशन्त्यत्र वा सम्वेशः । शयने यथा–अथ प्रदोषे दोषज्ञः सम्वेशाय विशांपतिः (रतिम्) । पीठे यथा– सम्वेशे समुपाविशत् । सुखाशस्तु प्रचेतसि । शुभाशे राजतिनिशे । सुखाढ्यायां पुरि शेते सुखाशः । कचिदिति डः सुखहेतुराशाऽस्य वा । सुष्ठु खमश्नुते वा । प्रचेता वरुणः ॥७२२॥ शुभाशः शुभेच्छः । तत्र वाच्यलिङ्गः । राजतिनिशो वृक्षः । हताशो निष्कृपे खले । हता आशा यस्य स हताशः । वाच्यलिङ्गः । द्वयोर्यथा–हतो हताशेन शिशुर्यमेन । अथ षान्ताः । अध्यक्षोऽधिकृतेऽन्वक्षे अक्षेषु आयस्थानेष्वधिकृतः । अधिकान्यक्षाण्यस्य अध्यक्ष्णोति वा । अक्षैरधिगतो वा । अध्यक्षः वाच्यलिङ्गः । अधिकृतो नियुक्तः । अन्वक्षं प्रत्यक्षम् । द्वयोर्यथा– शुल्काध्यक्षैः स्वयमहि कृतं भाण्डमध्यक्षमेतत् । अभीषुः प्रग्रहरोचिषोः । अभिष्यते अभीषुः । "पृकाहृषीति' (उ० ७२९ ॥) उः । पुंसि । प्रग्रहो

१. नष्टवाञ्छे हुताशस्तु पावके बहुभोजिनी । अध्यक्षो०

गवाक्षी त्विन्द्रवारूण्यां गण्डूषो मुख पूरणे ॥
गजस्य च कराङ्गुल्यां प्रसृत्या प्रमितेऽपि च ॥७२८॥
गोरक्षो गोपनारङ्गौ जिगीषातु जय स्पृहा ॥
व्यवसायः प्रकर्षश्च तरीषः शोभना कृतौ ॥७२९॥
भेलेऽब्धौ व्यवसाये च ताविषोऽब्धि सुवर्णयोः ॥
स्वर्गे च नहुषो राज विशेषे नाग भिद्यपि ॥७३०॥
निकषः शाणफलके निकषा यातु मातरि ॥
निमेषनिमिषौनेत्र मीलने काल भिद्यपि ॥७३१॥

मादनः ॥ ७२७ ॥ **गवाक्षीत्विन्द्रवारुण्यां** । इन्द्रवारुणी लताभेदः । **गण्डूषो मुखपूरणे॥ गजस्य च कराङ्गुल्यां प्रसृत्या प्रमितेऽपि च ॥** गण्डति गण्डूषः । खलिफलीत्युषः मुख पूरणे स्त्रीपुंसः । तत्र यथा—वत्से मा बहु निःश्वसीः कुरु सुरागंडूषमेकं शनैः । गजस्य कराङ्गुल्यां यथा—ददौ सरः पङ्कजरेणुगन्धिगजाय गण्डूषजलं करेणुः । प्रसृत्या प्रमिते यथा—अगस्तिः पातु वो यस्य गण्डूषोऽभूत्-पयोनिधिः ।। ७२८।। **गोरक्षो गोपनारङ्गौ।** गां रक्षति गोरक्षः । गोपे वाच्यलिङ्गः । तत्र यथा –गोरक्षनाथः क्षिणुता मघानि । नारङ्गो वृक्षः । **जिगीषा तु जयस्पृहा । व्यवसायः प्रकर्षश्च ।** जेतुमिच्छा जिगीषा । जयस्पृहायां यथा—षड्विधं-बलमाधाय प्रतस्थे दिग्जिगीषया । व्यवसाये यथा—सुप्रज्ञस्याजिगीषस्य कार्यसिद्धिः सुदुष्करा । प्रकर्षः उत्कर्षः। **तरीषः शोभना कृतौ । भेलेऽब्धौ व्यवसाये च ।** तरत्यनेन तरीषः। "कृतॄभ्यामीषः (उ०५५३) ।।शोभना कृतौ वाच्यलिङ्गः ॥ ७२९:॥ भेलः प्लवः । अब्धिः समुद्रः । **व्यवसायः कार्यतात्पर्यम् । ताविषोऽब्धिसुवर्णयोः । स्वर्गे च ।** तवीति ताविषः । "तवेर्वा" इति ईषः ॥ (उ०५५०) त्रिष्वपि यथा—रत्नाश्रयो निरीहाणां ताविषोऽपिविषोपमः । **नहुषो राजविशेषे नागभिद्यपि** नह्यते नहुषः । "ऋपॄ नहि हनि उषः (उ०५५७) राज विशेषे यथा—अधर्माच्चैव नहुषः प्रतिपेदे रसातलम्। नागभित् सर्प्पभेदः ।७३०। **निकषः शाणफलके** । निकषन्त्यत्र निकषः ।" गोचर संचर–षम् " ।५।

प्रत्यूषः स्याद्वसो प्रातः प्रदोषः कालदोषयोः ॥
परुषं कर्बुरे रूक्षे स्यान्नीष्ठुर वचस्यपि ॥७३२॥
पीयूषममृते नव्य सूतधेनोः पयस्यपि ॥
पुरुषस्त्वात्मनि नरे पुन्नागे चाथ पौरुषम् ॥७३३॥

१।५५।। इति षः°यथा—प्रादुःषन्ति विशेषाहेम्नां निकषोपलं (निकाषा) **निकषा यातुमातरि** । यातूनि रक्षांसि. तेषां माता तत्र यथा—दितिरदितिर्दनुकद्रुनिकषावनिताश्च मातरः प्रोक्ताः । **निमेष निमिषौ नेत्रमीलने काल भिद्यपि** । निमेषणं निमेषं धञ । "स्थादिभ्यः कः ,,५।३।८२। इति के निमिषः । कालभेदे तूपचारात् । नेत्रमीलने यथा—आराधितोद्दामतुरङ्गभिश्चक्रे प्रजाः स्वाः सनिमेषचिह्नाः । अनिमेषमविरामा रागिणां सर्वरात्रं नवनिधुवन लोलाकौतुकेनाभिवीक्ष्य । कालभिदि यथा—निमेष मात्रादवधूय च व्यथां । सहोत्थितः सैनिकहर्षनिः स्वनैः । एवं निमिषोऽपि ॥७३१॥ **प्रत्यूषः स्याद्वसौप्रातः** । प्रत्यूषति रुजति प्रत्यूषः । अष्टौ वसवः तेषु मध्ये एकस्य प्रत्यूष इति नाम प्रातः प्रभाते पुंक्लीबः । तत्र यथा—प्रत्यूषेषु स्फुटितकमला मोदमैत्रो कषायः । **प्रदोषः काल दोषयोः**। प्रारब्धा दोषा अत्र प्रकृष्टो वा दोषः प्रदोषः । दोषवत्यपि मखः । त्रिष्वपि यथा—तमः स्वभावास्तेऽप्येनं प्रदोष मनु गामिनः । **परुषं कर्बुरे रुक्षेस्यान्निष्ठुर वचस्यपि** ॥ पृणाति परुषं ऋपॄ नहि हानि—उषः (उ०५५७) इत्युषः। वाच्यलिङ्गः सदशोऽपि मङ्खः कर्बुरे सदशे च यथा-विरक्तसन्ध्यापरुषं पुरस्ताद्यथा रजः पार्थिवमुज्जिहीते रुक्षे यथा—स्नेहसंगेपि पारुष्यं वर्त्तते ते करोमि किं । निष्ठुरे वचसि यथा—अपि सपत्नजनेन च तेन वाग् परुषा परुषाक्षरमीरिता ॥७३२॥ **पीयूसममृते नव्यसूतधेनोः पयस्यपि (धेनु पयस्यपि)** ॥ पीयिः सौत्रः (पीयः सौत्रः) । पीय्यते पीयूषं । "खलि पलोत्युषः" (उ०५६०) अमृते यथा—अपि सुमुखिमयूषाः पश्य प यूषरश्मेः । नव्यसूतधेनोः पयसि यथा—पीयूषगण्डूषशतानि पायं पायं स्वदन्ति व्रजवासि गोपाः ॥ **पुरुषस्त्वात्मनि नरे पुन्नागे च** । पृणाति पुरुष "विदिपृभ्यां किदित्युषः (उ०५५८) ॥ पुरिशयनाद्वा पृषोदरादित्वात् ॥

ऊर्द्ध्वविस्तृत दोः पाणि पुरुषोन्मान तेजसोः ॥
पुंसः कर्मणि भावे च महिषी नृप योषिति ॥७३४॥
सैरिभ्यामौषधीभेदे मारिषस्त्वार्यशाकयोः ॥
मारिषा दक्षजननी मृगाक्षी मृगलोचना ॥७३५॥

आत्मनि यथा—तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः । नरे यथा—तस्यैव कोपि भुवनैकपुरुष पुरुषस्तपस्यतितपन्जगतीम् । पुन्नागो वृक्षः । पञ्चहस्त प्रमाणेऽपि मङ्कः । यथा—उद्ध्वबाहुरूद्ध्वपदः । प्रपदाभ्यां प्रतिष्ठितः । पञ्चारत्निर्दशपदः पुरुषो विंशशतांगुलः । अथ पौरुषम् ॥ ऊर्द्ध्व विस्तृत दोः पाणि पुरुषोन्मान तेजसोः ॥ पुंसः कर्मणि भावे च ॥ पुरुषः प्रमाणमस्य पौरुषम् ॥७३३॥ "हस्तिपुरुषाद्वाण्" पुरुषस्येदं वा । पुरुषस्य भावः कर्म वा ।"पुरुषहृदयादसमासे" ७।१।७०। इत्यण् उर्द्ध्व विस्तृत दोः पाणि पुरुषोन्माने वाच्यलिङ्गः । तत्र यथा—कारयेत्पौरुषीं वेदिं दर्शिकीमग्निसंयुताम् । तेजसिपराक्रमे यथा—वितन्यते तेन नयेन पौरुषं ॥ पुरुषस्य कर्मणि भावे च यथा—बुद्धिपौरुष हीनानां जीविके ति बृहस्पतिः ॥ महिसी नृप योषिति । सैरिभ्यांमौषधी भेदे । मह्यते महिषी । "मह्यविभ्यां टित् (उ०५४७) इती षः । त्रिष्वपि यथा-आक्रान्तं महिषं भिरेव शयनं त्वद्विद्विषां मन्दिरे राजन् सैव चिरन्तनप्रणयिनी शून्येऽपि राज्यस्थितिः ॥७३४॥ मारिषस्त्वार्यशाकयोः ॥ मृश् हिंसायां, मृणाति मारिषः । "अमिमृभ्यांणि दितीसः" (उ०५४९) ॥ आर्ये यथा—मारिष भवतः कुतूहलमीदृशमेवैतत् शाकं शाकभेदः । मारिषा दक्षजननी । दक्षस्यमुनेर्जननी दक्ष जननी । मृगाक्षी मृगलोचना ॥ त्रियामेन्द्रवारुणी च ॥ मृगस्येव अक्षिणी अस्याः मृगाक्षी ॥ "सवध्यक्षणः— स्वाङ्गे ७-३-१२६" इति टेङीः । मृगो नक्षत्रभेदोऽक्षि अस्या वा ।"अक्ष्णोऽप्राण्यङ्गे" ७-३-८४इति अतिगौरादित्वाङ्गीः । मृगालोचनायां यथा केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्वा च कण्ठाटवीम् ॥७३५॥ त्रियामा रात्रिः ।

त्रियामेन्द्रवारुणी च रक्ताक्षो रक्तलोचने ॥
चकोरे महिषे क्रूरे पारावतेऽथ रौहिषः ॥७३६॥
मृगकतृण मत्स्येषु विश्लेषस्तु वियोजने ॥
विधुरे चाथ शुश्रूषोपासनाश्रवणेच्छयोः ॥७३७॥
शैलूषः स्यान्नटे बिल्वे संहर्षः पवने मुदि ॥
स्पर्द्धायां च समीक्षातु ग्रन्थभेदे समीक्षणे ॥७३८॥

इन्द्रवारुणी लताभेदः । रक्ताक्षो रक्तलोचने ॥ चकोरे महिषे क्रूरे पारावते (पारापेते) । रक्ते अक्षिणी यस्य स रक्ताक्षः । रक्तलोचने क्रूरे च वाच्यलिङ्गः । तयोर्यथा—विपक्ष वीक्षणाज्जज्ञे रक्ताक्षो राक्षसेश्वरः । चकोरे महिषे पारावते च यथा क्षणं कौतुकसक्ताक्षैरक्ताक्षो वीक्ष्यते न कैः । अथ रौहिषः । मृगकतृणमत्स्येषु ॥ रोहति रौहिषः । "रुहेर्वृद्धिश्च" (उ०५४८) इती षः ॥७३६॥ मृगो मृगभेदः ॥ तत्र तथा—कृष्णसाररुरुरौहिषाकुलं केकिकोकिलकुलारवावृतम् । कतृणं तृणजातिः ॥ तत्र पुंल्कोबः । तत्र यथा—योषा सखस्वपिषि रौहिषकायमाने । मत्स्ये मत्स्यभेदे यथा—अदृष्टातिशयोनित्यानुभूतं बहुमन्यते मन्यते रोहिषस्तुण्यश्चण्डो(तुंडी)मपिमहोदधिं । विश्लेषस्तु वियोजने, विधुरे च ॥ अथ विश्लेषणं विश्लेषः । वियोजनं पृथग्भावमात्रम् । विधुरमिष्टवस्तुवियोगः । वियोजने यथा—अदृश्यतत्वच्चरणारविन्द विश्लेषदुःखादिवबद्धमौनम् । विधुरे यथा आस्तांदूरेण विश्लेषः । प्रियामालिङ्गतोपि मे । स्वेदः क्लिन्न सरिन्नाथो रोमाञ्चः क्लिन्नपर्वतः । शुश्रूषोपासनाश्रवणेच्छयोः ॥ श्रोतुमिच्छा शुश्रूषा । उपासनायां यथा—तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेतां । श्रवणेच्छायां यथा शुश्रूषा श्रवणं चैव ग्रहणं धारणन्तथा ॥७३७॥ शैलूषः स्यान्नटे बिल्वे । शलति शैलूषः "कोरदूषेति साधुः । (उ० ५६१) नटे यथा—अथोपपत्तिछलनापरो परामवाप्य शैलूष इवैष भूमिकां । बिल्वः श्रीफलम् । संहर्षः पवने मुदि । स्पर्द्धायां च ॥ संहृष्यत्यनेन संहर्षणं वा

१ विशेषस्तु व्यकतावयवेऽपि च आधिक्ये चाथ० ।

अलसः स्याद्द्रुमभेदे पादरोगे क्रियाजडे ॥
अलसा तु हंस पद्यां नगौको वद गौकसः ॥७३९॥
विहंग सिंह सरभाः आश्वासः स्यात्तु निवृत्तौ ॥
आख्यायिका परिच्छेदेऽपीष्वासोधन्वधन्विनोः ॥७४०॥
उच्छ्वासः प्राणनेश्वासे गद्यबन्धान्तरेऽपि च ॥
उत्तंसः शेखरे कर्णपूरे चापि वतंसवत् ॥७४१॥

संहर्षः । पवनो वायुः । मुदि यथा-वल्लभालोकनं कस्य संहर्षं न प्रवर्षति । स्पर्द्धायां च यथा— संहर्षिणा सह गुणाभ्यधिकैर्दुरासम् । **समीक्षा तु ग्रन्थ-भेदे समीक्षणे** । समीक्ष्यतेऽनया समीक्षणं वा समीक्षा । द्वयोर्यथा-समीक्षा-विचक्षणः । अथ सान्ताः ॥७३८॥ **अलसः स्याद्द्रुमभेदे पादरोगे क्रिया-जडे** । अलति अलसः । "तप्यणि" इत्यसः ॥ न लसति वा । द्रुमभेदो अशोकवृक्षः । पादरोगे यथा— अलसितचरणाग्रः कर्दमैः प्रावृषेण्यैः । क्रियाजडे वाच्यलिङ्गः । तत्र यथा— वपुरलसलसद्बाहुलक्ष्म्याः पुनातु । **अलसा तु हंसपद्यां** । हंसपदी औषधिः । **नगौको वद गौकसः** । **विहंग सिंह सरभाः** । अगोनगश्च वृक्षो गिरिर्वा । तत्र ओकोऽस्य । अगौकानगौकाः ।७३९। विहंगः पक्षी । सिंहः केसरी । सरभोऽष्टापदः । **आश्वासः स्यात्त निवृत्तौ । आख्यायिका परिच्छेदेऽपि** । आश्वासनं आश्वासः । निर्वृतिर्धृतिः । द्वयो-यथा— आख्यायिके वसाश्वासा सुवक्त्रा च मृगेक्षणा । **इष्वासो धन्वध-न्विनोः** । इषून् अस्यति इष्वासः । धन्वनि । पुंक्लीबः । धन्विनि वाच्यलिङ्गः । धन्वनि यथा— पलायत परित्यक्त महेष्वासा वमाचमूः । धन्विनि यथा— नाशितं विद्विषां सैन्यमिष्वासैरिषुवर्षिभिः ॥७४०॥ **उच्छ्वासः प्राणने श्वासे गद्यब-न्धान्तरेऽपि च** ॥ उच्छ्वासनं उच्छ्वासः । प्राणनं जीवनं । आयुरित्यर्थः । श्वासः पवनश्वसितं । तयोर्यथा—देहान्तर्यावदुच्छ्वासस्तावद्धर्मं विधेहि भो ॥ गद्यबन्धान्तरे यथा-गद्यपद्यमयीचम्पूः साङ्कोच्छ्वासा च वर्ण्यते ॥ **उत्तंसः शेखरे कर्णपूरे चापि (प्य)वतंसवत्** । भूषतसुण् अलङ्कारे उत्तंसयति उत्तंसः । अवत-

उदर्चिरुत्प्रभेऽग्नौ च कनीयाननुजेऽल्पके
अतियूनि कीकसस्तु क्रमौ कीक समस्थनि ॥७४२॥
तामसः सर्पखलयोः तामसी स्यान्निशोमयोः ॥
त्रिस्त्रोता जाह्नवी सिन्धुभिदोरथ दिवौकसौ ॥ ७४३॥

न्यतेऽवतंसः । व्यवाभ्यांतनेरीच्चवेरितिसः । वावाप्योरिति अवस्यवादेशः । अवतंसोऽपि ॥ त्रयोऽपि पुंनपुंसकाः । शेखरः शिरोमाल्यम् । कर्णपूरः कर्णा-भरणम् । द्वयोर्यथा— उत्तंस कौतुक रसेन विलासिनीनां छनानि यस्य न नखै-रपि पल्ववानि । वतंसः शेखरे यथा— उष्णागमे न ववतंसितमल्लिकानां । स्नाता-नुवासित विकुंचितकुंतलानाम् । कर्णपूरे यथा— वतंसयन्ती नयनं मृगाक्षी कटाक्ष लक्षैर्मुहुरीक्षते मां । अवतंसो द्वयोर्यथा— गणा न मेरुप्रसवावतंसाः ॥७४१॥ **उदर्चिरुत्प्रभेऽग्नौ च** ॥ उद्गता ऊर्द्ध्वा वा अर्चिरस्य उदर्चिः । उत्प्रभे वाच्य-लिङ्गः । तत्र यथा— स्फुरन्नुदर्चिः सहासा तृतीया दक्षणः कृशानुः किल निष्पपात । अग्नौ पुंसि तत्र वाच्यलिङ्गः । प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतं । **कनीयाननुजेऽल्पके** । **अतियूनि** । अतिशयेनऽल्पो युवा वा कनीयान् । "गुणाङ्गाद्वेष्ठे यमू" ७।३।९। इति ईयसौ अल्प यूनोः कत्वेति कनादेशः । अनुजेऽतियूने च यथा— कलत्र वाहनं बाले कनीयांसं भजस्व मे । अल्पके वाच्यलिंगः । तत्र यथा— रजः कणैः कनीयोभिरयो-भिरिव तापितैः । दक्षिणानिल निर्धूतैः (निध्मातैः) स्पृष्टा कण्टं हि जीवति । **कीकसस्तु क्रमौ** ककते कीकसः । "फनसता मरसादयः" (उ०५७३)० इति साधुः । की इति अव्यक्तं कसति वा । क्रमिः कीटः । यथा—कीकसाः-क्रमयोऽणवः । **कीकसमस्थ-नि** । यथा—सद यः पाटित कंठकीकस कणा कीर्णा शदंशस्थलीम् । स्वेनेभाजिनपल्लवे नमु दितः प्रस्फोटयद धूर्जटिः ॥७४२॥ **तामसः सर्पखलयोः** । तमोऽस्त्यस्य तामसः । "ज्योत्स्नादित्वात्" अण्॥ (७।२।३४) खले वाच्यलिङ्गः । द्वयोर्यथा—दुश्चेष्टितैं र्निजैरेव तामसो हि मलीमसः ॥ **तामसो स्यान्निशोमयोः** ॥ निशायां यथा—हा धिक् सा किल तामसी शशिमुखी दृष्टा मया यत्र सा । उमा गौरी । **त्रिस्त्रोता जाह्नवी सिन्धुभिदोः** । त्रीणि स्त्रोतांसि यस्या सा त्रिस्त्रोता ।

चातक स्त्रिदशचापि दीर्घायुर्जीवके द्विके ॥
मार्कण्डे शाल्मलि तरौ नभसस्तु नदीपतौ ॥७४४॥
गगने ऋतु भेदे च पनसः कपिरुग् भिदोः ॥
कण्टके कण्टकि फले प्रचेतो वरुणे मुनौ ॥७४५॥

जाह्नव्यां यथा—अङ्गुष्ठ निष्ठ्यूतमिवोर्द्ध्वमुच्चैस्त्रिस्त्रोतसः सन्तत धारमम्मः । सिन्धुभित् नदीविशेषः । तत्र यथा-तिस्त्रस्त्रिस्त्रोतसस्तीरे संक्रीडन्ते मृगी दृशः । अथ दिवौकसौ । चातकस्त्रिदशश्चापि ॥ दिवि ओकोऽस्य दिवौकाः । "पृषोदरादित्वात्" अकारागमः । वृत्तिविषये अकारान्तो वा दिव शब्दः ।७४३॥ चातके यथा—क्रियते नीरदैरेव वितृष्णत्वं दिवौकमाम् । त्रिदशे यथा—तस्मिन् विप्रकृताः काले तारकेण दिवौकसः । **दीर्घायुर्जीवके द्विके । मार्कण्डे शाल्मलि तरौ** । दिर्घमायुरस्य दीर्घायुः । जीवको दीर्घजीवी । तत्र वाच्यलिङ्गः । तत्र यथा—दीर्घायुर्भजतेऽन्ध यष्टिपदवीं श्रीनाचिराजः—कविः । द्विकः काकः । मार्कण्ड ऋषिः ॥ **नभसस्तुनदीपतौ । गगने ऋतु भेदे च** । णभच् हिंसायां, नभ्यति नभसः । "तप्यणि" (उ०५६९) ॥ इत्यसः नदीपतिः समुद्रः ॥ ७४४॥ गगने यथा- वृक्षा ध्वनन्ति नभसंगम संगमेन । अत्र हि नभसे गमनेन गच्छन्ति नभसङ्गमा पक्षिणः । ऋतुभेदः प्रावृट् । **पनसः कपिरुग्भिदोः ॥ कण्टके कण्टकि फले ॥** पन्यतेऽनेन पनसः । "तप्यणि" (उ०५६९) इत्यसः । कपिभेदः कपि विशेषः रुग्भेदः रोगविशेषः । कण्टकस्तीक्ष्णाग्रो वृक्षावयवः रोमाञ्चो वा कण्टकिफलो वृक्षविशेषः तत्र पुंक्लीबः । तत्र यथा सरसपनसप्रायैर्वृत्तिः । सुखोपन्तैः फलैः । **प्रचेता॰ वरुणे मुनौ** ॥ हृष्टे । प्रकृष्ट प्रसन्नं प्रहृष्टं वा चेतोऽस्य प्रचेताः । हृष्टे वाच्यलिङ्गःवरुणे यथा किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः । मुनौ यथा प्राचेतसे न जगदे रघुवीर वृत्तम् । अत्र हि—प्रचेतसो मुनेरपत्यं प्राचेतसो वाल्मीकिः । ७४४॥ हृष्टे यथा—प्रचेता. वल्लभे दृष्टे को हि न स्यात्सचेतनः । **पायसः श्रीवासे** ॥

हृष्टे पायसः श्रीवासे पायसं परमान्नके ॥
बीभत्सो विकृते क्रूरे रसे पार्थे घृणात्मनि ॥७४६॥
बुकसी कालिका नील्योः बुकसो श्वपचेऽधमे ॥
मानसं स्वान्त सरसोः रभसो वेगहर्षयोः ॥७४७॥
राक्षसी कौणपी दंष्ट्रा रोद इव तु रोदसी ॥
दिवि भुव्युभयोश्चापि लालसो लोलयाश्चयौः ॥७४८॥

पायसो द्रुमक्षीरस्य विकारः स्रुतिः पायसः । श्रीवासः सरलद्रवः । **पायसं परमान्न के** । पयसि संस्कृतं पायसम् । "संस्कृते भक्ष्ये" (६-२-१४०) इत्यण् । पुंक्लीबः यथा—पायसं वायसेभ्योऽपि दीयते शकुनार्थिना । **बीभत्सो विकृते क्रूरे रसे पार्थे घृणात्मनि** ॥ बीभत्सते बीभत्स्यते वा बीभत्सः । रसे पार्थे च पुंसि । शेषेषु वाच्यलिङ्गः । विकृते यथा—बीभत्सोऽस्थिभिरुत्फणो च भयकृन्मूर्त्याद्रुतस्तुंगया । क्रूरे यथा—कथं वा बीभत्सं— चरितमिदमार्येण विहितम् । रसे पार्थे च यथा—बीभत्सोऽप्यतिवीरः पार्थोऽपार्थप्रवृत्तिः स्यात् । घृणात्मा= जुगुप्सात्मकः । तत्र यथा—बीभत्सः कच्छदेशो य मच्छभल्लशतैर्भृतः ॥७४६॥ **बुकसी कालिका नील्योः** । बुक्कयते बुक्कसो । "फनसतामरसादय" (उ०५७३) इतिसाधुः । बुक्कास्यते वा । कालिका योगिनी । नीली ओषधिः । **बुक्कसः श्वपचेऽधमे** । अधमे वाच्यलिङ्गः द्वयोर्यथा—भवन्ति बुक्कसा एव ब्रह्मस्त्री—भ्रूणघातकाः । **मानसं स्वान्तसरसोः** । मन एव मानसम् । "प्रज्ञादित्वात्" (७-२-१६५) अण् । मानस्यति वा । द्वयोर्यथा- निरस्तगाम्भीर्य्यमपास्त पुष्पकः प्रकम्पयामास न मानसं न सः । **रभसो वेग हर्षयोः** । रभन्तेऽनेन रभसः । "दिवादि रभीति किदसः" (उ०५७२) स्त्रो पुंसः । वेगो रंहस्त्वरा वा । रंहसि यथा—समितौ रभसादुपागतं—सगदः सम्प्रति पत्तुमर्हसि । त्वरायां यथा—अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्योविपाकः । हर्षे यथा—आलिङ्गितः सरभ सन्तरलायिताक्ष्या । ७४७॥ **राक्षसी कौणपी दंष्ट्रा** । रक्षस इयं राक्षसी । रक्ष एव वा । "प्रज्ञादित्वात्" । (७-२-१६५) अण् । द्वयोर्यथा-दुःखाकरोति नो केषामुद्गच्छन्तीह राक्षसी ॥

तृष्णातिरेक औत्सुक्ये वरीयान् श्रेष्ठ योगयोः ॥
अति यून्यति विस्तीर्णे वायसः स्त्वगरौ द्विके ।७४९।
श्रीवासे वायसी काकोदुम्बरी काचमाच्यपि ॥
वाहसोऽजगरे वारिनिर्याणसुनिषण्णयोः ॥७५०॥

तद्भवादिष्वपि मङ्गः तत्र वाच्यलिङ्गः । तत्र यथा–राक्षसीमकृतरक्षितप्रजस्तेजसाधिकबिभीषणां पुरीं । **रोद इव तु रोदसी । दिवि भुव्युभयोश्चापि ।** रुदन्त्यत्ररोदः । "असित्यस्" । स्त्रीक्लीबः । "गौरादित्वात्" स्त्रियांङ्यां रोदसी । त्रिष्वपि यथा–रोदः कुक्षिम्भरिध्वानैर्दध्वने विजयानकैः । स्वः श्रवणभैरवः स्थगितरोदसी कन्दरः कुतोदयसमरोदधेरयमभूदपूर्वः पुरः । रोदसीत्यव्ययमपि । **लालसो लोलयाञ्चयोः ॥ तृष्णातिरेक औत्सुक्ये ॥** लालसीति लालसनं वा लालसः ॥ चतुर्ष्वर्थेषु । लोले वाच्यलिङ्गः । शेषेषु स्त्री पुंसः । लोले यथा–छायां निजस्त्री चटु लालसानां मदेन किंचिच्चटु लालसानां । याञ्चायां तृष्णातिरेके औत्सुक्ये च यथा-सागताद्यविषयेषु लालसा वर्त्तते त्वयि तुदेव (सदैव) लालसा । बुद्धिरस्ति तव चञ्चलालसा प्राप्त सार पर वित्कलालसा । अत्र प्रथमो याञ्चायां तृष्णातिरेके च । द्वितीयस्त्वौत्सुक्ये ।७४८। **वरीयान् श्रेष्ठ योगयोः । अतियून्यति विस्तीर्णे ॥** अतिशयेन वरो वरीयान् । अतिशयेन उरुर्वा । "ईयसिप्रिय स्थरेति" वरादेशः । यगे पुंसि । अन्यत्र वाच्यलिङ्गः । श्रेष्ठे अतियूनि च यथा अस्मिन् स्वयंवरेदेवि । वरीयांसं वरं वृणु । योगे यथा–वरीयन् परिघः शिवः । अतिविस्तीर्णे यथा–उर्वीं महो वारिततो वरीयो वरिष्ठमाकाशमातोपितत्त्वं । **वायसस्त्वगरौ द्विके । श्रीवासे ।** वयते वायसः । "सृवयिभ्यां णिदित्यसः" ॥ (उ०५७०) वय एव वा। "प्रज्ञादित्वादण्" ७।२।१६५॥ श्रीवास वाचि प यस शब्दस्य वा "जपादित्वात्" ॥ २।३।१०५ वत्वं ॥ अगरुः काकतुण्डः । श्रीवासः=सरलद्रवः । तयोर्यथा–वायसः कायसौगन्ध्यं विधत्ते धनिनां क्षणात् । द्विके काके यथा–वायस नयनामिवास्तेशंकितमनिशं दुरात्मनां चेतः ।७४९। **वायसी काकादुम्बरी काचमाच्यपि ।** वयसः (वायसः) पक्षिणः, इयं वायसी । काको-

विलासो हावे लीलायां विहायो व्योमपक्षिणोः ॥
श्रीवासः स्याद्वृकधूपे कमले मधुसूदने ॥७५१॥
श्रेयसी गज पिप्पल्यामभया रास्नयोरपि ।
समासः समर्थनायां स्यात् संक्षेपैक पद्ययोः ॥७५२॥
सप्तार्चिः क्रूरनेत्रेऽग्नौ साधीयानतिशोभने ॥
अतिवाठे साहसन्तु दमे दुष्करकर्मणि ॥७५३॥

दुम्बरो वृक्षभेदः । काचमाचो ओषधिः ॥ **वाहसोऽजगरे वारिनिर्याणसुनिषण्णयोः ॥** वहति वाहसः । "वहियुभ्यां वेति णिदसः" (उ०५७१) वाहं गतिं (रातिं) स्यति वा । वारिनिर्याणं वारिप्रवाहः । सुनिषण्णे वाच्यलिङ्गः । तत्र अजगरे च यथा-निरुत्साहेशयालौचवाहसे साहसं कुतः ॥७५०॥ **विलासो हावे लीलायां ।** विलसत्यनेन विलसनम्वा विलासः । हावो लीला च स्त्रीणां चेष्टाविशेषौ । यद्भरतः । हावः शृङ्गार भावासौरम्योकस्मितवीक्षितम् प्रियस्यानुकृत लीला श्लिष्टा वाग्वेष चेष्टितैः । द्वयोर्यथा-विलासेन हि कामिन्यो मोहयन्ति मुनीनपि । **विहायो व्योम पक्षिणोः ।** विजहाति विजिहीते वा विहायाः । "विहायः सुमनसिति (उ०९७६) साधुः । व्योम्नि पुंक्लीबः । पक्षिणि पुसि । द्वयोर्यथा–क्षणाद्विमानेन ययौ त्रिहायसा विहायसामीश इवामितद्युतिः । तुल्यां•च कीलेन तना (दा) विहायसा-विहायसा तच्छुचमाश्रयद्वनं । **श्रीवासः स्याद्वृकधूपे कमले मधुसूदने** ॥ श्रियोवासः श्रीवासः । वृकधूपो धूप विशेषः । त्रिष्वपि यथा श्रीवासो वासवस्यापि वल्लभः किं पुनर्नृणाम् ॥७५१॥ **श्रेयसी गज पिप्पल्यामभया रास्नयोरपि** ॥ अतिशयेन प्रशस्या श्रेयसी । "गुणांगाद्वेष्ठेयसू ७।३।९॥ इति-ईयसो । "प्रशस्यस्य श्रः" ७।४–३४॥ इति श्रादेशः । तिस्त्रोप्योबधयः । **समासः समर्थनायां स्यात् संक्षेपैक पद्ययोः ।** समसनं समस्यन्ते पदान्यत्र वा समासः । समर्थना समाप्तिः । तत्रयथा-शास्त्र समासेऽपि मंगलं कार्यं । संक्षेपे यथा प्रौढिर्व्यास समासौ च साभिप्रायत्वमेव च । ऐकपद्यं पदानामेकार्थीभावः । तत्र यथा चार्थेद्वन्द्वः समासो हि सहोक्ताविष्यते बुधैः ॥७५१॥ **सप्तार्चिः क्रूरनेत्रेऽग्नौ ।** सप्त अर्चिषोऽस्य सप्तार्चिः । पुंसि ।

अविमृश्यकृतौ धाष्ट्र्ये सारसं सरसीरुहे ॥
सारसः पुष्कराख्येन्दोः सुमनाः प्राज्ञ देवयोः ॥७५४॥
जात्यां पुष्पे सुमेधास्तु ज्योतिष्मत्यां विदुष्यपि ॥
सुरसः स्वादौ पर्णासेऽप्यत्यूह श्चित्र मेखले ॥७५५॥

क्रूरनेत्रः शनैश्चरः। द्वयोर्यथा यस्मात्सन्तापकोप्युच्चैः सप्तार्चिश्चर्च्यते जनैः। **साधीयानति शोभने। अतिबाढे ॥** अतिशयेन साधुः साधीयान्। अतिशयेन बाढो वा। "बाढान्तिकयोः साधनादौ" ।७।४।३७॥ इति साधादेशः। वाच्यलिङ्गः। द्वयोर्यथा किमत्र साधीय इति प्रयत्नाद्विचार्य कार्यं गुरु कार्यमार्यैः। **साहसंतु दमे दुष्कर कर्मणि। अविमृश्य कृतौ धाष्ट्र्ये ॥** सहसि बले भवं साहसं। भवेऽण्। सह एव वा। प्रज्ञादित्वादण् ७।२।१६५। दमो दण्डश्चतुर्थोपायः। तत्र यथा— दाप्यस्तूत्तम साहसं। दुष्करकर्मणि यथा—न साहस मनारुह्यनरो भद्राणि पश्यति। अविमृश्य कृतौ यथा—न खलु न खलु मुग्धे साहसं कार्यमेतत्। धाष्ट्र्ये यथा—उदयता जयिनि कामिनी मुखे ते न साहसमनुष्ठितं-पुनः। **सारसं सरसीरुहे।** सरसि भवं सारसं। यथा—सरससारससारसमारणैर्विपिनमेतदितः सुरभीकृतं।

सारसः पुष्कराख्येन्दोः ॥ सरति सारसः। सृत्रयिभ्यां णिदिति णिदेसः। (उ०५७०॥) पुष्कराख्यः पक्षिभेदः। तत्र यथा—दीर्घीकुर्वन् पटुमदकलं कूजितं सारसानां। इन्दौ यथा—सिंचतीव सुधासारैः सारसः सरसैः करैः। **सुमनाः प्राज्ञ देवयोः ॥ जात्यां पुष्पे।** शोभनं मनोऽस्य सुमनाः। सुष्ठु मान्यते वा बिहायस्सुमनसिति साधुः। प्राज्ञे वाच्यलिङ्गः। देवे पुंसि। जात्यां पुष्पे च स्त्रीलिङ्गः। पुष्पेप्रायो भूम्नि च। चतुर्ष्वपि यथा-मालती विमुख श्चैत्रो-विकासीपुष्पसम्पदाम्। आश्चर्यं जाति हीनस्य कथंसुमनसः प्रियाः (या)। **सुमेधास्तु ज्योतिष्मत्यां विदुष्यपि।** शोभना मेधाऽनयाऽस्य वा सुमेधाः। "मन्दाल्पाच्च मेधायाः" इत्यस् समासान्ताः। ज्योतिष्मती ओषधिः। तत्र स्त्रियां विदुषि-वाच्यलिङ्गः। तत्र यथा-सुमेधा रज्यते नाद्ये (द्वये)रसपीयूषविचिभः।

अत्यूहातु नीलिकायां, आग्रहोऽनुग्रहे ग्रहे।
आसङ्गक्रमणयोश्चापि आरोहोदैर्ध्य उच्छ्रये ॥७५६॥
आरोहणे गजारोहे स्त्री कट्यां मानभिद्यपि ॥
कलहो भण्डने खड्गकोशे समर राढयोः ॥७५७॥

सुरसः स्वादौ पर्णासेपि ॥ शोभनो रसोऽस्य सुरसः। स्वादौ वाच्यलिङ्गः। तत्र यथा—एषा वृद्धोदरकृता सुरसा रसाला। पर्णासोगुल्मभेदे—अर्जक-विशेषः। पर्णाश (तत्र) स्त्रियामित्यन्ये। अथ हान्ताः—**अत्यूह-श्चित्रमेखले ॥** अत्यूहति अत्यूहः। चित्रमेखलः पक्षिविशेषः ॥७५५॥ **अत्यूहा तु नीलिकायाम् ॥** अत्युह्यते अत्यूहा। निलिका ओषधिः। **आग्रहोऽनुग्रहे ग्रहे। आसङ्गक्रमणयोश्चापि।** आग्रहणमाग्रहः। अनुग्रहः प्रसादः। ग्रहः स्वीकारः। आसङ्गः आसक्तिः। आक्रमणं आक्रान्तिः। सर्वेषु यथा—भृत्येषु विहिताग्रहः। **आरोहो दैर्ध्यउच्छ्रये। आरोहणे गजारोहे स्त्री कट्यां-मानभिद्यपि ॥** आरोहत्यस्मिन् आरोहणं आरोहति वा आरोहः। दैर्ध्यमायामः। उच्छ्रयउर्द्ध्वमानं। तत्र यथा—आरोहपरिणाहाभ्यां व्याप्तव्योम-दिगन्तरः। आरोहणे यथा—आरोहमवरोहञ्च मुहुर्मुदति(मुहर्मुहरति) कुर्वती। स्वदङ्गयष्टौ मद्दृष्टिर्निश्चलापि कपीयते। गजारोहे यथा-बाणाक्षिप्तारोहशून्यासनानां गजेत्युपलक्षणं। तेनाऽश्वारोहेऽपि यथा-आरोहमाकृष्य महाप्रयत्नं विवेश शीघ्रं पर सैन्यमश्वः। स्त्रीकट्यां यथा—कामं कुरु वारारोहे देहिमे परिरम्भणम्। मान भित् मानविशेषः। तरोरधः स्कन्धेऽपि मंस। यथा छायावन्तो गतव्याकलाः इथारोहाः फलशालिनः ॥ **कलहो भण्डने खड्गकोशे समर राढयोः ॥** कल्यते कलहः। "कृपृकटी (उ०५८९) त्यहः ॥ कलं हन्ति वा। कचिदिति डः। कलां जहाति वा। ङेड्यापोबहुलं नाम्नीतिह्रस्वः। पुंसि। गौड स्तु भण्डने खड्गकोशेनाकलहं युद्धराढयो(राहंयो) रित्याह। भण्डनं राटिः। तत्र यथा—च्युतामिन्दोर्लेखारतिकलहभग्नं च वलयं। खड्गकोशः प्रत्याकारः। समरे संग्रामे यथा विलम्बितुं न खलु सहा मनस्विनो विधित्सतः कलह-

कटाहः स्यात्कूर्म पृष्ठे कर्परे महिषीशिशौ ॥
तैलादि पाकपात्रे च दात्यूहः कालकण्ठके ॥७५८॥
चातकेऽपि नवाहस्त्वाद्यूतिथौ नव्र वासरे ॥
निर्यूहो द्वारिनिर्यासे शेखरे नाग दन्तके ॥७५९॥
निरूहो निश्चिते तर्के वस्ति भेदेऽथ निग्रहः ॥
बन्धके भर्त्सने सीम्नि प्रग्रहः किरणे भुजे ॥७६०॥

मवेक्ष्यविद्विषः । राढो देशविशेषः ।७५७। कटाहः स्यात्कूर्मपृष्ठे कर्परे महिषीशिशौ । तैलादिपाकपात्रे च । कटति आवृणोति कटाहः । "वृकटिशमिभ्यः आहः" (उ०५९१) ॥ कूर्मपृष्ठे यथा—न्यञ्चत्कूर्मकटाहकोटिविचलद्भूभागसंक्षोभतः । कर्परे यथा—स्फुटितघटकटाहैर्दुर्गमः कूपमार्गः । महिष्याः शिशु-डिम्भो महिषीशिशुः । तैलादिपाकपात्रे त्रिभिङ्गः । तत्र यथा—अस्मिन् महामोहमये कटाहे सूर्याग्निना रात्रिदिनेन्धनेन । मासर्तु दर्वी परिघट्टनेन भूतानि कालः पचतिप्रसह्य । दात्यूहः कालकण्ठके । चातकेऽपि ॥ ददाति दात्यूहः (दत्यूह) । कालकण्ठ कोजलरंकुः ॥७५८॥ चातकेबपोहकः । द्वयोर्यथा दात्यूहव्यूह केलीकलित कुह कुहारावकान्तावनान्ताः । नवाहस्त्वाद्यतिथौनववासरे ॥ नवं प्रथमं प्रत्यग्रं वा अहर्नवाहः । "अह" ७-३-११६। इति ॥ अट्र समासान्ताः । "अहनिर्यूह कलहा" इति पुस्त्वं ॥ आद्यतिथिः प्रतिपत् । नवः प्रत्यग्रो वासरो नव वासरः । निर्यूहोद्वारि निर्यासे शेखरे नागदन्तके । निरेति निर्यूहः । "निरइण् ऊहशिति ऊहशि । "ह्निणोरप्विति व्यौ ॥४।३।१५॥ इति खत्वं । यूहिलौकिको धातुर्वा । द्वारि यथा—निर्यूहपर्यंकतले निषण्णा । निर्यासः क्वाथरसः । तत्र यथा-पञ्चकोलकनिर्यूहः । शेखरो गृहादेर्बहिर्निर्गतं दारु । तत्र यथा रथान्तरे यत्र गृहान्तरेषु वितर्दिनिर्यूहविटंकनीडः । शेखरोऽवतंसः इति मंखः । यथा सरसकुसुमचित्रव्यूहनिर्युइहृद्यदयुतितरललामाम्लानशोभोत्तमाङ्गः । नागदन्तको भित्तिनिखातकीलकः । तत्र यथा-निर्यूहकोल्लम्बिततारहारैः;॥७५९॥ निरूहो निश्चिते तर्के वस्ति भेदे ॥ निष्क्रान्तं ऊहते निरूहणं वा निरूढः । निरोहति वा । पृसोदरादित्वात् निश्चितमिति भावे कर्मणि वा क्तः । तर्को

तुलासूत्रेऽश्वादिरश्मौ सुवर्णे हलि पादपे ।
बन्धने बन्ध्यां प्रवाहो व्यवहाराम्बुवेगयोः ॥७६१॥
प्रवहो वायुभेदे स्याद्वायुमात्रे बहिर्गते ।
प्रग्राहः स्यात्तुलासूत्रे वृषादीनां च बन्धने ॥७६२॥

वितर्कः । तयोर्यथा—हेम्नो निरूहं कुरुते कणादः । बस्तेरपानस्य भेदो बस्तिभेदः वस्तिविशेषः । अथ निग्रहः । बन्धके भर्त्सने सीम्नि । निगृह्णाति निग्रहणं निगृह्यते अनेन वा निग्रहः । बन्धकः आधिः । तत्र यथा—धनिकस्याधमर्ण्येन क्रियते निग्रहे गृहम् । भर्त्सने तर्जने यथा—यत्साध्यं स्वयमेव तुल्यमुभयोः पक्षे विरुद्धं च यत् । तस्यांगीकरणेन वादिन इव स्यात्स्वामिनो निग्रहः । भर्त्सनेन दण्डोऽपि लक्ष्यते । सीमा मर्यादा । प्रग्रहः किरणे भुजे । तुलासूत्रेऽश्वादिरश्मौ सुवर्णे हलि पादपे । बन्धने बन्ध्यां । प्रगृह्यतेऽसावनेन प्रग्रहणं वा । प्रग्रहः । सप्तस्वर्थेषु । किरणे यथा—प्रग्रहा ग्रहराजस्य तमसां निग्रहक्षमाः । भुजो बाहुः ॥७६०॥ तुलासूत्रे यथा—प्रग्रहकलया पण्यं कलयन्ति वाणिजादपरे । अश्वादिरश्मौ यथा—उत्तेरुरुत्तालखुरा रवंद्रुताः । श्लथीकृतप्रग्रहमर्वतां व्रजाः । सुवर्णहलिपादपः तमालवृक्षः । बन्धने यथा-प्रत्यर्थि प्रग्रहोऽकारि कारायां तेन भूभुजा । बन्ध्यां हठहृत्तस्त्रियां यथा—साधयन्ति अभिमानं हि परस्त्रीहरणान्नृपाः । मानिनां तूचिता क्वापि न प्रग्रहकलत्रता । प्रवाहो व्यवहाराम्बुवेगयोः । प्रवहणं प्रवहत्यनेन वा प्रवाहः । व्यवहारे यथा—लोकप्रवाहं नोत्क्रामेत् न शौंडार्यं समाचरेत् । अम्बुवेगे अम्बुस्त्रोतसि । यथा—प्रवाहोवारां यः पृषज्जलधुदृष्टः शिरसि ते ॥७६१॥ प्रवहो वायुभेदे स्याद्वायुमात्रे बहिर्गते । प्रवहति प्रवहः प्रवहणं वा । गोचरसंचरेति बाहुलकात् घः । प्रग्राहः स्यात्तुलासूत्रे वृषादीनां च बन्धने । प्रगृह्यते प्रग्राहः । प्राङ्रश्मि तुलासूत्रे इति अद्य विकल्पनात् घञ् । तुलासूत्रे यथा—तोलयन्ति जनाः पण्यं प्रग्राहेण गृहे गृहे । दृष्टमात्रं तु दृष्टयैव विर-

पटहो वाद्य आरम्भे वराहो नाणके किरौ ।
मेघे मुस्ते गिरौ विष्णौ वाराही गृष्टिभेषजे ॥७६३॥
मातर्यपि विदेहस्तु निर्देहे मैथिलेऽपि च ।
विग्रहो युधि विस्तारे प्रविभागशरीरयोः ॥७६४॥

लास्तोलयन्त्यलम् । वृषादीनां च बन्धने यथा-प्रग्रहाग्रेण संगृह्य शिथिलं क्ष्वेडनारवैः । साधु वल्लभपालोऽयं विवर्त्तयिषते हयम् ॥७६२॥ **पटहो वाद्य आरम्भे** । पटे हन्यते पटहः । क्वचिदिति डः । पटति वा । कृप कटीत्यहः । वाद्य पुंक्लीबः । तत्र यथा—कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीयाम् । आरम्भ आदिकर्म । **वराहो नाणके किरौ । मेघे मुस्ते गिरौ विष्णौ** । व्रियते वृणोति वराहः । वृकटि शमिभ्य आहः । नाणकं रूपकादि । किरौ सूकरे यथा—विस्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले । मेघो जलदः । मुस्तः कन्दविशेषः । गिरिः पर्वतविशेषः । विष्णौ यथा—बभ्रामैको बन्धुमिष्टं दिदृक्षुः । सिन्धौ वाद्यं मण्डलं गोर्वराहः । **वाराही गृष्टिभेषजे । मातर्यपि** । वराहास्येयं वाराही । गृष्ट्याख्यं भेषजम् यदाह—विष्वक्सेन प्रिया गृष्टिर्वाराही बदरीत्यपि ॥७६३॥ मातरि मातृभेदे यथा—वाराही घनघोरघर्घररवा ऐन्द्री च वज्रायुधा । **विदेहस्तु निर्देहे मैथिलेऽपि च** । विगतो देहोऽस्य विदेहः । विदिह्यते वा । निर्देहे वाच्यलिङ्गः । तत्र यथा—सपदि भवति जीवः कर्ममुक्तो विदेहः । मैथिले यथा—तौ विदेहनगरीनिव शिनाम् । **विग्रहो युधि विस्तारे प्रविभागशरीरयोः** । विग्रहणं विगृह्यते वा विग्रहः । युधि शरीरे च यथा—रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः । विस्तारे यथा—आचष्टे विग्रहेणापि समये संग्रहेण च । यः शिष्यबुद्धिमालक्ष्य सगुरुर्गुरुसत्तमः ॥ प्रविभागो वाक्यं समासाद्यारम्भकः पदसमूहः । तत्र यथा—अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः । क्रियासम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ।

वैदेही पिप्पलीसीतारोचनासु वणिक् स्त्रियाम् ।
संग्रहो बृहदुद्धारे ग्रहसंक्षेपयोरपि ॥७६५॥
सुवहस्तु सम्यग्वहे सुवहा सल्लकीद्रुमे ।
रास्नाशेफालिकागोधापद्येलापर्णिकासु च ॥७६६॥

इत्याचार्य श्रीहेमचन्द्रविरचितेऽनेकार्थसंग्रहे त्रिस्वरकाण्डः समाप्तः॥३॥

७६४॥ **वैदेही पिप्पलीसीतारोचनासु वणिक् स्त्रियाम्** । विदेहा देवता अस्या विदेहस्यापत्यं वा वैदेही । पिप्पली कणा । सीतायां यथा—वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव । रोचना रागद्रव्यम् । वणिक् स्त्रियां यथा—वैदेही न विदेहि (विदेदि) हीति(?) विधवावाल्हीकपङ्कैर्वपुः । **संग्रहो बृहदुद्धारे ग्रहसंक्षेपयोरपि** । संगृह्णाति संग्रहणं वा संग्रहः । बृहतः शास्त्रादेरुद्धारः साराकर्षणं बृहदुद्धारः । तत्र यथा—क्रियते सारसंग्रहः । ग्रहः स्वाकारः । तत्र यथा—शरदि समग्रफलानां कर्त्तव्यः संग्रहोधिनिभिः । संक्षेपे यथा—आचष्टे विग्रहेणापि समये संग्रहेण च । संचयेऽपि मंखः । यथा—धनसंग्रहेण किं ते यदिह न भोगाय नैव दानाय ॥७६५॥ **सुवहस्तु सम्यग्वहे** । सुष्ठु वहति सुवहः । वाच्यलिङ्गः । सम्यग्वहति यः सम्यग्वहः । यथा—सुवहो हि बलीवर्दः कस्य न स्यात्सुखावहः । **सुवहा सल्लकीद्रुमे । रास्नाशेफालिकागोधापद्येलापर्णिकासु च** । रास्नाद्याश्चतस्रोऽप्योषधयः । सर्वेषु यथा—परोपकारसद्बुद्धिरवित्तेऽप्यविदश्यते । उदीयुः कर्तुमारोग्यं सुवहा निवहायतः ॥७६६॥ इत्याचार्यश्री हेमचन्द्रविरचितायामनेकार्थकैरवाकरकौमुदीत्यभिधानायां स्वोपज्ञानेकार्थसंग्रहटीकायां त्रिस्वरकाण्डस्तृतीयः परिपूर्णः ॥३॥ श्रीहेमसूरिशिष्येण श्रीमन्महेन्द्रसूरिणा भक्तिनिष्ठेन टीकेयं तन्नाम्नैव प्रतिष्ठिता ॥१॥ सम्यग्ज्ञान निधिर्गुणैरनवधिः श्रीहेमचन्द्रप्रभोर्ग्रन्थे व्याकृतिकौशलं विलसति क्वास्मादृशां तादृशम् । व्याख्यामः स्म तथापि तं पुनरिदं नाश्चर्यमन्तर्मनस्तस्याजल्पमपि स्थित-

॥अथ चतुर्थः काण्डः॥

अङ्गारक उल्मुकांशे महीपुत्रे कुरण्टके ।
अङ्गारिका त्विक्षुकाण्डे किंशुकस्य च कोरके ॥१॥
अलिपकः पिके भृङ्गे अलमकः पद्मकेसरे ।
मधूके कोकिले भेके अश्मन्तकं मालुकाच्छदे ॥२॥
चुल्यां चाक्षेपको व्याधि निन्दके वातरुज्यपि ।
आकल्पकस्तमो मोहग्रन्थावुत्कलिका मुदोः ॥३॥

स्य हि वयं व्याख्यामनुब्रूमहे ॥२॥ यल्लक्ष्यं स्मृतिगोचरं सम्भवद् दृष्टं च शास्त्रान्तरे तःसर्वं समदर्शि किन्तु कतिचिन्नो दृष्ट लक्ष्याः क्वचित् । अभ्यूह्यं स्वयमेव तेषु सुमुखैः शब्देषु लक्ष्यं बुधैर्यस्मात्सम्प्रति तुच्छकश्मलधियां ज्ञानं कुतः सर्वतः ॥३॥ एकत्रापि कृताभिधेयविषये व्युत्पत्तिरर्थान्तरे कर्त्तव्या स्वयमेव दर्शितदिशानिर्वैदवन्द्यैर्बुधैः । वर्णाद्यक्रमवर्णनं च न कृतं तत्रापि कार्यं स्वयम् यत्कृत्स्नं प्रतिपादनेन विवृतिः कामं वरीवृध्यते ॥४॥

॥अर्हं॥ अथ चतुर्थं चतुःस्वरकाण्डमारभ्यते ॥

तत्रादौ कान्ताः। **अङ्गारक उल्मुकांशे महीपुत्रे कुरण्टके ।** अङ्गतेरयं गीति आरे स्वार्थे के च अङ्गारकः । त्रिष्वपि यथा—अङ्गारकं विजानीयात्तत्ताङ्गारकरो विषम् । **अङ्गारिका त्विक्षुकाण्डे किंशुकस्य च कोरके ।** अङ्गमियर्त्ति अङ्गारिका । द्वयोर्यथा—अङ्गारिकाः पश्य पुरोपकण्ठे ॥१॥ **अलिपकः पिके भृङ्गे ।** न लिम्पति अलिपकः । कीचकादित्वात्साधुः । द्वयोर्यथा—अलिपककुलजल्पैराजुहावैष पान्थान् । **अलमकः पद्मकेसरे । मधूके कोकिले भेके ।** अलमत्यर्थमकति अलमकः । पद्मकेसरे मधूके च यथा—अलमलमकश्चेतो हर्तुं स्वसौरभवैभवात् । **अश्मन्तकं मालुकाच्छदे । चुल्यां च ।** अश्नुते अश्मं तं सीमन्तेति साधुः । स्वार्थे के अश्मन्तकम् । मालुकाच्छदो वृक्षः । तत्र यथा—तीराश्मन्तकशम्बिचुम्बितमुखाः ॥२॥ चुल्यां च यथा—अश्मन्तकान्तिकचलाचलकुम्भदासी । तृणेऽपि तत्र पुंसि यथा—मुञ्जा-

आखनिकस्त्वाखुरिव किराम्बुदरचोरयोः ।
उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि ॥४॥
एडमूकोऽनेडमूक इवावाक् श्रुतिके शठे ।
कटिल्लकस्तु वर्षाभ्वां पर्णासे कारवेल्लके ॥५॥

लाभे तु कर्त्तव्या कुशाश्मन्तकवल्लजैः । यदाह मंखः—अश्मन्तकं भवे च्चुल्यां ना वृक्षतृणभेदयोरिति । **आक्षेपको व्याधिनिन्दके वातरुज्यपि ।** आक्षिपत्याक्षेपकः । निन्दके वाच्यलिङ्गः । वातश्चासौ रुक् वातरुक् । त्रिष्वपि यथा—रुजति जनमनांसि क्षिप्रमाक्षेपकोऽयम् । **आकल्पकस्तमोमोहग्रन्थावुत्कलिकामुदोः ।** आकल्पते आकल्पकः । तमोमोहाभ्यां हृद्ग्रन्थिस्तमोमोहग्रन्थिः । त्रिष्वपि यथा—आकल्पकं कल्पयते मृगाक्षी ॥३॥ **आखनिकस्त्वाखुरिव किराम्बुदरचोरयोः ।** आखनते कुशिकादित्वात्के (उ.४५) आखनिकः । किरः सूकरः । त्रिष्वपि यथा—राजन्नाखनिकाः खनन्ति नगरं शून्यं त्वदीयद्विषाम् । पराङ्म्याश्खनिभ्यां डिदिगु (उ.७४२) प्रत्यये आखुः । लाघवार्थं द्विस्वरस्याप्यत्र पाठः । एवं सर्वत्र । उन्दरे स्त्रीपुंसः । शेषयोः पुंसि । उन्दरे यथा—कृताखुर्विवरं स्वयं निपतितो नक्तंमुखे भोगिनः । **उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि ।** उत्कलिते उत्कलिका । कोकलीतिकः । हेलोत्कण्ठयोर्यथा—उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणात् । तरङ्गे यथा—वनाव लीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभः ॥ ४ ॥ **एडमूकोऽनेडमूक इवावाक्श्रुतिके शठे ।** एडो बधिरः सचासौ मूकश्च एडमूकः । अनेडोऽपि अवकारोऽपि मूकः अनेडमूकः । वाच्यलिङ्गौ । द्वयोर्यथा—एडमूक कथनेडमूकता न व्यधायि विधिना तवाधुना । अनेडमूको वाक्श्रुतिके यथा—अनेडमूका भूयासुस्ते येषांत्वयि मत्सरः । **कटिल्लकस्तु वर्षाभ्वां पर्णासे कारवेल्लके ।** कटति कटिल्लः । भिल्लाच्छभल्लेति (उ.४६४) साधुः । के कटिल्लकः । वर्षाभूरोषधिः । पर्णा-

कर्कटकोऽह्नौ बिल्वे च कनीनिकाऽक्षितारिका ।
स्यात्कनिष्ठाङ्गुलिरपि काकरूको दिगम्बरे ॥६॥
उलूके स्त्रीजिते दम्भे भीरुके निर्धनेऽपि च ।
कुरवकः शोणाम्लानोऽरुणा पीता च झिंटिका ॥७॥
कृकवाकुस्ताम्रचूडे मयूरकृकलासयोः ।
कोशातकः कचे कोशातकी ज्योत्स्नी पटोलिका ॥८॥
घोषकोऽथ कौलेयकः सारमेयकुलीनयोः ।
कौक्कुटिको दाम्भिके स्याददूरेरितलोचने ॥९॥

सोऽर्जकवृक्षः । कारवेल्लकः शाकभेदः ॥५॥ **कर्कटकोऽह्नौ बिल्वे च ।** कर्कैः सौत्राद्दिव्यत्रोत्यटे कर्कटः । तस्य तुल्यः कर्कटकः । **कनीनिकाऽक्षितारिका । स्यात्कनिष्ठांगुलिरपि ।** कनति कनीनिका । कनेरीनकः । अक्षितारकायां यथा—किंचिल्लक्ष्यकनीनिकेव नयने नासाग्रतः स्थास्नुनी । **काकरूको दिगम्बरे । उलूके स्त्रीजिते दम्भे भीरुके निर्धनेऽपि च ।** ककते काकरूकः । शम्बूकेति साधुः । भीरुकनिर्धनयोर्वाच्यलिङ्गः । षट्स्वपि यथा—किं वात्र निन्दन्ति न काकरूकम् ॥६॥ **कुरवकः शोणाम्लानोऽरुणा पीता च झिंटिका ।** कुत्सितो रवोऽस्मात् कुरवकः । कुत्सितं रौति वा । कुरु रुंटिरंटिभ्य इत्यकः । शोणाम्लानो वृक्षस्तत्र यथा—कुरुबककुचाघातक्रीडा सुखे न वियुज्यसे । अरुणा पीता चेति अरुणझिंटिका पीतझिंटिका चेत्यर्थः ॥७॥ **कृकवाकुस्ताम्रचूडे मयूरकृकलासयोः ।** कृकमव्यक्तं वक्ति कृकवाकुः । कृकस्थूराद्दचः कचेति (उ.७२८) णिङ्गुः । पुंसि । ताम्रचूडे यथा—रुतमथ कृकवाकोस्तारमाकर्ण्य काले । **कोशातकः कचे ।** कोशमतति कोशातकः । **कोशातकी ज्योत्स्नी पटोलिका । घोषकः ।** गौरादित्वाङ्ङीः । ज्यौत्स्नी पटोलिके वल्यौ । घोषकोऽपामार्गः । पटोलिकायाँ यथा—कोशातकी पुष्पगुलुंछकान्तिभिर्मुखैर्विनिद्रोज्ज्वलवाण चक्षुषः ॥८॥ अथ **कौलेयकः सारमेयकुलीनयोः ।** कुले भवः कौलेयकः । कुलकुक्षि—

गुणनिका तु शून्याङ्के नर्त्तने पाठनिश्चये ।
गोमेदकं पीतरत्ने काकोले पत्रकेऽपि च ॥१०॥
गोकण्टको गोक्षुरके गोखुरे स्थपुटी कृते ।
गोकुणिकः केकरे स्यात्पङ्कस्थगव्युपेक्षके ॥११॥
घर्घरिका भ्रष्टधान्ये किङ्कण्यां सरिदन्तरे ।
वादित्रस्य च दण्डेऽपि चण्डालिकौषधीभिदि ॥१२॥

ग्रीवादित्येयकञ् (६.३.१२) कुलस्यापत्यम्बा । येयकञावसमासे वेत्येयकञ् । द्वयोर्यथा—कौलेयकः किल भवेन्निजभर्तृभक्तः । **कौक्कुटिको दाम्भिके स्याददूरेरितलोचने ।** दाम्भिकचेष्टा मिथ्याशौचादि । कुक्कुटीतामाचरति कौक्कुटिकः । कुक्कुटीशब्देन कुक्कुटीपातो वा लक्ष्यते । तेन च देशस्याल्पता । कुक्कुटीं पश्यति कौक्कुटिकः । यो हि भिक्षुरविक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य युगमात्रदेशदर्शी गच्छति स एवमुच्यते । शाब्दिकदार्दरिकेति साधुः । वाच्यलिङ्गः । दाम्भिके यथा—जङ्घालवालचरिताध्वनि साधुवृत्तलुण्टाककौक्कुटिककर्म्म सुधार्मिकेषु ॥९॥ **गुणनिका तु शून्याङ्के नर्त्तने पाठनिश्चये ।** गुण्यतेऽस्यां गुणनी स्वार्थे के गुणनिका । गुणनमेव वा । गुणनमस्त्यस्यां वा । अतोऽनेकस्वरादितोकः । शून्याङ्को बिन्दुः । नर्त्तनमिति भावे आधारे वा अनट् । तत्र यथा—प्रेङ्खद्गुणा गुणनिकां गुणिकाः श्रयन्ति । पाठनिश्चये यथा—हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकेव सा । **गोमेदकं पीतरत्ने काकोले पत्रकेऽपि च ।** गोभिः किरणैर्जलैर्वा मेद्यति गोमेदकम् । काकोलं विषम् । पत्रकं गन्धद्रव्यम् । पीतरत्ने यथा—गोमेदकानां द्युतिभिः पिशंगाः ॥१०॥ **गोकण्टको गोक्षुरके गोखुरे स्थपुटीकृते ।** गवां कण्टको बाधकत्वात् गोकण्टकः । **गोकुणिकः केकरे स्यात्पङ्कस्थगव्युपेक्षके ।** गामक्षि क्वणयति गोकुणिकः । कुशंकेति साधुः । गामाक्रष्टुं कर्दमात् कुणिकः पाणिविकल इव वा । केकरो वक्रदृष्टिः । पङ्कस्थगवीमुपेक्षते यस्तत्र । द्वयोर्वाच्यलिंगः ॥११॥ **घर्घरिका भ्रष्टधान्ये किङ्कण्यां सरिदन्तरे । वादित्रस्य च दण्डेऽपि ।** घर्घरः स्वरोऽस्त्यस्यां

॥अथ चतुर्थः काण्डः॥

अङ्गारक उल्मुकांशे महीपुत्रे कुरण्टके ।
अङ्गारिका त्विक्षुकाण्डे किंशुकस्य च कोरके ॥१॥
अलिपकः पिके भृङ्गे अलमकः पद्मकेसरे ।
मधूके कोकिले भेके अश्मन्तकं मालुकाच्छदे ॥२॥
चुल्यां चाक्षेपको व्याधि निन्दके वातरुज्यपि ।
आकल्पकस्तमो मोहग्रन्थावुत्कलिका मुदोः ॥३॥

स्य हि वयं व्याख्यामनुब्रूमहे ॥२॥ यल्लक्ष्यं स्मृतिगोचरं सम्भवद् दृष्टं च शास्त्रान्तरे तत्सर्वं समदर्शि किन्तु कतिचिन्नो दृष्ट लक्ष्याः क्वचित् । अभ्यूह्यं स्वयमेव तेषु सुमुखैः शब्देषु लक्ष्यं बुधैर्यस्मात्सम्प्रति तुच्छकश्मलधियां ज्ञानं कुतः सर्वतः ॥३॥ एकत्रापि कृताभिधेयविषये व्युत्पत्तिरर्थान्तरे कर्त्तव्या स्वयमेव दर्शितदिशानिर्वेदवन्ध्यैर्बुधैः । वर्णाद्यक्रमवर्णनं च न कृतं तत्रापि कार्यं स्वयम् यत्कृत्स्नं प्रतिपादनेन विवृतिः कामं वरीवृध्यते ॥४॥

॥अर्हं॥ अथ चतुर्थं चतुःस्वरकाण्डमारभ्यते ॥

तत्रादौ कान्ताः। **अङ्गारक उल्मुकांशे महीपुत्रे कुरण्टके ।** अङ्गतेरयं गीति आरे स्वार्थे के च अङ्गारकः । त्रिष्वपि यथा—अङ्गारकं विजानीयात्तताङ्गारकरो विषम् । **अङ्गारिका त्विक्षुकाण्डे किंशुकस्य च कोरके ।** अङ्गमियर्त्ति अङ्गारिका । द्वयोर्यथा—अङ्गारिकाः पश्य पुरोपकण्ठे ॥१॥ **अलिपकः पिके भृङ्गे ।** न लिम्पति अलिपकः । कीचकादित्वात्साधुः । द्वयोर्यथा—अलिपककुलजल्पैराजुहावैव पान्थान् । **अलमकः पद्मकेसरे । मधूके कोकिले भेके ।** अलमत्यर्थमकति अलमकः । पद्मकेसरे मधूके च यथा—अलमलमकश्चेतो हर्तुं स्वसौरभवैभवात् । **अश्मन्तकं मालुकाच्छदे । चुल्यां च ।** अश्नुते अश्मं तं सीमन्तेति साधुः । स्वार्थे के अश्मन्तकम् । मालुकाच्छदो वृक्षः । तत्र यथा—तीराश्मन्तकशम्बिचुम्बितमुखाः ॥२॥ चुल्यां च यथा—अश्मन्तकान्तिकचलाचलकुम्भदासी । तृणेऽपि तत्र पुंसि यथा—मुञ्जा-

आखनिकस्त्वाखुरिव किराम्बुदरचोरयोः ।
उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि ॥४॥
एडमूकोऽनेडमूक इवावाक् श्रुतिके शठे ।
कटिल्लकस्तु वर्षाभ्वां पर्णासे कारवेल्लके ॥५॥

लाभे तु कर्त्तव्या कुशाश्मन्तकवल्वजैः । यदाह मंखः—अश्मन्तकं भवे च्चुल्यां ना वृक्षतृणभेदयोरिति । **आक्षेपको व्याधिनिन्दके वातरुज्यपि ।** आक्षिपत्याक्षेपकः । निन्दके वाच्यलिङ्गः । वातश्चासौ रुक् वातरुक् । त्रिष्वपि यथा—रुजति जनमनांसि क्षिप्रमाक्षेपकोऽयम् । **आकल्पकस्तमोमोहग्रन्थावुत्कलिकामुदोः ।** आकल्पते आकल्पकः । तमोमोहाभ्यां हृद्ग्रन्थिस्तमोमोहग्रन्थिः । त्रिष्वपि यथा—आकल्पकं कल्पयते मृगाक्षी ॥३॥ **आखनिकस्त्वाखुरिव किराम्बुदरचोरयोः ।** आखनते कुशिकादित्वात्के (उ.४५) आखनिकः । किरः सूकरः । त्रिष्वपि यथा—राजन्नाखनिकाः खनन्ति नगरं शून्यं त्वदीयद्विषाम् । पराङ्भ्याश्रुखनिभ्यां डिदित्यु (उ.७४२) प्रत्यये आखुः । लाघवार्थं द्विस्वरस्याप्यत्र पाठः । एवं सर्वत्र । उन्दरे स्त्रीपुंसः । शेषयोः पुंसि । उन्दरे यथा—कृत्वाखुर्विवरं स्वयं निपतितो नक्तंमुखे भोगिनः । **उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि ।** उत्कलिते उत्कलिका । कीकलीतिकः । हेलोत्कण्ठयोर्यथा—उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणात् । तरङ्गे यथा—वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभः ॥ ४ ॥ **एडमूकोऽनेडमूक इवावाक्श्रुतिके शठे ।** एडो बधिरः सचासौ मूकश्च एडमूकः । अनेडोऽपि अवकारोऽपि मूकः अनेडमूकः । वाच्यलिङ्गौ । द्वयोर्यथा—एडमूक कथमेडमूकता न व्यधायि विधिना तवाधुना । अनेडमूको वाक्श्रुतिके यथा—अनेडमूका भूयासुस्ते येषांत्वयि मत्सरः । **कटिल्लकस्तु वर्षाभ्वां पर्णासे कारवेल्लके ।** कटति कटिल्लः । भिल्लाच्छभल्लेति (उ.४६४) साधुः । के कटिल्लकः । वर्षाभूरोषधिः । पर्णा-

किन्दरायामुमायां च जर्जरीकं जरत्तरे ।
बहुच्छिद्रेऽप्यथ जैवातृकः स्याद्रजनीकरे ॥१३॥
कृशायुष्मद्भेषजेषु तर्तरीकं वहित्रके ।
परागे त्रिवर्णकस्तु गोक्षुरेऽप्यथ त्रिवर्णकम् ॥१४॥
त्र्यूषणं त्रिफला तिक्तशाकस्तु पथसुन्दरे ।
वरुणे खदिरे दन्दशूकस्तु फणिरक्षसोः ॥१५॥
दलाढकोऽरण्यतिले गैरिके नागकेसरे ।
कुन्दे महत्तरे फेने करिकर्ण्यशिरीषयोः ॥१६॥

घर्घरिका । किङ्कण्यां यथा—स्मराज्ञां घोषयन्तीव कांची घर्घरिकारवैः । चण्डालिकौषधी भिदि । किन्दरायामुमायां च । चण्डमलति चण्डालिका । चण्डालोऽस्त्यस्या वा । किन्दरा चण्डालवादित्रम् ॥१२॥ जर्जरीकं जरत्तरे । बहुच्छिद्रेऽपि । जीर्यति (जीयते) जर्जरीकम् । ऋपृ हृ शृ मृ भ्यो द्वश्चादावितीकः । वाच्यलिङ्गः । अथ जैवातृकः स्याद्रजनीकरे । कृशायुष्मद्भेषजेषु । जीवति जीवत्यनेन वा जैवातृकः । जीवेरातृको जैव चेत्यातृकः । कृशायुष्मतोर्वाच्यलिङ्गः । रजनीकरे यथा—प्रत्यर्थिक्षितिपालपङ्कजवनी जैवातृकक्ष्मापते ॥१३॥ आयुष्मति यथा—बालोस्तु जैवातृकः । तर्तरीकं वहित्रके । पारगे । तरति तर्तरीकम् । कृपृदृशृ इति । बहुवचनादिके साधुः । वहित्रकं प्रवहणम् । पारगः पारगामी । तत्र वाच्यलिङ्गः । त्रिवर्णकस्तु गोक्षुरे । त्रिभिरवयवैर्वर्ण्यते त्रिवर्णकः । क्लीबेत्यन्ये । अथ त्रिवर्णकम् । त्र्यूषणं त्रिफला । त्रयो वर्णका अत्र त्रिवर्णकम् ॥१४॥ त्र्यूषणं त्रिकटु । तिक्तशाकस्तु पथसुन्दरे । वरुणे खदिरे । तिक्तश्चासौ शाकश्च तिक्तशाकः । त्रयोऽपि वृक्षाः । दन्दशूकस्तु फणिरक्षसोः । दन्दश्यते इत्येवंशीलो दन्दशूकः । यजि जपि दंशी (५.२.९७) त्यूकः । फणिनि यथा—भयविह्वलमाशु दंदशूकैर्विवशैराविविशे स्वमेव धाम ॥१५॥ दलाढकोऽरण्यतिले गैरिके नागकेसरे । कुन्दे महत्तरे फेने करिकर्ण्य-

वात्यायां खातके प्रश्न्यां नियामको नियन्तरि ।
पोतवाहे कर्णधारे निश्चारकः समीरणे ॥१७॥
पुरीषस्य क्षये स्वैरे प्रचलाको भुजङ्गमे ।
शराघाते शिखण्डे च प्रकीर्णकं तुरङ्गमे ॥१८॥
चामरे विस्तरे ग्रन्थभेदे पिप्पलकं पुनः ।
चूचुके सीवनसूत्रे पिण्डीतकः फणिज्जके ॥१९॥
तगरे मदनद्रौ च पुण्डरीकं सिताम्बुजे ।
सितच्छत्रे भेषजे च पुण्डरीकोऽग्निदिग्गजे ॥२०॥

शिरीषयोः । वात्यायां खातके प्रश्न्याम् । दल्यते दलाढकः । कीचकेति (उ.३३) साधुः । महत्तरो बृहत्तरः । तत्र वाच्यलिङ्गः । खातकं कृत्रिमभूगर्त्तः । प्रश्नी ओषधिः । एकादशस्वर्थेषु ॥१६॥ नियामको नियन्तरि । पोतवाहे कर्णधारे । नियच्छति नियामकः । नियन्तरि वाच्यलिङ्गः । पोतवाहो नैया(यां)मकः । द्वयोर्यथा—चेतश्चेदनियामकं खलु चलत्युच्छृङ्खलं पोतवत् । कर्णधारो नाविकः । निश्चारकः समीरणे । पुरीषस्य क्षये स्वैरे । निश्चरति निश्चरणं वा निश्चारकः । स्वैरे वाच्यलिङ्गः । त्रिष्वपि यथा—निश्चारकश्चारकवासिवल्लभः ॥१७॥ प्रचलाको भुजङ्गमे । शरा(शरो)घाते शिखण्डे च । प्रचलमकति प्रचलाकः । शिखण्डश्चन्द्रकः । त्रिष्वपि यथा—काले बलाहकाकीर्णे केकाभिः प्रचलाकिनाम् । प्रचलाकाः पलायन्ते प्रचलाकैरिवार्दिताः । प्रकीर्णकं तुरङ्गमे । चामरे विस्तरे ग्रन्थभेदे । प्रकीर्यते स्म क्ते के च प्रकीर्णकम् । क्लीबे । गौडस्तु प्रकीर्णकः स्यात्तुरगे चामरग्रन्थभेदयोरिति पुंस्याह ॥१८॥ चामरे यथा—यांतोऽस्पृशन्तश्चरणैरिवावनिं जवात् प्रकीर्णैरभितः प्रकीर्णके । पिप्पलकं पुनः । चूचुके सीवनसूत्रे । पलतेः । पॄकलिभ्यां टि त्यिप् च पूर्वस्येत्य (उ.११) प्रत्यये के च । पिप्पलकम् । चूचुकं स्तनवृन्तम् । तत्र यथा—नीलपिप्पलकौ स्तनौ । पिण्डीतकः फणिज्जके । तगरे मदनद्रौ च । पिण्ड्यते पिण्डीतकः । हरु हि पिण्डिभ्य इतकः । (उ.७९) । त्रयोऽपि वनस्पतयः ॥१९॥ पुण्डरीकं सिताम्बुजे । सितच्छत्रे भेषजे च । पुगति पुण्ड्यते वा पुण्डरीकम् ।

१ दासेरकस्तु धीवरे दासीपुत्रे च करभे नियामको० ।

सहकारे गणधरे राजिलाहौ गजज्वरे ।
कोशकारान्तरे व्याघ्रे पुष्कलकस्तु कीलके ॥२१॥
कृपणे गन्धमृगे च स्यात्पूर्णानकमानके।
पात्रे च पूर्णपात्रे च फर्फरीकन्तु मार्दवे ॥२२॥
फर्फरीकश्चपेटायां बलाहकोऽम्बुदे गिरौ ।
दैत्ये नागे बर्बरीकः केशविन्यासकर्मणि ॥२३॥
कालभेदे महाकाले बकेरुका बलाकिका ।
वातवर्जितशाखा च भ्रमरको मधुव्रते ॥२४॥

सृणीकादित्वात्साधुः । (उ.५०) सिताम्बुजसितच्छत्रयोर्यथा—शान्ते पितर्याहित-पुण्डरीकं यं पुण्डरीकाक्षमिव श्रिताश्रीः । **पुण्डरीकोऽग्निदिग्गजे । सहकारे गणधरे राजिलाहौ गजज्वरे । कोशकारान्तरे व्याघ्रे ।** अग्निदिग्गजे आग्नेयी (आग्नेये) दिग्गजे यथा—ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥२०॥ गणधरः श्रीऋषभनाथस्य यथा—अन्यतश्च प्रतिष्ठासुरपरेद्युर्जगद्गुरुः गणत्-पुण्डरीकं तं पुण्डरीकमथादिशत् । कोशकारान्तरमिक्षुभेदः । व्याघ्रे यथा—तेन द्विपानामिव पुण्डरीको राज्ञामजय्योऽजनि पुण्डरीकः । **पुष्कलकस्तु कीलके । कृपणे गन्धमृगे च ।** पुष्णाति पुष्कलकः । कीचकादित्वात्साधुः । कीलकगन्धमृगयोर्यथा—सीम्नि पुष्कलको हतः ॥२१॥ **स्यात्पूर्णानकमानके । पात्रे च पूर्णपात्रे च ।** पूर्णमनिति पूर्णानकम् । पात्रं भाजनम् । पूर्णपात्रं तु—उत्सवे यद् बलाद् गृहीतं वस्त्रादि । यदाहुः। उत्सवेषु—सुहृद्भिर्यद्बलादाकृष्य गृह्यते । वस्त्रमाल्यादि तत्पूर्णपात्रं पूर्णानकं च तत् । **फर्फरीकन्तु मार्दवे ।** पिपर्त्ति फर्फरी-कम् । सृणी केति (उ.५०) साधुः ॥२२॥ **फर्फरीकश्चपेटायाम् ।** बाहुलक-त्वात्पुंस्त्वम् **। बलाहकोऽम्बुदे गिरौ । दैत्ये नागे ।** वारिणो वाहको बला-हकः । पृषोदरादित्वात् बलति वा । बलिविलिशिञ्जीति (उ.८१) आहकः । अम्बुदे यथा—बलाहकच्छेदविभक्तरागाम् । दैत्ये यथा—बलाहकं दैत्यरिपु-र्जघान । नागः काद्रवेयः । तत्र यथा—महानीलमहाकर्णौ धृतराष्ट्रबलाहकौ । **बर्बरीकः केशविन्यासकर्मणि । काल(शाक)भेदे महाकाले ।** वृणोति व्रियते वा वर्बरीकः । वृृ । इति इके साधुः ॥२३॥ महाकालः किम्पाकः । **बकेरुका बलाकिका । वातावर्जितशाखा च ।** बकैरुह्यते

गिरिके केशचूर्णे च भयानकस्तु भीषणे ।
व्याघ्रे राहौ रसे भट्टारको राज्ञि मुनौ सुरे ॥२५॥
भार्याटिको मृगभेदे भार्यया च विनिर्जिते ।
मरुबकः पुष्पभेदे मदनद्रौ फणिज्जके ॥२६॥
मयूरकस्त्वपामार्गे मयूरकं तु तुत्थके ।
माणवकः कुपुंसि स्यांद्बालहारभिदोरपि ॥२७॥

बकेरुका । घञि । पृषोदरादित्वात्साधुः । **भ्रमरको मधुव्रते । गिरिके चूर्णकेशे च ।** भ्राम्यति ऋच्छिचटीत्यरे (उ.३९७) के च भ्रमर-कः । भ्रमरप्रतिकृतिर्वा ॥२४॥ गिरिको बालक्रीडनकाष्ठम् । तत्र यथा—हेलाहतभ्रमरकभ्रमिमण्डलीभिः । चूर्णकेशो ललाटस्थोऽलकः । तत्र पुंस्त्रोबः । मधुव्रते स्त्रीपुंसः । तयोर्यथा—वीक्षन्ते वनितालताभ्रमरकैर्भ्राजिष्णवो जिष्णुना । **भयानकस्तु भीषणे । व्याघ्रे राहौ रसे ।** बिभेत्यस्मा-दिति भयानकः । शीभो राजे श्वानकः (उ. ७१) भीषणे वाच्यलिङ्गः । तत्र यथा— तत्सौम्यं च भयानकं च शिवयोरैक्यं शिवायास्तु वः । रसश्चर्वणीयतां गतः स्थायिभावः । तत्र यथा—विकृतस्वरश्रवणादि विभावं करकं पाद्यनुभावं शंकादिव्यभिचारि भयं भयानकः । **भट्टारको राज्ञि मुनौ सुरे ।** भज्यते भट्टारकः । कीचकादित्वात्साधुः । भट्टैर्र्यते वा । राज्ञि यथा—परमभट्टारक श्री कुमारपालदेवः शासनं प्रयच्छति यथा । मुनौ यथा—भट्टारकः श्री गौतमः । सुरे यथा—आम्नासीत्स्वपरिश्रमं सफलयन् श्रद्धा विशुद्धात्मने यस्मै भाष्यमहार्णवं स भगवान् श्री शेषभट्टारकः ॥२५॥ **भार्याटिको मृगभेदे भार्यया च विनिर्जिते ।** भार्यामटति भार्याटिकः । कुशिकादित्वात्साधुः । **मरुबकः पुष्पभेदे मदनद्रौ फणिज्जके ।** मरौ बक इव सीदति मरुबकः । पुष्पभेदे यथा—यतो रुरुचिरे स्त्रीणां चैत्रमरुबकस्रजः । फणिज्जके यथा—नवमरु-बके वर्त्तते पुष्पकार्यम् ॥२६॥ **मयूरकस्त्वपामार्गे ।** मयूरस्य तुल्यो मयूरकः । तस्यतुल्ये: क (७.१.१०८) इति कः । **मयूरकं तु तुत्थके ।** तुत्थकं शिखिग्रीवम् । **माणवकः कुपुंसिः स्याद् बालहारभिदोरपि ।** मनोरपत्यं

मृष्टेरुकः स्यान्मिष्टाशे दानशौण्डेऽतिथिद्विषि ।
रतर्द्धिकं तु दिवसे सुखस्नानेष्टमङ्गले ॥२८॥
राधरङ्कुस्तु नासीरे शीकरे जलदोपले ।
लालाटिकः स्यादाश्लेषभेदे कार्याक्षमेऽपि च ॥२९॥
प्रभोर्भालदर्शिनि च लेखीलकस्तु तत्र यः ।
स्वहस्तं परहस्तेन लिखितेषु विलेखयेत् ॥३०॥

कुत्सितं मूढं माणवः। माणवः कुत्सायामितिसाधुः। स्वार्थे के माणवकः। कुपुंसि बालभिदि यथा—निरर्थकं माणवका गृणन्ति। हारभित्षोडशलतो हारः॥२७॥ **मृष्टेरुकः स्यान्मि(मृ)ष्टाशे दानशौण्डेऽतिथिद्विषि।** मृष्टमियर्त्ति मृष्टेरुकः। कंचुकादित्वात्साधुः। वाच्यलिङ्गः। मृष्टाशो मृष्टभक्षकः। दानशौण्डेऽतिथिद्विषि च यथा—ननाम नामसाम्येन स्वभावसमता मता। दृष्टौ मृष्टेरुकावुभौ हि दानशौण्डाऽतिथिद्विषौ। **रतर्द्धिकं तु दिवसे सुखस्नानेऽष्टमंगले।** रतस्य ऋद्धिरत्र रतर्द्धिकम्। त्रिष्वपि यथा—रतर्द्धिके रतर्द्धिकं कृत्वा न्यसेद्रतर्द्धिकम् ॥२८॥ **राधरंकुस्तु नासीरे शीकरे जलदोपले।** राधसिद्धौ रमते राधरङ्कुः। कैशोशमीति (उ.७४९) कुः। पुंसि। नासीरमग्रयानम्। **लालाटिकः स्यादाश्लेषभेदे कार्याक्षमेऽपि च। प्रभोर्भालदर्शिनि च।** ललाटं प्रयोजनमस्य लालाटिकः। प्रयोजनमितीकण्। दूरस्थ एव स्वामिनो ललाटं पश्यति न तु कार्येषू तिष्ठते वा। प्रभोर्ललाटमेव कोपप्रसादाभिलक्षणाय पश्यति वा। शाब्दिकदार्दरिकेति (६ ४ ४५) साधुः। आश्लेषभेदे पुंसि। शेषयोर्वाच्यलिङ्गः ॥२९॥ प्रभोर्भालदर्शिनि यथा—सौखप्रसुतिकविधौ धिषणो नदीष्णः। सौस्नातिकः स किल दैत्यमहत्तरश्च। लालाटिकास्तदपरे प्रहराशितारा यस्याप्रियङ्करमनुष्य किमस्तु मूर्धनाम् (मूर्ध्ना)। प्रभोर्भावदर्शिनि चेति पाठः। भावदर्शी अभिप्रायप्रेक्षणतत्परः। **लेखोलकस्तु तत्र यः। स्वहस्तं परहस्तेन**

लेखहारे वर्त्तरूकः काकनीले जलावटे ।
वराटकः पद्मबीजकोशे रज्जौ कपर्दके ॥३१॥
वरण्डकस्तु मातंगवेद्यां यौवनकण्टके ।
सम्वर्त्तुले च भित्तौ च विनायको गणाधिपे ॥३२॥
बुद्धे तार्क्ष्ये गुरौ विघ्ने वितुन्नकन्तु धान्यके ।
झाटामलौषधौ वापि विदूषकोऽन्यनिन्दके ॥३३॥
क्रीडनीयकपात्रे च विशेषकस्तु पुण्ड्रके ।
विशेषाधायके वापि वृन्दारको मनोरमे ॥३४॥

लिखितेषु विलेखयेत्। लेखहारे। लेखयति लेखं लाति वा लेखीलकः। कीचकादित्वात्साधुः। परहस्तधृतेन स्वहस्तेन यो लेखं लिखति तस्मिन्नित्यर्थः ॥३०॥ **वर्त्तरूकः काकनीले जलावटे।** वर्त्तते वर्त्तरूकः। शम्बुकादित्वासाधुः। काकनीलो वृक्षभेदः। जलावटः सजलकूपः। नदीभेदेऽपि। **वराटकः पद्मबीजकोशे रज्जौ कपर्दके।** वरमटति वराटः। स्वार्थे के वराटकः। कपर्दके स्त्रीपुंसः इति दुर्गमंखौ। तत्र यथा—पुत्रादपि प्रियतमैकवराटकानाम् ॥३१॥ **वरण्डकस्तु मातङ्गवेद्यां यौवनकण्टके। सम्वर्त्तुले च भित्तौ च।** व्रियतेः। कृ तॄ शॄ इत्यंडे स्वार्थे के च वरण्डकः। मातङ्गवेद्यां यथा—गता सुरन्तरा दन्ती वरण्डक इवाभवत्। यौवनकण्टकः कीलकाख्यो मुखरोगः। सम्वर्त्तुलं सम्यक् वर्त्तुलम्। **विनायको गणाधिपे। बुद्धे तार्क्ष्ये गुरौ विघ्ने।** विनयति विनायकः। गणाधिपे यथा—न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति। विघ्ने यथा—अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥३२॥ बुद्धः सुगतः। तार्क्ष्यो गरुडः। गुरुः शास्ता। **वितुन्नकन्तु धान्यके। झाटामलौषधौ वापि।** वितुद्यते क्ते के च वितुन्नकम्। धान्यकं कुस्तुम्बुरुः। **विदूषकोऽन्यनिन्दके। क्रीडनीयकपात्रे च।** विदूषयति विदूषकः। अन्यनिन्दके वाच्यलिङ्गः ॥३३॥ क्रीडनीयकपात्रे यथा—विदूषकनटीमार्षैः प्रस्तुताक्षेपि भाषितम्। सूत्रधारस्य

सुरेश्रेष्ठे बृहतिका स्यादूरुवस्त्रभेदयोः ।
वैतालिकः खेट्टताले मङ्गलपाठकेऽपि च ॥३५॥
वैनाशिकः स्यात् क्षणिके परायत्तोर्णनाभयोः ।
वैदेहको वाणिजके वैश्यापुत्रे च शूद्रतः ॥३६॥
शतानीको मुनौ वृद्धे शालावृको बलीमुखे ।
सारमेये शृगाले च शिलाटकस्तिलाट्टयोः ॥३७॥

वक्त्रोक्तस्पष्टोक्त्यैर्थत्तदामुखम् । **विशेषकस्तु पुण्ड्रके । विशेषाधायके वापि ।** विशिनष्टि विशेषकः । पुण्ड्रके पुंक्लीबः । विशेषाधायके वाच्यलिङ्गः । पुण्ड्रके यथा-विशेषको वा विशिशेष यस्याः श्रियं त्रिलोकीतिलकः स एव । विशेषाधायके यथा—गुणो गुणविशेषकः । **वृन्दारको मनोरमे । सुरे श्रेष्ठे ।** प्रशस्तं वृन्दमस्त्यस्य वृन्दारकः । वृन्दादारकः (७-२-११) मनोरमं मनोज्ञम् । श्रेष्ठं मुख्यम् । तयोर्वाच्यलिङ्गः ॥३४॥ सुरे यथा—वृन्दारवृन्दारकवृन्दवन्दो मन्दारमालामकरन्दबिन्दून् । शेषयोर्यथा—विद्वद्वृन्दारकैर्वन्द्या । **बृहतिका स्यादूरुवस्त्रभेदयोः ।** बृहत्येव बृहतिका । तनुपुत्रे तिकः । ऊरुः सक्थि । वस्त्रभेदे यथा—क्षपति यो भुवनं विततां बृहद्बृहतिकामिव रौचनिकीं रुचम् । **वैतालिकः खेट्टताले मङ्गलपाठकेऽपि च ।** विताल एव वैतालिकः । विनयादित्वादिकण् । वितालः शब्दप्रयोजनमस्येति वा । प्रयोजनमितीकण् । खेट्टेन क्रीडया तालः खेट्टतालः । मङ्गलपाठके यथा—वैतालिकाः कलगिरोऽवसरेषु पेठुः ॥३५॥ **वैनाशिकः स्यात् क्षणिके परायत्तोर्णनाभयोः ।** विनाशः प्रयोजनमस्य वैनाशिकः । क्षणिकपरायत्तयोर्वाच्यलिङ्गः । क्षणिके यथा—वैनाशिकं जगदिदं निगदन्ति सन्तः । उर्णनाभो लूता । **वैदेहका वाणिजके वैश्यापुत्रे च शूद्रतः ।** विदिह्यते घञि स्वार्थेऽणिके च वैदेहकः । वाणिजके यथा-गृहपति वैदेहक तापसव्यञ्जनाः प्राणिधयः । शूद्रतो वैश्यापुत्रे यथा-वैदेहकानां कृषिगोरक्षादि कर्म ॥३६॥ **शतानीको मुनौ वृद्धे ।** शतमनिति शतानीकः । सृणीकादित्वात्साधुः । **शालावृको बलीमुखे । सारमेये शृगाले च ।** शालायां

शृङ्गाटकं पथां श्लेषे पानीयकण्टकेऽपि च ।
संघाटिका[1] तु कुट्टन्यां घ्राणे युग्मेऽम्बुकण्टके ॥३८॥
सन्तानिका क्षीरसारे मर्कटस्य च जालके ।
सुप्रतीकः स्यादीशानदिग्गजे शोभनाङ्गके ॥३९॥
सैकतिकं पुनर्मातृयात्रामङ्गलसूत्रयोः ।
सैकतिकः क्षेपणिके संन्यस्ते भ्रान्तिजीविनि ॥४०॥

वृक इव शालावृकः । शालां वृणोति वा । वीचि पुषीति कित् कः (उ.२२) । त्रिष्वपि यथा—भीरुः शालावृकेभ्यो यः स कार्यं किन्नु साधयेत् । **शिलाटकस्ति-(शि)लाट्टयोः ।** शिलमुञ्छं शिलां वा अटति शिलाटकः ॥३७॥ **शृङ्गाटकं पथां श्लेषे पानीयकण्टकेऽपि च ।** शीर्यते शृंगाटं कपाटादित्वात्साधुः । तस्य तुल्यं शृङ्गाटकम् । शृङ्गमटति वा । पथां श्लेषे यथा—धातुश्चतुर्मुखीकंठशृंगाटकविहारिणीम् । पानीयकण्टको जलविशेषः । पुंस्यपीत्यन्ये । **संघाटिका तु कुट्टन्यां घ्राणे युग्मेऽम्बुकण्टके ।** संघटते संघमटति वा संघाटिका । युग्मे यथा—संघाटिका घटयतां शिवयोः शिवानि ॥३८॥ **सन्तानिका क्षीरसारे (शारे)-मर्कटस्य च जालके ।** सन्तनोति सन्तानिका । सन्तानोऽस्त्यस्य वा सन्तानिका । क्षीरसारम् आमिक्षा । मर्कटो लूता तस्य जालकम् । **सुप्रतीकः स्यादीशानदिग्गजे शोभनाङ्गके ।** शोभनाः प्रतीकाः अवयवा यस्य सुप्रतीकः । ईशानदिग्गजे यथा—सुरगज इव गांगं सैकतं सुप्रतीकः । शोभनाङ्गके वाच्यलिङ्गः ॥३९॥ **सैकतिकं पुनर्मातृयात्रामङ्गलसूत्रयोः ।** सिकिः सौत्रः । सिकते सैकतिकम् । कुशिकादित्वात्साधुः । मातृयात्रा मातृणां ब्रह्म्यादीनां यात्रा उत्सवः । मङ्गलसूत्रं (कौसुम्भं) कंकणसूत्रम् । **सैकतिकः क्षेपणिके संन्यस्ते भ्रान्तिजीविनि ।** सिकताः प्रयोजनमस्य सैकतिकः । भ्रान्तिवाच्यलिङ्गः । क्षेपणादिः कर्करादिः । संन्यस्तस्त्यक्तसंगः ।

१ शृगालिका शिवायां स्यात्रासादपि पलायने । संघाटिका॰ ।

सोमवल्कः कट्फले स्याद्वलक्षः खदिरद्रुमे ।
सौगन्धिको गन्धवणिक् सौगन्धिकन्तु कतृणे ॥४१॥
गन्धोपले पद्मरागे कल्हारेऽग्निमुखो द्विजे ।
भल्लाते चित्रके देवेऽप्यग्निशिखं तु कुंकुमे ॥४२॥
अग्निशिखा लाङ्गलिक्यामिन्दुलेखेन्दुखण्डके ।
गडूची सोमलतयोः पञ्चनखस्तु कच्छपे ॥४३॥
गजे बद्धशिखो बाले बद्धशिखोच्चटौषधौ ।
महाशंखो निधिभेदे संख्याभेदे नरास्थिनि ॥४४॥

जीवी सन्देहजीवी ॥४०॥ सोमवल्कः कट्फले स्याद्वलक्षः खदिरद्रुमे । सोमस्येव वल्कलमस्य सोमवल्कः । कट्फलो वृक्षः । सौगन्धिको गन्धवणिक् । सुगन्धाः पण्यमस्य सौगन्धिकः । सौगन्धिकं तु कतृणे । गन्धोपले पद्मरागे कल्हारे । सुगन्धः प्रयोजनमस्य सौगन्धिकम् । कतृणं रोहिषम् ॥४१॥ गन्धोपलो गंधकौषधम् । पद्मरागो मणिः । कल्हारमुत्पलभेदस्तत्र यथा—सरस्सु राजहंसाभसौगन्धिकसुगन्धिषु । अथ खान्ताः । अग्निमुखो द्विजे । भल्लाते चित्रके देवेऽपि । अग्निर्मुखं प्रधानमास्यं वा अस्य । अग्निर्मुखे अस्मादिति वा अग्निमुखः । भल्लातकचित्रके ओषधिभेदौ । अग्निशिखं तु कुंकुमे । अग्निरिव शिखाऽस्य अग्निशिखम् ॥४२॥ अग्निशिखा लाङ्गलिक्याम् । लाङ्गलिको ओषधिः । इन्दुलेखेन्दुखण्डके । गडूची सोमलतयोः । इन्दोर्लेखा इन्दुलेखेव वा इन्दुलेखा । इन्दुखण्डके यथा—इन्दुलेखेव यां वक्रासंध्येव क्षणरागिणी । गडूची सोमलते ओषधी । पञ्चनखस्तु कच्छपे गजे । पञ्चनखा अस्य पंचनखः । कच्छपः शशकादीनामुपलक्षणम् । यदाह—पंच पंचनखा भक्ष्या ब्रह्मक्षत्रस्य राघव । शशकः शल्यकः श्वाविद्गोधा कूर्मश्च पञ्चमः ॥४३॥ बद्धशिखो बाले । बद्धशिखाऽस्य बद्धशिखः । बालः शिशुः । बद्धशिखोच्चटौषधौ । बद्धा शिखा यया बद्धशिखा । महाशंखो निधिभेदे संख्याभेदे नरास्थिनि ।

व्याघ्रनखस्तु कन्दे स्याद्गान्धद्रव्यान्तरेऽपि च ।
शशिलेखा वृत्तभेदे वाकुची चन्द्रलेखयोः ॥४५॥
शिलीमुखोऽलौ बाणे चाऽपवर्गस्त्यागमोक्षयोः ।
क्रियावसानसाफल्येऽप्यभिषङ्गः पराभवे ॥४६॥
आक्रोशे शपथे चेहामृगः स्याद् रूपकान्तरे ।
वृके जन्तौ चोपरागो राहुग्रस्तार्कचन्द्रयोः ॥४७॥

महांश्चासौ शंखः महाशंखः ॥४४॥ व्याघ्रनखस्तु कन्दे स्याद्गन्धद्रव्यान्तरेऽपि च । व्याघ्रनख इव नख व्याघ्रनखः । शशिलेखा वृत्तभेदे बाकुचीचन्द्रलेखयोः । शशिनमपि लिखति शशिनो लेखा वा शशिलेखा । वृत्तभेदचन्द्रलेखयोर्यथा—कलयति पाण्डुरभावं तव विरहे सुतनुः सा । सुभगे यथा दिवसादौ गलितरुचिः शशिलेखा ॥ बाकुची वर्व्वरिका ॥४५॥ शिलीमुखोऽलौ बाणे च । शिलीव जलजन्तुरिव मुखमस्य शिलिमुखः । अलौ स्त्रीपुंसः । तयोर्यथा—खामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि । अथा गान्ताः । अपवर्गस्त्यागमोक्षयोः । क्रियावसानसाफल्येऽपि । अवपर्जनमपवर्गः । त्यागे दाने च यथा-अर्थोपवर्गैरसिकस्य यशांसि सूते । मोक्षे यथा-तथापि भवतो मुक्तिरपवर्गानुबन्धिनी । क्रियाऽवसाने यथा-क्रियापवर्गेष्वनुजीविसात्कृताः। अभिषङ्गः पराभवे । आक्रोशे शपथे च । अभिषं जनमभिषज्यतेऽनेनेति वाऽभिषंगः । पराभवे यथा-जाताभिषङ्गो नृपतिर्निषङ्गात् ॥४६॥ आक्रोशे यथा—कोपाभिषङ्गविगलत्सकलांगसन्धिः । शपथे यथा-चचाल तस्मादभिषङ्गभङ्गात् । ईहामृगः स्याद्रूपकान्तरे । वृके जन्तौ च । ईहया मृग्यते मृगयते वा ईहामृगः । रूपकान्तरे वृके च यथा-विस्फूर्जदीहामृगभूमिकासु रज्यन्ति रक्ताविरताश्च केचित् । उपरागो राहुग्रस्तार्कचन्द्रयोः । विगाने दुर्नये राहौ । उपरज्यतेऽनेन उपरागः । घञ भावे करणे इति नलोपः । उपरञ्जनम्वा । राहुग्रस्तार्कचन्द्रयोर्यथा—उपरागक्षणे दत्तमक्षयं दक्षिणादिकम् । शेषेषु यथा—कस्योपरागललितं न विराग(म)हेतुः ॥४७॥

विगाने दुर्नये राहावुपसर्गे उपद्रवे ।
प्रादौ रोगे च भेदे च कटभङ्गो नृपात्यये ॥४८॥
हस्तच्छेदे च सस्यानां छत्रभङ्गो नृपक्षये ।
स्वातन्त्र्ये विधवत्वे च दीर्घाध्वगः क्रमेलके ॥४९॥
लेखहारे मल्लनागो वात्स्यायनसुरेभयोः ।
समायोगस्तु संयोगे समवाये प्रयोजने ॥५०॥
सम्प्रयोगो निधुवने सम्बन्धे कार्मणेऽपि च ।
जलसूचिः शिशुमारे त्रोटिमत्स्ये जलौकसि ॥५१॥

उपसर्ग उपद्रवे । प्रादौ रोगे च भेदे च । उपसृज्यते उपसर्गः । उपद्रवे यथा–रक्षन्तु स्खलितोपसर्गगलितप्रौढप्रतिज्ञाविधौ । प्रादौ यथा-धातुलीनमुपसर्ग इवार्थम् (र्थः)।कटभङ्गो नृपात्यये । हस्तच्छेदे च सस्यानाम् । कटस्य भंग इव प्रजानां दुःसहत्वात् । कटेति शब्देन भंजनं वा कटभंगः । नृपात्ययो नृपक्षयः । सस्यानां हस्तच्छेदो मोटनम् । छत्रभङ्गो नृपक्षये । स्वातन्त्र्ये विधवत्वे च । छत्रस्य भङ्गोऽत्र छत्रभङ्गः । नृपक्षये यथा-रजन्यामिन्द्रचापेन छत्रभङ्गं विनिर्दिशेत् । दीर्घाध्वगः क्रमेलके । लेखहारे । दीर्घमध्वानं गच्छति दीर्घाध्वगः । नाम्नोगम (५-१-१३१) इति डः ॥४९॥ लेखहारे च वाच्यलिङ्गः । द्वयोर्यथा-दीर्घाध्वगानां हि किमत्र दूरम् । मल्लनागो वात्स्यायनसुरेभयोः । मल्लश्चासौ नागश्च मल्लनागः । वात्स्यायनश्चाणक्यः । सुरेभ ऐरावणः । समायोगस्तु संयोगे समवाये प्रयोजने । समायोजनं समायुज्यतेऽथवा समायोगः । संयोगो द्रव्ययोरुपश्लेषः । समवायो नैयायिकप्रसिद्धः सम्बन्धविशेषः । त्रिष्वपि यथा–दुर्लभो हि समायोगे समायोगो हितैषिणाम् ॥५०॥ सम्प्रयोगो निधुवने सम्बन्धे कार्मणेऽपि च । सम्प्रयोजनं सम्यक् प्रयोगो वात्र सम्प्रयोगः । निधुवने यथा–सा सम्प्रयोगरभसेन दिनं नतांगी । सम्बन्धे यथा-साधुभिः सम्प्रयोगः । अथ चान्तौ । जलसूचिः शिशुमारे त्रोटिमत्स्ये जलौकसि । कङ्कशृङ्गाटयोश्चापि । जलस्य सूचिरिव जलं सूचयति वा जलसूचिः । स्वरेभ्य इः पुंसि ।

कङ्कशृङ्गाटयोश्चापि मलिम्लुचस्तु तस्करे ।
वाते कश्मीरजं कुष्टे कुंकुमे पौष्करेऽपि च ॥५२॥
कश्मीरजाऽतिविषायां क्षीराब्धिजं तु मौक्तिके ।
वशिरे क्षीराब्धिजस्तु चन्द्रे क्षीराब्धिजा श्रियाम् ॥५३॥
ग्रहराजः शशिन्यर्के जघन्यजोऽनुजन्मनि ।
शूद्रे च द्विजराजस्तु शेषे तार्क्ष्ये निशाकरे ॥५४॥

त्रोटिश्चञ्चुः तया युक्तो मत्स्यस्त्रोटिमत्स्यः । कंकः पक्षी । शृङ्गाटं जलोद्भवः कन्दः ॥५१॥ मलिम्लुचस्तु तस्करे । वाते । मलिनं म्लोचति मलिम्लुचः । मूलविभुजादित्वात्कः । तस्करे यथा–न परेषु महौजसः छलादपकुर्वन्ति मलिम्लुचा इव । अथ जान्ताः । कश्मीरजं कुष्टे कुङ्कुमे पौष्करेऽपि (पुष्करेऽपि) च । कश्मीरेषु जातं कश्मीरजम् । कुष्टं गन्धद्रव्यम् । पौष्करं पुष्करमूलम् । कुङ्कुमे यथा–अरुणितमकठोरैर्वेश्मकश्मीरजाम्भः स्नपितमिव तदेतद्भानुभिर्भाति भानोः ॥५२॥ कश्मीजाऽतिविषायाम् । अतिविषा ओषधिः । क्षीराब्धिजं तु मौक्तिके । वशिरे । क्षीराब्धेर्जातं क्षीराब्धिजम् । वशिरः सामुद्रलवणम् । क्षीराब्धिजस्तु चन्द्रे । यथा–क्षीराब्धिजस्य तुलनां ललनामुखानि । क्षीराब्धिजा श्रियाम् । यथा–क्षीराब्धिजा न स्थिरतामुपैति ॥५३॥ ग्रहराजः शशिन्यर्के । ग्रहाणां राजा ग्रहेषु राजते वा ग्रहराजः । द्वयोर्यथा–अस्मिन् विग्रहराजे काले करचक्षुषामुदयः । जघन्यजोऽनुजन्मनि शूद्रे च । जघन्ये अंत्ये जातो जघन्यजः । अनुजन्मनि यथा-जघन्यजे भ्रातरि कातरास्ये । नीचेऽपि । नीचशूद्रयोर्यथा–तर्किं करोषि दुर्बुद्धे यत्कुर्वन्ति जघन्यजाः । द्विजराजस्तु शेषे तार्क्ष्ये निशाकरे । द्विजानां सर्पाणां पक्षिणां विप्राणां वा राजा द्विजराजः । राजन् सखेरिति अट् (७-३-१०६) समासान्तः । शेषे तार्क्ष्ये च यथा-अध्यास्य विष्णुर्द्विजराजपृष्ठम् । निशाकरे यथा-इत्थं द्विजेन द्विजराजकान्तिरावेदिते वेदविदांवरेण । द्विजेऽपि ॥५४॥ धर्मराजस्तु सुगते श्राद्धदेवे

धर्मराजस्तु सुगते श्राद्धदेवे युधिष्ठिरे ।
भरद्वाजः पक्षिभेदे बृहस्पतिसुतेऽपि च ॥५५॥
भारद्वाजो मुनौ भारद्वाजी वनपिचुद्रुमे ।
भृङ्गराजो मधुकरे मार्कवे विहगान्तरे ॥५६॥
राजराजो नृपेशेन्द्वोः कुबेरेऽथ सकृत्प्रजः ।
द्विके सिंहेऽथोच्चिङ्गटः कोपने मीनभिद्यपि ॥५७॥
करहाटः पद्मकन्दे देशद्रुमविशेषयोः ।
कार्यपुटोऽनर्थकरे क्षपणोन्मत्तयोरपि ॥५८॥

युधिष्ठिरे । धर्म्मेण समवर्त्तित्वेन राजते धर्मराजः । सुगते श्राद्धदेवे च यथा–धर्म्मराजपरिकल्पितरातित्यक्तदोषनिचयाः खलु सन्तः । युधिष्ठिरे यथा–सहायमध्वरधुरां धर्मराजो विवक्षते । भरद्वाजः पक्षिभेदे बृहस्पतिसुतेऽपि च । भरन्तो वाजाः पक्षाः अस्य भरतो वाजयति वा भरद्वाजः ॥५५॥ भारद्वाजो मुनौ । भरद्वाजस्यापत्यं वृद्धं भारद्वाजः । विदादित्वादञ् । भारद्वाजी वनपिचुद्रुमे । भारद्वाजस्येयं भारद्वाजी । वनोद्भववमनीवृक्षः । भृङ्गराजो मधुकरे मार्कवे विहगान्तरे । भृंगश्चासौ राजा च भृंगवद्राजते वा भृंगराजः । मार्कवः केशरञ्जनः । विहगान्तरं धूम्याटः । मधुकरे स्त्रीपुंसः । तत्र यथा–राजन् राजीव राजीयं भृङ्गराजैर्विराजते ॥५॥ राजराजो नृपेशेन्द्वोः कुबेरे । राज्ञां राजा स्वामी राजा चासौ राजा च राज्ञां यक्षाणां वा राजा राजराजः । राजन् सखेरित्यट् । समासान्तः । नृपेशे यथा–नैवास्तिराजराजस्य तत्सुखं नैव देवराजस्य । इन्दौ यथा–सपदि कुमुदराजी राजराजेन रेजे । कुबेरे यथा–अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ । अथ सकृत्प्रजः । द्विके सिंहे । सकृत्प्रजापत्यमस्य सकृत्प्रजः । द्विकः काकः । द्वयोर्यथा–सकृत्प्रजानामपि वंशवृद्धिः । अथ दान्ताः । अथोच्चिङ्गटः कोपने मीनभिद्यपि । उच्चाङ्गमटति उच्चिङ्गटः । पृषोदरादित्वात् । कोपने वाच्यलिङ्गः ॥५७॥ करहाटः पद्मकन्दे देशद्रुमविशेषयोः । कं रहयति करहं पद्मादि तदटति ।

कामकूटौ वेश्याविभ्रमष्ठावथ कूटन्नटः ।
शोणके कैवर्त्तीमुस्ते कुण्डकीटस्तु जारतः ॥५९॥
विप्रीपुत्रे दासीपतौ चार्वाकोक्ति विशारदे ।
खञ्जरीटस्तु खञ्जनेऽसिधाराव्रतचारिणी ॥६०॥
गाढमुष्टिस्तु कृपणे कृपाणप्रभृतावपि ।
चक्रवाटस्तु पर्यन्ते क्रियारोहे शिखातरौ ॥६१॥
तुलाकोटिर्मानभेदेऽर्बुदे स्यान्नूपुरेऽपि च ।
नारकीटः [1]स्वदत्ताशाविहन्तर्यश्मकीटके ॥६२॥

करे हटनमस्येति करहाटः । पद्मकन्दे यथा–सुघटितकरहाटां क्रोटिभिव्रोटयन्ति । पुष्पविशेषेऽपि । कार्यपुटोऽनर्थकरे क्षपणोन्मत्तयोरपि ॥५८॥ कार्येषु पुटति श्लिष्यति कार्यैः पुटोऽस्यति वा कार्यपुटः । अनर्थकरोन्मत्तयोर्वाच्यलिङ्गः ॥५८॥ कामकूटौ वेश्याविभ्रमेष्टौ । कामं कूटं कपटमत्र कामस्य वा कूट इव कामकूटः । वेश्याया विभ्रमो वेश्याविभ्रमः । वेश्याया इष्टश्च । अथ कूटन्नटः । शोणके कैवर्त्तीमुस्ते । कूटन् वक्रीभवन् नटति स्पन्दते कूटन्नटः । द्वा[2]प्यौषधभेदौ । कुण्डकीटस्तु जारतः । विप्रीपुत्रे दासीपतौ चार्वाकोक्ति विशारदे । कुण्डो भर्त्तर्यमृते जारजः । स चासौ कीटश्च कुण्डकीटः । निन्द्यं कुत्सनैरपापाद्यैरिति समासः । अन्यत्रोपचारात् । चार्वाकोक्तिविशारदे वाच्यलिङ्गः । खञ्जरीटस्तु खञ्जने । असिधाराव्रतचारिणि । खञ्जति खञ्जरीटः । खञ्जेररीटः । असिधाराव्रतचारिणि वाच्यलिङ्गः । खंजने यथा–स खंजरीटा सपयःप्रसादा (?) सा कस्य नो मानसमाच्छिनत्ति ॥६०॥ फलकेऽपि । गाढमुष्टिस्तु कृपणे कृपाणप्रभृतावपि । गाढो मुष्टिरस्य गाढमुष्टिः । कृपणे वाच्यलिङ्गः । द्वयोर्यथा–कोशासक्तो गाढमुष्टिर्न किञ्चित् । प्रभृतिशब्दात् क्षुरिकादौ । चक्रवाटस्तु पर्यन्ते क्रियारोहे शिखातरौ । चक्रे चक्रावद्वा वटनं वेष्टनमस्य चक्रं वटति वा चक्रवाटः । क्रियाया आरोहः प्रकर्षः ॥६१॥ तुलाकोटिर्मानभेदेऽर्बुदे स्यान्नूपुरेऽपि च । कोटेस्तुला

१. गन्धकुटी मदिरायां बुद्धायतनेऽपि च । गाढ० । २. चतुःषष्टिश्चतुःषष्टिकलासु च इवेऽपि च । तुला. ।

प्रतिकृष्टन्तु गुह्ये स्यात् द्विरावृत्या च कर्षिते ।
प्रतिशिष्टः पुनः प्रत्याख्याते च प्रेषितेऽपि च ॥६३॥
परपुष्टः कलकण्ठे परपुष्टा पणाङ्गना ।
वर्कराटस्तु तरुणादित्यरोचिःकटाक्षयोः ॥६४॥
स्त्रीणां पयोधरोत्संगकान्तदत्तनखेऽपि ।
शिपिविष्टस्तु खल्वाटे दुश्चर्मणि पिनाकिनि ॥६५॥

तुलाकोटिः । राजदन्तादित्वात् । तुलाकृतेर्जंघायाः कोटिरिव तुलाकोटिः । पुंसि । द्वयोर्यथा—अमूल्यस्य मम स्वर्णतुलाकोटिद्वयं कियत् इति कोपादिवाताम्रं पादयुग्मं मृगीदृशः । **नारकीटः** स्वदत्ताशाविहन्तर्यश्मकीटके । नरकीट एव नारकीटः । प्रज्ञादित्वादण् । न इयर्त्ति नारः । पाषाणस्तस्य कीटो वा स्वदत्तामाशां कामं विहन्ति यस्तत्रेत्यर्थः । तत्र वाच्यलिङ्गः ॥६२॥ **प्रतिकृष्टन्तु गुह्ये स्यात्** । **द्विरावृत्या च कर्षिते** । प्रतिकृष्यते प्रतिकृष्टं वाच्यलिङ्गः । गुह्यं गोप्यम् । **प्रतिशिष्टः पुनः प्रत्याख्याते च प्रेषितेऽपि च** । प्रतिशिष्यते प्रतिशिष्टः । वाच्यलिङ्गः । प्रत्याख्याते यथा—अप्रियाणि वदत्येव प्रतिशिष्टोऽपि दुर्जनः । प्रेषिते यथा—दमघोषसुतेन कश्चन प्रतिशिष्टः प्रतिभानवानथ । **परपुष्टः कलकण्ठे** । परेण पुष्यते स्म परपुष्टः । यथा—तद्वसन्तमदान्धस्य परपुष्टस्य चेष्टितम् । **परपुष्टा पणाङ्गना** । यथा—इष्टा नैव विशिष्टानां परपुष्टा स कुट्टनी । **वर्कराटस्तु तरुणादित्यरोचिःकटाक्षयोः** । **स्त्रीणां पयोधरोत्संगकान्तदत्तनखेऽपि च** । वर्करं तरुणमादित्यमटति वर्कराटः । वर्करेण नर्म्मणा वाटति वर्कराटः ॥६४॥ **शिपिविष्टस्तु खल्वाटे दुश्चर्मणि पिनाकिनि** । शिपिश्चर्मविष्टं दोषव्यासमस्य शिपिविष्टः । शिबिर्नाम राजा स मूर्द्धनि विष्टोऽस्य तदस्थिवह्नादिति वा पृषोदरादित्वात् । दुश्चर्मा निश्चमाप्रशिश्नः विष्णावपि । विष्णुपिनाकिनो र्यथा—शिष्टानां शिपिविष्टविष्टपपते भूयात् स्वमिष्टप्रदः । **श्रुतिकटः प्रायश्चित्ते प्रांचलोहभुजङ्गयोः** । श्रुतिं शास्त्रं कर्णं वा कटति

श्रुतिकटः प्रायश्चित्ते प्रांचलोहभुजङ्गयोः ।
कलकण्ठः पिके पारापते हंसे कलध्वनौ ॥६६॥
कालकण्ठनीलकण्ठौ पीतसारे महेश्वरे ।
दात्यूहे ग्रामचटके खञ्जरीटे शिखावले ॥६७॥
कालपृष्ठन्तु कोदण्डमात्रके कर्णधन्वनि ।
कालपृष्ठो मृगभेदे कङ्के दन्तशठः पुनः ॥६८॥
जम्बीरे नागरङ्गे च कर्म्मरङ्गकपित्थयोः ।
पूतिकाष्ठन्तु सरले देवदारुद्रुमेऽपि च ॥६९॥

अनुगच्छति आवृणाति वा श्रुतिकटः । प्रायश्चित्तं पापशोधनमुपवासादि । प्राञ्चलोहं लोहविशेषः । भुजङ्गः सर्पः । अथ ठान्ताः । **कलकण्ठः पिके पारापते हंसे कलध्वनौ** । कलो मधुरकण्ठः स्वरोऽस्य कलकण्ठः । पिके पारापते च । यथा—प्रियतमावदनेन्दुविलोकितैरसुहितः कलकण्ठयुवा न कः प्रति मुहुः प्रतिगद्य नभस्तलाद्वलति याति वलत्यथ यात्यथ । कलध्वनौ वाच्यलिङ्गः । तत्र यथा—कलयति कलकण्ठः पञ्चमं रागराजम् ॥६६॥ **कालकण्ठनीलकण्ठौ पीतसारे महेश्वरे** । **दात्यूहे ग्रामचटके खञ्जरीटे शिखावले** । कालो नीलश्च कण्ठोऽस्य कालकण्ठः नीलकण्ठः । पीतसारो वृक्षः । महेश्वरे यथा—जयन्ति नीलकण्ठस्य नीलाः कण्ठे महाहयः । शिखावले मयूरे यथा—यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः । एवं कालकण्ठोऽपि ॥६७॥ **कालपृष्ठन्तु कोदण्डमात्रके कर्णधन्वनि** । कालः पृष्ठेऽस्य कालं पृष्ठमस्ति वा कालपृष्ठम् । कर्णधन्वनि यथा—कर्णे करान्दोलितकालपृष्ठे तिष्ठेद्भटपृष्ठगणः कुतोऽग्रे । **कालपृष्ठो मृगभेदे कङ्के** । कङ्कः पक्षी । **दन्तशठः पुनः** । **जम्बीरे नागरङ्गे च कर्म्मरङ्गकपित्थयोः** । दन्तेषु शठोऽम्लत्वात् दन्तशठः चत्वारो वृक्षाः ॥६८॥ **पूतिकाष्ठन्तु सरलो देवदारुद्रुमेऽपि च** । पूति उग्रगन्धं काष्ठमस्य पूतिकाष्ठम् । सरलो वृक्षः ॥६९॥ **सूत्रकण्ठः खंजरीटे द्विजन्मनि कपोतके** । सूत्रं सूत्राकृतिरुपवीतं वा कण्ठेऽस्य सूत्रकण्ठः । द्विजन्मनि यथा—किं पाठ—

सूत्रकण्ठः खंजरीटे द्विजन्मनि कपोतके ।
हारिकण्ठो हारयुक्तकण्ठे परभृतेऽपि च ॥७०॥
अपो गण्डोऽतिभीरौ स्याच्छिंशुकाविकलाङ्गयोः ।
चक्रवाडं गणे चक्रवाडोऽद्रौ चक्रवालवत् ॥७१।
जलरुण्डः पयोरेणौ जलावर्ते भुजङ्गमे ।
देवताडो घोषकेऽग्नौ राहौ वातखुडा पुनः ॥७२॥
वात्यायां पिच्छिले स्फोटे वामायां वातशोणिते ।
अध्यारूढः समारूढेऽभ्यधिकेऽङ्गारिणी पुनः ॥७३।

कुण्ठैः शठसूत्रकण्ठैः । हारिकण्ठो हारयुक्तकण्ठे परभृतेऽपि च ॥७०॥ हारी हारवान् मनोहरो वा कण्ठो गलः स्वरो वा यस्य हरिकण्ठः । हारयुक्तकण्ठे वाच्यलिङ्गः । अथ डान्ताः । अपो गण्डोऽतिभीरौ स्याच्छिंशुका विकलाङ्गयोः । पूयते पूगोगादिरित्यण्डेऽपोगण्डो विकलाङ्गस्तत्सदशाऽपोगण्डः । नञत्रे सादृश्ये । पोगण्डविपरीतो वा । अतिभीरावविकलाङ्गे च वाच्यलिङ्गः । **चक्रवाडं गणे** । चक्रेण वाडते चक्रवाडम् । लत्वे चक्रवालमपि । यथा—नागाङ्कं मोक्तुमिच्छोः शयनमुरुफणा चक्रवालोपधानम् । **चक्रवाडोऽद्रौ चक्रवालवत्** ॥७१॥ अद्रिर्लोकालोकाद्यस्तत्र यथा—ध्रुवं पतति पंक्तिकंधरकबन्धपीडाभरात् निजावनमनक्रमोन्नमितचक्रवालाचलम् ॥७१॥ **जलरुण्डः पयोरेणौ जलावर्ते भुजङ्गमे** । जलं रुणद्धि जलरुण्डः । पिचण्डादित्वात्साधुः । जडं रुण्डमस्यति वा । **देवताडो घोषकेऽग्नौ राहौ** । देवः प्रधानमूतस्ताडो देवताडः । देवता अण्डति उपच्छन्ति अत्रेति वा । देवान् ताडयति वा । घोषको वृक्षः । **वातखुडा पुनः । वात्यायां पिच्छिले स्फोटे वामायां वातशोणिते** । वातेन खोडति प्रतिहन्यते वातखुडा । पृषोदरादित्वात् ॥७२॥ पिच्छिलः स्फोटः पिच्छिला स्फोटिका । वामा स्त्री । सर्वेषु पुंसीत्यन्यः । अथ ढान्ताः । **अध्यारूढः समारूढेऽभ्यधिके** । अध्यारोहतेः कर्त्तरि कर्मणि वा क्ते अध्यारूढः । वाच्यलिङ्गः । समारूढे यथा—अध्यारूढे सुरपरिवृढे स्कन्धमैरावणस्य । अथ णान्ताः । **अङ्गारिणी पुनः ।**

भास्करत्यक्तदिक्कुल्योराथर्वणः पुरोधसि ।
अथर्वणज्ञब्राह्मणे चाप्यारोहणं प्ररोहणे ॥७४॥
समारोहे सोपाने च स्यादुद्धरणमुन्नये ।
भुक्तोज्झितोन्मूलनयोरुत्क्षेपणमुदश्वनम् ॥७५॥
व्यञ्जनं धान्यमलनं वस्तु कामगुणो रतौ ।
विषयाभोगयोश्चापि कार्षापणस्तु कार्षिके ॥७६॥

भास्करत्यक्तदिक्कुल्योः । अङ्गारः सन्त्यस्यां अङ्गारिणी । भास्करत्यक्तदिगित्युपचारात् । तत्र यथा—तत्क्षणादित्यमुक्तां तु वदत्यङ्गारिणीं दिशम् ॥७३॥ **आथर्वणः पुरोधसि । अथर्वणज्ञब्राह्मणे चापि** । अथर्वाणं वेत्यधीते वा आथर्वणिकः । न्यायादित्वादिकण् । अथर्वणिकानां धर्म्म आम्नायः संघो वा आथर्वणः आथर्वणिकादण् कलुकश्चेति साधुः । आथर्वणयोगात्पुरोधा अथर्वज्ञश्च आथर्वणः । शान्तिगृहेऽपि तत्र क्लीवम् । **आरोहणं प्ररोहणे । समारोहे सोपाने च** । आरुह्यते आरोहन्त्यनेन वा आरोहणम् । पारोहणे उद्गमे यथा—अपामोघं(मेघः) किरति हरितारोहणकृते ॥७४॥ समारोहे यथा—आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम् । सोपाने यथा—आरोहणेषु विचरन्ति सदैव हंसाः । **स्यादुद्धरणमुन्नये भुक्तोज्झितोन्मूलनयोः** । ऊर्द्धं ध्रियते ह्रियते वा उद्धरणम् । उन्नय ऊर्द्धं नयनम् । कूपादिभ्यो जलादेः । तत्र यथा—कैलासोद्धरणेन भारवहनप्रौढिस्त्वयाविष्कृता । भुक्तोज्झिते वान्तान्ने यथा—अस्मात्किमुद्धरण—लब्धभृतेस्तवैष गर्व्वस्वरं वद सखे ननु निष्क्रपोऽपि । उन्मूलने यथा—अमात्यस्य च दुष्टस्य मूलादुद्धरणं सुखम् । **उत्क्षेपणमुदश्वनम् । व्यञ्जनं धान्यमलनं वस्तु** । उत्क्षिप्यते उत्क्षिपन्त्यनेन वा उत्क्षेपणम् । उदंचने यथा—उत्क्षेपणं वारिघटस्य कूपात् । **कामगुणो रतौ विषयाभोगयोश्चापि** । कामस्य स्मरस्य इच्छाया वा गुणः कामगुणः । त्रिष्वपि यथा—पणांगनाः कामगुणैर्गुणिन्यः । **कार्षापणस्तु कार्षिके । पणषोडशके** । कर्षेण आप्यते कार्षापणः । भुजादित्वादनट् । पूर्वपदस्थेति णत्वम् । स्वार्थेऽण कार्षापणः पुंक्लीबः । कार्षिको विंशत्यधिकैक—

पणषोडशके चीर्णपर्णः खर्जूरनिम्बयोः ।
चूडामणिः काकचिंचाफले मूर्द्धमणावपि ॥७७॥
जुहुराणोऽध्वर्युवह्न्योः तण्डुरीणस्तु वर्वरे ।
तण्डुलाम्बुनिकीटे च तैलपर्णी तु सिह्लके ॥७८॥
श्रीवासे चन्दने दाक्षायण्युमायां च भेषु च ।
रोहिण्यां च देवमणिर्विष्णुवक्षो मणौ हरे ॥७९॥
अश्वस्य कण्ठावर्ते च नारायणस्तु केशवे ।
नारायणी शतावर्युमाश्रीः निःसरणमृतौ ॥८०॥

पंचाशत् शतसंख्यो वराटकमानविशेषः । द्वयोर्यथा—कर्षापणोऽपि कृपणस्य हिरण्यकोटिः । **चीर्णपर्णः खर्जूरनिम्बयोः** । चीर्णं पर्णमस्य चीर्णपर्णः । **चूडामणिः काकचिंचाफले मूर्द्धमणावपि** । चूडायां मणिः चूडामणिः । तत्सदृशो वा । काकचिचा गुंजा । तत्फले । मूर्द्धमणौ यथा- बिभ्रद् ब्रह्मशिरः शिवाय जगतामेणाङ्कचूडामणिः॥७७॥ **जुहुराणोऽध्वर्यु वह्न्योः** । जुहोति हूयते वा जुहुराणः । मुमुचान युयुधानेति साधुः । **तण्डुरीणस्तु वर्वरे** । **तण्डुलाम्बुनि कीटे च** । तण्डुनां तण्डुलेषु वारीणः तण्डुरीणः । पृषोदरादित्वात् । तण्ड्यते वा । भ्रूण—तृणेति साधुः । **तैलपर्णी तु सिह्लके** । **श्रीवासे चन्दने** । तैलं पर्णेऽस्यास्तैलपर्णी । पाककर्णेति ङीः । श्रीवासः सरलद्रवः । **दाक्षायण्युमायां च भेषु च** । **रोहिण्यां च** । दक्षस्यापत्यं दाक्षिः । तस्यापत्यं स्त्री दाक्षायणी । अनन्तरापत्येऽपि पौत्राद्युपचारात् । यञिञ इत्यायनण् । जातेरयांतेति ङीः । उमायां यथा—दाक्षायणीविभ्रमदर्पणश्रिबालेन्दुखण्ड भवतः पुनातु । भेषु यथा—क्षीरोदार्णवशुक्तिमौक्तिकमयं दाक्षायणीनायकः । रौहिणो गौः । **देवमणि विष्णुवक्षो मणौ हरे** । **अश्वस्य कण्ठावर्ते च** । देवस्य मणिर्देवेषु मणिरिव देवमणिसदृशो वा देवमणिः । विष्णुवक्षो मणौ अश्वकण्ठावर्ते च यथा—आवर्त्तिनः शुभफलप्रदशुक्तियुक्ताः सम्पन्नदेवमणयो भृतरन्ध्रभागाः ॥७९॥ **नारायणस्तु केशवे** । नरानयते रम्यादित्वादनाट पूर्वपदस्थेति णत्वे स्वार्थेऽणि च नारायणः । यथा—त्वद्वृत्या शिथिलीकृतस्त्रिभुवनत्राणाय नारायणः । **नारायणी शतावर्युमा-**

उपाये गेहादिमुखे निर्वाणे निर्गमेऽपि च ।
निस्तरणन्तु निस्तारे तरणोपाययोरपि ॥८१॥
निरूपणं विचारावलोकनयोर्निदर्शने ।
निगरणं भोजने स्यात् निगरणः पुनर्गले ॥८२॥
प्रकरणं स्यात्प्रस्तावे रूपकेऽथ प्रवारणं ।
काम्यदाने निषेधे च पर्व्वरीणन्तु पर्व्वणि ॥८३॥
पर्णवृन्तरसे पर्णसिरायां घृतकम्बले ।
परायणं स्यादभीष्टे तत्पराश्रययोरपि ॥८४॥

श्रीः । नारं नरसमूहमयते नारायणी । नारायणस्य भार्या वा । **निःसरणं मृतौ** । **उपाये गेहादिमुखे निर्वाणे निर्गमेऽपि च** । निःसरत्यनेन निःस्रियते वा निस्सरणम् । गेहादीनां मुखद्वारं निर्गमे यथा—वचो जीवितयोजितः पुरो निस्सरणेरणः ॥८०॥ **निस्तरणं तु निस्तारे तरणोपाययोरपि** । निस्तीर्यते निस्तरन्त्यनेन वा निस्तरणम् । निस्तारो जीविका तत्र उपाये च यथा—रणो निस्तरणं तेषां येषां प्राणास्तृणं नृणाम् । तरणे यथा—संसारनीरनिधिनिस्तरणाय कायः ॥८१॥ **निरूपणं विचारावलोकनयोर्निदर्शने** । निरूप्यते निरूपणम् । विचारावलोकनयोर्यथा—कलादा एव जानन्ति कार्षापणनिरूपणम् । निदर्शनं दृष्टान्तः । **निगरणं भोजने स्यात्** । निगीर्यते निगरणम् । **निगरणः पुनर्गले** । निगरन्त्यनेन निगरणः ॥८२॥ **प्रकरणं स्यात्प्रस्तावे रूपके** । प्रक्रियते प्रकरणम् । प्रस्तावे यथा—प्रकरणकथितं वाक्यं भवति हि संसिद्धये पुंसाम् । रूपके यथा—प्रकरणफलबीजभावकानाममृतभुजां समुपास्महे समाजम् । कीर्णेऽपि यथा—पुष्पप्रकरणरुचिरे । **अथ प्रवारणम्** । **काम्यदाने निषेधे च** । प्रवार्यते प्रवारणम् । काम्यस्य वस्तुनो दानं काम्यदानम् । कामनापूर्वं दानं स्वेच्छया त्यागः । काम्यदानमित्यमरः । **पर्व्वरीणन्तु पर्व्वणि** । **पर्णवृन्तरसे पर्णसिरायां घृतकम्बले** । पर्व्वति पर्व्वरीणम् । भ्रूणतृणेति साधुः । पर्व्वणि ग्रन्थौ उत्तरायणे वा । रोणं संजातमिति वा । घृतकम्बल

परवाणिर्धर्म्माध्यक्षे वर्षे पारायणं पुनः ।
कात्स्न्र्ये पारगतौ संगे पीलु पर्ण्यौषधीभिदि ॥८५॥
मूर्व्वायां चिचिकायां च पुष्करिणी जलाशये ।
हस्तिन्यां कमलिन्यां च मीनामृणस्तु खञ्जने ॥८६॥
दर्दराम्रे रक्तरेणुः पलाशकलिकोद्गमे ।
सिन्दूरे रागचूर्णस्तु खदिरे मकरध्वजे ॥८७॥

उत्तरायणे शिवलिङ्गस्य घृतपूजा। **परायणं स्यादभीष्टे तत्पराश्रययोरपि।** पर ईयते परायणम्। स्वरादिति णत्वम्। अभीष्टतत्परयोर्वाच्यलिङ्गः। त्रिष्वपि यथा—परात्परतरं यान्ति नारायणपरायणाः ॥८४॥ **परवाणिर्धर्म्माध्यक्षे वर्षे।** परा वाणिरस्य परवाणिः। परं वर्ण्यते वा। कमिवमीति णिदिः। वर्षे वत्सरः। **पारायणं पुनः। कात्स्न्र्ये पारगतौ संगे।** पारमयन्तेऽनेन साकल्यं व्याप्नुवन्ति। पारेऽयनं वा पारायणम्। कात्स्न्र्यमत्र कात्स्न्र्येन वचनम्। यदाह—साकल्यवचनं प्राज्ञैः पारायणमुदाहृतम्। तत्र यथा—धातुपारायणम्। पारगतौ यथा—स भवतु भवपारावारपारायणाय। संगे सम्बन्धे यथा—ब्रह्मपारायणं जगौ। **पीलुपर्ण्यौषधीभिदि मूर्व्वायां चिचिकायां च।** पीलुवत् पर्णमस्याः पीलुपर्णी। पाककर्णेति ङीः ॥८५॥ मूर्वा ज्याहेतुस्तृणविशेषः। **पुष्करिणी जलाशये। हस्तिन्यां कमलिन्यां च।** पुष्कराणि सन्त्यस्यां पुष्करिणी। जलाशये यथा—न खानिताः पुष्करिण्यो रोपिता न महीरुहः। **मीनामृणस्तु खञ्जने। दर्दराम्रे।** मीनान् आमयति मान्यते वा मीनामृणः। भ्रूणतृणेति साधुः। खञ्जन पक्षी ॥८६॥ दर्दराम्रो वृक्षभेदः। **रक्तरेणुः पलाशकलिकोद्गमे। सिन्दूरे।** रक्ता रेणवोऽस्य रक्तरेणुः। पुंसि। **रागचूर्णस्तु खदिरे मकरध्वजे।** रागाय चूर्णोऽस्य रागेण चूर्णयति वा रागचूर्णः। खदिरे यथा—रागचूर्णवनं पश्य। मकरध्वजे यथा—श्रीरागचूर्णश्रियम् ॥८७॥

रेरिहाणोऽम्बरे रुद्रे लम्बकर्णः पुनश्छगे ।
अङ्कोठे वारबाणस्तु कूर्पासे कवचेऽपि च ॥८८॥
विदारणं भेदने स्यात्सम्पराये विडम्बने ।
वैतरणी प्रेतनद्यां जनन्यामपि रक्षसाम् ॥८९॥
शरवाणिः शरमुखे पदातौ शरजीविनि ।
शिखरिणी वृत्तभेदे रोमाली पेयभेदयोः ॥९०॥

रेरिहाणोऽम्बरे रुद्रे। रिहः सूत्रो हिंसार्थः। रेहति रेरिहाणः। कल्यादित्वात्साधुः। अम्बरं नभः। **लम्बकर्णः पुनश्छगे। अङ्कोठे।** लम्बो कर्णावस्य लम्बकर्णः। अङ्कोठ अङ्कोलकनामा वृक्षः। **वारबाणस्तु कूर्पासे कवचेऽपि च।** बाणान् वारयति वारबाणः। राजदन्तादित्वात्। पुंक्लीबः। कूर्पासः कंचुकः। कवचं वर्म्म। द्वयोर्यथा—तद्योधवारबाणानामयत्नपटवासताम् ॥८८॥ **विदारणं भेदने स्यात्सम्पराये विडिम्बने।** विदार्यते विदार्यन्त्यस्मिन्वा विदारणम्। भेदने यथा—दन्तभंगो हि नागानां श्लाघ्यो गिरिविदारणे। शेषयोर्यथा—सुदुष्करं वैरिविदारणं नरैः। **वैतरणी प्रेतनद्यां जनन्यामपि रक्षसाम्।** विगततरणौ द्व्यर्कें पाताले भवा वैतरणी। वै दुःखार्थः। दुःखेन तीर्यते इति वा। ऋहसृधृ (उ.३८) इत्यणिः प्रेतनदी नरकनदी। तत्र यथा—नदीं वैतरणीं नामावतार्यन्ते वराककाः ॥८९॥ **शरवाणिः शरमुखे पदातौ शरजीविनि।** शरान् वणति शरवाणिः। कमिवमीति णिदिः। शरजीविनि वाच्यलिङ्गः। शेषयोः पुंसि। **शिखरिणी वृत्तभेदे रोमालीपेयभेदयोः। क्षीररत्ने मल्लिकायां च।** शिखरमस्त्यस्यां शिखरिणी। वृत्तभेदे यथा—हरन् सर्वां भोज श्रियमविरतं सिन्धुगतिना कृतार्थस्तत्वानो निशितमसि विद्योतमसमम्। सुधांशुरत्वद्वंशे त्वमिव जयसिंहक्षितिपते कलापूर्णः पश्योदयशिखरिणीहाभ्युदयते ॥ शेषेषु यथा—शिखरिणीरमणीयशिरोमणिः ॥९०॥ **समीरणः फणिज्जके। पान्थे वायो।** सम्यक्

स्त्रीरत्ने मल्लिकायां च समीरणः फणिज्जके ।
पान्थे वायौ संसरणं त्वसम्बाधचमूगतौ ॥९१॥
संसारे समरारम्भे नगरस्योपनिर्गमे ।
हस्तिकर्णः स्यादेरण्डे पलाशगणभेदयोः ॥९२॥
अवदातं तु विमले मनोज्ञे सितपीतयोः ।
अपावृतोऽपरायत्ते पिहितेऽवसितं गते ॥९३॥
ऋद्धे ज्ञातेऽवसाने चाप्यवगीतं विगर्हिते ।
मुहुर्दृष्टेऽपवादे चात्याहितं तु महाभये ॥९४॥

समीरणः । रम्यादित्वादनट् । फणिज्जको मरुबकः । वायौ यथा–समीरण प्रेरयिता भवेति व्यादिश्यते केन हुताशनस्य । संसरणं त्वसम्बाधचमूगतौ । संसारे समरारम्भे नगरस्योपनिर्गमे । संसृतिः संसरणम् । असम्बाधचमूगतौ असंकटसेनागमने यथा–एतत्संसरणं विलोक्य भवतो याताः क्षयं शत्रवः ॥९१॥ संसारे पुनर्भवे यथा–कोऽस्मिन् संसरणे विवेकविशदो यातो रतिं सज्जनः । नगरस्योपनिर्गमो घंटापथः । तत्र समरारम्भे च यथा–यान्ति द्रुतं संसरणेषु योधाः । हस्तिकर्णः स्यादेरण्डे पलाशगणभेदयोः । हस्तिकर्णाविव कर्णौ पत्राणि चास्य हस्तिकर्णः । उष्ट्रमुखादित्वात्साधुः । त्रिष्वपि यथा-हस्तिकर्णसवर्णोऽयम् ॥९२॥ अथ तान्ताः । अवदातं तु विमले मनोज्ञे सितपीतयोः । अवदायते स्म अवदातम् । सितपीतयोर्गुणः पुंसि । तद्वति शेषयोश्च वाच्यलिङ्गः । विमले यथा-सत्यावदाते वचसि त्वदीये । मनोज्ञे यथा-अवदातं मुखम् । सिते यथा–कुन्दावदातं यशः । पीते यथा–जयति कनकावदातः कृष्णजटा मुकुटमण्डितो वृषभः । अपावृतोऽपरायत्ते पिहिते । अपाव्रियते अपावृतः । वाच्यलिङ्गः । अवसितं गते । ऋ(ब)द्धे ज्ञातेऽवसाने चापि । अवसीयते अवसितम् । वाच्यलिङ्गः । गते यथा–अवसितं बाल्यम् ॥९३॥ ऋद्धे यथा–धनेनावसितः । ज्ञाते यथा–अवसितमन्त्रो राजा । अवसाने भावानयने द्रव्यानयनमिति । न्यायादवसानं गते यथा–अवसितमन्त्रसाध–

जीवनिरपेक्षकर्मण्यभिजातः कुलोद्भवे ।
न्याय्ये प्राज्ञेऽभिनीतस्तु न्याय्येऽमर्षिणि संस्कृते ॥९५॥
अभियुक्तः परिरुद्धे तत्परेऽन्तर्गतं पुनः ।
मध्यप्राप्तविस्मृतयोरङ्गारितं तु भस्मिते ॥९६॥
पलासकलिकोद्भेदे चातिमुक्तस्तु निष्कले ।
वासन्तिकायां तिनिशेऽप्यवध्वस्तोऽवचूर्णिते ॥९७॥

नस्यास्मद्गुरोरघोरघण्टस्य । अवगीतं विगर्हिते । मुहुर्दृष्टेऽपवादे च । अवगीयते स्म अवगीतम् । अपवादे क्लीबे शेषयोर्वाच्यलिङ्गः । विगर्हिते यथा–विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम् । मुहुर्दृष्टे यथा–अवगीतं नृत्तम् । अपवादे यथा–यदि परस्त्रियं न त्यजसि तर्हि अवगीतं ते भविष्यति । अत्याहितं तु महाभये । जीवनिरपेक्षकर्मणि । अत्याधीयते स्म अत्याहितम् । द्वयोर्यथा–धिक् धिक् शान्तं प्रतिहतमिदं तीव्रमत्याहितं नः ॥९४॥ अभिजातः कुलोद्भवे । न्याय्ये प्राज्ञे । अभिजायते स्म अभिजातः । वाच्यलिङ्गः । त्रिष्वपि यथा–अभिजातभवने (मदेन)तेन सा यदि युज्यते हि दैवयोगतः । अभिनीतस्तु न्याय्येऽमर्षिणि संस्कृते । अभिनीयते स्म अभिनीतः । वाच्यलिङ्गः । संस्कृते यथा–अभिनीतः काव्यार्थः प्रायः शिक्षाविधिप्रसरैः । वागादिना अभिनयविषयतां नीत इत्यर्थः ॥९५॥ अभियुक्तः परिरुद्धे तत्परे । अभियुज्यते स्म अभियुक्तः । वाच्यलिङ्गः । परिरुद्ध आक्षिप्तस्तत्र यथा-अभियुक्तो रणधुर्कैर्वलतेऽभिमुखं भटः । तत्परे आसक्ते यथा–युक्तोऽभियुक्तो जनः । अन्तर्गतं पुनः । मध्यप्राप्तविस्मृतयोः । अन्तर्गच्छति अन्तर्गतम् । वाच्यलिङ्गः । मध्यप्राप्ते यथा–हृदयान्तर्गतो मन्युर्मदग्ध्वा विनिवर्त्तते । । विस्मृते यथा–अन्तर्गतानि शास्त्राणि दौर्गत्येन गरीयसा । अङ्गारितं तु भस्मिते । पलासकलिकोद्भेदे च । अङ्गाराः संयाता अस्य अङ्गारितम् । तारकादित्वादितः । भस्मिते वाच्यलिङ्गः ॥९६॥ अतिमुक्तस्तु निष्कले । वासन्तिकायां तिनिशेऽपि । अतिमुच्यते स्म अतिमुक्तः । निष्कले वाच्यलिङ्गः । अवध्वस्तोऽवचूर्णिते । त्यक्तनिन्दितयोश्च । अवध्वस्यते स्म अव-

त्यक्तनिन्दितयोश्चाधिक्षिप्तौ निहितभर्त्सितौ ।
अपचितिर्व्यये हानौ पूजायां निष्कृतावपि ॥९८॥
अनुमतिः स्यादनुज्ञापौर्णमासीविशेषयोः ।
अभिशस्तिः पुनर्लोकापवादे प्रार्थनेऽपि च ॥९९॥
उदास्थितश्चरे द्वाःस्थेऽध्यक्षे चोपाहितः पुनः ।
आरोपितेऽनलोत्पातेऽप्युपाकृत उपद्रुते ॥१००॥

ध्वस्तः। वाच्यलिङ्गः। अवचूर्णिते यथा—शफैरवध्वस्तशिलातलेषु। निन्दिते यथा—एतैरवध्वस्तविहस्तमानसैः ॥९७॥ **अधिक्षिप्तौ निहितभर्त्सितौ**। अधिक्षिप्यते स्म अधिक्षिप्तः। वाच्यलिङ्गः। निहिते यथा—अधिक्षिप्ते भारे वहति करभो योजनशतम्। भर्त्सिते यथा—अधिक्षिप्तोऽपि विकृतिं न याति कापि सज्जनः। **अपचितिर्व्यये हानौ पूजायां निष्कृतावपि**। अपचयनमपचितिः। स्त्रियां क्तिः। अपचायनम्वा। अपाच्चायश्चिः क्ताविति (४–२–६६) चिरादेशः॥ व्यये यथा—गृहेऽपचितिसंकटे कटु रटत्यसौ गेहिनी। पूजायां यथा—प्रभवः पयोधिरपचितिरीश्वरभवनेषु रत्नानाम्। हानौ यथा—विभवापचितौ चिन्ता नो चिता हि विपश्चितां निष्कृतिर्निष्क्रियः ॥९८॥ **अनुमतिः स्यादनुज्ञापौर्णमासीविशेषयोः**। अनुमननमनुमतिः। स्त्रियां क्तिः। अनुज्ञायां यथा—तवानुमत्या विचरन्ति यत्र। कलाहीनेन्दुयुक्तत्वं पौर्णमास्या विशेषः (विशेषतः)। **अभिशस्तिः पुनर्लोकापवादे प्रार्थनेऽपि च**। अभिशंसनमभिशस्तिः। स्त्रियां क्तिः॥ स्तुतावपि मंखः। त्रिष्वपि यथा—अभिशस्तिं प्रकुरुते यस्य शत्रुः सुहृद् यथा ॥९९॥ **उदास्थितश्चरे द्वास्थेऽध्यक्षे च**। उदातिष्ठति स्म उदास्थितः। **उपाहितः पुनः। आरोपितेऽनलोत्पातेऽपि**। उपाधीयते स्म उपाहितः। आरोपिते वाच्यलिङ्गः। तत्र यथा—उष्ट्रोपाहितदिव्यरत्ननिचयो यातः सदेशान्तरम्। अनलोत्पाते यथा—उपाहितोत्स्यन्नभियोति विक्लवः। **उपाकृत उपद्रुते। मन्त्रेण प्रोक्षितपशौ**। उपाक्रिते स्म उपाकृतः। उपद्रुते वाच्यलिङ्गः। मन्त्रेण प्रोक्षितपशौ यथा—योऽभिमन्त्र्य निहन्येत स स्यात् पशुरुपाकृतः ॥१००॥ **उल्लिखितं**

मन्त्रेण प्रोक्षितपशावुल्लिखितं तनूकृते ।
उत्कीर्णे चोपरक्तस्तु स्वर्भानौ व्यसनातुरे ॥१०१॥
राहुग्रस्तार्कशशिनोपरुचितः समाहिते ।
रुद्धे दिग्धेऽथोज्जृम्भितमुत्फुल्ले चेष्टितेऽपि च ॥१०२॥
उद्ग्राहितमुपन्यस्ते बद्धग्राहितयोरपि ।
उपसत्तिः सङ्गमात्रे प्रतिपादनसेवयोः ॥१०३॥
ऋष्यप्रोक्ता शुकशिम्ब्यां शतावर्यां वलाभिदि ।
ऐरावतोऽह्रौ नारङ्गे लिकुचि त्रिदशद्विपे ॥१०४॥

तनूकृते। उत्कीर्णे च। उल्लिख्यते स्म उल्लिखितम्। वाच्यलिङ्गः। द्वयोर्यथा—टंकैरुल्लिखिताः स्फुरन्ति दृषदः। **उपरक्तस्तु स्वर्भानौ व्यसनातुरे। राहुग्रस्तार्कशशिनोः**। उपरज्यते स्म उपरक्तः। व्यसनातुरे वाच्यलिङ्गः। तत्र यथा—नैवोपरक्तहृदयस्य हिताहिते स्तः ॥१०१॥ राहुग्रस्तार्के यथा—उपरक्तोऽपि विवस्वान् न जातु कान्तिं निजां त्यजति। आत्तरागेऽपि मंखः। यथा—एतन्मे नितरां धुनोति हृदयं कामोपरक्तं मुखम्। **उपचितः समाहिते। रुद्धे दिग्धे**। उपचीयते स्म उपचितः। वाच्यलिङ्गः। समाहिते यथा—शमोपचितमानसाः। दिग्धो मांसलः। तत्र रुद्धे यथा—अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे। **अथोज्जृम्भितमुत्फुल्ले चेष्टितेऽपि च**। उज्जृम्भणमुज्जृम्भितम्। क्लीबे क्तः। कर्त्तरि क्ते तु वाच्यलिङ्गः। उत्फुल्ले यथा—वल्लीभिरुज्जृम्भितम्। चेष्टिते यथा—उज्जृम्भितं कावचिकस्य पश्य ॥१०२॥ **उद्ग्राहितमुपन्यस्ते बद्धग्राहितयोरपि**। उद्ग्राह्यते स्म उद्ग्राहितम्। वाच्यलिङ्गः। उपन्यस्ते यथा—उद्ग्राहिता सम्प्रति शम्भुसिद्धिः। **उपसत्तिः सङ्गमात्रे प्रतिपादनसेवयोः**। उपसदनं उपसत्तिः। स्त्रियां क्तिः। त्रिष्वपि यथा—कृतोपसत्तिः सुगुरोः(सगुरोः)सदापि ॥१०३॥ **ऋष्यप्रोक्ता शुकशिम्ब्यां शतावर्यां वलाभिदि**। ऋष्येण प्रोक्ता ऋष्यप्रोक्ता शूकशिम्बी कपिकच्छुः। वलाभित् शतावर्यावोषधी। **ऐरावतोऽह्रौ नारङ्गे लिकुचि त्रिदशद्विपे**। इरावति अध्यावनुपे वा भवः ऐरावतः। त्रिदशद्विपे

ऐरावतं तु शक्रस्य ऋजुदीर्घशरासने ।
ऐरावती सरिद्विद्युद्भिदोः शतह्रदा यथा ॥१०५॥
कलधौतं रूप्यहेम्नोः कलधौतः कलध्वनौ ।
कुहरितं तु रटिते पिकालापे रतस्वने ॥१०६॥
कुमुद्वती कैरविण्यां दयितायां कुशस्य च ।
कृष्णवृन्ता माषपर्ण्यां पाटलाख्यद्रुमेऽपि च ॥१०७॥

पुंक्लीबः । तत्र यथा—ऐरावते सुरवधूपरिगीयमानयुष्मद्यशः श्रवणनिश्चलकर्णताले । नारङ्गलिकुचौ वृक्षविशेषौ ॥१०४॥ **ऐरावतं तु शक्रस्य ऋजुदीर्घशरासने ।** पुंक्लीब इति मंखः । यथा—प्रावृषेण्यं पयोवाहं विद्युदैरावताविव । **ऐरावती सरिद्विद्युद्भिदोः शतह्रदा यथा ।** इरावति मेघे भवा ऐरावती । शतह्रदोऽम्बिधरस्त्यस्याः शतह्रदा । अभ्रादित्वादः । शतधा ह्रादते वा । वाडवज्योतिष्ट्वात् साधुः । यथा शतह्रदाशब्दो विद्युद्विद्युद्भिदोः वर्तते । तथा ऐरावती शब्दोऽपीत्यर्थः । तान्तेष्वपि लाघवार्थं शतह्रदाशब्दस्य पाठः । द्वयोर्यथा—ऐरावती चेतस्थिरतामुपैति (तथा) दूरं परिक्षिप्तशतह्रदेव ॥१०५॥ **कलधौतं रूप्यहेम्नोः ।** कलं किन्दतं धौतमस्मिन् कलधौतम् । द्वयोर्यथा—कलधौतभित्तिषु शशी विराजते । **कलधौतः कलध्वनौ ।** कलश्चासौ धौतश्च कलधौतः । वाच्यलिङ्गः । यथा—गीयन्ते कलधौतकण्ठकुहरैर्देवैर्यशांसि प्रभोः । **कुहरितं तु रटिते पिकालापे रतस्वने ।** कुहरं संजातमस्य कुहरितम् । तारकादित्वादितः । त्रिष्वपि यथा—श्रुत्वा श्रुत्वा कुहरितममी पान्थसार्थाः स्मरन्ति ॥१०६॥ **कुमुद्वती कैरविण्यां दयितायां कुशस्य च ।** कुमुदानि सन्त्यस्यां कुमुद्वती । नडकुमुदेति ड्मितुः (६।२।७४) । कुमुदशब्दाद्वा तदस्यास्तीति मतुः । कैरविण्यां यथा—प्रभातवातागमकं पिताकृतिः कुमुद्वतीरेणुपिशंगविग्रहम् । कुशदयितायां यथा—अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती । **कृष्णवृन्ता माषपर्ण्यां पाटलाख्यद्रुमेऽपि च ।** कृष्णं वृन्तमस्याः कृष्णवृन्ता । माषपर्णी ओषधिः । द्वयोर्यथा—कृष्णा वृन्ता वने भान्ति मधुपावृत-

गन्धवती सुरापुर्योः पृथ्वीयोजनगन्धयोः ।
गृहपतिः गृही सत्री चन्द्रकान्तन्तु कैरवे ॥१०८॥
चन्द्रकान्तो रत्नभेदे चर्म्मण्वती नदीभिदि ।
कदल्यां चित्रगुप्तस्तु कृतान्ते तस्य लेखके ॥१०९॥
दिवाभीतः काकरिपौ कुम्भिले कुमुदाकरे ।
दिवाकीर्तिर्नापिते स्यादुलुकेऽन्तावसायिनि ॥११०॥

संनिभाः ॥१०७॥ **गन्धवती सुरापुर्योः पृथ्वीयो जनगन्धयोः ॥** गन्धोऽस्त्यस्या गन्धवती । सुरा ओषधिः । योजनगन्धा व्यासमाता । चतुःष्वर्थेषु यथा—एतां गन्धवतीं पश्य व्यासनिर्भासितांतिकाम् । **गृहपतिः गृही सत्री ।** गृहस्य पतिः गृहपतिः । पुंसि । गृही गृहस्थः । सत्रं सदादानमस्त्यस्य सत्री । द्वयोर्यथा—गृहपतिपरिकीर्णे पुण्यनैपुण्यभाजि । **चन्द्रकान्तन्तु कैरवे ।** चन्द्रस्य कान्तं चन्द्रः कान्तोऽस्य वा चन्द्रकान्तम् । यथा—उन्निद्रैश्चन्द्रकान्तैः ॥१०८॥ **चन्द्रकान्तो रत्नभेदे ।** यथा—सायं शशांककिरणाहतचन्द्रकान्तनिःस्यन्दिनीरनिकरेषु कृताभिषेकाः । **चर्मण्वती नदीभिदि कदल्याम् ।** चर्माणि सन्त्यस्यां चर्मण्वती । नद्यां मतुरिति (६–२–७२) मतौ चर्मण्वत्यष्ठीवदिति साधुः । नद्यां यथा—चर्म्मण्वतीकर्तृसद्दग् । कदल्यां यथा—चर्म्मण्वतीस्तम्भनिबद्धतोरणम् । **चित्रगुप्तस्तु कृतान्ते तस्य लेखके ।** चित्रे लिखिते गुप्तश्चित्रगुप्तः । द्वयोर्यथा—नामान्येषां लिखामि ध्रुवमहमधुना चित्रगुप्तः प्रमार्ष्टि ॥१०९॥ **दिवाभीतः काकरिपौ कुम्भिले कुमुदाकरे ।** दिवा भीतो दिवाभीतः । अव्ययं प्रवृद्धादिभिरिति समासः । काकरिपुर्घूकः । कुम्भिलश्चौरः । तयोर्यथा—दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् । **दिवाकीर्तिर्नापिते स्यादुलूकेऽन्तावसायिनि ।** दिवा कीर्त्यते दिवाकीर्त्तिः । स्वरिभ्य इः । कृतः कीर्त्तिरीति कीर्त्यादेशः । पुंसि । अन्तावसायी चण्डालः । त्रिष्वपि यथा—अन्विष्यते दिवाकीर्त्तिरपि कार्यार्थिभिर्नरैः ॥११०॥ **धूमकेतुर्वह्न्युत्पातौ ।** धूमः केतुरस्य धूमकेतुः । पुंसि । वह्नौ यथा—शक्रसम्प्रेषितो

धूमकेतू वह्न्युत्पातौ नन्द्यावर्त्तौ गृहान्तरे ।
तगरेऽथ नदीकान्तो निर्गुण्डी निचुलाब्धिषु ॥१११॥
नदीकान्ता लताजम्ब्वोः काकजङ्घौषधेऽपि च ।
नागदन्तो हस्तिदन्ते गेहान्निःसृतदारुणि ॥११२॥
नागदन्ती श्रीहस्तिन्यां कुम्भाख्यभेषजेऽपि च ।
निस्तुषितं वर्जिते स्याद्गतत्वचि लघूकृते ॥११३॥
निराकृतिरस्वाध्याये निराकरनिषेधयोः ।
प्रतिहतस्तु विद्विष्टे प्रतिस्खलितरुद्धयोः ॥११४॥

हत्ये धूमकेतुरथागमत् । गृहभेदेऽपि तत्रोत्पात्ये च यथा—धूमकेतुरुदेत्येष प्रजानां धूमकेतवे । **नन्द्यावर्त्तौ गृहान्तरे । तगरे** । नन्दी आवर्त्तो अत्र नन्द्यावर्त्तः । गृहान्तरमाढ्यसद्मविशेषः । तगरो वृक्षविशेषः । द्वयोर्यथा—नन्द्यावर्त्तेऽथ दोलां कलयति ललना । **अथ नदीकान्तो निर्गुण्डी निचुलाब्धिषु** । नद्याः कान्तो नदीकान्तः । निर्गुण्डी सिन्दुवारः । निचुलो वेतसः । त्रिष्वपि यथा—पुरः पश्य नदीकान्तम् ॥१११॥ **नदीकान्ता लताजम्ब्वोः काकजङ्घौषधेऽपि च** । स्फुटम् । **नागदन्तो हस्तिदन्ते गेहान्निःसृतदारुणि** । नागस्य दन्तो नागदन्त इव वा नागदन्तः । गेहान्निःसृतदारुणि यथा—कार्यन्ते नागदन्त प्रणयमधिगृहं पङ्क्तिकाश्चित्रवत्यः ॥११२॥ **नागदन्ती श्रीहस्तिन्यां कुम्भाख्यभेषजेऽपि च** । नागस्येव दन्तौ यस्याः नागदन्ती । नासिकोदरोष्ठेति ङः । नागदन्तीव नागदन्ती । श्रीहस्तिनी अश्मरीरिपुनामौषधम् । कुम्भा कुम्भिका । **निस्तुषितं वर्जिते स्याद्गतत्वचि लघूकृते** । निस्तुषं करोति णिचि क्ते निस्तुषितम् । वाच्यलिङ्गः । वर्जिते यथा मद्यं निस्तुषितम् । शेषयोर्यथा—वचो निस्तुषिताः प्रियङ्गव इव ॥११३॥ **निराकृतिरस्वाध्याये निराकारनिषेधयोः** । आकृतेर्जातेर्निष्क्रान्तो निराकृतिः । निर्गता आकृतिर्यस्मात् निराकरणं वा । अस्वाध्यायो वेदहीनः । तत्र यथा—ब्रह्मबन्धुमुनिखेटनिराकृते । निराकारे वाच्यलिङ्गः । तत्र यथा-ननु श्लाघ्यो निरा-

प्रणिहितं तु सम्प्राप्तनिहितयोः समाहिते ।
प्रतिक्षिप्तं प्रतिहते निषिद्धे प्रेषितेऽपि च ॥११५॥
प्रधूपिता क्लेशितायां रविगन्तव्यदिश्यपि ।
प्रव्रजिता तु मुण्डीर्यां तापस्यां मांसिकौषधौ ॥११६॥
प्रजापतिर्ब्रह्मराज्ञोर्जामातरि दिवाकरे ।
वह्नौ त्वष्टरि दक्षादौ प्रतिकृतिस्तु पूजने ॥११७॥

कृतिः । निषेधे यथा—एतन्माननिराकृतौ कुशलतां यातं विधोर्मण्डलम् । **प्रतिहतस्तु विद्विष्टे प्रतिस्खलितरुद्धयोः** । प्रतिहन्यते स्म प्रतिहतः । वाच्यलिङ्गः । विद्विष्टे यथा—धिक्धिक् शांतं प्रतिहतमिदं तीव्रमत्याहितं नः । प्रतिस्खलिते यथातस्मिन्नुपायाःसर्व्वे नः क्रूरे प्रतिहतक्रियाः । रुद्धे यथा—जम्बूकुंजप्रतिहतरयम् ।११४॥ **प्रणिहितं तु सम्प्राप्तनिहितयोः । समाहिते** । प्रणिधीयते स्म प्रणिहितम् । वाच्यलिङ्गः । सम्प्राप्ते यथा—प्रणिहितं धनम् । निहिते यथा—मन्दं मन्दं प्रणिहितपदं संचरत्युष्ट्रसार्थः । समाहिते यथा—भाव्यं तया प्रणिहितचेतसेति । **प्रतिक्षिप्तं प्रतिहते निषिद्धे प्रेषितेऽपि च** । प्रतिक्षिप्यते स्म प्रतिक्षिप्तम् । वाच्यलिङ्गः । प्रतिहते निषिद्धयोर्यथा—प्रतिक्षिप्तोऽपि हि खलो न शान्तिमवलम्बते । प्रेषिते यथा—परस्परप्रतिक्षिप्तशरौघास्तत्र सैनिकाः ॥११५॥ **प्रधूपिता क्लेशितायां रविगन्तव्यदिश्यपि** । प्रधूप्यन्ते स्म प्रधूपिता । क्लेशितायां यथा—प्रधूपितासु क्षितिपैः प्रजासु । रविगन्तव्यदिशि यथा—प्रधूपितायां दिशि सञ्चरन्ती । **प्रव्रजिता तु मुण्डीर्यां तापस्यां मांसिकौषधौ** । प्रव्रजति स्म प्रव्रजिता । मुण्डीरी ओषधिभेदः । तापस्यां यथा—कुमारप्रव्रजिता शापदुस्सहैः ॥११६॥ **प्रजापतिर्ब्रह्मराज्ञोर्जामातरि दिवाकरे । वह्नौ त्वष्टरि दक्षादौ** । प्रजानां प्रजाया वा पतिः प्रजापतिः । पुंसि । ब्रह्मणि यथा—प्रजापतिः कल्पितयज्ञभागम् । त्वष्टा देववर्द्धकिः। **प्रतिकृतिस्तु पूजने । प्रतिमायां प्रतीकारे** । प्रतिक्रियते प्रतिकृतिः । स्त्रियां क्तिः ॥११७॥ प्रतिमा प्रतिबिम्बम् । तत्र यथा-रम्यां रघुप्रतिकृतिः स नवोपकार्यां बालात्परामिवदशां मदनोऽधितस्थौ ।

प्रतिमायां प्रतीकारे प्रतिपत्तिस्तु गौरवे ।
प्राप्तौ प्रवृत्तौ प्रागल्भ्ये बोधे परिगतं गते ॥११८॥
प्राप्तवेष्टितयोर्ज्ञाते पल्लवितं सपल्लवे ।
लाक्षारक्ते तते पंचगुप्तश्चार्वाकदर्शने ॥११९॥
कमठे परिवर्त्तस्तु कूर्मराजे पलायने ।
युगान्ते विनिमये च परिघातस्तु घातने ॥१२०॥

(रम्यां रघुप्रतिप्रतिकृतिः सनवोपकार्थी बाल्यात्परामिवेत्यादि ।) प्रतीकारे यथा—वैरिप्रतिकृतौ दक्षः । **प्रतिपत्तिस्तु गौरवे । प्राप्तौ प्रवृत्तौ प्रागल्भ्ये बोधे ।** प्रतिपदनं प्रतिपत्तिः । स्त्रियां गौरवे यथा—प्रतिपत्तिरियं गुरोः । प्रवृत्तिरारम्भः । तत्र प्राप्तौ च यथा—अर्थानर्थौ (अर्थोऽनर्थो) विचिन्त्य स्युः कार्याणां प्रतिपत्तयः । प्रागल्भ्ये बोधे च यथा—वागर्थप्रतिपत्तये । **परिगतं गते । प्राप्तवेष्टितयोर्ज्ञाते ।** परिगम्यते परिगतम् । भावक्तान्तस्य क्लीवत्वं कर्म्म कर्तृक्तान्तस्य तु वाच्यलिङ्गः । गते यथा—क्वचिदपि गजेन्द्रैः परिगतम् ॥११८॥ प्राप्ते यथा—परिगत इवापत्यस्नेहो लतासु मृगीषु च । वेष्टिते यथा—कुसुमपरिगतोऽसौ केशपाशः सुकेश्याः । ज्ञाते यथा—इति परिगतमेतत् स्थानमासाद्य सद्यः । **पल्लवितं सपल्लवे लाक्षारक्ते तते ।** पल्लवाः संयाता अस्य पल्लवितम् । तारकादित्वादितः । वाच्यलिङ्गः । ततं विस्तीर्णम् । सपल्लवे यथा—अंकुरितः कोरकितः पल्लवितः पुष्पितश्च सहकारः । **पंचगुप्तश्चार्वाकदर्शने । कमठे ।** पञ्चभिर्गुप्यते स्म पञ्चगुप्तान्यस्य वा पञ्चगुप्तः ॥११९॥ कमठः कच्छपः । **परिवर्त्तस्तु कूर्मराजे पलायने युगान्ते विनिमये च ।** परिवर्त्तते जगदत्रेति परिवर्त्तनं वा परिवर्त्तः । युगान्ते यथा-परिवर्त्तेष्वनन्तेषु । विनिमये यथा-अन्योन्यवस्त्रपरिवर्त्तमिव व्यधत्ताम् । **परिघातस्तु घातने । अस्त्रे च ।** परिघातनम् परिघात्यतेऽनेन वा परिघातः ॥१२०॥ **अथ पशुपतिः पिनाकिनि हुताशने ।** पशूनां पतिः पशुपतिः । पशोः पतिरिति वा । हुताशनस्य छागवाहनत्वात् । पिनाकिनि यथाशरसन्धानसंरम्भः पशौ पशुपतावपि । **पाशुपतः शिवमल्ल्यां पशुपत्यधि-**

अस्त्रे चाथ पशुपतिः पिनाकिनि हुताशने ।
पाशुपतः शिवमल्ल्यां पशुपत्यधिदैवते ॥१२१॥
पारिजातस्तु मन्दारे पारिभद्रे सुरद्रुमे ।
पारापतः कलरवे गिरौ मर्कटतिण्डुके ॥१२२॥
पारावती तु लवलीफलगोपालगीतयोः ।
पुष्पदन्तस्तु दिङ्नागे जिनभेदे गणान्तरे ॥१२३॥
पुष्पदन्तौ च चन्द्रार्कावेकोक्त्याथ पुरस्कृतम् ।
पूजिते स्वीकृते सिक्तेऽभिशस्तेऽग्रकृतेऽपि च ॥१२४॥

दैवते । पशुपतिर्देवताऽस्य पाशुपतः । धनादेः पत्युरित्यण (६-१-१४) । शिवमल्ली वकपुष्पम् । पशुपतिरधिदैवतं यस्य स तथा । तत्र वाच्यलिङ्गः । यथा-श्लाघ्यं पाशुपतं व्रतम् ॥१२१॥ **पारिजातस्तु मन्दारे पारिभद्रे सुरद्रुमे ।** पारिणः पारावतोऽब्धेर्जातः पारिजातः । मन्दारोऽर्कभेदः । पारिभद्रो निम्बः । सुरद्रुमे यथा—पारिजातपल्लवेभ्यो रागमिति । **पारापतः कलरवे गिरौ मर्कटतिण्डुके ।** पारमापतति पारापतः । लिहाद्यच् (५-१-५०) । मर्कटतिण्डुकस्तिण्डुकविशेषः । कलरवे यथा—तां कस्यांचिद्भवनवलभौ सुप्तपारापतायाम् ॥१२२॥ **पारावती तु लवलीफलगोपालगीतयोः ।** हरीतक्यादित्वाल्लवलीफलेऽपि स्त्रीत्वम् । **पुष्पदन्तस्तु दिङ्नागे जिनभेदे गणान्तरे ।** पुष्पवद्दन्ता अस्य पुष्पदन्तः । दिङ्नागो वायव्यदिग्गजः । जिनभेदे नवतीर्थकरे यथा—वन्दे श्रीपुष्पदन्तस्य ॥१२३॥ **पुष्पदन्तौ च चन्द्रार्कावेकोक्त्या ।** पुष्पे इव पुष्पे दन्ताविव दन्तौ पुष्पे च ते दन्तौ च पुष्पदन्तौ । यथा—विश्वस्यास्य विलोचने तिरयतो (ते) यत्पुष्पदन्तौ तमः । **अथ पुरस्कृतं पूजिते स्वीकृते सिक्तेऽभिशस्तेऽग्रकृतेऽपि च ।** पुरस्क्रियते स्म पुरस्कृतम् । नमस्पुरसोगतेरिति सः (२-३-१) । वाच्यलिङ्गः । पूजिते यथा—हरिन्मरुद्भिः सपुरस्कृतकृती । स्वीकृते यथा— सपुरस्कृतसक्रियः । सिक्ताभिशस्तयोर्यथा—नमः करोति स्म महालक्ष्म्यै भक्तिपुरस्कृतः । अग्रकृते यथा—पुरस्कृता वर्त्मनि पार्थिवेन ॥१२४॥

भोगवती तु सर्प्पाणां नगरेऽपि सरित्यपि ।
रङ्गमाता जतुचन्द्योर्लक्ष्मीपतिर्जनार्दने ॥१२५॥
पूगे लवङ्गवृक्षे च व्यतीपात उपद्रवे ।
योगभेदेऽपयाने च, वनस्पतिद्रुमात्रके ॥१२६॥
विनापुष्पफलिद्रौ च विनिपातस्तु दैवतः ।
व्यसने चावपाते च वैजयन्तो गुहे ध्वजे ॥१२७॥
इन्द्रालये वैजयन्ती त्वग्निमन्थपताकयोः ।
जर्तुयन्त्यां च समाघातस्त्वाहवे घातनेऽपि च ॥१२८॥

भोगवती तु सर्पाणां नगरेऽपि सरित्यपि (सरिदन्तरे) । भोगः सन्त्यस्यां भोगवती । बाहुलकाद् दीर्घत्वाभावः । द्वयोर्यथा—भोगवत्यपि वसुन्धराश्रिता । रङ्गमाता जतुच(चु)न्द्योः । रङ्गस्य माता रङ्गमाता । चन्दी कुट्टनी । लक्ष्मीपतिर्जनार्दने । पूगे लवङ्गवृक्षे च । लक्ष्म्याः पतिः लक्ष्मीपतिः । जनार्दने यथा—लक्ष्मीपतेश्चरितकीर्त्तनमात्रचारु ॥१२५॥ पूगः क्रमुकः । व्यतीपात उपद्रवे । योगभेदेऽपयाने च । व्यतिपतनं व्यतिपतन्त्यस्मिन् कार्याणि वा व्यतीपातः । घञ्युपसर्गस्येति दीर्घः । योगभेदे यथा—दिनमेकं परिहार्यः परिघश्च तथा व्यतीपातः । अपयानं पलायनम् । वनस्पतिर्द्रुमात्रके विना पुष्पफलिद्रौ च । वनस्य पतिर्वनस्पतिः । वर्चस्कादित्वात्साधुः । द्रुमात्रे यथा—क्लान्तिच्छिदो वनवनस्पतयस्तदानीम् ॥१२६॥ पुष्पं विना फलवति द्रुमे यथा—फली वनस्पतिर्ज्ञेयः । विनिपातस्तु दैवतः । व्यसने चावपाते च । विनिपतनं विनिपातः । दैवाघद् व्यसनं तत्र यथा—विनिपातोऽपि समः समुन्नतेः । पतनमात्रमवपातः । वैजयन्तो गुहे ध्वजे । इन्द्रालये । वैजयन्ती अत्रास्ति वैजयन्तः । अभ्रादित्वादः ॥१२७॥ वैजयन्ती त्वग्निमन्थपताकयोः । जयन्त्यां च । विजयन्ते विजयन्तः । क जि भू इत्यन्तः । तस्येयं वैजयन्ती । पताकायां यथा—इत्यस्यतेऽनेकदलीर्मधुश्रीः प्रभावनीकेतनवैजयन्तीः । अग्निमन्थोऽरणिः । जयन्ती ओषधिः । समाघातस्त्वाहवे घातनेऽपि च । समा हन्यन्ते

समाहितः समाधिस्थे संश्रुतेऽथ समुद्धतः ।
अविनीते समुद्गीर्णे समुद्रान्ता दुरालभा ॥१२९॥
कार्प्पासिका च स्पृक्का च सदागतिः सदीश्वरे ।
निर्व्वाणे पवमाने च सरस्वती सरिद्धिदि ॥१३०॥
वाच्यायागायां स्त्रीरत्ने, गोवाग्देवतयोरपि ।
सूर्यभक्तो बन्धुजीवे, भास्करस्य च पूजके ॥१३१॥

यो द्वारोऽत्रात समाघातनम्बा समाघातः ॥१२८॥ समाहितः समाधिस्थे संश्रुते । समादधाति समाधियते वा समाहितः । वाच्यलिङ्गः । समाधिस्थे यथा—समाहितैरप्यनुरूपितस्ततः पदं दशः स्याः कथमीश मादशाम् । संश्रुतः प्रतिज्ञातः । दत्तोत्तरेऽपि यथा—समाहितो मन्मथपूर्वपक्षः । अथ समुद्धतः । अविनीते समुद्गीर्णे । समुद्धन्यते स्म समुद्धतः । वाच्यलिङ्गः । अविनीते यथा—सहजचापलदोष समुद्धतः । समुद्गीर्णे समुदीरितम् । समुद्रान्ता दुरालभा । कार्प्पासिका स्पृक्का च । समुद्रोऽन्तो यस्याः सा समुद्रान्ता । स्पृक्कादुरालभे ओषधे ॥१२९॥ कार्प्पासिका वमनी । भूमावपि यथा—समुद्रान्तां स्थिरां शुद्धाम् । सदागतिः सदीश्वरे । निर्व्वाणे पवमाने च । सदागतिर्यस्य स सदागतिः । पवमाने यथा—महिषक्षता गरुतमालनदलसुरभिः सदागतिः । सरस्वती सरिद्धिदि । वाच्यापगायां स्त्रीरत्ने गोवाग्देवतयोरपि । सरः प्रसरणमस्त्यस्याः । सरस्वती । सरिद्धिदि यथा—नदोमिवाऽन्तःसलिलां सरस्वतीम् ॥१३०॥ वाचि यथा—रतिमाकाशभवां सरस्वती । आपगा मात्रे यथा—कूलंकषा शैवलिनी सरस्वती । वाग्देवतायां यथा—वाचालासि सरस्वती व्रज गृहान् कः सूक्तिगोष्ठीक्रमः । सूर्यभक्तो बन्धुजीवे भास्करस्य च पूजके । सूर्यस्य भक्तः सूर्यभक्तः । बंधुजीवो बंधूकः । भास्करपूजके वाच्यलिङ्गः ॥१३१॥ हैमवत्यद्रिजा स्वर्णक्षीरी शुक्लवचाऽभया । हिमवतः इयं हैमवती । अद्रिजा गौरी गंगा च तयोर्यथा—चुकोप सा हैमवतीति नाम्ना । स्वर्णक्षीरी अभया शुक्लवचा चौषधयः । हिमवति जातादावपि तत्र तु वाच्यलिङ्गः । यथा—

हैमवत्यद्रिजा[1] स्वर्णक्षीरी शुक्लवचाऽभया ।
अनीकस्थो रक्षिवर्गे, युत्खले वीरमर्दले ॥१३२॥
चिह्ने गजशिक्षके चेतिकथा व्यर्थभाषणे ।
अश्रद्धेये नष्टधर्मेऽप्युदरथिर्वियन्मणौ ॥१३३॥
अब्धौ चित्ररथो विद्याधरे गन्धर्वसूर्ययोः ।
चतुष्पथश्चतुर्मार्ग–सङ्क्रमे ब्राह्मणेऽपि च ॥१३४॥
दशमीस्थः स्थविरे स्यात्, क्षीणरागे मृताशने ।
वानप्रस्थो मधूकद्रौ, किंशुकाश्रमभेदयोः ॥१३५॥

स्थाणवाश्रमं हैमवतं जगाम । अथ थान्ताः । **अनीकस्थो रक्षिवर्गे युत्खले वीरमर्दले । चिह्ने गजशिक्षके च ।** अनीके तिष्ठति अनीकं तिष्ठत्यनेति वा अनीकस्थः । रक्षिवर्गगजशिक्षकयोर्यथा–अनीकस्थैः स्वस्थैः स्थितिरिह कथं शत्रुनिकरे । युधः खलं रणभूमिः ॥१३२॥ **इतिकथा व्यर्थभाषणे अश्रद्धेये नष्टधर्म्मेऽपि ।** इतिकथा इतिकथा अव्ययं प्रवृद्धादिभिरितिसमासः । **उदरथिर्वियन्मणौ । अब्धौ ।** उदूर्ध्वमियर्त्ति उदरथिः । उदर्त्तेर्णिद्वेत्यथिः । पुंसि । वियन्मणिरादित्यः ॥१३३॥ **चित्ररथो विद्याधरे गन्धर्वसूर्ययोः ।** चित्रोरथोऽस्य चित्ररथः । **चतुष्पथश्चतुर्मार्गसङ्क्रमे ब्राह्मणेऽपि च ।** चत्वारः पन्थानोऽत्र चतुष्पथः । चतुर्णां पथां समाहारश्चतुष्पथः चतुष्पथमिति क्लीबेऽपि । चतुर्म्मार्गसंगमे यथा-किं यातोऽसि चतुष्पथे ॥१३४॥ **दशमीस्थः स्थविरे स्यात् क्षीणरागे मृताशने ॥** दशम्यां अवस्थायां तिष्ठति दशमीस्थः । वाच्यलिङ्गः । स्थविरक्षीणरागयोर्यथा–चक्रिणो दशमीस्थस्य रोगिणो भारिणस्त्रियः । स्नातकस्य च राज्ञश्च पंथा देयोवरस्य च ॥ मृतस्य हस्तेनाशनं यस्य स मृताशनः । **वानप्रस्थो मधूकद्रौ किंशुकाश्रमभेदयोः ।** प्रतिष्ठन्तेऽत्र प्रस्थः । वनस्य प्रस्थे भवो वानप्रस्थः । आश्रमभेदे यथा–वानप्रस्थमुनिस्थलीषु विहृतं बद्धोटजासु (बद्धो जटासु) त्वया ॥१३५॥ अथदान्ताः ॥ **अष्टापदश्चन्द्रमाल्ल्यां लूतायां शरभे गिरौ । कनके शारिफलके ।** अष्टौ पदान्यस्य

---

[1] सेनापतिर्गुहेऽध्यक्षे हिमारातिः खगेऽनले । हैम. ।

अष्टापदश्चन्द्रमल्ल्यां, लूतायां शरभे गिरौ ।
कनके शारिफलकेऽभिमर्दौ मन्थयुद्धयोः ॥१३६॥
स्यादभिस्यन्द आस्रवनेत्ररोगातिवृद्धिषु ।
अववादस्तु निदेशे निन्दाविश्रम्भयोरपि ॥१३७॥
उपनिषत्तु वेदान्ते रहस्यधर्मयोरपि ।
एकपदं तदात्वे स्यादेक पदी तु वर्त्मनि ॥१३८॥
कटुकन्दः शृङ्गबेरे शोभांजनरसोनयोः ।
कुरुविन्दः पद्मरागे मुकुरव्रीहिभेदयोः ॥१३९॥

अष्टसु लोहेषु पदं प्रतिष्ठाऽस्येति वा अष्टापदः । नाम्नीति दीर्घः । कनके शारिफलके च पुंक्लीबः । शेषेषु पुंसि । चन्द्रमल्ली वनस्पतिभेदः लूता ऊर्णनाभः । गिरौ यथा–अष्टापदान्दोलनस्वर्गाधीशसहस्रबाहुविजयप्रायाणि सत्यापय । कनके यथा–आवर्जिताष्टापदकुम्भतोयैः । शारिफलके यथा–अन्धकारितललाटाष्टापदम् । **अभिमर्दौ मंथयुद्धयोः ।** अभिमर्दनमभिमर्दः । युद्धे यथा–युक्तं न मार्दवमराव-मन्ये यथा–तीव्राभिमर्दपरिहारनिविष्टबुद्धेः । भिमर्दभाजि ॥१३६॥ **स्यादभिस्यन्द आस्रवनेत्ररोगातिवृद्धिषु ।** अभिस्यन्दनमभिस्यन्दः । आस्रवे यथा–केनाभिस्यन्दतोहयैः । **अववादस्तु निर्देशे निन्दाविश्रम्भयोरपि ॥** अववदनमववादः । निदेश आज्ञा तत्र यथा–मधुकरैरववादकरैरिव । निन्दायां यथा–दष्टोऽयमववादस्ते । विश्रम्भो विश्वासः ॥१३७॥ **उपनिषत्तु वेदान्ते रहस्यधर्मयोरपि ।** उपसमीपे ब्रह्मणो निषीदन्त्यनयेति उपनिषत् । त्रिष्वपि यथा–यद्वेदाध्ययनं तथोपनिषदां सांख्यस्य । **एकपदं तदात्वे स्यात् ।** एकं पदमेकपदम् । तदात्वन्तत्कालः । **एकपदी तु वर्त्मनि ।** एकः पादोऽस्या एकपदी । कुम्भपद्यादित्वात्साधुः ॥१३८॥ **कटुकन्दः शृङ्गबेरे शोभांजनरसोनयोः ।** कटुः कन्दः कटुकन्दः । शृङ्गबेरमार्द्रकम् । शोभांजनः शिग्रुः । रसोनो लशुनम् । **कुरुविन्दः पद्मरागे मुकुरव्रीहिभेदयोः कुल्माषे हिङ्गुले मुस्ते ।** कुरुं विन्दति कुरुविन्दः । निगवा-

कुल्माषे हिङ्गुले मुस्ते कोकनदन्तु रक्तयोः ।
अम्भोजन्मकुमुदयोश्चतुष्पदो गवादिषु ॥१४०॥
स्त्रीणां करणभेदे च रक्तपादो मतङ्गजे ॥
स्यन्दने च जनपदः स्यात्पुनर्जनदेशयोः ॥१४१॥
परिवादस्तु निन्दायां वीणावादनवस्तुनि ॥
प्रियम्वदः प्रियवादिनभश्चरविशेषयोः ॥१४२॥
पीठमर्दोऽतिवियाते नाट्योक्त्या नायकप्रिये ॥
पुटभेदस्तु नगरातोद्ययोस्तटिनीमुखे ॥१४३॥
महानादो वर्षुकाब्दे महाध्वाने शयानके ॥
गजे च मुचुकुन्दस्तु द्रुभेदे मुनिदैत्ययोः ॥१४४॥

देर्नाम्नीति शः। पद्मरागहिंगुलयोर्यथा—सावित्राः कुरुविन्दः कन्दलरुचः प्राचोमलं कुर्वते मुकुरो दर्पणः ॥१३९॥ कोकनदन्तु रक्तयोः। अम्भोजन्मकुमुदयोः। कोकैश्चक्रवाकैर्नदति कोकनदं। द्वयोर्यथा—फुल्लकोकनदकान्तितस्करी। चतुष्पदो गवादिषु। स्त्रीणां करणभेदे च। चत्वारि पदानि यस्य स चतुष्पदः। गवादिषु यथा—द्विपदचतुष्पदभागी ।१४०॥ करणभेदो वात्स्यायनप्रसिद्धः॥ रक्तपादो मतङ्गजे स्यन्दने च। रक्तः पादा अस्य रक्तपादः। स्यन्दनो रथः जनपदः स्यात्पुनर्जनदेशयोः ॥ जनैः पद्यते जनपदः ॥ पदणिगत वित्यस्याल्। जनानां पदमिति वा। प्रतिपदपाठात्पुस्त्वं। द्वयोर्यथा-प्रीतिस्निग्धै-जनपदः वधूलोचनैः पीयमानः ॥१४१॥ परिवाद स्तु निन्दायां वीणा-वादनवस्तुनि। परिवदनं पर्युषतेऽनेन वा परिवादः। निन्दायां यथा—प्रसरति परिवादः सर्व्वतोऽयं न यावत्। वीणावादनवस्तुनि यथा—कल तया वचसः परिवादिनी स्वरजितारजितावशमाययुः ॥ अत्र हि परिवादोऽस्या अस्तीति परिवादिनी। प्रियम्वदः प्रियवादिनभश्चरविशेषयोः। प्रियम्वदतीति प्रियंवद इति खः। प्रियवादिनि वाच्यलिङ्गः॥ तत्र यथा—प्रियम्वदः प्रत्यवदत्सुरेश्वरम्। नभश्चरविशेषे यथा—अवेहि गन्धर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ॥१४२॥ पीठमर्दोऽतिवियाते नाट्योक्त्या नायकप्रिये।

मेघनादो मेघशब्दे वरुणे रावणात्मजे ।
विशारदो बुधे धृष्टे विष्णुपदं नभोऽब्जयोः ॥१४५॥
विष्णुपदस्तु क्षीरोदे विष्णुपदी सुरापगा ।
संक्रान्तिद्वारका वापि समर्यादं[1] तु सन्निधौ ॥१४६॥
मर्यादया सहितेऽप्यनुबन्धोऽप्रयोगिणि ।
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्त्तने[2] ॥१४७॥

पीठं मृदनाति पीठमर्दः। अतिवियातो अतिधृष्टः। तत्र यथा—यौवनो-न्मादलीलागोष्ठीनां पीठमर्दः। नाट्योक्त्या नायकप्रियो विदूषकप्रभृतिः पुटभेदस्तु नगरातोद्ययोस्तटिनीमुखे। पुटं भिनत्ति पुटभेदः ॥१४३॥ महानादो वर्षुकाब्दे महाध्वाने शयानके। गजे च। महान्नादोऽस्य महानाद इति वा महानादः। शयानकोऽजगरः। मुचुकुन्दस्तु द्रुभेदे मुनि-दैत्ययोः॥ मुंचति मुचुकन्दः मुचिर्द्रुकुन्द कुकुन्दाविति किदि दु कुन्दः। द्रुभेदे यथा—द्वित्रमुचुकुन्दकलिकास्त्रिचतुरमुकुलः क्रमेण लवलीषु। पंचषकलिनो कुसुमो जयति हिमर्त्तुर्निवावतारः ॥१४४॥ मेघनादो मेघशब्दे वरुणे रावणा-त्मजे। मेघस्य नादो मेघस्येव नादोऽस्येति वा मेघनादः। रावणात्मजे यथा—सौमित्रे तिष्ठ पात्रं त्वमपि नहि रुषां न त्वहं मेघनादः। विशारदो बुधे धृष्टे। विशेषेण शारदस्य विशारदः। वाच्यलिङ्गः। द्वयोर्यथा—तां भवानीं भवानीतां बिलेशनाशविशारदां। विष्णुपदं नभोऽब्जयोः। विष्णोः पदं पदमिव वा विष्णुपदं॥१४५॥ नभसि यथा-क्रान्त्वा विष्णुपदं प्रयाति शनकैरस्ताचलं भास्करः। विष्णुपदस्तु क्षीरोदे। विष्णोः पदं यत्र विष्णुपदः। विष्णुपदी सुरापगा। संक्रान्ति द्वारकावापि। विष्णोः पादौ हेतुरस्या विष्णुपदी। कुम्भपद्यादिरिति साधुः। सुरापगायां यथा-किम्बाकृष्टांघ्रिपद्मातिद्युतिभिररुणिता विष्णुपद्याःपदव्यः। समर्यादं तु सन्निधौ॥१४६॥ मर्यादया सहितेऽपि ॥ मर्यादया सह वर्त्तते समर्यादं। सन्निधिन्नैकट्यं। तत्र— क्लीबो तद्वति मर्यादया सहिते च

१ शतहृदा तु विधुति वज्रेऽपि च समर्यादा र प्रकृतक्यानुवर्त्ते च दोषस्यापादनेऽपि च।

दोषोत्पादेऽनुबन्धी तु हिक्कायां तृष्यति क्वचित् ।
अवरोधस्तु शुद्धान्ते तिरोधाने नृपौकसि ॥१४८॥
अवष्टब्धमविदूरे समाक्रान्तेऽवलम्बिते ।
अनिरुद्धश्चरे पुष्पचापसूनावनर्गले ॥१४९॥
आशाबन्धः समाश्वासे मर्कटस्य च वासके ।
इष्टगन्धः सुगन्धिः स्यादिष्टगन्धं तु वालुके ॥१५०॥

वाच्यलिङ्गः मर्यादया सहिते यथा—आर्याः समर्यादमुदाहरन्तु ॥ अथ धान्ताः । अनुबन्धोऽप्रयोगिणि मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्त्तने । दोषोत्पादे अनुबध्यते इति अनुबन्धः ॥ अप्रयोगिणि यथा—तिवाशवानुबन्धेन । प्रकृतस्यानुवर्त्तने यथा—सानुबन्धाः कथं न स्युः सम्पदो मे निरापदः (मयः) ॥१४७॥ दोषोत्पादे यथा—महतां नास्ति कदाचनानुबन्धः । मुख्यानुयायी प्रधानानुगामी । अनुबन्धी तु हिक्कायां तृष्यति क्वचित् । गोरादित्वाङ्गीः अवरोधस्तु शुद्धान्ते तिरोधाने नृपौकसि । अवरुध्यते अवरोधः । शुद्धान्तनृपौकसोर्यथा-यावच्चलासनविलोलनितम्बबिम्बविस्रस्तवस्त्रमवरोधवधूः पपात ॥१४८॥ अवष्टब्धमविदूरे समाक्रान्तेऽवलम्बिते । अवष्टम्यते स्म अवष्टब्धम् । अवाच्चाश्रयोर्जा विदूरे २–३–४२ इति षत्वं । वाच्यलिङ्गः । त्रिष्वपि यथा-अवष्टब्धक्लेशैः शमसुखविमूढः शठमतिः । अनिरुद्धश्चरे पुष्पचाप सूनावनर्गले । न निरुद्धचते अनिरुद्धः । अनर्गले वाच्यलिङ्गः । पुष्पचापसूनौ (पुष्पचापस्तनौ) यथा—अनिरुद्धसमद्युतिः ॥३४९॥ आशाबन्धः समाश्वासे मर्कटस्य च वासके (जालके) । आशाया बन्धः आशाबन्धः । समाश्वासे यथा—आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम् । मर्कटवासको छतापुटम् । इष्टगन्धः सुगन्धिः स्यात् । इष्टो गन्धोऽस्य इष्टगन्धः । वाच्यलिङ्गः । इष्टगन्धन्तु वालुके । वालुकं भेषजभेदः ॥१५०॥ इक्षुगन्धा काशक्रोष्ट्री कोकिला-

इक्षुगन्धा काशक्रोष्ट्रीकोकिलाक्षेषु गोक्षुरे ।
उग्रगन्धा वचाक्षेत्रयवान्योश्छिक्किकौषधौ ॥१५१॥
उपलब्धिर्मतौ प्राप्तौ, कालस्कन्धस्तु तिन्दुके ।
तमाले जीवकद्रौ च, तीक्ष्णगन्धावचौषधे ॥१५२॥
शोभाञ्जने राजिकायां परिव्याधो द्रुमोत्पले ।
वेतसे महौषधं तु विषाशुण्ठ्यो रसोनके ॥१५३॥
ब्रह्मबन्धुर्निन्द्यविप्रे, बान्धवे ब्राह्मणस्य च ।
समुन्नद्धस्तूद्ध्र्वे बद्धे पण्डितम्मन्यदृप्तयोः ॥१५४॥

क्षेषु गोक्षुरे । इक्षोरिव गन्धोऽस्या इक्षुगन्धा । क्रोष्ट्री शृगाली । शेषा ओषधिभेदाः । उग्रगन्धा वचाक्षेत्रयवान्योश्छिक्किकौषधौ । उग्रो गन्धोऽस्या उग्रगन्धा । सर्वा ओषधयः ॥१५१॥ उपलब्धिर्मतौ प्राप्तौ । उपलम्भनमुपलब्धिः श्चादित्वात् । स्त्रियां क्तिः । (५–३–९२) मतिर्ज्ञानं । द्वयोर्यथा—सम्यक् पुत्रि विमृश्य पूर्वपरयोरर्थोपलब्धौ पदं कर्त्तव्यं सुभगे यतोऽर्थरुचिता धर्म्मीयमस्मद्गृहे । कालस्कन्धस्तु तिन्दुके । तमाले जीवकद्रौ च । कालः स्कन्धोऽस्य कालस्कन्धः । जीवकद्रुः श्यामखदिरः । तीक्ष्णगन्धा वचौषधे । शोभाञ्जने राजिकायां । तीक्ष्णो गन्धोऽस्याः तीक्ष्णगन्धा ॥१५२॥ शोभाञ्जनः शिग्रुः । राजिका राजसर्षपः । परिव्याधो द्रुमोत्पले । वेतसे । परिविध्यति परिव्याधः । "तन् व्यधीणिति णः" (५-१-६४) द्रुमोत्पलः कर्णिकारः । महौषधं तु विषाशुण्ठ्यो रसोनके । महदौषधं महौषधं । "जातीयैकार्थे च्चेरिति डाः" (३-२-७०) ॥१५३॥ ब्रह्मबन्धुर्निन्द्यविप्रे बान्धवे ब्राह्मणस्य च । ब्रह्मा बन्धुरस्य ब्रह्मबन्धुः । द्वयोर्यथा—ब्रह्मबन्धुरयमागतोऽतिथिः । समुन्नद्धस्तूर्द्ध्वं बद्धे पण्डितम्मन्यदृप्तयोः । समुन्नह्यते समुन्नद्धः । वाच्यलिङ्गः ॥१५४॥ अथ नान्ताः । अपाचीनं विपर्यस्तेऽपागर्थे । अपागेव अपाचीनं । "अदिक् स्त्रियां वाच इतीनः । (७-१-१०७) विपर्यस्ते वाच्यलिङ्गः । तत्र

अपाचीनं विपर्यस्तेऽपागर्थेऽभिजनः कुले ।
कुलध्वजे जन्मभूम्यामभिमानस्त्वहंकृतौ ॥१५५॥
हिंसायां प्रणये ज्ञानेऽवलग्नो मध्यलग्नयोः ।
अवदानमितिवृत्ते खण्डने शुद्धकर्म्मणि ॥१५६॥
अधिष्ठानं प्रभावेऽध्यासने नगरचक्रयोः ।
अनूचानः साङ्गवेदकोविदे विनयान्विते ॥१५७॥

यथा—सोपाचीनानि पश्यति । अपाक् पश्चादित्यस्यार्थोऽपागर्थः । तत्र यथा—अपाचीनं चीनांशुकयुगलसंवीतवपुषा । **अभिजनः कुले कुलध्वजे जन्मभूम्यां** । अभिजायते अभिजनः । कुले यथा—तां पार्वतीत्यभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव । कुलध्वजे यथा—वैदभिदर्भदलपूजनयाऽपि यस्य गर्भे जनः पुनरुदेति न जातु मातुः । तस्यार्चनां रचय तत्र मृगांकमौलेस्तन्मात्रदैवतजनाऽभिजनः संदेशः । जन्मभूमौ यथा—यः कन्यकुब्जाभिजनः स राजा । **अभिमानस्त्वहंकृतौ । हिंसायां प्रणये ज्ञाने ।** अभिमाननमभिमानः । अहंकृतौ यथा—अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ॥१५५॥ हिंसायां यथा—यः शत्रुष्वभिमानवान् स जयति स्फीतं महीमण्डलम् । प्रेमपूर्वको वशीकारः प्रणयस्तत्र यथा—प्रियाभिमानेन विना न तन्वी चित्तस्य कोपाकुलतां जहाति । ज्ञाने यथा-तत्त्वाभिमानेन विना न मोक्षः। **अवलग्नो मध्यलग्नयोः**। अवलगति स्म अवलग्नः। "क्षुब्धविरब्धेति साधुः।" मध्ये पुंक्लीबः। तत्र यथा—कृशावलग्नां सुदतीं ससर्ज । लग्ने वाच्यलिङ्गः । तत्र यथा—क्षितो हस्तावलग्नः प्रसभमभिहतो व्याददानोऽङ्कुशान्तम् । **अवदानमितिवृत्ते खण्डने शुद्धकर्म्मणि** । अवदीयते अवदायते वाऽनेनाऽवदानं। त्रिष्वपि यथा—विश्वावसुप्राग्रहरैः सदेवैः संगीयमानत्रिपुरावदानः ॥१५६॥ **अधिष्ठानं प्रभावेऽध्यासने नगरचक्रयोः** । अधिष्ठीयते अधिष्ठानं । चक्रं रथाङ्गं । तत्र प्रभावे च यथा—उच्चैस्तेरुरस्तूर्णमस्त्रापगायाः । साधिष्ठानास्ते किमाश्चर्यमत्र ॥ नगराध्यासनयोर्यथा— अधिष्ठानं राज्ञो जगति जयति प्रात-

अन्वासनं स्नेहवस्तौ सेवायामनुशोचने ।
अग्रजन्माऽग्रजे विप्रेऽन्तेवासी पुनरन्त्यजे ॥१५८॥
शिष्यप्रान्तगयोश्चाप्यायोधनं समरे वधे ।
आराधनं पाकप्राप्त्योः साधने तोषणेऽपि च ॥१५९॥
आच्छादनं तु वसने सम्पिधानेऽपवारणे ।
आकलनं परिसंख्याकांक्षयोर्बन्धनेऽपि च ॥१६०॥

विभवम् । **अनूचानः साङ्गवेदकोविदे विनयान्विते** ॥ अनूवाच अनूचानः "वेयिवदनेति (५-२-३) साधुः।" विनयान्विते वाच्यलिङ्गः । द्वयोर्यथा-इदमूचुरनूचानाः प्रीतिकंटकितत्वचः ॥१५७॥ **अन्वासनं स्नेहवस्तौ सेवायामनुशोचने** । अन्वास्यते अन्वासनं । स्नेहवस्तिः स्नेहोपकरणम् । **अग्रजन्माऽग्रजे विप्रे** । अग्रे जन्म अस्य अग्रजन्मा पुंसि । अग्रजे यथा—अग्रजन्मा यदा तिष्ठेत्तदा-दध्यानुजः कथम् । विप्रे यथा—द्रष्टुमाह वनमग्रजन्मनां । **अन्तेवासी पुनरन्त्यजे शिष्यप्रान्तगयाश्चापि** । अन्ते वसत्यन्तेवासी ॥१५८॥ शयवासीत्यलुप् (३-२-२५) प्रान्तगे वाच्यलिङ्गः शिष्ये यथा—रुतानिशृण्वन् वयसांगणोऽन्तेवासित्वमाप स्फुटमङ्गनानाम् । **आयोधनं समरे वधे** । आयुध्यन्तेऽस्मिन्नित्यायोधनं । समरे यथा—आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिं । वधे यथा—शस्त्रायोधनविधुरो रणभुवि वीरोपि मुह्यति प्रायः । **आराधनं पाकप्राप्त्योः साधने तोषणेऽपि च** । आराध्यते आराधनं । साधने यथा—न्यस्याङ्गानि ततः कुर्याद्विद्याराधनमुत्तमम् । तोषणे यथा—शंकराराधनं धनं ॥१५९॥ **आच्छादनं तु वसने सम्पिधानेऽपवारणे** । आच्छाद्यतेऽनेन आच्छादनं । वसने यथा-भोजनाच्छादने सद्भिरुभेकसिपु कथ्यते । सम्पिधानाऽपवारणयोर्यथा—आच्छादनमकार्यस्य कार्यमार्यैः । प्रयत्नतः। **आकलनं परिसंख्याकांक्षयोर्बन्धनेऽपि च** । आकल्यते आकलनं बन्धने यथा—सेव्याऽपि सानुनयमाकलनाय यन्त्रा । शेषयोर्यथा—जलधिजला-

आतञ्चनं स्याज्जवने प्रीणनप्रतिवापयोः ।
आवेशनं भूतावेशे प्रवेशे शिल्पिवेश्मनि ॥१६१॥
आस्कन्दनं तिरस्कारे संशोषणसमीकयोः ।
आत्माधीनः सुते प्राणाधारे श्याले विदूषके ॥१६२॥
आत्मयोनिः स्मरे वेधस्युद्वर्त्तनं विलेपने ।
अपावृत्तावुत्पत्तने स्यादुपासनमासने ॥१६३॥

कलनार्चितेषु तेषु ॥१६०॥ आतञ्चनं स्याज्जवने प्रीणनप्रतिवापयोः । तंचू गतौ । आतञ्चति आतच्यते वा आतंचनम् । जवने वेगवति वाच्यलिङ्गः । तत्र यथा—आतञ्चनं पंचशरस्य बाणं, सम्प्राप्य शीघ्रं भुवनं जयन्ति । प्रतिवापो द्रवद्रव्यस्य भाण्डात् भाण्डान्तरक्षेपः । तत्र प्रीणने च यथा—सुधारसातंचनचंचदुच्चचंद्रांशुशुभ्रीकृतगण्डलेखाः । आवेशनं भूतावेशे प्रवेशे शिल्पिवेश्मनि । आविश्यते आवेश्यते अस्मिन्वा आवेशनं । भूतावेशे यथा—दर्पाविशनदुःस्थितस्य परमो मन्त्रस्त्वदीयं वचः । शिल्पिवेश्मनि यथा—आवेशनानि विविशुः सहसैव सिंहाः ॥१६१॥ आस्कन्दनं तिरस्कारे संशोषणसमीकयोः । आस्कंद्यते आस्कद्यतेऽस्मिन्वा आस्कन्दनं । तिरस्कारे यथा-एते हठास्कन्दनमन्तरेण, रणेषु योग्या न वहन्ति वाहाः । प्रापणेऽपि । तत्र संशोषणे च यथा—ग्रीष्मास्कन्दनजर्जरीकृततृणप्लोषाय दावानलः । समो के संग्रामे च यथा—आस्कन्दने स्कन्दसमानसारः । शरैररीणां विजयं विधाय । आत्माधीनः सुते प्राणाधारे श्याले विदूषके । आत्मनोऽधीनः आत्माधीनः ॥१६२॥ आत्मयोनिः स्मरे वेधसि । आत्मा योनिरस्य आत्मयोनिः । पुंसि । स्मरे यथा—प्रहर्त्तुमभ्युदयतमात्मयोनिम् । वेधसि यथा—संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते । उद्वर्त्तनं विलेपने । अपावृत्तावुत्पतने स्यात् । उद्वर्त्यते उद्वर्त्यतेऽनेन वा उद्वर्त्तनं विलेपनमिति भावे—करणे वा अनट् । तत्र भावपक्षे यथा – उद्वर्त्तनं कारय कुंकुमेन ।

शुश्रूषायां शराऽभ्यासेऽप्युपाधानं तु गण्डके ।
व्रते विशेषे प्रणये स्यादुत्पतनमुत्प्लुतौ ॥१६४॥
उत्पत्तावुदयनस्तु वत्सराजे घटोद्भवे ।
उत्सादनं समुल्लेखो द्वर्तनोद्वाहनेष्वपि ॥१६५।
उद्वाहनं द्विसीत्ये स्यादुद्वाहनी वटारके ।
कपीतनः गर्दभाण्डशिरीषाम्रातपिप्पलाः ॥१६६॥

तत्र करणपक्षे यथा—उद्वर्तनं भर्त्तुरथार्प्पयन्ती । अपावृत्तो यथा—मोघीकर्त्तुं चतुत्र (बहुल) शफरोद्वर्त्तनप्रेक्षितानि । उपासनमासने शुश्रूषायां शराऽभ्यासेऽपि । उपास्यते उपासनं । त्रिष्वपि यथा—उपासनं तत्र दृढं किमुदभुतं ॥१६३॥ उपधानं तु गण्डके । व्रते विशेषे प्रणये । उपाधीउपाधीयते उपाधानं । गण्डके उच्छीर्षके यथा-नागांङ्के मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं । व्रते यथा-श्रुताराधनमाधेयमुपधानविधानतः । विशेषो विशेषणं । स्यादुत्पतनमुत्प्लुतौ उत्पत्तौ । उत्पत्यते उत्पतनं । उत्प्लुतौ यथा-परभृतशिशो मौनं, । तावद्विधेहि नभस्तलोत्पतनविषये पक्षौ स्यातां न यावदिमौ क्षमौ ॥१६४॥ उदयनस्तु वत्सराजे घटोद्भवे । उदयते उदयनः । नन्द्यादिभ्योऽनः । वत्सराजे यथा—प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धान् । घटोद्भवोऽगस्तिः । उत्सादनं समुल्लेखोद्वर्त्तनोद्वाहनेष्वथ । उत्सादयते उत्सादनं ॥१६५॥ उद्वाहनं द्विसीत्ये स्यात् । उद्वाह्यते उद्वाहनं । द्वाभ्यां सीताभ्यां संगतं द्विसीत्यं—द्विकृष्टं । उद्वाहनी वटारके । वटारको रज्जुः । कपीतनः (नो) गर्दभाण्डशिरीषाम्रातपिप्पलाः । कपी तनोति कपीतनः । लिहाद्यच् । कम्पते वा "विदनग-गनेति साधुः" चत्वारोऽपि वृक्षाः ॥१६३॥ कलध्वनिः परभृते पारापतकलापिनोः । कलो ध्वनिरस्य कलध्वनिः । त्रिष्वपि यथा—कलध्वनौ कूजति पान्थसार्थाः प्रियां स्मरंति स्मरतापतप्ताः । कात्यायनो वररुचौ । कतस्यापत्यं वृद्धं कात्यः ॥ "गर्गादिर्यञ्" ॥ (६-१

कलध्वनिः परभृते पारापतकलापिनोः ।
कात्यायनो वररुचौ, कात्यायनी तु पार्वती ॥१६७॥
कषायवस्त्रं विधवाऽर्द्धवृद्धा महिलाऽपि च ।
कामचारी कलम्बिके, स्वेच्छाचारिणि कामुके ॥१६८॥
कारन्धमी धातुवादनिरते कांस्यकारिणि ।
किष्कुपर्व्वा पोटगले स्यादिक्षुत्वचिसारयोः ॥१६९॥
कुचन्दनं वृक्षभेदे पत्राङ्के रक्तचन्दने ।
कुम्भयोनिर्द्रोणेऽगस्तौ कृष्णवर्त्मा विधुन्तुदे ॥१७०॥

४२) तस्यापत्यं युवा कात्यायनः । "यञिञ (६-१-५४) इत्यायनण्" ॥ यथा—कात्यायनेन ते (मते) सृष्टा विबुद्धि प्रतिबुद्धये । **कात्यायनी तु पार्वती । कषायवस्त्रं विधवाऽर्द्धवृद्धामहिलाऽपि च ।** कात्यशब्दात् "यञोडायं न्नवेति डोः ।" (२-४-६७) कात्यायनी पार्वत्यां । यथा—प्रसाधयतु वः कृत्यानि कात्यायनी ॥१६७॥ कषाय(काषाय)वस्त्रं विधवा अर्धवृद्धा महिलापि । कषायवस्त्रा चासौ विधवा च सा चासौ अर्धवृद्धामहिला च सा तथा । तस्यां कात्यायनी च । कात्यायनी यथा—कात्यायनी नीतिविशारदा चेत् । **कामचारी कलम्बिके स्वेच्छाचारिणि कामुके ।** कामेन चरति कामचारी । स्वेच्छाचारिणि कामुके च वाच्यलिङ्गः । कलम्बिकश्चटकः । स्वेच्छाचारिणि यथा—न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ॥१६८॥ **कारन्धमी धातुवादनिरते कांस्यकारिणि ।** करं धमति, पाणिकरादिति खशि करन्धमः। स्वार्थे प्रज्ञाद्यणि कारंधमः । सोऽस्यास्तीति कारन्धमी । वाच्यलिङ्गः । **किष्कुपर्व्वा पोटगले स्यादिक्षुत्वचिसारयोः ।** किष्कुप्रमाणानि पर्व्वाण्यस्य किष्कुपर्व्वा । पोटगलो नडः । इक्षुः रसालः । त्वचिसारो वंशः॥१६९॥ **कुचन्दनं वृक्षभेदे पत्राङ्गे रक्तचन्दने ।** कौ कुत्सितं वा चन्दनं कुचन्दनं । पत्राङ्गं पट्टरंजनं-यन्निघंटुः । कुचन्दने तु पत्राङ्गं पत्तगं पट्टरंजनम् । रक्तचन्दनं भास्करप्रियम् । **कुम्भयोनिर्द्रोणेऽगस्तौ ।** कुम्भयोनिरस्य कुम्भयोनिः ।

दुराचारे हुताशे च गवादिनीन्द्रवारुणी ।
घासस्थानं गवादीनां गदयित्नुः शरासने ॥१७१॥
जलपाके पुष्पचापे च घनाघनो निरन्तरे ।
वासवे घातुके मत्तगजे वर्षुकवारिदे ॥१७२॥
घोषयित्नुः पिके विप्रे चिरजीवी तु वायसे ।
अजे च चित्रभानुस्तु हुताशनदिनेशयोः ॥१७३॥
जलाटनः कङ्कखगे जलाटनी जलौकसि ।
तपोधना तु मुण्डीर्यां तपोधनस्तपस्विनि ॥१७४॥

द्रोणो अश्वत्थामपिता । अगस्तौ यथा-प्रससादोदयादंभः कुम्भयोनेर्महौजसः । **कृष्णवर्त्मा विधुन्तुदे । दुराचारे हुताशे च ।** कृष्णं वर्त्माऽस्य कृष्णवर्त्मा ॥१७०॥ दुराचारे वाच्यलिङ्गः । हुताशे यथा—दाहशक्तिमिव कृष्णवर्त्मनि । पापेऽपि । **गवादिनीन्द्रवारुणी घासस्थानं गवादीनां ।** गावोऽदन्त्यस्यां गवादिनी । अनटि स्वरे वा नक्ष इत्यवादेशः । **गदयित्नुः शरासने जलपाके पुष्पचापे च ।** गदयति गदयित्नुः । हृषि पुषीति इत्नुः ॥१७१॥ जलपाके वाच्यलिङ्गः । शेषयोः पुंसिः । शरासनं धनुः । पुष्पचापः स्मरः । **घनाघनो निरन्तरे । वासवे घातुके मत्तगजे वर्षुकवारिदे ।** हन्ति घनाघनः । "अचि" चराचरेति साधुः । घातुके वाच्यलिङ्गः । तत्र वासवे च यथा—परमदानवलोकघनाघना । मत्तगजवर्षुकवारिदयोर्यथा—घनाघनानीलघनाघनप्रियाम् ॥१७२॥ **घोषयित्नुः पिके विप्रे ।** घोषयति घोषयित्नुः । हृषि पुषीति (उ०-७९७) इत्नुः । पुंसि । **चिरजीवी तु वायसे अजे च ।** चिरं जीवति चिरजीवी । णिन् । अजो ब्रह्मा । **चित्रभानुस्तु हुताशनदिनेशयोः ।** चित्रा भानवोऽस्य चित्रभानुः । पुंसि । द्वयोर्यथा—साध्यकर्मणि समाप्तिमागते चित्रभानुमृषयोऽभ्युपासते ॥१७३॥ **जलाटनः कंकखगे ।** जलेऽटनमस्य जलाटनः। **जलाटनी जलौकसि ।** गौरादित्वाङ्गीः । **तपोधना तु मुण्डीर्यां ।** तपः सन्तापो घनमस्यास्तपोधना । मुण्डीरी ओषधिभेदः। **तपोधनस्तपस्विनि ।** तपो व्रतं धनमस्य तपोधनः । यथा—तपोधनाकारधरा सरस्वती ॥१७४॥ **तपस्विनी**

तपस्विनो पुनर्मासी कटुरोहिणिकाऽपि च ।
तिक्तपर्वा हिलमोचीगुडूचीमधुयष्टिषु ॥१७५॥
देवसेनेन्द्रकन्यायां सैन्ये दिविषदामपि ।
नागांचना नागयष्टौ द्विरदस्य च मुद्गरे ॥१७६॥
निर्यातनं वैरशुद्धौ दाने न्याससमर्पणे ।
निधुवनं रते कम्पे निर्वासनन्तु मारणे ॥१७७॥
पुरादेश्च बहिष्कारे निरसनं निषूदने ।
निष्ठीवने निरासे च निशमनं निशामनम् ॥१७८॥

पुनर्म्मासी कटुरोहिणिकाऽपि च । तपोऽस्त्यस्यास्तपस्विनी । "अस्तपो मायेति" विनि डीः । द्वेऽप्योषध्यौ । **तिक्तपर्वा हिलमोचीगुडूचीमधुयष्टिषु** । तिक्तं पर्व अस्यास्तिक्तपर्वा । त्रयोऽपि ओषधिभेदाः ॥१७५॥ **देवसेनेन्द्रकन्यायां सैन्ये दिविषदामपि** । देवान् सिनोति देवसेना । सर्वेतिनः । देवस्य सेना वा । दिविषदां सैन्ये यथा—या देवसेनेव परैरलंध्या । **नागांचना नागयष्टौ द्विरदस्य च मुद्गरे** ॥१७६॥ नागानामंचनमनया नागांचना । नागयष्टिर्नागदमनी । **निर्यातनं वैरशुद्धौ दाने न्याससमर्पणे** । निर्यात्यते निर्यातनं । वैरशुद्धौ यथा—निर्यातनं यातनया रिपूणां । दाने यथा—निर्याय निर्यातनमाततान । न्यासो निक्षेपस्तस्य समर्पणं तत्र यथा—ज्ञात्वा प्रमाणञ्जिगादि कुर्य्यान्निर्यातनं ततः । **निधुवनं रते कम्पे** । निधूयन्ते अङ्गान्यत्र निधूयते वा निधुवनं । रते यथा—नवनिधुवनलीलां कौतुकेनाभिवीक्ष्य । **निर्वासनन्तु मारणे पुरादेश्च बहिष्कारे** । निर्वास्यते निर्वासनं । मारणे यथा—मोक्षे चित्तमिव व्यधात्स बहुशो, निर्वासनं विद्विषां ॥१७७॥ पुरादेर्बहिष्कारे यथा—तस्य निर्वासनं कार्यं सर्वस्य द्विजकर्मणः" । **निरसनं निषूदने । निष्ठीवने निरासे च** । निरस्यते निरसनम् । **निशमनं निशामनं । निरीक्षणश्रवणयोः** । निशम्यते निशमनं निशामनं वा । शमोऽदर्शने । मतभेदेन वा ह्रस्वः । द्वावपि द्व्यर्थौ । निशमनमपि पाप्मिनां निषिद्धं ॥१७८॥ **निर्भर्त्सन-**

निरीक्षणश्रवणयोर्निर्भर्त्सनमलक्तके ।
खलीकारे प्रजननं प्रगमे योनिजन्मनोः ॥१७९॥
प्रणिधानमभियोगे समाधानप्रवेशयोः ।
प्रयोजनं कार्यहेत्वोः स्यात्प्रवचनमागमे ॥१८०॥
प्रकृष्टवचने प्रस्फोटनं सूर्पे प्रकाशने ताडने ।
प्रतिपन्नस्तु विज्ञातेऽङ्गीकृतेऽपि च ॥१८१॥
प्रतियत्नः संस्कारे स्यादुपग्रहणलिप्सयोः ।
प्रहसनन्तु प्रहासाक्षेपयो रूपकान्तरे ॥१८२॥

मलक्तके । खलीकारे । निर्भर्त्स्यतेऽनेन वा निर्भर्त्सनं ॥ अलक्तके यथा—हर्षचरिते सरस्वतीवर्णके निर्भर्त्सनताडनजातरागाभ्यामिव स्वभावारुणाभ्यां पादपल्लवाभ्यामुद्भासमाना । अत्र हि—अलक्तकमर्द्दनेन जातरागाभ्यामिवेत्यर्थः । **प्रजननं प्रगमे योनिजन्मनोः** । प्रजन्यतेऽस्मिन्वा प्रजननम् ॥ प्रगमो मार्गः ॥१७९॥ **प्रणिधानमभियोगे समाधानप्रवेशयोः** । प्रणिधीयते प्रणिधानं । समाधाने यथा—सो पश्यत्प्रणिधानेन सन्ततेस्स्तम्भकारणम् । **प्रयोजनं कार्यहेत्वोः** । प्रयुंक्ते प्रयोजनं । कार्ये यथा—प्रयोजनापेक्षितया प्रभूणां, प्रायश्चलं गौरवमाश्रितेषु । हेतौ यथा—गतस्पृहोऽप्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते यया । **स्यात्प्रवचनमागमे प्रकृष्टवचने** । प्रोच्यते प्रकृष्टं वचनमस्य वा प्रवचनम् । आगमे यथा—अनूचानः प्रवचने सांगेऽधीती ॥१८०॥ प्रकृष्टवचन इति तत्पुरुषो बहुव्रीहिर्वा, बहुव्रीहिपक्षे वाच्यलिङ्गः । द्वयोरपि पक्षयोर्यथा—प्रवचने कचनापि न विद्विषः । **प्रस्फोटनं सूर्पे प्रकाशने ताडने** । प्रस्फोट्यतेऽनेन प्रस्फोट्यते वा प्रस्फोटनं । सूर्पे पुंक्लीबः । **प्रतिपन्नस्तु विज्ञातेऽङ्गीकृतेऽपि च** । प्रतिपद्यते स्म प्रतिपन्नः । वाच्यलिङ्गः । द्वयोर्यथा—प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥१८१॥ **प्रतियत्नः संस्कारे स्यादुपग्रहणलिप्सयोः** । प्रतियतनं प्रतियत्नः । यजिस्वपीति

प्रतिमानं प्रतिबिम्बे गजदन्तद्वयान्तरे ।
प्रसाधनी कंकतिकासिद्ध्योः प्रसाधनं पुनः ॥१८३॥
वेषे प्रचालकी सर्प्पे मयूरेऽथ पयस्विनी ।
विभावर्यां गोधेन्वां च पुण्यजनस्तु सज्जने ॥१८४॥
गुह्यके यातुधाने च पृथग्जनोऽधमे जडे ।
पृष्ठशृङ्गी भीमसेने खण्डसैरिभयोरपि ॥१८५॥

नः। सतो गुणान्तराधानं संस्कारः । तत्र यथा—प्रतियत्नमपेक्ष्यते नहि प्रतिभातत्वसहोदरी सताम् । उपग्रहणमादानम् । लिप्सायां यथा—मिथ्यैव कुर्व्वते मूढाः प्रतियत्नं धनम्प्रति । **प्रहसनन्तु प्रहासाक्षेपयो रूपकान्तरे ।** प्रहस्यते प्रहसनम् । रूपकान्तरं दशरूपकप्रसिद्धं । तत्र प्रहासे च यथा—गात्रैर्गिरा च विकलश्चटुमीश्वराणां कुर्वन्नयं प्रहसनस्य नटः कृतोऽस्मि ॥१८२॥ **प्रतिमानं प्रतिबिम्बे गजदन्तद्वयान्तरे ।** प्रतिमीयते प्रतिमानं । प्रतिबिम्बे यथा—किं तस्याप्रतिमानमानमसहः सिंहस्य गम्यो गजः । गजदन्तद्वयान्तरे यथा—अम्भोधिरोधसि पृथुप्रतिमानभागरुद्धोरुदन्तमुसलप्रसरं निपेते । **प्रसाधनी कंकतिकासिद्ध्योः** । प्रसाध्यतेऽनया प्रसाधनी । कंकतिकायां यथा—प्रसाधनी हस्तसखीजनान्विता । सिद्धिर्निष्पत्तिः । **प्रसाधनं पुनः** ॥१८३॥ **वेषे** । वेषो मण्डनं । यथा—ध्रियते कुसुमप्रधानं तव तच्चारु वपुर्न दृश्यते । आराधनेऽपि मंखः । समुद्दीपितकन्दर्पा कृतगौरीप्रसाधना । **प्रचलाकी सर्प्पे मयूरे** । प्रचक्रमकति णिनि प्रचलाकी प्रचलाकः कलापो (प्रचलापो) ऽस्त्यस्य वा । मयूरे यथा-**कलरवैः** प्रचलत्प्रचलाकिनां । अथ **पयस्विनी विभावर्यां गोधेन्वां च** । पयोऽस्त्यस्याः पयस्विनी । अस्त प इति विन् । गोधेन्वां यथा—कथं नु शक्योऽनुनयो महर्षेर्विश्राणनादन्यपयस्विनीनाम् । **पुण्यजनस्तु सज्जने । गुह्यके यातुधाने च** । पुण्यो जनः पुण्यजनः । सज्जनगुह्यकयोर्यथा—अलकेव पुण्यजनालङ्कृता ॥१८४॥ **पृथग्जनोऽधमे जडे** । पृथग् जनेभ्यः पृथगजनः । द्वयोर्यथा—विविनक्ति न बुद्धिदुर्विधः । स्वयमेव स्वहितं पृथगजनः । **पृष्ठशृङ्गी**

महाधनं महामूल्ये सिल्हके चारुवाससि ।
महासेनो महासैन्ये स्कन्देऽप्यथ महामुनिः ॥१८६॥
अगस्तिकुस्तुम्बुरुणोर्मालुधानी लताभिदि ।
मालुधानो मातुलाहौ मातुलानी पुनः शणे ॥१८७॥
कलापे मातुलपत्न्यां रसायनो विहङ्गमे ।
पक्षीन्द्रे रसायनन्तु जराव्याधिजिदौषधे ॥१८८॥
राजादनः पियालद्रौ क्षीरिकायां त्रिपत्रके ।
वर्द्धमानो वीरजिने स्वस्तिकैरण्डविष्णुषु ॥१८९॥

भीमसेने खण्डसैरिभयोरपि । शृङ्गमस्त्यस्य शृङ्गी । पृष्ठे शृङ्गी पृष्ठशृङ्गी ॥१८५॥ **महाधनं महामूल्ये सिल्हके चारुवाससि** । महच्च तद्धनं महाधनं । महद्धनमस्य बहुव्रीहि पक्षे तु महामूल्यचारुवाससोर्वाच्यलिङ्गः । **महासेनो महासैन्ये स्कन्देऽपि** । महती सेनाऽस्य महासेनः । महासैन्ये वाच्यलिङ्गः । स्कन्दे यथा—महासेनममप्रभः । **अथ महामुनिः । अगस्तिकुस्तुम्बुरुणोः** । महान्मुनिर्महामुनिः । पुंसि ॥१८६॥ अगस्तौ यथा—उदिते हि महामुनौ । कुस्तुम्बुरु धान्यकम् । **मालुधानी लताभिदि** । माला धीयतेऽनया मालुधानी । पृषोदरादित्वात् । **मालुधानो मातुलाहौ** । मलते क्विं मालुधानः । मुमुचानेति साधुः । मातुलाहिश्चित्रसर्पः । **मातुलानी पुनः शणे** । **कलापे मातुलपत्न्यां** । मायाः श्रियस्तुलयाऽनिति अचि ङ्यां मातुलानी गुरुपत्नी पितृष्वसा । मातुलस्य भार्या मातुलाचार्येति ङी आन् चान्तः । शणं भङ्गा तत्र यथा—मातुलं मातुलानीं च ॥१८७॥ मातुलपत्न्यां यथा-मातृष्वसा मातुलानो गुरुपत्नो पितृष्वसा । **रसायनो विहङ्गमे । पक्षीन्द्रे** । रसायां पृथिव्यामयनमस्य रसायनः । **रसायनन्तु जराव्याधिजिदौषधे** । रसानामयनमत्र रसायनम् । यथा—कर्णामृत नि मनसश्च रसायनानि ॥१८९॥ **राजादनः पियालद्रौ क्षीरिकायां त्रिपत्रके** । राज्ञाद्यते राजादनः । पुंक्लीबः । पियालद्रुश्चारवृक्षः । क्षीरिका मधुरालफलम् । त्रिपत्रकः किंशुकः । उत्कृष्टभोज्येपि । सर्वेषु यथा—राजादनं पुण्यकृतो लभन्ते । **वर्द्धमानो वीरजिने**

२ रोचमानो दीप्यमाने कण्ठालर्के च वाजिनः । वर्द्धमानो० ।

प्रश्नभेदे शरावे च विरोचनोऽग्निसूर्ययोः ।
प्रह्लादनन्दने चन्द्रे विहेठनं विडम्बनम् ॥१९०॥
हिंसायां मर्दने विस्मापना स्यात्कुहके स्मरे ।
गन्धर्वनगरे चापि विष्वक्सेनो जनार्दने ॥१९१॥
विष्वक्सेना तु फलिनी विश्राणनं विहायिते ।
सम्प्रेषणे परित्यागे विहननन्तु पिञ्जने ॥१९२॥
वधेऽथ विश्वकर्माऽर्के मुनिभिद्देवशिल्पिनोः ।
विघ्नकारी विघातस्य कारके घोरदर्शने ॥१९३॥

स्वस्तिकैरंडविष्णुषु । प्रश्नभेदे शरावे च । वर्द्धते वर्द्धमानः । शरावे पुंक्लीबः । अन्यत्र पुंसि । वीरजिने चतुर्विंशतीर्थंकरे । यथा—श्रीवर्द्धमानं जिनमाप्तमुख्यं स्वयंभुवं स्तोतुमहं यतिष्ये ॥१८९॥ विरोचनोऽग्निसूर्ययोः । प्रह्लादनन्दने चन्द्रे । विरोचते विरोचनः । अग्नौ यथा—दध्रे विरोचनरुचिं पटलं जटानाम् । सूर्ये यथा—त्रैलोक्यलोचनविरोचनचाटुगर्भाम् । प्रह्लादनन्दनो बलिपिता । तत्र यथा—राजते गजराजस्य दानं वैरोचनेरिव । चन्द्रे यथा—वैरोचने महसि मुक्तशुचश्चकोराः। विहेठनं विडम्बने । हिंसायां मर्दने । विहेठ्यते विहेठनम् ॥१९०॥ विस्मापना स्यात्कुहके स्मरे गन्धर्वनगरे चापि । विस्माप्यते विस्मापनं तस्य आख्या प्रसिद्धिर्विस्मापनाख्या । कुहकमिन्द्रजालम् । स्मरे पुंसि । शेषयोः क्लीबे । विष्वक्सेनो जनार्दने । विषूची सेनाऽस्य विष्वक्सेनः । यथा—विष्वक्सेनं सेनया सोम्यगाच्च ॥१९१॥ विष्वक्सेना तु फलिनी । फलिनी प्रियङ्गुः । विश्राणनं विहायिते । सम्प्रेषणे परित्यागे । विश्राण्यते विश्राणनं विहायितं दानं । तत्र यथा—विश्राणनादन्यपयस्विनोनाम् । विहननं तु पिञ्जने । वधे । विहन्यतेऽनेन विहन्यते वा विहननं पिञ्जने यथा—तूले विहनना हते ॥१९२॥ वधे यथा—विहननं मधुना शत्रोरिच्छन्ति पराक्रमान्न बुद्धिबलात् । अथ विश्वकर्माऽर्के मुनिभिद्देवशिल्पिनोः ।

विलेपनी स्याद्यवाग्वां चारुवेषस्त्रियामपि ।
वृक्षादनो मधुच्छत्रे चलपत्रकुठारयोः ॥१९४॥
वृक्षादनी तु वन्दायां विदार्यां गन्धकौषधे ।
वृषपर्वा तु शृङ्गारिहरदैत्यकसेरुषु ॥१९५॥
वैरोचनो रविसुते सुगते बलिदानवे ।
श्वेतधामा घनसारे कलानाथाब्धिफेनयोः ॥१९६॥
श्लेष्मघना तु केतक्यां मल्यामथ समापनम् ।
परिच्छेदे समाधाने समाप्तिवधयोरपि ॥१९७॥

विश्वं करोति विश्वकर्मा । अर्के यथा—प्रजानामिव विश्वकर्म्मकिरणाः । देवशिल्पिनि यथा—निर्म्मातुं विश्वकर्म्मैव कर्म्मठो रूपमीदृशम् । विघ्नकारी विघातस्य कारके घोरदर्शने । विघ्नं करोति विघ्नकारी । वाच्यलिङ्गः । द्वयोर्यथा—मा विघ्नकारी भव मे दुरात्मन् ॥१९३॥ विलेपनी स्याद्यवाग्वां चारुवेषस्त्रियामपि । विलिप्यतेऽनया विलिंपति वा विलेपनी । वृक्षादनो मधुच्छत्रे चलपत्रकुठारयोः । वृक्षो द्यतेऽनेन वृक्षादनः । मधुच्छत्रं मधुमण्डः । चलपत्रः पिप्पलः ॥१९४॥ वृक्षादनी तु वन्दायां विदार्यां गन्धकौषधे । वन्दा वृक्षापरिप्ररूढो वृक्षः । विदारी लताभेदः । वृषपर्वा तु शृङ्गारिहरदैत्यकसेरुषु । वृषेण पर्वाऽस्य वृषपर्वा । वृषं पृणाति वा । स्ना मदीति वन् । शृङ्गारिणि वाच्यलिङ्गः । चतुर्ष्वर्थेषु । दैत्ये यथा—उपनीय बिन्दुसरसान्मयेन या मणिदारु चारु किल वार्षपर्वणं । विदधेऽवधूतसुरसद्मसम्पदं समुपासदत्सपदि संसदं सतां । अत्र हि वृषपर्वण इदं वार्षपर्वणं । कशेरु कन्दभेदः॥१९५॥ वैरोचनो रविसुते । सुगते बलिदानवे । विरोचनस्यायं वैरोचनः । बलिदानवे यथा—वैरोचननिकेतनं । श्वेतधामा घनसारे कलानाथाब्धिफेनयोः । श्वेतं धामाऽस्य श्वेतधामा । त्रिष्वर्थेषु ॥१९६॥ श्लेष्मघना तु केतक्यां मल्यां । श्लेष्मणि घना श्लेष्मघना । अथ समापनं परिच्छेदे समाधाने समाप्तिवधयोरपि समाप्यते समापनम् । परिच्छद इयत्ता । समाधानं समाधिः । वधसमाप्त्यो-

सम्मूर्च्छनमपि व्याप्तौ मोहे सनातनोऽच्युते ।
पितृणामतिथौ रुद्रवेधसोः शाश्वते स्थिरे ॥१९८॥
सदादानो गन्धगजे हेरम्बेऽभ्रमतङ्गजे ।
संयमनं व्रते बन्धे संयमनी यमस्य पूः ॥१९९॥
समादानं समीचीनग्रहणे नित्यकर्मणि ।
समापन्नं वधे क्लिष्टे समाप्तप्राप्तयोरपि ॥२००॥
सम्वदनन्तु सम्वादे समालोचे वशीकृतौ ।
समुत्थानं निदानेऽभियोगे सम्वाहनं पुनः ॥२०१॥
वाहनेऽङ्गमर्दने च सम्प्रयोगी तु कामुके ।
कलाकेलौ सुप्रयोगे सरोजिनी सरोरुहे ॥२०२॥

यथा–राजा शत्रुमापनाय विहितोद्योगः स्थितो यद्यपि ॥१९७॥ **सम्मूर्च्छनमभिव्याप्तौ मोहे ।** सम्मूर्च्छ्यते सम्मूर्च्छनम् । **सनातनोऽच्युते । पितॄणामतिथौ रुद्रवेधसोः शाश्वते स्थिरे ।** सना सदा भवः सनातनः । सायं चिरमिति तनट् । रुद्राच्युते वेधस्सु यथा– ददृशे तेन सनातनः क्षणात् शाश्वतस्थिरयोर्वाच्यलिङ्गः । तयोर्यथा–सनातने वर्त्मनि साधुसेविते ॥१९८॥ **सदादानो गन्धगजे हेरम्बेऽभ्रमतङ्गजे ।** सदा दानमस्य सदादानः **संयमनं व्रते बन्धे ।** संयम्यतेऽनेन संयम्यते वा संयमनम् । बन्धे यथा–नोवीसंयमनं विलोक्य सुतनोः । **संयमनी यमस्य पूः।** संयम्यन्ते प्राणिनोऽस्यां संयमनी ॥१९९॥ **समादानं समीचीनग्रहणे नित्यकर्मणि ।** समादीयते समादानम् । **समापन्नं वधे क्लिष्टे समाप्तप्राप्तयोरपि ।** समापद्यते समापन्नं, वधे क्लीबः, शेषेषु वाच्यलिङ्गः ॥२००॥ **सम्वदनन्तु सम्वादे समालोचे वशीकृतौ।** समुद्यते सम्वदनम्। **समुत्थानं निदानेऽभियोगे।** समुत्थीयतेऽस्मिन् समुत्थीयते वा समुत्थानम् । **सम्वाहनं पुनः वाहनेऽङ्गमर्दने च ।** सम्वाह्यते सम्वाहनं॥२०१॥ अङ्गमर्दने यथा-अशिथिलपरिरम्भैर्दत्तसम्वाहनानि । **सम्प्रयोगी तु कामुके । कलाकेलौ सुप्रयोगे ।** सम्प्रयोगोऽस्यास्तीति सम्प्रयोगी । कलाकेलि स्मरः । कामुके सुप्रयोगे च वाच्यलिङ्गः । **सरोजिनी**

सरोरुहिण्यां कासारे स्तनयित्नुः पयोमुचि ।
मृत्यौ स्तनिते रोगे च सारसनमुरश्छदे ॥२०३॥
काञ्च्यां च सामयोनिस्तु सामोत्थे द्रुहिणे गजे ।
सामिधेनी समिदृचोः सुयामुनो जनार्दने ॥२०४॥
वत्सराजे प्रासादेऽद्रिभेदे चाथ सुदर्शनः ।
विष्णोश्चक्रे सुदर्शन्यमरावत्यां सुदर्शना ॥२०५॥

सरोरुहे । सरोरुहिण्यां कासारे । सरोजानि सन्त्यस्यां सरोजिनी । मन्माज्जादेर्नाम्नीति इन् । सरोजिनो संजातत्वात् सरोरुहमपि सरोजिनी ॥२०२॥ कासारः सरसो । सरोरुहे सरोरुहिण्यां च यथा– सरोजिनो यद्विमुखी शशाङ्के यद्यामिनीमाह्रियते न भानुः। स्फुटं फलं बालमृगायताक्षि विदग्धदूती परिवर्जनस्य । **स्तनयित्नुः पयोमुचि । मृत्यौ स्तनिते रोगे च ।** स्तनयति स्तनयित्नुः। पुंसि। हृषि पुषीति इत्नुः । स्तनितपयोमुचोर्यथा–यत्नोयं स्तनयित्नुना विरचितो मन्ये मदुच्छित्तये । **सारसनमुरश्छदे । काञ्च्यां च ।** सारं सनोति सारसनं। उरश्छदे उरस्त्रे यथा–दधुः सारसनं रणे ॥२०३॥ काञ्च्यां यथा-विश्वम्भरासारसनायमानं कञ्चुकमात्रेऽपि । **सामयोनिस्तु सामोत्थे द्रुहिणे गजे ।** सामवेदो योनिरस्य साम्नां योनिर्वा सामयोनिः । सामोत्थे वाच्यलिङ्गः । शेषयोः पुंसि । **सामिधेनी समिदृचोः ।** समिन्द्धे ज्वलनोऽस्याः सामिधेनी । दिननगेति साधुः । समिधामाधानी वा समिध आ धानेटेत्यणि डीः । समिधि यथा-दूरेप्यशङ्कितधियः कुशसामिधेनी नीवारपुष्पफलमूलमुपाहरन्ते । ऋचि यथा–सामिधेनीरधीत्य । **सुयामुनो जनार्दने । वत्सराजे प्रासादेऽद्रिभेदे च ।** यमुनाया अयं यामुनः । शोभनो यामुनः सुयामुनः ॥२०४॥ अथ **सुदर्शनः। विष्णोश्चक्रे।** सुखेन दृश्यते सुदर्शनः । "शासु युधोति अनः" (५-३-१४१) पुंसि । वाचस्पतिस्तु चक्रं सुदर्शनोऽस्त्रियामित्याह । यथा–तस्य नेष्यति वपुः कबन्धतां बन्धुरेव जगतां सुदर्शनः । **सुदर्शन्यमरावत्यां ।** सुष्ठु दृश्यतेऽस्यामनटि ङ्यां च सुदर्शनी । लिङ्गानुशासनकाराऽभिप्रायेण पुंसि । गौडमतेन तु क्लीबे । **सुदर्शना आज्ञा-**

आज्ञायामौषधीभेदे मेरुजम्ब्वां सुरीभिदि ।
सौदामिनी तडिद्भेदतडितोरप्सरोभिदि ॥२०६॥
हर्षयित्नुः सुते स्वर्णेऽवलेपो गर्वलेपयोः ।
दूषणेऽप्यपलापस्तु प्रेमाप्पह्नवयोरथ ॥२०७॥
उपतापो गदे तापे जलकूप्यंधुगर्भके ।
सरस्यां जीवपुष्पन्तु दमनके फणिज्जके ॥२०८॥
नागपुष्पस्तु पुन्नागे चम्पके नागकेसरे ।
परिवापो जलस्थाने पर्युप्तिपरिवारयोः ॥२०९॥

यामौषधीभेदे मेरुजम्ब्वां सुरीभिदि । शोभनं दर्शनमस्याः सुदर्शना ॥२०५॥ मेरुजम्ब्वां स्त्रीपुंसः । सौदामि(म)नी तडिद्भेदतडितोरप्सरोभिदि ॥२०६॥ सुदाम्ना पर्वतेनैकदिक् सौदामनी । टस्तुभ्य दिशीत्यण् । तडिद्भेदतडितोर्यथा—सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्व्वीम् । हर्षयित्नुः सुते स्वर्णे । हर्षयति हर्षयित्नुः । हृषि पुषीति इत्नुः । पुंसि । ॥ अथ पान्ताः । अवलेपो गर्वलेपयोः । दूषणेऽपि । अवलेपनमवलेपः । गर्वे यथा—बलावलेपादधुनापि पूर्ववत्प्रबाध्यते तेन जगज्जिगीषुणा । अपलापस्तु प्रेमापह्नवयोरथ । अपलप्यते अपलापः । अपह्नवे यथा—धनापलापं कुरुते दुरात्मा । उपतापो गदे तापे । उपतप्यतेऽनेन उपतापः । तापे यथा—परोपतापेन समृद्धिभावं । जलकूप्यंधुगर्भके । सरस्यां । जलस्य कूपी जलकूपी । अन्धोः कूपस्य गर्भकं तत्र । जीवपुष्पं तु दमनके फणिज्जके । जीवस्य पुष्पं जीवपुष्पं । दमनको गन्धोत्कटः । फणिज्जको मरुबकः ॥२०८॥ नागपुष्पस्तु पुन्नागे चम्पके नागकेसरे । नागाकारं पुष्पमस्य नागपुष्पः । परिवापो जलस्थाने पर्युप्तिपरिवारयोः । पुर्युप्यतेऽस्मिन् परिवपणं वा परिवापः । परीवापोऽपि जलस्थानपरिवारयोर्यथा—भृतपरिवापा मुनयो वनभुवि राज्यं प्रतायन्ते । पर्युप्तिर्जलादेर्भाण्डाद्भाण्डान्तरे क्षेपः । वपनेऽपि यथा—एतस्क्लेशपरीवापमात्रं भिक्षाप्रयोजनम् ॥२०९॥ पिण्डपुष्पं जपायां स्यादशोके

पिण्डपुष्पं जपायां स्यादशोके सरसीरुहे ।
बहुरूपः स्मरे विष्णौ सरटे धूणके शिवे ॥२१०॥
मेघपुष्पं तु नादेये पिण्डाभ्रे सलिलेऽपि च ।
विप्रलापो विरुद्धोक्तावनर्थकवचस्यपि ॥२११॥
वृकधूपो वृक्षधूपे सिल्हकेऽथ वृषाकपिः ।
वासुदेवे शिवेऽग्नौ च हेमपुष्पन्तु चम्पके ॥२१२॥

सरसीरुहे । पिण्डरूपं पुष्पमस्य पिण्डपुष्पम् । बहुरूपः स्मरे विष्णौ सरटे धूणके शिवे । बहूनि रूपाणि अस्य बहुरूपः। धूणकमौषधिभेदः ॥२१०॥ मेघपुष्पं तु नादेये पिण्डाभ्रे सलिलेऽपि च । मेघस्य पुष्पमिव मेघपुष्पम् नादेयो वेतसः । पिण्डाभ्र ओषधिभेदः । सलिले यथा—मेघपुष्पविशदीकृता दिशः । विप्रलापो विरुद्धोक्तावनर्थकवचस्यपि । विप्रलपनं विप्रलापः । द्वयोर्यथा—कृतजनपरितापैर्विप्रलापैः किमेभिः ॥२११॥ वृकधूपो वृक्षधूपे सिल्हके । वृकान् धूपयति वृकधूपः । द्वावपि गन्धद्रव्यभेदौ । अथ वृषाकपिः । वासुदेवे शिवेऽग्नौ च । वृषेण तेजसा आकम्पते वृषाकपिः । "अभिकुण्ठि कंप्यं हिम्यो नलुक् चेति इः (उ.६१४) पुंसि । शिववासुदेवयोर्यथा— वृषे संगं बिभ्रद्ववसि सततं तार्क्ष्यवहनो, रिपोः शूलोद्भेदी प्रथम इह सन्नंदक इति । सदा शक्तेर्भर्त्ता भवसि न तु मां चापि भजसे, समग्रानुग्राही प्रभवसि वृषाकप्युपमितः । अग्नौ यथा-वृषाकपेरिवातपम् । इन्द्रसूर्ययोरपि । हेमपुष्पन्तु चम्पके अशोकद्रौ जपापुष्पे । हेमवर्णं पुष्पमस्य, हेमवर्णं पुष्पमिति वा हेमपुष्पम् ॥२१२॥ अथ बान्ताः ॥ राजजम्बूस्तु जम्बूभित् पिण्डखर्जूरवृक्षश्चापि । राज्ञो जम्बूः राजजम्बूः । स्त्रियां । अथ भान्ताः । अवष्टम्भस्तु काञ्चने । संरम्भारम्भयोः स्तम्भे । अवष्टभ्यते अवष्टम्भः । "अवाच्चेति षत्वं । कांचने—संरम्भयोर्यथा-रघोरवष्टम्भमयेन पत्त्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः । ॥२१३॥ आश्रयेऽपि । यथा—दन्तावष्टम्भपातक्रमनमितबहिर्गर्त्तवद्दण्डभित्तिः । शातकुम्भोऽश्वमारके । शातकुम्भे गिरौ भवः शातकुम्भः । अश्वमारकः करवीरः ।

अशोकद्रौ जपापुष्पे राजजम्बूस्तु जम्बूभित् ।
पिण्डखर्जूरवृक्षश्चाप्यवष्टम्भस्तु काञ्चने ॥२१३॥
संरम्भारम्भयोः स्तम्भे शातकुम्भोऽश्वमारके ।
शातकुम्भन्तु कनकेऽभ्यागमः समरेऽन्तिके ॥२१४॥
घाते रोधेऽभ्युपगमेऽनूपमस्तु मनोरमे ।
अनूपमा सुप्रतीकस्त्रियामुपगमः पुनः ॥२१५॥
अङ्गीकारेऽन्तिकगतावुपक्रमस्तु विक्रमे ।
उपधायां तदाद्याचिख्यासाचिकित्सयोरपि ॥२१६॥

शातकुम्भन्तु कनके । यथा—आह्लादयन्ति सौख्याम्भः शातकुम्भीयकुम्भिकाः ॥ **अथ मान्ताः** ॥ **अभ्यागमः समरेऽन्तिके घाते रोधेऽभ्युपगमे ।** अभ्यागच्छन्ति, अत्रेति अभ्यागमः । "स्थादिभ्यः कः" अभ्यागमनन्वा, 'युवर्णे-त्यल्' (५–३–२९) । सर्वेषु यथा— अभ्यागमो यत्र बभूव राज्ञां नानादिगन्तेभ्य उपागतानाम् । अभ्यागमनेऽपि यथा—तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः ॥२१४॥ **अनूपमस्तु मनोरमे ।** न उपमा अस्य अनूपमः, वाच्यलिङ्गः यथा-अनुपमसुखबीजं धर्ममेकं गृणन्ति । **अनूपमा सुप्रतीकस्त्रियां ।** सुप्रतीको दिग्गजस्तस्य स्त्रियां भार्यायाम् । **उपगमः पुनः अङ्गीकारेऽन्तिकगतौ ।** उपगमनमुपगमः । अङ्गीकारे यथा— धर्मोपगमशुद्धात्मा ॥२१५॥ अन्तिकगतौ यथा— उपगममर्हति साधुः सुचरित्रो मेधयानुसंगतः ॥ **उपक्रमस्तु विक्रमे । उपधायां तदाद्याचिख्यासाचिकित्सयोरपि । आरम्भे ।** उपक्रमणमुपक्रमः । विक्रमारम्भयोर्यथा— उपक्रमः सम्प्रति निष्फलो भवेत् । उपधा, धर्मादिना सचिवपरीक्षा, तत्र यथा-उपक्रमैरस्खलितैर्विशुद्धाः । तदाद्याचिख्यासायां तु तत्पुरुषे आदावुपक्रमोपज्ञ इति क्लीबे यथा— नन्दोपक्रमं प्रमाणानि नन्दे न प्रथमं ज्ञात्वाद्याचिख्यासितानीत्यर्थः । चिकित्सायां यथा— असाध्योपक्रमा रोगानारभ्यन्ते चिकित्सितुं । **अथ जलगुल्मो जलावर्त्तेऽबुचत्वरे**

आरम्भेऽथ जलगुल्मो जलावर्त्तेम्बुचत्वरे ।
कमठे दण्डयामस्तु दिवसे कुम्भजे यमे ॥ २१७ ॥
प्रवङ्गमः कपौ भेके पराक्रमस्तु विक्रमे ।
सामर्थ्ये चाभियोगे च महापद्मः पुनर्निधौ ॥ २१८ ॥
नागसंख्याभिदोर्यातयामो भुक्तसमुज्झिते ।
जीर्णे च सार्वभौमस्तु दिग्गजे चक्रवर्त्तिनि ॥ २१९ ॥
अनुशयः पश्चात्तापे दीर्घद्वेषानुबन्धयोः ।
अन्वाहार्यममावास्या श्राद्धमिष्टेश्च दक्षिणा ॥ २२० ॥

कमठे । जलस्य गुल्मो जलगुल्मः । **दण्डयामस्तु दिवसे कुम्भजे यमे ।** दण्डवत् यामा अस्य, दण्डं यच्छति वा, दण्डयामः । कुम्भजोऽगस्तिः, यमः कीनाशः ॥ २१७ ॥ **प्र(प्ल)वङ्गमः कपौ भेके ।** प्रवेण गच्छति प्रवङ्गमः । "नाम्नो गम" (५-१-१३१) इति खः । कपौ यथा—संचेरुरात्मान इवापरं क्षणात् क्षमारुहं देहमिव प्रवङ्गमाः । **पराक्रमस्तु विक्रमे । सामर्थ्ये चाभियोगे च ।** पराक्रमणं पराक्रमः । त्रिष्वपि यथा—पराक्रमः परिभवे-वैयात्यं सुरतेष्विव । **महापद्मः ,पुनर्निधौ नागसंख्याभिदोः ।** महती पद्मा अस्य, महापद्मः ॥ २१८ ॥ नागसंख्याभिदोरिति नागभेदे संख्याभेदे च । **यातयामो भुक्तसमुज्झिते । जीर्णे च ।** याता यामा अस्य यातयामः ॥ वाच्यलिङ्गः ॥ भुक्तसमुज्झिते यथा—दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः । अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥ जीर्णो वृद्धस्तत्र यथा—अहो दृष्टचरमप्यस्य सांग्रामिकमोजायितं मामयातयाममिव भीषयते । **सार्वभौमस्तु दिग्गजे चक्रवर्त्तिनि ।** सर्व्वभूमेर्ज्ञात ईशो वा सार्व्वभौमः । "पृथिवीसर्वभूमेरीशज्ञातयोश्चाञ्" (६-१-१८) ॥ चक्रवर्त्तिनि यथा—ज्योत्स्नाजलैरयमुदयते शर्व्वरी सार्वभौमः ॥ २१९ ॥

अथ यान्ताः

अनुशयः पश्चात्तापे दीर्घद्वेषानुबन्धयोः । अनुशयनमनुशयः । पश्चात्ताप-

अवश्यायो* हिमे दर्प्पेऽप्यपसव्यन्तु दक्षिणे ।
प्रतिकूलेऽन्तशय्या भूशय्या पितृवनं मृतिः ॥ २२१ ॥

उपकार्या राजगेहमुपकारोचिताऽपि च ।
चन्द्रोदयो शश्युदयोल्लोचौ चन्द्रोदयौषधौ ॥ २२२ ॥

जलाशयमुशीरे स्याज्जलाशयो जलाश्रये ।
तण्डुलीयः शाकभेदे विडङ्गतरुताप्ययोः ॥ २२३ ॥

दीर्घद्वेषयोर्यथा—अभिधाय तदा तदप्रियं शिशुपालोऽनुशयं परं गतः । अनुबन्ध आसक्तिस्तत्र यथा—प्रविमुक्तानुशयो यदा मुनिः । दोषेऽपि । यथा—अनुशयशताघ्रातं चेतो न पश्यति सत्पथं । **अन्वाहार्यममावास्या श्राद्धमिष्टेश्च दक्षिणा ।** अन्वाह्रियतेऽन्वाहार्यं ॥ २२० ॥ **अवश्यायो हिमे दर्पेऽपि ।** अवश्यायतेऽवश्यायः । तन्व्यधीति णः । हिमे यथा—उषस्सु ववुराकृष्टजडावश्यायशीकराः । **अपसव्यन्तु दक्षिणे, प्रतिकूले ।** सव्यादपगतं, अपसव्यम्, वाच्यलिङ्गः । दक्षिणे यथा—अपसव्येन पाणिना । **अन्तशय्या भूशय्या पितृवनं मृतिः ।** अन्ते शय्या अन्तशय्या । त्रिष्वपि यथा—न्याय्यान्तशय्या न सतां कदापि ॥ २२१ ॥ **उपकार्या राजगेहमुपकारोचितापि च ।** उपक्रियते उपकार्या, राजगेहे पटमण्डपादिरूपे यथा—तस्योपकार्या रचितोपचारा वन्येत राजा न पदोपदाभिः । उपकारोचिते, अर्थे लाघवार्थं स्त्रियां निर्देशः । अन्यथा तु वाच्यलिङ्गतैवं । यथा—नैवोपकार्या सुजनैरनार्याः । **चन्द्रोदयो (चन्द्रोदयौ) शश्युदयोल्लोचौ ।** चन्द्रस्योदयः, उदय इव, वा चन्द्रोदयः । द्वयोर्यथा—चन्द्रोदयोद्भासितसन्निवेशः । **चन्द्रोदयौषधौ ।** चन्द्रे उदयो यस्याश्चन्द्रोदया ॥ २२२ ॥ **जलाशयमुशीरे स्यात् ।** जले आशयो अस्य जलाशयम् । उशीरं वीरणीमूलम् । **जलाशयो जलाश्रये ।** जलस्य आशयो जलाशयः ।

* अवसायोपयुक्तान्ये समाप्तौ निश्चयेऽपि च । अवश्यायो० ।

तृणशूल्यं मल्लिकायां केतकीशाखिनः फले ।
धनञ्जयो नागभेदे ककुभे देहमारुते ॥ २२४ ॥

पार्थेऽग्नौ निरामयस्तु स्यादिडिक्के गतामये ।
प्रतिभयं भये भीष्मे, प्रतिश्रयः सभौकसोः ॥ २२५ ॥

परिधायः परिकरे, जलस्थाननितम्बयोः ।
पाञ्चजन्यः पोटगले, शंखे दामोदरस्य च ॥ २२६ ॥

यथा—लतां पुष्पवतीं स्पृष्ट्वा कृतस्नानो जलाशये । **तण्डुलीयः शाकभेदे विडङ्गतरुताप्ययोः ।** तण्डुलेभ्यो हितस्तण्डुलीयः । "तस्मै हिते इति" यः तण्डते वा, गयहृदयेति, साधुः (उ. ३७०) । ताप्यो विटमाक्षिकः ॥ २२३ ॥ **तृणशूल्यं मल्लिकायां केतकीशाखिनः फले ।** तृणैः शूल्यते, घ्यण्, तृणशूल्यं । **धनञ्जयो नागभेदे ककुभे देहमारुते । पार्थेऽग्नौ ।** धनं जयति धनञ्जयः । "भृवृजीति खः" (५-१-११२) । नागभेदः सर्प्पभेदः । ककुभोऽर्जुनतरुः ॥ २२४ ॥ पार्थे यथा—आदित्यमिव दुष्प्रेक्ष्यं, समुद्रमिव दुस्तरम् वेदार्थमिव दुर्बोधं पश्य कर्ण धनञ्जयम् ॥ अग्नौ यथा—दीप्तो धनञ्जय इवाश्रु ददाह मोहं । **निरामयस्तु स्यादिडिक्के गतामये ।** निर्गत आमयोऽस्य निरामयः । इडिक्कः शिशुवाहकः । गतामये वाच्यलिङ्गः । तत्र यथा—सर्व्वे सन्तु निरामयाः । **प्रतिभयं भये भीष्मे ।** प्रति भीतिः, प्रति भयं, प्रतिगतं भयेन वा । भये यथा—प्रतिभयचलितांगसन्धिबन्धः । भीष्मे भयङ्करे वाच्यलिङ्गः । तत्र यथा—भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववाशिरे । **प्रतिश्रियः सभौकसोः ।** प्रति श्रीयते प्रतिश्रयः । द्वयोर्यथा—दिव्यं प्रतिश्रयमवाप्यगुणप्रकाशं सम्प्राप्तवान्ननु गुणोक्तिविशारदः सः ॥ २२५ ॥ **परिधायः परिकरे जलस्थाननितम्बयोः ।** परिधीयते परिधायः । घञ् परिकरः परिच्छदः । **पाञ्चजन्यः पोटगले शंखे दामोदरस्य च ।** पंचजने पाताले भवः । पाञ्चजन्यः । "गम्भीरपञ्चजनि बहिर्देवादितिञ्यः (६-३-१३५) । पोटगलः

पौरुषेयं पुरुषेण कृतेऽस्य च हिते वधे ।
समूहे च विकारे च, फलोदयो द्युलाभयोः ॥ २२७ ॥

बिलेशयो मूषिकेऽहौ, भागधेयः पुनः करे ।
दायादे भागधेयन्तु, भाग्ये महालयः पुनः ॥ २२८ ॥

तीर्थे विहारपरमात्मनोर्महोदयं पुरे ।
महोदयः स्वाम्यमुक्त्योर्महामूल्यं महार्घके ॥ २२९ ॥

काशः । दामोदरशंखे यथा—मन्दानिलापूरकृतं दधानो निध्वानमश्रूयत पांचजन्यः । २२६ ॥ **पौरुषेयं पुरुषेण कृतेऽस्य च हिते वधे । समूहे च विकारे च** । "पुरुषात् कृतहितवधविकारे चैयञित्येयञि (६।२।२९) । पौरुषेयं समूहे क्लीबे शेषेषु वाच्यलिङ्गः । कृते यथा अपौरुषेयं वचनमसम्भवि(वति) । हिते यथा—यत्पौरुषेयं वचनं तदेव । वधे यथा - योऽपौरुषेयेण वधेन नाशं नीतो न शोच्यः सुहृदा स बन्धुः । समूहे यथा—एकाकिनोऽपि परितः पौरुषेयवृता इव । विकारे यथा—पौरुषेया सृजालि पूः । **फलोदयो द्युलाभयोः** । फलस्योदयो यस्मात् फलस्योदय इति फलोदयः । दिवि स्वर्गे, लाभे प्राप्तौ च यथा—फलोदयो निष्फल एव तस्य ॥ २२७ ॥ **बिलेशयो मूषिकेऽहौ** । बिले शेते बिलेशयः । "आधारादित्यः" ५।१।१३७ । शयवासीत्यलुप् ।३।२।२५। **भागधेयः पुनः करे । दायादे** । भाग एव भागधेयः, नामरूपभागाद्धेयः । भागैर्धीयते वा, य एच्चातः । करे राजग्राह्यो भागः । तत्र स्त्रीपुंसः । तत्र यथा—शक्तिः कल्पितभागधेयहरणे राज्ञो न संरक्षणे । भा(भो)गेऽपि यथा-कालोपपन्नातिथिभागधेयं, वन्यं शरीरस्थितिसाधनं वः । **भागधेयं तु भाग्ये** । यथा—भागधेयपरिपाकहेतुकः, प्राप्यते हि सुखदुःखसङ्गमः । **महालयः(यं) पुनः तीर्थे विहारपरमात्मनोः** । महान् आलयो महालयः ॥२२८॥ **महोदयं पुरे** । महान् उदयो यत्र महोदयं, स्त्रीक्लीबः । पुरं कन्यकुब्जं । **महोदयः स्वाम्यमुक्त्योः** । द्वयोर्यथा—स्पृहयति सदयो महोदयाय । **महामूल्यं महार्घके** ।

पद्मरागमणौ. मार्जालीयः शूद्रबिडालयोः ।
शरीरशोधने रौहिणेयो वत्से बुधे बले ॥ २३० ॥

समुच्छ्रयो वैरोन्नत्योः, समुदाये गणे रणे ।
समुदयस्तूद्गमेऽपि, सम्परायस्तु संयुगे ॥ २३१ ॥

पद्मरागमणौ । महान् मूल्यमस्य महामूल्यं, महार्घके वाच्यलिङ्गः । तत्र यथा-महामूल्यानि वासांसि ॥२२९॥ **मार्जालीयः शूद्रबिडालयोः । शरीरशोधने** मार्ष्टि मार्जालीयः । मृजेर्णालीयः । **रौहिणेयो वत्से बुधे बले** । रोहिण्या अपत्यं रौहिणेयः । वत्से, चतुष्पाद्भ्य एयञ् ।६।१।८३ । बुधे । ङ्याप्त्यूङः इत्येयण् ।६।१।७० । बलभद्रमातृवाचका तु मानुषीनामाणपवादः, शुभ्रादेयण् ।६।१।७३ । बुधे यथा—रौहिणेयसहिताः शुभग्रहाः । बले बलभद्रे यथा—यां रेवतीजानिरियेष हातुं, न रौहिणेयो न च रोहिणीशः ॥२३०॥ **समुच्छ्रयो वैरोन्नत्योः** । समुच्छ्रयणं समुच्छ्रयः । वैरे यथा स्फुर्जत्समुच्छ्रयशताकुलिता न जातु संचिन्तयन्ति कुशलं मम वैरिणोऽमी । उन्नतौ यथा—सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । **समुदायो गणे रणे** । समुद्यन्तेऽत्र समुदायनं वा समुदायः । गणे यथा—बहूनामप्यसाराणां समुदायो हि दुर्जयः । रणे यथा—सह मित्रकुलेन भूपतिः समुदायं तव संप्रतीक्षते । **समुदयस्तूद्गमेऽपि** । समुदयनं समुदयः । अपि शब्दाद्गणे रणेऽपि । उद्गमे यथा—ज्योतिषां समुदये समाहितः । गणे यथा—न हि भीरुगतं निवर्त्तते समुदयमात्रमिदं कलेवरम् । रणे यथा—समुदयोदयभाजि धराधिपे त्वयि विभो भजति श्रियमुन्नतिः । **सम्परायस्तु संयुगे । आपद्युत्तरकाले च** । सम्परायन्ति अत्र भटा इति सम्यग् परैरय्यते वा सम्परायः । संयुगे पुंक्लीबः । तत्र यथा - कुर्व्वाणानां सम्परायान्तरायं भूरेणूनां मृत्युनामार्जनाय ॥ २३१ ॥ उत्तरकाले यथा—नृपतेः कर्म्म कर्त्तव्यं सर्व्वदा साम्परायिकम् । **स्यात्समाह्वयः आहवे । पशुभिः पक्षिभिर्द्यूते** । संघर्षणाह्वयन्तेऽत्र समाह्वयः । 'ह्वसमाह्वयेति साधुः' (५-३-४१) । आहवे

आपद्युत्तरकाले च, स्यात्समाह्वय आहवे ।
पशुभिः पक्षिभिर्द्यूते, स्थूलोच्चयो वरण्डके ॥ २३२ ॥
गजानां मध्यमगते, गण्डाश्माकात्स्न्र्ययोरपि ।
हिरण्मयो लोकधातौ, सौवर्णेऽभिमरो वधे ॥ २३३ ॥
स्वबलात् साध्वसे युद्धेऽवसरो वत्सरे क्षणे ।
अरुष्करं व्रणकरे भल्लातकफलेऽपि च ॥ २३४ ॥

यथा—तुमुलो बभूव समाह्वयोस्तयोः । पशुभिः पक्षिभिर्द्यूते यथा—धिक् तं येन समाह्वयेषु निधनं, नीता निजश्रीर्बलात् । **स्थूलोच्चयो वरण्डके । गजानां मध्यमगते, गण्डाश्माकात्स्न्र्ययोरपि (कात्स्न्र्ययोरपि)** । उच्चीयते उच्चयः, स्थूल उच्चयः स्थूलोच्चयः ॥२३२॥ गजानां मध्यमगते यथा-स्थूलोच्चये नाग-मदंतिकागतां गजोऽग्रजाताग्रकरः करेणुकाम । अकात्स्न्र्ये यथा—निर्णीतमाता-दवगत्य किञ्चित् स्थूलोच्चयेनेदमियत्प्रमेयम् । **हिरण्मयो लोकधातौ सौवर्णे ।** हिरण्यस्य विकारो हिरण्मयः । "अभक्ष्याच्छादन इति मयट्" ६।२।४६। "सारवैक्ष्वाकेति साधुः" ७।४।३०। लोकधातुर्मेरोरुत्तरेण क्षेत्रविशेषः । सुवर्णस्य विकारः सौवर्णस्तत्र वाच्यलिङ्गस्तत्र यथा—हिरण्मयोर्वीरुहवल्लितन्तुभिः । **अथ रान्ताः । अभिमरो वधे । स्वबलात्साध्वसे युद्धे ।** 'मृशहिंसायाम्' । अभिमरणं अभिमरः, अल्, अभिम्रियन्तेऽस्मिन् वा घः ॥ २३३ ॥ स्वबलात् स्वसैन्यात् । साध्वसे युद्धे च यथा—अभिमरसमये निजप्रतापो भवति नृपस्य जयाय हेतु रेकः । **अवसरो वत्सरे क्षणे ।** अवसरन्त्यत्र अवसरः । क्षणे यथा—शशंस सेवावसरं सुरेभ्यः । **अरुष्करं व्रणकरे भल्लातकफलेऽपि च ।** अरुः करोति अरुष्करं । संख्याहर्दि वा टः ५।१।१०२ । समासेऽसमस्तस्येति षत्वम् । २।३।१३ । व्रणकरे वाच्यलिङ्गः । तत्र यथा—गाढारुष्करदीर्घदुःखपटलीलीनं मनो मामकं, त्वं चेतसंश्रयसे न रक्षसि च तत्तेनात्र नः कौतुकम् ॥ २३४ ॥ **अश्वतरो नागभेदे वेसरे ।** अश्व इव तरति अश्वतरः, ह्रसितो वा अश्वोऽश्व-

अश्वतरो नागभेदे, वेसरेऽनुत्तरः पुनः ।
निरुत्तरे च श्रेष्ठे चावस्करो गूथगुह्ययोः ॥ २३५ ॥
अभिहारः सन्नहने, चौरिकोद्यमयोरपि ।
अवहारस्तु युद्धादिविश्रान्तौ ग्राहचोरयोः ॥ २३६ ॥
निमन्त्रणोपनेतव्येऽलङ्कारः कङ्कणादिषु ।
उपमादावकूपारः, कूर्मराजसमुद्रयोः ॥ २३७ ॥

तरः । "वत्सोक्षेति तरट्" ७।३।५१ । अश्वं तरति वा, लिहाद्यच् ।५।१।५०। नागभेदः, सर्पभेदः । वेसरे यथा—दुर्वचनमनभिजाताः सुजनं प्रत्युत्सृजन्त्यु-पेत्यापि, अश्वतरास्तीर्थाम्भसि दूरादागत्य मेहन्ति । **अनुत्तरः पुनः, निरुत्तरे च श्रेष्ठे च ।** नास्त्युत्तरमस्य अनुत्तरः, वाच्यलिङ्गः । निरुत्तरे यथा—अनुत्तरं सोऽपि चकार दूतम् । श्रेष्ठे यथा—अनुत्तरं मन्दिरमुत्तरन्ती । **अवस्करो गूथ-गुह्ययोः ।** अवकीर्यते अवस्करः । वर्चस्कादिष्ववस्कारादय इति साधुः । गुह्यं स्त्र्यादिव्यंजनम् । द्वयोर्यथा—धिक् तानवस्करनिमग्नतनून् कृमीणां, साम्यं भज-न्ति सततावधमवृत्तयो ये ॥ २३५ ॥ **अभिहारः सन्नहने चौरिकोद्यमयो-रपि ।** अभिहरणं अभिहारः । सन्नहने यथा—भवशत्रुपराजयाय धीरैरभिहारः प्रकटीक्रियेत यः । चौरिकायां यथा—रात्रौ ताः सुरताभिहारचतुरा गच्छन्ति पत्युर्गृहात् । उद्यमे यथा—ते मोक्षमार्गपरिमर्शकृताभिहाराः । **अवहारस्तु युद्धा-दिविश्रान्तौ ग्राहचौरयोः । निमन्त्रणोपनेतव्ये ।** अवह्रियते अवहारः, ग्राह-चौरयोस्त्ववहरतीति अवहारः । अवहृसा संस्रोरिति णः ।५।१।६३। युद्धादि-विश्रान्तौ यथा-युद्धावहारकरणप्रवणोऽपि वीरः । आदिशब्दाद्द्यूतादिविश्रान्तावपि ॥२३६॥ निमन्त्रणोपनेतव्यं शर्करादिस्वादूकृतं भक्ष्यम्, तत्र यथा—एतस्मिन् विषयावहारविषमे संसारवारांनिधौ । **अलङ्कारः कङ्कणादिषु, उपमादौ ।** अलं-क्रियते अनेन अलङ्कारः । "बाहुलकाद्घञ्" । द्वयोर्यथा—श्लेषालङ्कारभाजोऽपि रसानिष्पंदककर्कशाः । दुर्भगा इव कामिन्यः प्रीणन्ति न मनो गिरः ॥

अवतारस्तु नद्यादितीर्थेऽवतरणेऽपि च ।
अग्निहोत्रेऽनले हव्येऽसिपत्रो नरकान्तरे ॥ २३८ ॥

कोशकारेऽर्द्धचन्द्रस्तु गलहस्तेन्दुखण्डयोः ।
चन्द्रके बाणभेदे चार्द्धचन्द्रा त्रिवृताभिदि ॥ २३९ ॥

अकूपारः कूर्म्मराजसमुद्रयोः । न कुं पिपर्त्ति अकूपारः, बाहुलकाद्दीर्घः । न कूपमियर्त्ति वा । समुद्रे यथा—तूर्यं युगक्षयक्षुभ्यदकूपारानुकारिणी ॥२३७॥ **अवतारस्तु नद्यादितीर्थेऽवतरणेऽपि च** । अवतरत्यनेन अवतारः । अवात् तॄस्तॄभ्यामिति घञ् । अवतरणं वा भावेऽपि मतांतरेण घञ् । नद्यादितीर्थे यथा—रुद्धे गजेन सरितः स रुषावतारे रिक्तोदपात्रकरमास्त चिरं जनौघः । अवतरणे यथा—सा तीरसोपानपथावतारादन्योन्यकेयूरविघट्टनीभिः । **अग्निहोत्रोऽनले हव्ये** । हूयते होत्रः हूयामेति त्रः । अग्निश्चासौ होत्रश्च, अग्नौ होत्र इति वा । द्वयोर्यथा—अग्निहोत्रफला वेदाः । **असिपत्रो नरकान्तरे । कोशकारे** । असिरूपाणि पत्राण्यत्र असिपत्रः । नरकान्तरे यथा—निर्वाणसिद्धिरसिकाः सुधियस्त्यजन्ति । राज्यं विसर्प्पदसिपत्रवनं क्रमेण ॥ २३८ ॥ **कोशकार इक्षुभेदः । अर्द्धचन्द्रस्तु गलहस्तेन्दुखण्डयोः चन्द्रके बाणभेदे च** । अर्द्धचन्द्रस्य अर्द्धचन्द्रः जु(क्षु)रत्यादिभिरिति समासः । गलहस्तेन्दुखण्डयोर्यथा—इत्थं सर्व्वं भवदनुगामादीश्वरत्वं मयात्तमवापि त्वं मम नरपते नार्द्धचन्द्रं ददासि । चन्द्रको मेचकः । बाणभेदे यथा—उत्प्लुत्यारार्द्धचन्द्रावछन्ने । **नखक्षतविशेषेऽपि** । यथा—योऽर्द्धचन्द्रसदृशाकृतिवक्रः सोऽर्द्धचन्द्र इति नाम नखांकः । दीयते मदनशास्त्रविदग्धैः कण्ठदेशकुचकुम्भयुगेषु ॥

अर्द्धचन्द्रा त्रिवृताभिदि । अर्द्धचन्द्राकारपत्रयुक्तत्वादर्द्धचन्द्रा । त्रिवृताभिदोषधिभेदः ॥ २३९ ॥ **आत्मवीरो बलवति श्यालपुत्रे विदूषके** । आत्मना वीरः आत्मवीरः । **आडम्बरस्तु संरम्भे बृंहिते तूर्यनिस्वने** । आदम्यते

आत्मवीरो बलवति श्यालपुत्रे विदूषके ।
आडम्बरस्तु संरम्भे, बृंहिते तूर्यनिस्वने ॥ २४० ॥

इन्दीवरं नीलोत्पलमिन्दीवरा शतावरो ।
उपकारस्तूपकृतौ, विकीर्णकुसुमादिषु ॥ २४१ ॥

उपचारस्तु लञ्चायां, व्यवहारोपचर्ययोः ।
उदुम्बरः कुष्ठभेदे, देहल्यां पण्डके तरौ ॥ २४२ ॥

उदुम्बरं ताम्र, उपह्वरं रहसि सन्निधौ ।
उद्दन्तुरः कराले स्यादुत्तुङ्गोत्कटदन्तयोः ॥ २४३ ॥

आडम्बरः, "जठरेति साधु." । पुंक्लीबः । संरम्भे यथा—यदपि च प्रोद्दामसौदामनीदामाडम्बरमम्बरे विरचितम् । बृंहितं गजगर्जितम् । तत्र तूर्यनिस्वने च यथा—साडम्बरा समरभूर्भयदायिनी सा ॥२४०॥ इ(ई)**न्दीवरं नीलोत्पलम्** । इन्दति श्रिया इन्दीवरम् । 'तीवरेति साधुः' यथा—नीलेन्दीवरशङ्कया नयनयोः । **इन्दीवरा शतावरी** । शतावरी ओषधीभेदः, इन्दीवरीत्यमरः । **उपकारस्तूपकृतौ, विकीर्णकुसुमादिषु** । उपक्रियते उपकारः । उपकृतौ यथा—परोपकारः पुण्याय, पापाय परपडनीम् । विकीर्णकुसुमादिषु यथा—तस्योपकार्या रचितोपकारा ॥ २४१ ॥ **उपचारस्तु लञ्चायां, व्यवहारोपचर्ययोः** । उपचर्यते उपचारः । लञ्चायां यथा—उपचारगृहीतेन शत्रुणा शत्रुमुद्धरेत् । व्यवहारे यथा—तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्लवनेत्रया नृपः । उपचर्यायां यथा—सोपचारसुपशान्तविचारं सानुतर्षमनुतर्षपदेन । आरोपेऽपि यथा—उपचारपदं न चेदिदं त्वमनभरङ्गः कथमक्षत्ता रतिः । **उदुम्बरः कुष्ठभेदे, देहल्यां पण्डके तरौ** । उनत्ति उदुम्बरः । तीवरेति साधुः (उ. ४४४) । देहल्यां द्वाराधोदारुणि यथा—द्वारोदुम्बरलग्नमूर्तिभिरिदं धूर्त्तैर्गृहं गम्यते । पण्डकः क्लीबः । तरौ यथा—शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥२४२॥ **उदुम्बरं ताम्रे** । ताम्रं शुल्वम् । **उपह्वरं रहसि सन्निधौ** । उपह्वरति उपह्वरं ।

औदुम्बरो यमे रोगभेदे कर्म्मकरोऽन्तके ।
भृतिजीविनि भृत्ये च, कर्म्मकरी तु बिम्बिका ॥ २४४ ॥
मूर्व्वा च कर्णिकारस्तु, कृतमाले द्रुमोत्पले ।
करवीरो हयमारे, कृपाणे दैत्यभिद्यपि ॥ २४५ ॥
करवीरी तु पुत्रवत्यां, सद्गव्यामदितावपि ।
कलिकारस्तु धूम्याटे, पीतमुण्डकरञ्जयोः ॥ २४६ ॥
कर्णपूरः स्याच्छिरीषे, नीलोत्पलावतन्सयोः ।
कटम्भरा प्रसारण्यां, गोलायां गजयोषिति ॥ २४७ ॥

पुंक्लीबः । रहसि यथा–उपह्वरे गिरीणां च, नदीनां सङ्गमे तथा । सन्निधौ यथा –उपह्वरे पुण्यतमेंशुमत्याः । **उद्दन्तुरः कराले स्यादुत्तुङ्गोत्कटदन्तयोः ।** उत्कृष्टो दन्तुरः उद्दन्तुरः, वाच्यलिङ्गः । उत्तुङ्ग उन्नतः । उत्कटदन्त उत्कटदशनः ॥ २४३ ॥ **औदुम्बरो यमे रोगभेदे ।** उदुम्बरस्यायमौदुम्बरः । यमः कृतान्तः । **कर्म्मकरोऽन्तके । भृतिजीविनि भृत्ये च ।** कर्म्म करोति कर्म्मकरः । भृतौ कर्म्मणः इति टः । (५-१-१०४) अन्तको यमः भृतिजीवी भाटकजीवी । भृत्यः पदातिः । अनयोर्वाच्यलिङ्गः, तयोर्यथा–यस्तवेह सवनेन भूपतिः कर्म्म कर्म्मकरवत् करिष्यति । **कर्म्मकरी तु बिम्बिका मूर्व्वा च ।** बिम्बिका तुण्डिका मूर्व्वा ज्याहेतुस्तृणविशेषः ॥ २४४ ॥ **कर्णिकारस्तु । कृतमाले द्रुमोत्पले** कर्णिकामियर्त्ति कर्णिकारः । कृतमालद्रुमोत्पलौ वृक्षौ । द्वयोर्यथा–वर्णप्रकर्षे सति कर्णिकारं । **करवीरो हयमारे कृपाणे दैत्यभिद्यपि।** किरति करवीरः । जर्म्बीरेति साधुः ॥ (उ. ४२२) ॥ हयमारे यथा–पूजां विधाय विभवे करवीर-पुष्पैः । श्मशानेऽपि यथा –वीरास्ते करवीरवीरवर्त्मनि सदा भ्राम्यन्ति मत्ता इव ॥ २४५ ॥ **करवीरी तु पुत्रवत्यां सद्गव्यामदितावपि ।** करे वीरो अस्याः करवीरी । गौरादित्वाद्ङीः । **कलिकारस्तु धूम्याटे पीतमुण्डकरञ्जयोः ।** कलिं करोति कलिकारः । धूम्याटपीतमुण्डौ जीवविशेषौ । करञ्जो वृक्षः ॥

कलम्बिकायां रोहिण्यां, वर्षाभूमूर्वयोरपि ।
कालञ्जरो भैरवाद्रयोर्योगिचक्रस्य मेलके ॥ २४८ ॥
कादम्बरं दधिसारे, सीधुमद्यप्रभेदयोः ।
कादम्बरी कोकिलायां, वाणीशारिकयोरपि ॥ २४९ ॥
कुम्भकारः कुलाले स्यात्, कुम्भकारी कुलत्थिका ।
कृष्णसारः शिशपायां, मृगभेदे स्नुहितरौ ॥ २५० ॥

२४६ ॥ **कर्णपूरः स्याच्छिरीषे नीलोत्पलावतंसयोः ।** कर्णौ पूरयति कर्णपूरः । शिरीषे पुंसि । शेषयोः पुंक्लीबः । अवतंसे(वसन्ते) यथा आनन्दाय दृशः पुरो न विहितो नो कर्णपूरीकृतः । **कटम्भरा प्रसारण्यां, गोलायां गजयोषिति ॥ कलम्बिकायां रोहिण्यां, वर्षाभूमूर्वयोरपि ।** कटं बिभर्त्ति कटम्भरा । भृवृजीति खः । (५-१-११२) । गोला गोदावरी । गज-योषित्करेणुका । शेषा ओषधयः ॥ २४७ ॥ **कालञ्जरो भैरवाद्रयोर्योगि-चक्रस्य मेलके ।** कालेन जीर्यति कालञ्जरः, पृषोदरादित्वात् । भैरवस्तीर्थविशेषः । अद्रौ यथा–मृगाः कालञ्जरे गिरौ ॥ २४८ ॥ **कादम्बरं दधिसारे सीधुमद्य-प्रभेदयोः ।** कुत्सिताम्बरस्य नीलवासस इदं कादम्बरं, क्लीक्लीबः । दधिसारो दध्यग्रम् । सीधुमद्यप्रभेदयोर्यथा–पापाः कादम्बरीपानविवसीकृतचेतसः जननीं हा प्रियीयन्ति जननीयन्ति च प्रियाम् । **कादम्बरी कोकिलायां, वाणीशारि-कयोरपि ।** कादम्बवद्राजते कादम्बरी, क्वचिदिति ङे । गौरादित्वाङ्ङीः ॥२४९॥ **कुम्भकारः कुलाले स्यात् ।** कुम्भं करोति कुम्भकारः । **कुम्भकारी कुलत्थिका ।** कुलत्थिका चक्षुषानामौषधम् । **कृष्णसारः शिशपायां, मृगभेदे स्नुहितरौ ।** कृष्णश्चासौ सारश्च कृष्णसारः । मृगभेदे यथा–शृङ्गेण संस्पर्शन(संस्पर्शनि)-मीलिताक्षीं मृगीमकण्डूयत कृष्णसारः । शबलेपि यथा–पक्ष्मोत्क्षेपादुपरि विलस-त्कृष्णसारप्रभाणां ॥ २५० ॥ **गिरिसारः पुनर्लोहे, लिङ्गे मलयपर्वते ।** गिरेर्गिरिषु वा सारो गिरिसारः । लिङ्गे शिवलिङ्गभेदे । लोहे क्लीबे इति लिङ्ग-

गिरिसारः पुनर्लोहे, लिङ्गे मलयपर्वते ।
घनसारस्तु कर्पूरे, दक्षिणावर्त्तपारदे ॥ २५१ ॥
चर्मकारः पादूकृति, चर्म्मकार्यौषधीभिदि ।
चक्रधरो विष्णुसर्प्पचक्रिषु ग्रामजालिनि ॥ २५२ ॥
चराचरं जङ्गमे स्यादिङ्गविष्टपयोरपि ।
चित्राटीरो घण्टाकर्णबलिच्छागास्रबिन्दुभिः ॥ २५३ ॥
अङ्कितभाले चन्द्रे च, तालपत्रन्तु कुण्डले ।

विदः । **घनसारस्तु कर्पूरे, दक्षिणावर्त्तपारदे** । घनः सारो अस्य घनसारः । कर्पूरे यथा— न रङ्गे चातुर्यं तिरयसि न दत्तस्थपुटतां, महार्घं स्वं तस्मात् किमिति घनसारं प्रथयसि । रदावधस्तेनैर्विभवलवलभ्यैरपि, यतो दलैस्ताम्बूलीनामवनिवलयं रञ्जितमिदम् ॥ २५१ ॥ **चर्मकारः पादूकृति** । चर्म्म करोति चर्म्मकारः । पादूकृत् उपानत्कृत्, तत्र यथा—चर्म्माणि शर्मकारीणि, चर्म्मकारो विनिर्ममे । **चर्म्मकार्यौषधीभिदि** । अणन्तत्वाड्डीः । **चक्रधरो विष्णुसर्प्पचक्रिषु ग्रामजालिनि** । चक्रं धरति चक्रधरः, आयुधादिभ्यो धृगोऽदण्डादेरित्यच् । (५-१-९४) । चक्री कुलालो ग्रांबिकश्चक्रवर्ती वा । ग्रामजाली ग्रामवृन्दभर्त्ता, तत्र वाच्यलिङ्गः । विष्णौ यथा-चक्रधर इति रथाङ्गमदः सत्वं बिभर्षि भुवनेषु रूढये ॥ २५२ ॥ **चराचरं जङ्गमे स्यादिङ्गविष्टपयोरपि** । चरति चराचरं । चराचरेति साधुः, (४-१-१३) इङ्गमद्भुतं, तत्र जङ्गमे च वाच्यलिङ्गः । जङ्गमे यथा—उच्चकैश्च सचराचरकीर्त्तिः । विष्टपे यथा—जयेन कश्चिद्विरमेदयं रणात् भवेदपि स्वस्ति चराचराय वा । **चित्राटीरो घण्टाकर्णबलिच्छागास्रबिन्दुभिः । अङ्कितभाले चन्द्रे च** । चित्रं चित्रां वाऽटति चित्राटीरः । जम्बीराभीरेति साधुः । (उ. ४२२) । घण्टाकर्णो यक्षस्तस्य बलिनिमित्तं यो हतच्छागस्तस्यास्रं रक्तं तस्य बिन्दवस्तैरङ्कितं भालं येन तस्मिन्नित्यर्थः ॥२५३॥ **तालपत्रन्तु कुण्डले** । तालस्य पत्रं पत्रमिव वा तालपत्रं । यथा—श्रवण-

स्यात्तालपत्री रण्डायां, तुङ्गभद्रो मदोत्कटे ॥ २५४ ॥
तुङ्गभद्रा नदीभेदे तुलाधारस्तुलागुणे ।
वाणिजे तुण्डिकेरी तु कर्प्पासो बिम्बिकापि च ॥ २५५ ॥
तोयधारो जलधरे सुनिषण्णाख्यभेषजे ।
दशपुरं पत्तने स्यान्मुस्तायां नीवृदन्तरे ॥ २५६ ॥
दण्डधरो यमे राज्ञि दण्डयात्रा तु दिग्गजे ।
संयाने वरयात्रायां दिगम्बरस्तु शङ्करे ॥ २५७ ॥
अन्धकारे क्षपणके स्याद्वस्त्ररहितेऽपि च ।
दुरोदरः पुनर्द्यूते द्यूतकारे पणेऽपि च ॥ २५८ ॥

युगलदोलां दोलिते तालपत्रे । **स्यात्तालपत्री रण्डायां** । ताड्यते तालपत्री, खुरक्षुरेति साधुः । गौरादित्वाङ्डीः । रण्डा विधवा स्त्री । **तुङ्गभद्रो मदोत्कटे** । तुङ्गश्चासौ भद्रश्च तुङ्गभद्रः । मदोत्कटो मदकलः ॥ २५४ ॥ **तुङ्गभद्रा नदीभेदे** । तुङ्गं भद्रं यस्यां तुङ्गभद्रा । **तुलाधारस्तुलागुणे, वाणिजे** । तुलां धरति तुलाधारः, तुलाया गुणो रज्जुः । **तुण्डिकेरी तु, कर्प्पासो, बिम्बिकापि च** ॥ तुण्ड्यते तुण्डिकेरी, जातेरादय इति साधुः । कर्प्पासी वमनी, बिम्बिका लताभेदः ॥ २५५ ॥ **तोयधारो जलधरे सुनिषण्णाख्यभेषजे** । तोयं धरति तोयधारः । **दशपुरं पत्तने स्यान्मुस्तायां नीवृदन्तरे** । दशानां पुरं दशपुरं, दश्यते वा । खुरक्षुरेति साधुः । नीवृदन्तरं देशविशेषः । तत्र पत्तने च यथा—पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानां ॥२५६॥ **दण्डधरो यमे राज्ञि** । दण्डं धरति दण्डधरः । **दण्डयात्रा तु दिग्गजे । संयाने वरयात्रायाम्** । दण्डाय दण्डाकारा वा यात्रा दण्डयात्रा । समुदितायां यानं संयानम् । **दिगम्बरस्तु शंकरे अन्धकारे क्षपणके स्याद्वस्त्ररहितेऽपि च** । दिगेवाम्बरमस्य दिगम्बरः । वस्त्ररहिते वाच्यलिङ्गः । तत्र शङ्करे च यथा-दिगम्बरो वहति कपालभूषणं ॥ २५७ ॥ **दुरोदरः पुनर्द्यूते द्यूतकारे पणेऽपि च** । दुष्टमासमन्तादुदरं यत्र दुरोदरः । पणो द्यूतजेयं, द्यूतपणयोः पुंक्लीबः ।

देहयात्रा यमपुरीगमने भोजनेऽपि च ।
द्वैमातुरो जरासन्धे हेरम्बेऽथ धराधरः ॥ २५९ ॥
कृष्णेऽद्रौ धाराधरस्तु पयोदकरवालयोः ।
धाराङ्कुरः शीकरे स्यान्नासीरे जलदोपले ॥ २६० ॥
धार्त्तराष्ट्रः कौरवेऽहौ कृष्णास्यांघ्रिसितच्छदे ।
धुन्धुमारो गृहधूमे नृपभेदेन्द्रगोपयोः ॥ २६१ ॥
पदालिकेऽप्यथ धुरन्धरो धुर्ये धवद्रुमे ।
धृतराष्ट्रः खगे सर्प्पे सुराज्ञि क्षत्रियान्तरे ॥ २६२ ॥

द्यूतकारे पुंसि । त्रिष्वपि यथा—दुरोदरच्छद्मजितां समीहते, नयेन जेतुं जगतीं सुयोधनः ॥ २५८ ॥ **देहयात्रा यमपुरी-गमने भोजनेऽपि च ।** देहस्य यात्रा देहयात्रा । **द्वैमातुरो जरासन्धे, हेरम्बे ।** द्वयोर्मात्रोरपत्यं द्वैमातुरः । संख्यासंभद्रान्मातुर्मातुर्चेत्यण् (७-१-६६) । जरासन्धे यथा—हते हिडम्बरिपुणा राज्ञि द्वैमातुरे युधि । **अथ धराधरः कृष्णेऽद्रौ ।** धरां धरति धराधरः ॥२५९॥ कृष्णे यथा—दधतौ भुवनान्यन्तर्विलीनौ हलिवत्सलौ । आकाराद्केवलं भिन्नौ धाराधरधराधरौ । अद्रौ यथा—धराधरेन्द्रं व्रततीततीरिव । **धाराधरस्तु पयोद-करवालयोः ।** धारां धरति धाराधरः । पयोदे यथा—धाराधरं वर्षति । **धाराङ्-कुरः शीकरे स्यान्नासीरे जलदोपले ।** धाराया अङ्कुरो धाराङ्कुरः । वातास्तं वारिशीकरः । नासरीमग्रयानं, जलदोपलः करकः ॥.२६०.॥ **धार्त्तराष्ट्रः कौरवेऽहौ, कृष्णास्यांघ्रिसितच्छदे ।** धृतराष्ट्रस्यापत्यं धार्त्तराष्ट्रः, धृतराष्ट्र एव वा । स्वार्थेऽण् । कौरवकृष्णास्यांघ्रिसितच्छदयोर्यथा—निपतन्ति धार्त्तराष्ट्राः कालवशान् मेदिनीपृष्टे । **धुन्धुमारो गृहधूमे, नृपभेदेन्द्रगोपयोः । पदालि-केऽपि ।** धुन्धुमसुरं मारयति धुन्धुमारः । धूयते वा । द्वारश्रङ्गारेति साधुः । (उ. ४११) ॥ पदालिकमोषधिभेदः । नृपभेदे यथा—मान्धाता धुन्धुमारश्च ॥ २६१ ॥ **अथ धुरन्धरो धुर्ये धवद्रुमे ।** धुरां धारयति धुरन्धरः, धारेर्धश्चेति

धृतराष्ट्री हंसपद्यां नभश्चरः खगेऽम्बुदे ।
विद्याधरे समीरे च निशाचरस्तु राक्षसे ॥ २६३ ॥
सर्प्पे घूके मृगाले च निशाचरी तु पांसुला ।
निषद्वरः समरे पङ्के निषद्वरी पुनर्निशि ॥ २६४ ॥
नीलाम्बरो बलभद्रे राक्षसे क्रूरलोचने ।
प्रतीहारो द्वारि द्वास्थे प्रतिकारः समे भटे ॥ २६५ ॥

खः । (५।१।११३) धुर्ये वाच्यलिङ्गः । तत्र यथा—गजानां पङ्कमग्नानां गजा एव धुरन्धराः । **धृतराष्ट्रः खगे सर्प्पे सुराज्ञि क्षत्रियान्तरे ।** धृतं राष्ट्रं येन धृतराष्ट्रः । धृतः सन् राजते वा । त्रडिति त्रट् । (उ. ४४६) । क्षत्रियान्तरे यथा-धृतराष्ट्रसुतेन सुत्यजाश्चिरमासाद्य नरेन्द्रसम्पदः ॥ २६२ ॥ **धृतराष्ट्री हंस-पद्यां ।** धृतं राष्ट्रं यया धृतराष्ट्री । हंसपदी ओषधिः । **नभश्चरः खगेऽम्बुदे । विद्याधरे समीरे च ।** नभसि चरति नभश्चरः । "चरेष्ट" इति टः ।(५।१। १३८) । विद्याधरे यथा—नभश्चरैस्तत्पदवी विवव्रे । **निशाचरस्तु राक्षसे । सर्प्पे घूके मृगाले च ।** निशायां चरति निशाचरः । "चरेष्ट" इति टः (५।१।१३८) राक्षसे यथा—तस्मै निशाचरैश्वर्यं प्रतिजज्ञे रघूद्वहः ॥ २६३ ॥ **निशाचरी तु पांसुला ।** पांसुला स्वैरिणी, तत्र यथा—राममन्मथशरेण ताडिता, दुःसहेन हृदये निशाचरी । **निषद्वरः समरे पङ्के ।** निषीदति निषादत्यस्मिन् वा निषद्वरः । कृ गृ शृ दृ वृग्-वरट् (उ. ४४१) क्रूरलोचने वाच्यलिङ्गः । **निषद्वरी पुनर्निशि ।** टित्वान्ङीः ॥ २६४ ॥ **नीलाम्बरो बलभद्रे राक्षसे क्रूरलोचने ।** नील-मम्बरमस्य नीलाम्बरः । बलभद्रे यथा—आकृष्य कुम्भिशिरसो मुशलप्रहारैर्नीला-म्बरेण सरुषा कृतनामशेषः । **प्रतीहारो द्वारि द्वास्थे ।** प्रति ह्रियते प्रतिहारः प्रतीहारः । घञ्युपर्गस्येति वा दीर्घः (३।२।८६)। द्वास्थे यथा-जनसंमृत्सहो दक्षः प्रतीहारः स उच्यते । प्रतिहारोऽपि द्वयोर्यथा—भविष्यतः पत्युरुमा च शम्भोः, समाससाद प्रतिहारभूमिम् । **प्रतिकारः समे भटे ।** प्रतिक्रियते प्रतिकारः,

प्रतिसरश्चमूपृष्ठे नियोज्यकरसूत्रयोः ।
मन्त्रभेदे व्रणशुद्धावारक्षे मण्डने स्रजि ॥ २६६ ॥
कङ्कणेऽथ परिकरः पर्यङ्कपरिवारयोः ।
प्रगाढगात्रिकाबन्धे विवेकारम्भयोर्गणे ॥ २६७ ॥
परिवारः परिजनेऽसिकोशेऽथ परम्परः ।

दीर्घत्वे प्रतीकारोऽपि । समस्तुल्यः, भटो वीरः । प्रतिक्रिया, गजाग्रधावतोऽपि । क्रमेण यथा–दुःप्रतिकारौ मातापितरौ । तनुते वाजिजवोल्लसत्क्व(क)शपुरः कामत्सुपर्णाग्रजप्रतिकारोपरि वेल्लदायतकरो मत्तेभविक्रीडितम् ॥ २६५ ॥ **प्रतिसरश्चमूपृष्ठे नियोज्यकरसूत्रयोः । मन्त्रभेदे व्रणशुद्धावारक्षे मण्डने स्रजि ॥ कङ्कणे ।** प्रतिसरति प्रतिसरः । चमूपृष्ठकरसूत्रयोस्त्रिलिङ्गः । नियोज्ये प्रेष्ये, वाच्यलिङ्गः । शेषेषु तु पुंसि । चम्वाः पृष्ठे पश्चाद्भागे यथा–प्रतिसरवंति हयारुहतरलिततरवारिकालजिह्वाग्रे । नियोज्ये यथा–प्रीत्या प्रतिसराऽस्मि ते ॥ करसूत्रे यथा–अन्त्रैः कल्पितमङ्गलप्रतिसराः । आरक्षे गजललाटमर्म्मणि यथा–प्रतिसरसकृतसृणेरिव गजस्य का तस्य निर्वृतिर्म्मनसः । मण्डने यथा–एताः कल्पितकुङ्कुमप्रतिसरा निर्यान्ति वारस्त्रियः ॥ २६६ ॥ **अथ परिकरः पर्यङ्कपरिवारयोः । प्रगाढगात्रिकाबन्धे विवेकारम्भयोर्गणे ।** परिक्रियतेऽनेन परिकरः । पुंनाम्नि घः (५।३।१३०)। मतान्तरेण सडभावः । परिकीर्यते वा पर्यङ्कः । पर्यस्तिका तत्र यथा–अहिपरिकरभाजो भास्मनैरङ्गरागैरधिगतधवलिम्नः शूलपाणेरभिख्यां । परिवारे यथा–तव परिकरे कान्ते नेत्थं विरोधिनि बोधिते । प्रगाढगात्रिकाबन्धे यथा–मया बद्धो दुष्टद्विजदमनदीक्षापरिकरः । आरम्भे यथा–ममाप्येष स्तोत्रे हर निरपवादः परिकरः । गणे यथा–श्मशानेष्वाक्रीडा स्मरहर–पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटी परिकरः ॥ २६७ ॥ **परिवारः परिजनेऽसिकोशे ।** परिवारयति परिवारः । परिजने यथा–द्वयोर्यथा–असिरिव निष्परिवारः सद्वंशत्वं रणे प्रकाशयति । **अथ परम्परः । मृगभेदे**

मृगभेदे प्रपौत्रादौ परम्पराऽन्वये वधे ॥ २६८ ॥
परिपाट्यां परिसरः प्रान्तभूदैवयोर्मतो ।
पक्षचरो यूथभ्रष्टपृथक्चारिगजे विधौ ॥ २६९ ॥
पयोधरः कुचे मेघे कोशकारे कशेरुणि ।
नालिकेरे पात्रटीरस्त्वपण्यापारमन्त्रिणि ॥ २७० ॥
लोहकांस्ये जरत्पात्रे पिङ्गाणकहुताशयोः ।
पारावारः पयोराशौ पारावारं तटद्वये ॥ २७१ ॥
पारिभद्रस्तु मन्दारनिम्बौ पीताम्बरोऽच्युते ।
नटे च पूर्णपात्रन्तु [1]जलादिपूर्णभाजने ॥ २७२ ॥

प्रपौत्रादौ । परात्परः परम्परः । पृषोदरादित्वात् । **परम्परान्वये वधे । परिपाट्यां ।** परिपाट्यां यथा–तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ॥ २६८ ॥ **परिसरः प्रान्तभूदैवयोर्मतो ।** परिसरन्ति अत्रेति परिसरः । पुंनाम्नीति घः । प्रान्तभुवि यथा–सद्यः पुरी परिसरेऽपि शिरीषमृद्वी । दैवं विधिः । **पक्षचरो यूथभ्रष्टपृथक्चारिगजे विधौ ॥** पक्षे चरति पक्षचरः । यूथभ्रष्टः सन् यः पृथक् चरति गजः स तथा । विधुश्चन्द्रः ॥ २६९ ॥ **पयोधरः कुचे मेघे कोशकारे कशेरुणि । नालिकेरे ।** पयो धरति पयोधरः । सर्वेष्वपि यथा–अयमतिजरठाः प्रकामगुर्व्वीरलघुविलम्बिपयोधरोपरुद्धाः, सततमसुमतामगम्यरूपाः परिणितदिक्करिकास्तटी बिभर्त्ति । **पात्रटीरस्त्वपण्यापारमन्त्रिणि । लोहकांस्ये जरत्पात्रे पिङ्गाणकहुताशयोः ।** पात्रमटति पात्रटीरः । जम्बीरेति साधुः । लोहेन मिश्रं कांस्यं, लोहकांस्यम् ॥ २७० ॥ **पारावारः पयोराशौ ।** पारमावृणोति पारावारः । यथा–प्राप्तुं पारमपारस्य पारावारस्य पार्यते । **पारावारं तटद्वये ।** पारं च अवारं च पारावारम् । तटद्वयं परतीरमर्वाक् तीरं च ॥२७१ ॥ **पारिभद्रौ तु मन्दारनिम्बौ ।** पारिप्राप्ते पारं भद्रमस्य पारिभद्रः । मन्दारः सुरतरुः । **पीताम्बरोऽच्युते । नटे च ।** पीतेऽम्बरेऽस्य पीताम्बरः । अच्युते यथा–

१ गोमेदकमणौ स्मृतः । मलयजे पूर्णपात्रं जलादि० ।

वर्धापके बलभद्रस्त्वनन्ते बलशालिनि ।
बलभद्रा कुमार्यां स्यात् त्रायमाणौषधावपि ॥ २७३ ॥
[1]वार्वटीरस्त्रपुण्याम्रास्थ्यङ्कुरे गणिकासुते ।
[2]बिन्दुतन्त्रं पुनः शारिफलके चतुरङ्गके ॥ २७४ ॥
महावीरोऽन्तिमजिने परपुष्टे जराटके ।
तार्क्ष्ये कर्के पवौ शूरे सिंहे मखहुताशने ॥ २७५ ॥

पीताम्बरोऽब्धेर्यदवाप लक्ष्मीम् । **पूर्णपात्रन्तु, जलादिपूर्णभाजने वर्द्धापके ।** पूर्णं च तत् पात्रञ्च पूर्णपात्रम् । जलादिपूर्णभाजने यथा—शशधरधवलाभं पूर्णपात्रं वहन्ती ॥ २७२ ॥ वर्द्धनं वर्द्धस्तस्याप्तिरापको वर्द्धापकः । नाम्नि पुंसि चेति णकः । (५-१-१२१) । उत्सवेषु सुहृद्भिर्यद्बलादाकृष्य गृह्यते वस्त्रमाल्यादि स वर्द्धापकः । तत्र यथा—पूर्णपात्रमियं तस्मै मैथिली कल्पयिष्यति । **बलभद्रस्त्वनन्ते बलशालिनि ।** बलेन भद्रो बलभद्रः । बलशालिनि वाच्यलिङ्गः। अनन्ते हलायुधे यथा—बलभद्रप्रलम्बघ्नौ पक्षाविव सितासितौ । **बलभद्रा कुमार्यां स्यात् त्रायमाणौषधावपि ।** बलेन भद्रमस्याः बलभद्रा ॥ २७३ ॥

वार्वटीरस्त्रपुण्याम्रास्थ्यङ्कुरे गणिकासुते । वृणोति वार्वटीरः । जम्बीरेति साधुः। **बिन्दुतंत्रं पुनः शारिफलके चतुरङ्गके ।** बिन्दवस्तन्यन्तेऽस्मिन् बिन्दुतन्त्रम् । हुयामेति त्रः । चतुरङ्गकं द्यूतविशेषः ॥ २७४ ॥ **महावीरोऽन्तिमजिने परपुष्टे जराटके । तार्क्ष्ये कर्के पवौ शूरे सिंहे मखहुताशने ।** महांश्चासौ वीरश्च महावीरः । जराटक ओषधिः । तार्क्ष्यो गरुडः । कर्कः श्वेतोऽश्वः । पविर्वज्रम् । मखहुताशनो होमाग्निः । अन्तिमजिने यथा—अर्हते योगिनाथाय महावीराय तायिने । शूरे यथा—तस्मै कः प्रथमाय मानिषु महावीराय वैरायते ॥ २७५ ॥ **महामात्रः प्रधाने स्यादारोहकसमृद्धयोः ।**

१ ब्रह्मपुत्रो नदीभिदि क्षेत्रसङ्करयोरपि । वार्वटी० ।
२ वारकीरो भारग्राहिण्याराधितचुरङ्गमे ।
यूकायां वेणिवेधिन्यां भूभयीशुल्करयोरपि ॥ बिन्दु० ॥

महामात्रः प्रधाने स्यादारोहकसमृद्धयोः ।
मणिच्छिद्रा तु मेदायामृषभाख्यौषधावपि ॥ २७६ ॥
रथकारस्तक्षि(क्ष)णि स्यान्माहिष्यः करणीसुते ।
रागसूत्रं पट्टसूत्रे तुलासूत्रेऽपि च क्वचित् ॥ २७७ ॥
लम्बोदरः स्यादुद्ध्माते प्रमथानां च नायके ।
लक्ष्मीपुत्रो हये कामे व्यवहारः स्थितौ पणे ॥ २७८ ॥
द्रुभेदेऽथ व्यतिकरो व्यसनव्यतिषङ्गयोः ।
वक्रनक्रौ खलशुकौ विश्वम्भरोऽच्युतेन्द्रयोः ॥ २७९ ॥

महती मात्रा यस्य महामात्रः । आरोहके यथा—महामात्रैरिव व्यालाः । **मणिच्छिद्रा तु मेदायामृषभाख्यौषधावपि ।** मणेरिव च्छिद्रमस्या मणिच्छिद्रा । मेदा शालपर्णीनामौषधिः ॥ २७६ ॥ **रथकारस्तक्षणि स्यान्माहिष्यः करणीसुते ।** रथं करोति रथकारः । क्षत्राद्वैश्यायां जातो माहिष्यः, वैश्यात्शूद्रायां जातो करणी, तयोः सुते । **रागसूत्रं पट्टसूत्रे तुलासूत्रेऽपि च क्वचित् ।** रागेण युक्तं सूत्रं रागसूत्रं । तुलासूत्रे कश्चिल्लक्ष्यानुसारेण ॥ २७७ ॥ **लम्बोदरः स्यादुद्ध्माते प्रमथानाञ्च नायके ।** लम्बमुदरमस्य लम्बोदरः । उद्गतो ध्मातो वायुरस्य उद्ध्मातः तत्र वाच्यलिङ्गः । प्रमथानां गणानां नायके यथा—हा लम्बोदरकुम्भमौक्तिकमणिस्तोमैर्म्मैकावली शिल्पे वागधमर्णकस्य भवतो लङ्केन्द्रनिद्रारसः । **लक्ष्मीपुत्रो हये कामे ।** लक्ष्म्याः पुत्रो लक्ष्मीपुत्रः। **व्यवहारः स्थितौ पणे । द्रुभेदे ।** व्यवह्रियते व्यवहारः । स्थितौ यथा—आहारे व्यवहारे च, त्यक्तलज्जः सुखी (सदा) भवेत् ॥ २७८ ॥ अथ—**व्यतिकरो व्यसनव्यतिषङ्गयोः ।** व्यतिकीर्यते व्यतिकरः । व्यसने यथा—धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म्म निर्मूलयन्ति । व्यतिषङ्गः सम्बन्धस्तत्र यथा—भास्वत्करव्यतिकरोल्लसिताम्बरान्ताः(रीताः)। संकरवृत्तान्तयोरपि । क्रमेण यथा—त्वदर्थीयक्रव्यात् कपिकुलकबन्धव्यतिकरैः करालेयं भूमिर्भुगनभयमद्यापि तनुते । रामार्जुनव्यति-

विश्वम्भरातु मेदिन्यां विभाकरोऽग्निसूर्ययोः ।
विश्वकद्रुस्तु मृगयाकुक्कुरे पिशुने ध्वनौ ॥ २८० ॥
वीरभद्रो वीरणेऽश्वमेधाश्वे वीरसत्तमे ।
वीरतरो वीरश्रेष्ठे शरे वीरतरं पुनः ॥ २८१ ॥
वीरणे वीतिहोत्रस्तु दिवाकरहुताशयोः ।
शतपत्रो दार्वाघाटे राजकीरमयूरयोः ॥ २८२ ॥
शतपत्रन्तु राजीवे सम्प्रहारो गतौ रणे ।
सहचरः पुनर्झिण्ट्यां वयस्ये प्रतिबन्धके ॥ २८३ ॥

करः साम्प्रतं वर्त्तते तयोः । **वक्रनक्रौ खलशुकौ** । वक्रं नक्रं नासिकाऽस्य वक्रनक्रः । खले वाच्यलिङ्गः । **विश्वम्भरोऽच्युतेन्द्रयोः** । विश्वबिभर्त्ति विश्वम्भरः । भृवृजीति खः (५-१-११२)। अच्युते यथा—त्वमेव विश्वम्भरविश्वमीशिषे ॥ २७९ ॥ **विश्वम्भरा तु मेदिन्यां** । यथा—विश्वम्भरा भगवती भवतीमसूत । **विभाकरोऽग्निसूर्ययोः** । विभां करोति विभाकरः । संख्याहर्दिवेति टः (५-१-१०२) । सूर्ये यथा—बतबत्त लसत्तेजःपुञ्जो विभाति विभाकरः । **विश्वकद्रुस्तु मृगयाकुक्कुरे पिशुने ध्वनौ** । विश्वं कत् कुत्सितं द्रवति विश्वकद्रुः (विश्वकद्रूः) । हरिपीतेति द्रुः । पिशुने वाच्यलिङ्गः । शेषयोः पुंसि ॥ २८० ॥ **वीरभद्रो वीरणेऽश्वमेधाश्वे वीरसत्तमे** । वीरश्चासौ भद्रश्च वीरभद्रः । वीरणं तृणभेदः । वीरसत्तमे । वाच्यलिङ्गः । **वीरतरो वीरश्रेष्ठे, शरे** । प्रकृष्टो वीरो वीरतरः, वीरान् तरति वा । वीरश्रेष्ठे वाच्यलिङ्गः । **वीरतरं पुनः । वीरणे** । बाहुलकात् क्लीबे ॥ २८१॥ **वीतिहोत्रस्तु दिवाकरहुताशयोः** । वीतयोऽश्वा होत्रं वाहनं हव्यं वाऽस्य वीतिहोत्रः । **शतपत्रो दार्वाघाटे राजकीरमयूरयोः** । शतं पत्राण्यस्य शतपत्रः । दार्वाघाटः पक्षिभेदः ॥२८२॥ **शतपत्रन्तु राजीवे** । यथा—कम्पेन मूर्ध्नः शतपत्रयोनिम् । **सम्प्रहारो गतौ रणे** । सम्प्रहरणं सम्प्रहारः । सम्प्रहरन्त्यत्र वा । बाहुलकाद्घञ् । रणे यथा—सम्प्रहारे प्रहरणैः, प्रहाराणां परस्परं । **सहचरः पुनर्झिण्ट्यां वयस्ये प्रतिबन्धके** । सह

समाहारस्तु संक्षेप एकत्रकरणेऽपि च ।
समुद्रारुर्ग्राहभेदे सेतुबन्धे तिमिङ्गिले ॥ २८४ ॥
सालमारस्तरौ हिङ्गौ सुकुमारस्तु कोमले ।
पुण्ड्रेक्षौ सूत्रधारस्तु शिल्पिभेदे नटेन्द्रयोः ॥ २८५ ॥
अतिबलः स्यात् प्रबलेऽतिबला तु बलाभिदि ।
अक्षमाला त्वक्षसूत्रे वशिष्ठस्य च योषिति ॥२८६॥

चरति सहचरः । झिन्टी ओषधिः । तत्र स्त्रीपुंसः । वयस्ये वाच्यलिङ्गः । तत्र यथा—रात्रौ द्वित्रैः सह सहचरैः सेवते तद्विपक्षः । पत्न्यामपि, तत्र तु स्त्रियां यथा—समन्तादुत्तालैः सुरसहचरी चामरमरुत्तरङ्गैः ॥ २८३ ॥ **समाहारस्तु संक्षेप एकत्रकरणेऽपि च** । समाह्रियते समाहारः संक्षेपे यथा—स समाहारतोऽभ्यधात् । एकत्रकरणे यथा—व्यधादेतां वेधा विधुमधुसुधासीधुसुहृदां समाहारं कृत्वा कथमितरथायं गुणगणः । **समुद्रारुर्ग्राहभेदे सेतुबन्धे तिमिङ्गिले** । समुद्रमियर्त्ति समुद्रारुः । भृमृतृत्सरीति वः बहुवचनादुः पुंसि । (उ. ७१६) ॥२८४॥ **सालामारस्तरौ हिंगौ** । सालं मारयति सालमारः । **सुकुमारस्तु कोमले । पुण्ड्रेक्षौ** । सुष्ठु काम्यते सुकुमारः । कमे रत उच्च इति आरः (उ. ४०९) । कोमले वाच्यलिङ्गः तत्र यथा—सुकुमारमहो लघीयसां हृदयम् । **सूत्रधारस्तु शिल्पिभेदे नटेन्द्रयोः** । सूत्रं धरति सूत्रधारः । शिल्पिभेदे यथा—देवः शिवस्त्रिभुवनस्थितिसूत्रधारः । नटे यथा—दशमुखवधनाट्यसूत्रधारो रघुपतिरस्य च पारिपार्श्विकोऽहम् । २८५॥ **अथ लान्ताः । अतिबलः स्यात् प्रबले** । अतिशयेन बलमस्य अतिबलः, वाच्यलिङ्गः । **अतिबला तु बलाभिदि** । बलाभित् औषधिविशेषः **अक्षमाला त्वक्षसूत्रे वसिष्ठस्य च योषिति** । अक्षाः पद्मबीजानि तेषां माला अक्षमाला । न क्षमां पृथिवीं लाति वा समामित्वात्, द्वयोर्यथा—रेजे वसिष्ठलीलेव मुनिमालाक्षमालया ॥२८६॥

अङ्कपाली परीरम्भे स्यात्कोट्यामुपमातरि ।
उलूखलं गुग्गुलोदूखले [1]कलकलः पुनः ॥२८७॥
कोलाहले सर्जरसे कन्दरालो जटिद्रुमे ।
गर्दभाण्डेऽप्यथ कमण्डलू पर्कटिकुण्डिके ॥२८८॥
कुतूहलं शस्तेऽद्भुते खतमालो बलाहके ।
धूमेऽथ गण्डशैलोऽद्रिच्युतस्थूलाश्मभालयोः ॥२८९॥
गन्धफली तु प्रियङ्गौ चम्पकस्य च कोरके ।
जलाञ्चलं तु शैवाले स्वतश्च जलनिर्गमे ॥२९०॥

अङ्कपाली परीरम्भे स्यात् कोटयामुपमातरि । अङ्के पाल्यते स्वैरेभ्यः (१।३।३०) इति इ प्रत्यये ङ्यामङ्कपाली । परीरम्भे यथा—वितरति कमितुर्धर्म्मितस्याङ्कपालीम् । कोटिरग्रभागः । उपमाता धात्री । **उलूखलं गुग्गुलोदूखले** । उदूर्ध्वं खं बिलमस्य उलूखलं । पृषोदरादित्वात् । उदूखले यथा—उलूखलं तन्दुलखण्डनेन । **कलकलः पुनः । कोलाहले सर्जरसे** । कल्यते कलकलः, अदुपान्त्यरुदभ्यामश्वात इत्यप्रत्ययो द्वित्वञ्च । (उ.१४) ॥२८७॥ कोलाहले यथा—शृणवन् रजनिचरसेना कलकलम् । **कन्दरालो जटिद्रुमे गर्दभाण्डेऽपि** । कन्दरां लाति—कन्दरालः द्वावपि वृक्षविशेषौ । **अथ कमण्डलू पर्कटिकुण्डिके** । कं पानीयमन्त्यस्मिन् कमण्डलुः । गूहल्विति साधुः । (उ. ८२४) ॥ पर्कटी प्लक्षः, तत्र पुंसि । कुण्डिकायां पुंक्लीबः । तत्र यथा—अशेषतीर्थोपहृताः कमण्डलोः । ॥२८८॥ **कुतूहलं शस्तेऽद्भुते** । कुत्सितं तोहति कुतूहलम् । मुरलेति साधुः(उ०४७४) अद्भुते यथा—कुतूहलाविष्टतया तदानीं । **खतमालो बलाहके । धूमे** । खेतमाल इव खतमालः । **अथ गण्डशैलोऽद्रिच्युतस्थूलाश्मभालयोः** । शैलस्य गण्ड इव गण्डशैलः । राजदन्तादित्वात् । (३।१।१४९) द्वयोर्यथा—अस्मिन् भजन्ति घनकोमलगण्डशैला नार्योऽनुरूपमधिवासमधित्यकासु ॥२८९॥ **गन्धफली तु प्रियङ्गौ चम्पकस्य च कोरके** । गन्धेन युक्तं फलमस्याः गन्धफली । असम्भस्त्रेति

१ उलूखली दन्तच्छिद्रमेकाष्ठीलोम्बकौषधे ।
एकाष्ठीला तु पाठायां भवेत् कलकलः पुनः ॥

[1]दलामलं पुनर्दमनके मरुबकेऽपि च ।
ध्वनिलाला तु वल्लक्यां वेणुकाहलयोरपि ॥२९१॥
परिमलो विमर्दोत्थहृद्यगन्धे विमर्दने ।
[1]पोटगलो नले काशे झषे बहुफलः पुनः ॥२९२॥
नीपे बहुफला फल्गौ भस्मतूलं पुनर्हिमे ।
ग्रामकूटे पांशुवर्षे भद्रकाल्यौषधीभिदि ॥२९३॥
गन्धोल्यां हरपत्न्यां च, महाकालो महेश्वरे ।
किम्पाके गणभेदे च, मदकलो मदिद्विपे ॥२९४॥

डीः (२।४।५७) । **जलाञ्चलं तु शैवाले स्वतश्च जलनिर्गमे** । जलस्याञ्चलमिव जलाञ्चलं, शैवाले पुंक्लीबः ॥२९०॥ **दलामलं पुनर्दमनके मरुबकेऽपि च** । दलेष्वमलं दलामलं । **ध्वनिलाला तु वल्लक्यां वेणुकाहलयोरपि** । ध्वनिं लालयति ध्वनिलाला ॥ २९१ ॥ **परिमलो विमर्दोत्थहृद्यगन्धे विमर्दने** । परिमलते परिमलः, विमर्दोत्थहृद्यगन्धे यथा-यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणां । विमर्दने यथा—स्तनपरिमलमीलल्लोचनान्तां नतांगीं । परिशीलनेऽपि यथा—सतां परिमलान्नित्यं स्वरूपमुपजायते । **पोटगलो नले काशे झषे** । पोटेन संश्लेषेण गलति पोटगलः । **बहुफलः पुनः नीपे** । बहूनि फलान्यस्य बहुफलः ॥२९२॥ **बहुफला फल्गौ** । फल्गुरोषधिः । **भस्मतूलं पुनर्हिमे ग्रामकूटे पांशुवर्षे** । भस्मरूपं तूलमस्मात् , भस्मं तूलति वा भस्मतूलम् । ग्रामकूट उत्कुरुटिका । **भद्रकाल्यौषधीभिदि । गन्धोल्यां हरपत्न्यां च** । भद्रा चासौ काली च भद्रकाली ॥ २९३ ॥ गन्धोली क्षुद्रजन्तुः । **महाकालो महेश्वरे । किंपाके गणभेदे च** । महांश्चासौ कालश्च महाकालः । महेश्वरे यथा—अप्यन्यस्मिन् जलचर महाकालमासाद्य काले । **मदकलो मदिद्विपे । मदेनाऽव्यक्तवचने** । मदेन कलो

१ चक्रवालेऽद्रिभेदे स्याच्चक्रवालं तु मण्डले । दलाच० ।
१ पुष्पफलः पुनर्ग्राम्यकर्कट्यां च कपित्थके । पोट० ।

मदेनाऽव्यक्तवचने महानीलो मणेर्भिदि ।
नागभेदे भृङ्गराजे महाबलो बलीयसि ॥२९५॥
वायौ महाबलं सीसे महाबला बलाभिदि ।
मणिमाला हारे स्त्रीणां, दशनक्षतभिद्यपि ॥२९६॥
मुक्ताफलं घनसारे मौक्तिके लवलीफले ।
मृत्युफलो महाकाले, मृत्युफली कदल्यथ ॥२९७॥

मदकलः । मदिद्विपे मदवति द्विपे यथा—मनसिजमदकलमांसलकुम्भतटैस्तौ स्तनौ तन्व्याः । प्रसरति केसरिणि मधावधिकं कान्तिं कथं धत्ताम् ॥२९४॥ मदेनाव्यक्तवचने वाच्यलिङ्गः । तत्र यथा—मदकलमधुपकुलाकुलकरटतटः सोऽवताद्गणेशो वः । विधिना विघ्ननिवारणलिखितललाटाक्षरप्रशस्तिरिव ॥ **महानीलो मणेर्भिदि । नागभेदे भृङ्गराजे** । महांश्चासौ नीलश्च महानीलः । मणेर्भिदि यथा—महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे । नागभेदः सर्प्पभेदः । भृंगराजः केशरञ्जनः । **महाबलो बलीयसि वायौ** । महद्बलमस्य महाबलः । बलीयसि वाच्यलिङ्गः । तत्र यथा सैष भीमो महाबलः ॥२९५॥ **महाबलं सीसे** । सीसं नागम् । **महाबला बलाभिदि** । बलाभित् ओषधिः । **मणिमाला हारे स्त्रीणां दशनक्षतभिद्यपि** । मणीनां मणीनामिवमाला मणिमाला । स्त्रीणां दशनक्षतभिदि यथा—अधरे बिन्दुः कण्ठे मणिमाला कुचयुगे शशप्लुतकम् । तव सूचयन्ति सुन्दरि कुसुमायुधशास्त्रपण्डितं रमणम् ॥२९६॥ **मुक्ताफलं घनसारे मौक्तिके लवलीफले** । मुक्ताख्यं फलं मुक्ताफलमिव वा मुक्ताफलम् । मौक्तिके यथा—मुक्ताफल स्थूलतमान् स्तनेषु । **मृत्युफलो महाकाले** । मृत्यवे फलमस्य भक्षकाणां मृत्युफलः, महाकालः किम्पाकवृक्षः । **मृत्युफली कदल्यथ** । मृत्यवे फलमस्याः स्वस्यैव मृत्युफली । 'असम् भवाजिनैकशण—पिण्डात्फलात्' (२।४।५७) इति ङीः ॥२९७॥ **यवफलो मांसिकायां कुटजत्वचिसारयोः** । यववत्फलमस्य

यवफलो मांसिकायां कुटजत्वचिसारयोः ।
[1]वायुफलं तु जलदोपले शक्रशरासने ॥२९८॥
वातकेलिः कलालापे षिङ्गानां दन्तलेखने ।
विचकिलो दमनके मल्ल्यामथ बृहन्नलः ॥२९९॥
महापोटगले पार्थे सदाफल उदुम्बरे ।
नालिकेरे स्कन्धफले [2]हस्तिमल्लः सुरद्विपे ॥३००॥
विघ्नेशे हलाहलस्तु हयलालोरगे विषे ।
ज्येष्ठ्यां च हरिताली दूर्वागगनरेखयोः ॥३०१॥

यववत्फलति वा यवफलः । **वायुफलं तु जलदोपले शक्रशरासने** । वायुना फलति वायुफलम् ॥२९८॥ **वातकेलिः कलालापे षिङ्गानां दन्तलेखने** । वातवत् केलिरस्य वातकेलिः । कलालापे हृदयभाषिणि वाच्यलिङ्गः । षिङ्गानां दन्तलेखने रोधादौ शोधनमात्रे वा । **विचकिलो दमनके मल्ल्यां** । विच्यते विचकिलः, 'स्थण्डिलेति' (उ. ४८४) साधुः । मल्ल्यां यथा—मन्दारे यदनादरी विचकिलोपान्तेऽपि सन्तप्यते । **अथ बृहन्नलः । महापोटगले पार्थे** । बृहंश्चासौ नलश्च, बृहंतो नला अस्येति वा बृहन्नलः ॥२९९॥ **सदाफल उदुम्बरे । नालिकेरे स्कन्धफले** । सदाफलति सदाफलः । त्रयोऽपि वृक्षाः । **हस्तिमल्लः सुरद्विपे । विघ्नेशे** । हस्तिषु मल्लो हस्तिमल्लः । सुरद्विपे यथा—सुराधिपाधिष्ठितहस्तिमल्ललीलां दधौ राजतगण्डशैलः ॥३००॥ विघ्नेशे यथा—विघ्नानभिघ्नन् सोपघ्नान् हस्तिमल्लः सदास्तु वः । **हलाहलस्तु हयलालोरगे विषे । ज्येष्ठ्यां च** । हलति जठरं हलाहलः । "मुरलोरलेति साधुः । (उ. ४७४) विषे पुंक्लीबः । हयलालोरगो हरमेखलाप्रयोगेण हयलालया कृतः सर्पः । तत्र विषे च यथा—कस्य सद्यो हलाहलः । ज्येष्ठी गृहगोधिकाभेदः । **हरिताली दूर्वागगनरेखयोः । कृपाणलतिकायां च** । हरितां नीलत्वमलति हरिताली ॥३०१॥

१ रजस्वला पुष्पवत्यां रजस्वलस्तु सैरिभे । वायु० ।
२ सौवर्चलं सुवर्चिके । शूलघ्नाशके चाथ हस्ति० ।

कृपाणलतिकायाश्चानुभावो भावसूचने ।
प्रभावेनिश्चयेऽथापह्नवः स्नेहापलापयोः[1] ॥३०२॥
अभिषवः क्रतौ मद्यसन्धानस्नानयोरपि ।
आदीनवः पुनर्दोषे, परिक्लिष्टदुरन्तयोः ॥३०३॥
उपप्लवौ राहूत्पातौ कुशीलवस्तु चारणे ।
प्राचेतसे याचके च जलबिल्वस्तु कर्कटे ॥३०४॥

" अथ वान्ताः "

अनुभावो भावसूचने प्रभावे निश्चये । अनुभाव्यतेऽनेन अनुभावः । घः । अनुभवनम्वा, बाहुलकाद्घञ् । रत्यादीन् भावान् सूचयति भावसूचनः कटाक्षादिः । तत्र यथा–विभावानुभावव्यभिचारिभिरभिव्यक्तः स्थायीभावो रसः। प्रभावे यथा–तवानुभावोयमवेदि यन्मया । निश्चये यथा–महानुभावाः सततं धर्म्मैकनिरताः स्थिराः । **अपह्नवः स्नेहापलापयोः ।** अपह्नवनमपह्नवः, अनाश्वासेऽपि, त्रिष्वपि यथा–अप्यन्वभूदविततां सह पांशुकेलिं मापह्नवं मनसि मित्र मनाक् निधास्त्वम् ॥ ३०२ ॥ **अभिषवः क्रतौ मद्यसन्धानस्नानयोरपि ।** अभिषयते अभिषवः, क्रतौ यथा–ऋत्विजोऽत्राभिशंसंति सोमाभिषवपावनाः । मद्यसन्धानस्नानयोर्यथा–अभिषवसक्तोप्यमदो द्विजराजो निष्कलङ्कजडभावः । **आदीनवः पुनर्दोषे परिक्लिष्टदुरन्तयोः ।** आदीयते आदीनवः । कैरवेति ॥ (उ० ५१९) ॥ साधुः । त्रिष्वपि यथा–यद्वासुदेवेनादीनमनादीनवमीरितम् ॥३०३॥ **उपप्लवौ राहूत्पातौ ।** उपप्लवते उपप्लवः । द्वयोर्यथा–ददृशाते जने नाथ तौ तिरस्कृततेजसौ । उपप्लवपरिक्रान्तौ सूर्य्याचन्द्रमसाविव । **कुशीलवस्तु चारणे । प्राचेतसे याचके च ।** कुत्सितं शीलं वाति, कुश्या लुनाति वा कुशीलवः । चारणे नटे यथा–कथं प्रक्रान्तमेव कुशीलवैः । प्राचेतसो वाल्मीकिः, याचकोऽर्थी, तत्र वाच्यलिङ्गः । **जलबिल्वस्तु कर्कटे ।** जल-

१. चौरकर्मणि ।

जलचत्वरे पंचाङ्गे जीवंजीवः खगान्तरे ।
द्रुमभेदे चकोरे च धामार्गवस्तु घोषके ॥३०५॥
अपामार्गेऽप्यथ परिप्लवावाकुलचञ्चलौ ।
पराभवस्तिरस्कारे नाशे पारशवोऽयसि ॥३०६॥
शूद्रायां विप्रतनये तनये च परस्त्रियाः ।
पुटग्रीवस्तु गर्गर्यां ताम्रस्य कलशेऽपि च ॥३०७॥
बलदेवस्तु कालिन्दीकर्षणे मातरि श्वनि ।
बलदेवा त्रायमाणा रोहिताश्वो हुताशने ॥३०८॥

चत्वरे पश्चाङ्गे । जले बिल्वमिव जलबिल्वः । कर्कट कुलीरः ॥ ३०४ ॥ जलचत्वरं जलचतुष्पथम् । पश्चाङ्गः कच्छपः । **जीवंजीवः खगान्तरे । द्रुमभेदे चकोरे च ।** जीवं जीवयति जीवंजीवः, बाहुलकात् खः । **धामार्गवस्तु घोषके । अपामार्गेऽपि ।** धाम इत्यर्त्ति धामार्गवः । कैरवेति साधुः । घोषक ओषधभेदः ॥ ३०५ ॥ **अथ परिप्लवावाकुलचञ्चलौ ।** परिप्लवते परिप्लवः । वाच्यलिङ्गः । द्वयोर्यथा–मत्कुणाविव पुरः परिप्लवौ सिन्धुनाथशयने निषेदुषः । **पराभवस्तिरस्कारे नाशे ।** पराभवनं पराभवः । द्वयोर्यथा-व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु येन मायिनः । **पारशवोऽयसि । शूद्रायां विप्रतनये तनये च परस्त्रियाः ।** परशवे इदं, परशव्यन्तस्य विकारः पारशवः । "परशव्याद्यलुक्चेत्यण् (६–२–४०) यलुक्च । परस्त्रिया अपत्यम्वा । "परस्त्रियाः परशुश्चावर्णे" (६–१–४०) इत्यण् । अयसि पुंक्लीवः ॥ ३०६ ॥ "शूद्रायां विप्रतनय" इति यः । शूद्रायां विप्रेण जन्यते । **पुटग्रीवस्तु गर्गर्यां ताम्रस्य कलशेऽपि च ।** पुटवद्ग्रीवास्य पुटग्रीवः ॥ ३०७ ॥ **बलदेवस्तु कालिन्दीकर्षणे मातरि श्वनि ।** बलेन दीव्यति बलदेवः । कालिन्दीकर्षणे यथा– स्वस्थीभूतो बलदेवोऽप्युदस्तायोग्रलाङ्गलः । **बलदेवा त्रायमाणा ।** त्रायमाणा ओषधिः । **रोहिताश्वो हुताशने हरिश्चन्द्रनृपसुते ।** रोहिताख्यो मृगोऽश्वो वाहनमस्य रक्तवर्णो वा अश्वोऽस्य रोहिताश्वः । हुताशने यथा–रभ-

हरिश्चन्द्रनृपसुते सहदेवस्तु पाण्डवे ।
सहदेवा बलादण्डोत्पलयोः शारिवौषधे ॥३०९॥
सहदेवी तु सर्पाक्ष्यामपदेशस्तु कारणे ।
व्याजे लक्ष्येऽप्यपभ्रंशो भाषाभेदाऽपशब्दयोः ॥३१०॥
पतने चाश्रयाशस्तु वह्नावाश्रयनाशके ।
उपदंशोऽवदंशे स्यान्मेहनामययोरपि ॥३१२॥
उपस्पर्शस्त्वाचमनस्नानयोः स्पर्शमात्रके ।
खण्डपर्शुः शिवे राहौ भार्गवे चूर्णलेपिनि ॥३१२॥

सादम्बररोहिरोहिताश्वः ॥३०८॥ हरिश्चन्द्रनृपसुते यथा—ततः प्रविशति सुतारा रोहिताश्वश्च । **सहदेवस्तु पाण्डवे।** सह दीव्यति सहदेवः । यथा—ततः प्रविशति अर्जुनेनादिश्यमानमार्गो नकुलसहदेवाभ्यां सह राजा युधिष्ठिरः। **सहदेवा बलादण्डोत्पलयोः शारिवौषधे । सहदेवी तु सर्पाक्ष्याम् ।** विषयभेदेन शोणादित्वाङ्गीः । चत्वारोऽपि गुल्मभेदाः ॥३०९॥

अथ शान्ताः ॥

अपदेशस्तु कारणे। व्याजे लक्ष्येऽपि। अपदिश्यते अपदेशः। कारणे यथा-विनापदेशं बालोऽपि। व्याजे यथा—रक्षापदेशाद्गुरुहोमधेनोः। लक्ष्यं वेध्यम्। **अपभ्रंशो भाषाभेदाऽपशब्दयोः। पतने च।** अपभ्रश्यति अपभ्रंशनम्वा अपभ्रंशः। त्रिष्वपि यथा-अपभ्रंशपराचीना वर्णव्यत्ययहारिणः। नृपा इवैते कवयः ॥३१०॥ **आश्रयाशस्तु वह्नावाश्रयनाशके ।** आश्रयमश्नाति आश्रयाशः। आश्रयनाशके वाच्यलिङ्गः। वह्नौ यथा—परितः प्रसभेन नीयमानः शरवर्षैरवशायमाश्रयाशः। **उपदंशोऽवदंशे स्यान्मेहनामययोरपि ।** उपदिश्यते उपदंशः। अवदंशश्चक्षणम। मेहनं मेढ्रम्। आमयो रोगः। अवदंशे यथा—स्वादुंकारं कालखण्डोपदंशैः क्रोष्टाडिम्बं व्यष्वणत् व्यस्वनच्च ॥ ३११ ॥ **उपस्पर्शस्त्वाचमनस्नानयोः स्पर्शमात्रके ।** उपस्पृश्यते उपस्पर्शः। त्रिष्वपि यथा—जलोपस्पर्शपूर्वकम्। **खण्डपर्शुः शिवे राहौ भार्गवे चूर्णलेपिनि । खण्डामलकभैषज्ये ।** खण्डः

खण्डामलकभैषज्ये जीवितेशः प्रिये यमे ।
जीवितस्वामिजीवात्वोर्नागपाशस्तु योषितां ॥३१३॥
करणे वरुणास्त्रे च प्रतिष्कशः पुरोगमे ।
वार्त्ताहारे सहाये च [1]पुरोडाशो हविर्भिदि ॥३१४॥
हुतशेषे सोमरसे चमस्यां पिष्टकस्य च ।
अम्बरीषो नृपे सूर्ये युधि भ्राष्ट्रकिशोरयोः ॥३१५॥

पर्शुरस्य खण्डपर्शुः। शिवे राहौ भार्गवे च यथा—खण्डपर्शुं सहेत कः। चूर्णलेपी सुधालेपकः ॥ ३१२ ॥ **जीवितेशः प्रिये यमे । जीवितस्वामिजीवात्वोः ।** जीवितस्येशो जीवितेशः । जीवितस्वामिनि वाच्यलिङ्गः । प्रिये यमे च यथा-जीवितेशवसतिं जगाम सा जीवातुर्जीवनौषधम् । **नागपाशस्तु योषितां करणे वरुणास्त्रे च ।** नागपाश इव नागानां पाशो वा नागपाशः । द्वयोर्यथा—तं बद्ध्वा नागपाशेन ॥ ३१३ ॥ **प्रतिष्कशः पुरोगमे । वार्त्ताहारे सहाये च ।** प्रतिकशति प्रतिष्कशः । वर्चस्कादित्वात् । वाच्यलिङ्गः । त्रिष्वपि यथा-ग्राममध्यप्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः। **पुरोडाशो हविर्भिदि। हुतशेषे सोमरसे चमस्यां पिष्टकस्य च।** पुरो दास्यते पुरोडाशः। पृषोदरादित्वात्साधुः। हविर्भिदि हुतशेषे सोमरसे च यथा—वैतानेषु कपीटयोनिषु पुरोडाशं वषट् कुर्वते ॥ ३१४ ॥ चमसी वर्त्तिः ।

॥ अथ षान्ताः ॥

अम्बरीषो नृपे सूर्ये युधि भ्राष्ट्रकिशोरयोः। आम्राते खण्डपरशौ । अमति अम्बरीषः । "अमेवर्रादिरितीषः" (उ० ५५५) । भ्राष्ट्रे पुंक्लीबः । अन्यत्र पुंसि । नृपे यथा-अम्बरीषश्च नाभोगो बुभुजाते चिरं महीम् । किशोरो हयशावः ॥३१५॥ आम्रातो वृक्षः । खण्डपरशुरीश्वरः । **अनुकर्षो अनुकर्षणे ।**

१. पञ्चदशी तु पूर्णिमा । दर्शश्च पादपाशी तु खट्टिका यामुदाहृता ॥ शृङ्खला कटके वापि पुरोडाशो हविर्भिदि ।

आम्राते खण्डपरशावानुकर्षोऽनुकर्षणे ।
रथस्याधोदारुणि चानिमिषः सुरमत्स्ययोः ॥३१६॥
अनुतर्षोऽभिलाषे स्यात्तृषाचषकयोरपि ।
अलम्बुषश्छर्दनेऽलम्बुषा स्वःपण्ययोषिति ॥३१७॥
गण्डीर्यां किम्पुरुषस्तु किन्नरे लोकभिद्यपि ।
देववृक्षो मंदरादौ गुग्गुलौ विषमच्छदे ॥३१८॥
नन्दिघोषो बन्दिघोषे स्यन्दने च किरीटिनः ।
परिवेषः परिवृतौ परिधौ परिवेषणेः ॥३१९॥

रथस्याधोदारुणि च । अनुकर्षणम् अनुकृष्यते वा अनुकर्षः । रथस्याधोदारुणि यथा-अनुकर्षशादविचलतस्खलद्रथे रुधिरावमर्दन सकर्दमावनौ । **अनिमिषः सुरमत्स्ययोः** । न निमिषति अनिमिषः । "नाम्युपान्त्य" ०(५-१-५४) इति कः । द्वयोर्यथा—कदाचिदम्भोनिधिरिव उच्चैः—स्तननाभिरम्याः कृतानिमिषनयनविभ्रमाः सकन्दर्प्पाः सिषेवे वेलाविलासिनी ॥३१६॥ **अनुतर्षो अभिलाषे स्यात्तृषाचषकयोरपि** । अनुतृष्यते अनुतर्षः । मद्येऽपि तत्र क्लीबः । सर्व्वेऽपि यथा—सोपचारमुपशान्तविचारं सानुतर्षपदेन । **अलम्बुषश्छर्दने** । अलति अलम्बुषः । अलेरम्बुषः, बाहुलकात् षत्वम् । छर्दनो दुर्योधनमित्रम् राक्षसः । **अलम्बुषा स्वःपण्य(पण)योषिति** । **गण्डीर्यां** । गण्डीरी ओषधिः ॥३१७॥ **किम्पुरुषस्तु किन्नरे लोकभिद्यपि** । कुत्सितः पुरुषोऽश्वमुखत्वात्किंपुरुषः । कुत्सिताः पुरुषा अस्मिन्निति वा । किन्नरे यथा-यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किम्पुरुषाङ्गनानाम्। लोकभिदि यथा-भारतं प्रथमं वर्षं ततः किंपुरुषं परम्। **देववृक्षो मन्दारादौ गुग्गुलौ विषमच्छदे** । देवानां वृक्षो देववृक्षः ॥ ३१८॥ **नन्दिघोषो बन्दिघोषे स्यन्दने च किरीटिनः** । नन्दी चासौ घोषश्च, नन्दीघोषोऽस्य वा नन्दिघोषः । द्वयोर्यथा—अर्जुनसमरमिव नन्दिघोषमुखरितदिगन्तरं मंचमारूरोह वासवदत्ता । **परिवेषः परिवृतौ परिधौ परिवेषणे** । परिवेषणं परिवेषः । परिवृतौ परिवेष्टने यथा कृतपरिवेषोऽप्युच्चैर्वेलावलयेन जलनिधिः

परिघोषः स्यादवाच्ये निनादे जलदध्वनौ ।
पलङ्कषो यातुधाने पलङ्कषा तु किंशुके ॥३२०॥
गोक्षुरे गुग्गुलौ लाक्षारास्नातुण्डीरिकासु च ।
भूतवृक्षस्तु शाखोटे स्योनाककलिवृक्षयोः ॥३२१॥
महाघोषो महाशब्दे स्यान्महाघोषमापणे ।
महाघोषा शृङ्ग्योषध्यां राजवृक्षः पियालके ॥३२२॥
सुवर्णालुतरौ वातरुषः शक्रशरासने ।
वातूलोत्कोचयोश्चापि विशालाक्षो महेश्वरे ।
तार्क्ष्ये विशालनेत्रे च वीरवृक्षोऽर्जुनद्रुमे ।
भल्लाते सकटाक्षस्तु कटाक्षिणि धवद्रुमे ॥३२४॥

परितः । क्षयसमये समुपेत महाजले पृषततां याति । परिधावुपसूर्यके यथा—बद्धभीमपरिवेषमण्डलः । परिवेषणे भोज्यनिक्षपणे यथा—रचयति परिवेषं शेषभोज्यस्य कैषा ॥ ३१९ ॥ **परिघोषः स्यादवाच्ये निनादे जलदध्वनौ** । परिघुष्यते परिघोषः । **पलङ्कषो यातुधाने** । पलं कषति पलङ्कषः । बाहुलकात् खः ।। यातुधानो राक्षसः । **पलङ्कषा तु किंशुके । गोक्षुरे गुग्गुलौ लाक्षारास्नातुं(मुं)डीरिकासु च** । षट्स्वर्थेषु च ॥३२०॥ **भूतवृक्षस्तु शाखोटे स्योनाककलिवृक्षयोः** । भूतानां वृक्षो भूतवृक्षः । त्रयोऽपि वृक्षाः ॥३२१॥ **महाघोषो महाशब्दे** । महांश्चासौ घोषश्च । महाघोषः । **स्यान्महाघोषमापणे** । महान् घोषोऽत्र महाघोषम् । **महाघोषा शृङ्ग्योषध्यां** । शृङ्गीनाम ओषधिः । **राजवृक्षः पियालके** । **सुवर्णालुतरौ** । राज्ञो वृक्षो राजवृक्षः । पियालको राजादनः ॥ ३२२ ॥ **वातरुषः शक्रशरासने । वातूलोत्कोचयोश्चापि** । वातेन रौति वातरूषः । कोरदषेति साधुः । वातूलो वातसमूहः । उत्कोचो लंचा । **विशालाक्षो महेश्वरे । तार्क्ष्ये विशालनेत्रे च** । विशालेऽक्षिणी अस्य विशालाक्षः । विशालनेत्रे वाच्यलिङ्गः । तत्र यथा—पद्मपत्रविशालाक्षी ॥३२३॥ **वीरवृक्षोऽर्जुनद्रुमे** । **भल्लाते** । वीराणां वृक्षो वीरवृक्षः । **सकटाक्षस्तु कटाक्षिणि । धवद्रुमे** । सह कटाक्षैर्वर्त्तते सकटाक्षः । कटाक्षिणि वाच्यलिङ्गः ॥३२४॥

अधिवासः स्यान्निवासे संस्कारे धूपनादिभिः ।
अवध्वंसस्तु निन्दायां परित्यागेऽवचूर्णने ॥३२५॥
कलहंसो राजहंसे कादम्बे नृपसत्तमे ।
कुम्भीनसस्त्वहौ कुम्भीनसी लवणमातरि ॥३१६॥
घनरसोऽप्सु कर्पूरे सान्द्रे सिद्धरसे द्रवे ।
मोरटे पीलुपर्ण्यां च चन्द्रहासोऽसिमात्रके ॥३२७॥

॥ अथ शान्ताः ॥

अधिवासः स्यान्निवासे संस्कारे धूपनादिभिः । अध्युष्यतेऽधिवासः । निवासे यथा—नागाधिवासे स ययौ क्षितीशः । धूपनादिभिः संस्कारे यथा—पुष्पाधिवासैः सुरभीकृतानि । **अवध्वंसस्तु निन्दायां परित्यागेऽवचूर्णने** । अवध्वंसनमवध्वंसः ॥ ३२५ ॥ **कलहंसो राजहंसे कादम्बे नृपसत्तमे** । कलश्चासौ हंसश्च कलहंसः । आरक्त चंचुचरणा हंसा राजहंसाः । अतिधूसरपक्षाः कादम्बाः । द्वयोर्यथा—दुग्धधौतोऽपि किं याति वायसः कलहंसताम् । **कुम्भीनसस्त्वहौ** । कुम्भीव नासिकाऽस्य कुंभीनमः । अस्थूलाच्चेति ॥ ७-३-१६१ ॥ नसादेशः । **कुम्भीनसी लवणमातरि** । गौरादित्वान्ङीः। लवणो राक्षसस्तस्य माता तत्र यथा—स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः । वनात्करमिवादाय सत्वराशिमुपस्थितः ॥३२६ ॥ **घनरसोऽप्सु कर्पूरे सान्द्रे सिद्धरसे द्रवे । मोरटे पीलुपर्ण्यां च** । घनस्य रसो, घनश्चासौ रसश्च, घनो रसोऽत्र वा, घनरसः । सान्द्रं बह(हु)लम् । तत्र वाच्यलिङ्गः । द्रवो निर्यासः । मोरटं सप्तरात्रात्परं क्षीरं पीलुपर्णी ओषधिः । द्रवेऽप्सु च यथा—तडिदनललतानामिव घनरस एषोतिदाहकृद्विरसः । पतति घनाघनघनरसविसरो विसरन्ति च प्राणाः । **चन्द्रहासोऽसिमात्रके । दशग्रीवकृपाणे च** । चन्द्रस्येव हासोऽस्य चन्द्रहासः । असिमात्रके यथा—चन्द्रहासोमुखे यस्तेपतितोऽतिप्रसादिनि । सशत्रुर्वाथमित्रम्बा समचर्त्तिपदं व्रजेत् ॥ ३२७ ॥ दशग्रीवकृपाणे

दशग्रीवकृपाणे च तामरसं तु पङ्कजे ।
ताम्रकांचनयोः दिव्यचक्षुस्त्वन्धे सुलोचने ॥३२८॥
सुगन्धभेदे च निश्रेयसं कल्याणमोक्षयोः ।
नीलञ्जसा नदीभेदेऽप्सरोभेदे तडित्यपि ॥३२९॥
पुनर्वसुः स्यान्नक्षत्रे कात्यायनमुनावपि ।
पौर्णमासो यागभेदे पौर्णमासी तु पूर्णिमा ॥३३०॥
मलीमसं पुनः पुष्पकासीसे मलिनायसोः ।
महारसः पुनरिक्षौ खर्जूरद्रौ कसेरुणि ॥३३१॥

यथा—बद्धस्पर्द्धस्तव परशुना लज्जते चन्द्रहासः । **तामरसं तु पङ्कजे । ताम्रकाञ्चनयोः**। ताम्यति तामरसम् । केनेति (३-४-३३) साधुः । त्रिष्वपि यथा—अनवरतममन्दरागतामरससदृशः । **दिव्यचक्षुस्त्वन्धे सुलोचने । सुगन्धभेदे च**। दिव्यं चक्षुरस्य दिव्यचक्षुः । अन्धसुलोचनयोर्वाच्यलिङ्गः। सुलोचने यथा—चर्मचक्षुर्जनः सर्वः कवयो दिव्यचक्षुषः॥३२८॥ **निःश्रेयसं कल्याणमोक्षयोः** । निश्चितं श्रेयः निःश्रेयसम् । निसश्च श्रेयस इति अत्समासान्तः । द्वयोर्यथा—निःश्रेयसाय स श्रीमान् श्रीकण्ठो वः प्रकल्पताम् । **नीलञ्जसा नदीभेदेऽप्सरोभेदे तडित्यपि**। नीलं जस्यति नीलंजसा। बाहुलकात् खः। अप्सरोभेदे यथा—नीलंजसायाबिल्यात् ॥ ३२९॥ **पुनर्व्वसुः स्यान्नक्षत्रे कात्यायनमुनावपि** । पुनर्व्वस्वस्य पुनर्व्वसुः । पुंसि । नक्षत्रे यथा—पुष्यपुनर्व्वसुरेवतिचित्रा । कात्यायनमुनिः वररुचिः । **पौर्णमासो यागभेदे** । पौर्णमास्यां भवः पौर्णमासः । "भर्तुसन्ध्यादेरण् (६-३-८९) । यथा—पौर्णमासश्च दर्शश्च यज्ञो पक्षान्तयोः पृथक् । **पौर्णमासी तु पूर्णिमा** । पूर्णो मासश्चन्द्रोऽस्यामस्ति पौर्णमासी । पूर्णमासेऽण् । यथा—उदयति विततांशुः पौर्णमासी सुधांशुः ॥ ३३० ॥ **मलीमसं पुनः पुष्पकासीसे मलिनायसोः** । मलोऽस्यास्ति मलीमसं । "मलादिमसश्च (७-२-१४)। मलिने वाच्यलिङ्गः । तत्र यथा—क्षपातमस्काण्डमलीमसं नभः। **महारसः पुनरिक्षौ खर्जूरद्रौ कशेरुणि** । महान् रसोऽस्य महारसः । कशेरु कन्द-

मधुरसा तु मूर्वायां द्राक्षादुग्धिकयोरपि ।
[1]राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे ॥३३२॥
रासेरसो रससिद्धिबलौ शृङ्गारहासयोः ।
षष्ठीजागरके रासे गोष्ठ्यां विश्वावसुः पुनः ॥३३३॥
निशि गन्धर्वभेदे च विभावसुस्तु भास्करे ।
हुताशने हारभेदे चन्द्रे स्वःश्रेयसं सुखे ॥३३४॥
परानन्दे च भद्रे च सर्व्वरसस्तु धूणके ।
वाद्यभाण्डेऽवग्रहस्तु ज्ञानभेदे गजालिके ॥३३५॥

भेदः ॥ ३३१ ॥ **मधुरसा तु मूर्वायां द्राक्षादुग्धिकयोरपि** । मधुवद्रसोऽस्या मधुरसा । मूर्वा ज्याहेतुस्तृणविशेषः । दुग्धिका ओषधिः । **राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे** । राजा चासौ हंसश्च राजहंसः। त्रिष्वपि यथा—वर्षागम इव प्रवासितराजहंसः ॥ ३३२ ॥ **रासेरसो रससिद्धबलौ शृङ्गारहासयोः । षष्ठीजागरके रासे गोष्ठ्यां** । रासे रसोऽस्य रासेरसः । रस्यते वा । "फनसेति" (उ० ५७३) । साधुः । रससिद्ध्यर्थमुपहारो रससिद्धिबलिः । **विश्वावसुः पुनः । निशि गन्धर्वभेदे च** । विश्वं वस्वस्य विश्वावसुः । वसुराटोः (३-२-८१) इति दीर्घः। निशि स्त्रियां। गन्धर्वभेदे पुंसि । **यद्वैजयन्ती**—विश्वावसुस्तु गन्धर्वभेदे ना स्त्री पुनर्निशि । गन्धर्वभेदे यथा--विश्वावसुप्रागहरैः प्रवीणैः ॥ ३३३ ॥ **विभावसुस्तु भास्करे । हुताशने हारभेदे चन्द्रे** । विभैव वस्वस्य विभावसुः । पुंसि । सर्वेषु यथा-विभावसोर्विभा भाति तमस्तानवभाविनी। **स्वःश्रेयसं सुखे । परानन्दे च भद्रे च** । शोभनं श्रेयः स्वःश्रेयसम् । निसश्च श्रेयस (७-३-१२२) इत्यत्समासान्तः । त्रिष्वपि यथा—स्वःश्रेयसायास्तु वः ॥ ३३४ ॥ **सर्व्वरसस्तु धूणके । वाद्यभाण्डे** । सर्व्वे रसा अत्र सर्व्वरसः ।

॥ अथ हान्ताः ॥

अवग्रहस्तु ज्ञानभेदे गजालिके । प्रतिबन्धे वृष्टिरोधेऽपि । अवगृह्यते अवग्रहः । ज्ञानभेदे यथा—अक्षार्थयोगे दर्शनान्तरमर्थग्रहणमवग्रहः ।

१. यमस्वसा तु कालिन्द्यां कपर्दिनः स्त्रियामपि । राज० ।

प्रतिबन्धे वृष्टिरोधेऽप्यभिग्रहस्तु गौरवे ।
अभियोगेऽभिग्रहणेऽवरोहस्तु लतोद्गमे ॥३३६॥
तरोरङ्गेऽवतरणेऽप्यश्वारोहोऽश्वमारके ।
अश्वारोहाऽश्वगन्धायामुपग्रहोऽनुकूलने ॥ ३३७ ॥
बन्द्युपयोगयोश्चोपनाहो वीणानिबन्धने ।
व्रणालेपनपिण्डे च गन्धवहो मृगेऽनिले ॥ ३३८ ॥

गजालिके यथा—अवग्रहगृहीतोऽपि प्रभिन्नो नावरुध्यते ॥ ३३५ ॥ प्रतिबन्धे निषेधे यथा- एतस्ता निरवग्रहोग्रकरमोल्लीढावरूढाः पुरः । वृष्टिरोधे यथा—वृष्टिर्भवति सस्यानामवग्रहविशेषिणाम् । **अभिग्रहस्तु गौरवे । अभियोगेऽभिग्रहणे** । अभिग्रहणमभिग्रहः । गौरवाऽभियोगयोर्यथा—अभिग्रहेण विद्यार्थी कुर्व्वीताभिग्रहं गुरोः । अभिग्रहणे यथा—आसनाऽभिग्रहो भक्त्या । **अवरोहस्तु लतोद्गमे । तरोरङ्गेऽवतरणेऽपि** । अवरुह्यते अवरोहः । तरोरङ्गं शाखायाः स्कन्धादधः प्रदेशः ॥ ३३६ ॥ अवतरणे यथा—आरोहमवरोहं च मुहुः सूदति कुर्व्वती । त्वदङ्गयष्टौ मदद्दष्टिर्निश्चलापि कपीयते । **अश्वारोहोऽश्ववारके** । अश्वमारोहति अश्वारोहः । यथा—अश्वारोहैर्विरहितमिदं वाहवृन्दं वृथैव । **अश्वारोहाऽश्वगन्धायाम्** । आशु आरोहति, अश्वारोहा । पृषोदरादित्वात् । अश्वगन्धा ओषधिः । **उपग्रहोऽनुकूलने बंद्युपयोगयोश्च** । उपगृह्यते उपग्रहः ॥३३७॥ बन्दी हठाकृष्टा स्त्री । **उपनाहो वीणानिबन्धने । व्रणालेपनपिण्डे च** । उपनह्यतेऽनेन उपनाहः । 'व्यञ्जनाद् घञ् (५-३-१३२)॥ **गन्धवहो मृगेऽनिले** । गन्धं वहति गन्धवहः । लिहादित्वात् (५-३-५०) अच् । अनिले यथा—चन्दनगन्धवहोऽसौ सर्प्पति विंध्यधराधरभूमेः ॥ ३३८ ॥ **गन्धवहा तु नासायां** । यथा—गन्धवहामपि धत्स्वसखि त्वं दुर्वह एष मम प्रतियाति । **तमोपहो जिने रवौ चन्द्रेऽग्नौ** । तमोऽपहन्ति, तमोपहः । क्लेशा-

गन्धवहा तु नासायां तमोपहो जिने रवौ ।
चन्द्रेऽग्नौ तनूरुहस्तु पुत्रे गरुति लोम्नि च ॥ ३३९ ॥
प्रतिग्रहः सैन्यपृष्ठे ग्रहभेदे पतद्ग्रहे ।
क्रियाकारे दानद्रव्ये तद्ग्रहे स्वीकृतावपि । ३४० ॥
परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः ।
शापेऽथ परिवाहोऽम्बूच्छ्वासे राजार्हवस्तुनि ॥ ३४१ ॥

दिम्योऽपादिति (५-१-८१) डः । जिने यथा—तमश्छिन्द्यात्तमोपहः । रवौ यथा—खरकिरणनखरनिवहस्तमालमलिनात्मनामुपरि रोषात् । सिंह इव हास्तिकानां परिपतति (पतित) तमोपहस्तमसां । चन्द्रे यथा—तमोपहं प्रज्वलितं प्रदोषे स्तुवन्ति वैतानममी मनुष्याः । **तनूरुहस्तु पुत्रे गरुति लोम्नि च** । तन्वां रोहति तनूरुहः । गरुति लोम्नि च पुंक्लीबः । पुत्रे यथा—रवेस्तनूरुहं शनिं । गरुति पिच्छे यथा—अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृतां । लोम्नि यथा—रुचिरचित्रतनूरुहशालिभिः ॥ ३३९ ॥ **प्रतिग्रहः सैन्यपृष्ठे ग्रहभेदे पतद्ग्रहे । क्रियाकारे दानद्रव्ये तद्ग्रहे स्वीकृतावपि** । प्रतिगृह्यते प्रतिग्रहः । सैन्यपृष्ठे यथा—सेनापतिः प्रतिग्रहस्थो योधानामुद्दीपनजयनप्रसारणापसारणव्रणादिशोधनादीनि यथाकालमाचरेत् । ग्रहभेदः प्रतिपक्षग्रहः । पतद्ग्रहः पित्तलादिमयं ताम्बूलप्रत्येषणादि भाण्डम् । क्रियायाः करणमारम्भः क्रियाकारः । तत्र-यथा—विचार्योदर्कमार्येण कार्यः कार्यप्रतिग्रहः । दानद्रव्यं द्विजेभ्यो विधिवद्देयम् । तद्ग्रहो दानद्रव्यग्रहः । तयोर्यथा—प्रतिग्रहसमर्थोऽपि नाददीत प्रतिग्रहम् । अत्र हि प्रथमो द्विजकर्तृके ग्रहणे । द्वितीया विधिवद्देये । स्वीकृतौ यथा—चिन्तयन् परधनं प्रतिग्रहं भूभृदेष यदि तस्करोऽत्रकः ॥ ३४० ॥ **परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः । शापे** । परिगृह्यते परिग्रहः । परिजने यथा—दलयति कुलानि करिणां किं हरिणपरिग्रहः सिंहः । पत्न्यां यथा—निर्दिष्टां कुलपतिना सपर्णशालामध्यास्य प्रयतपरिग्रहद्वितीयः । स्वीकारे यथा—गुरुवचनपरिग्रहो हि धर्म्मः । मूले आदौ यथा—शुद्धिर्दिव्यपरिग्रहा । शापे यथा—परिचरितव्या गुरवो न यथा हि परिग्रहाय कल्पन्ते । **अथ परिवाहोऽम्बूच्छ्वासे राजार्हवस्तुनि** । पर्युह्यते परिवाहः । अम्बूच्छ्वासे यथा—तडागोदरसंस्थानां परिवाह इवाम्भसाम् ॥ ३४१ ॥ **परिबर्हः परीवारे पार्थिवोचितवस्तुनि** । परिबर्ह्यते परिबर्हः । द्वयोर्यथा—वेश्मानि रामः परिबर्हवन्ति ।

परिबर्हः परीवारे पार्थिवोचितवस्तुनि ।
पितामहः पद्मयोनौ जनके जनकस्य च ॥ ३४२ ॥
[1]वरारोहो गजारोहे वरारोहा कटावपि ।
सर्वंसहः सहिष्णौ स्यात्सर्वंसहा पुनः क्षितौ ॥ ३४३ ॥

इत्याचार्यश्रीहेमचन्द्रसूरीश्वरविरचितेऽनेकार्थसंग्रहे
चतुःस्वरकाण्डश्चतुर्थः ॥४॥

पितामहः पद्मयोनौ जनके जनकस्य च । पितुः पिता पितामहः । पित्रोर्डामहट् (६-२-६३) इति डामहट् । पद्मयोनौ यथा—प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय । जनकस्य जनके यथा—पिता पितामहो भ्राता स्वकुल्यो जननी तथा ॥ ३४२ ॥ **वरारोहो गजारोहे** । वरमारोहति वरारोहः । **वरारोहा कटावपि** । वरमारोहणमस्याः, वरारोहा । यथा—किंकिणीकाणवाचाला वरारोहा मृगीदृशः । **सर्वंसहः सहिष्णौ स्यात्** । सर्व्वं सहते सर्व्वंसहः । सर्वात्सहश्चेति (५-१-११) खः । वाच्यलिङ्गः । यथा—मुनिरसि विरसानि ब्रूहि सर्व्वंसहोऽस्मि । **सर्वंसहा पुनः क्षितौ** । यथा—सर्व्वंसहा भगवती तव जन्मभूमिः ॥ ३४३ ॥

इत्याचार्य्यश्रीहेमचन्द्रसूरीश्वरविरचितायामनेकार्थकैरवाकर-
कौमुदीत्यभिधानायां स्वोपज्ञानेकार्थसंग्रहटीकायां
चतुःस्वरकाण्डश्चतुर्थः ॥४॥

---

१. महासहा स्यादम्लानकुसुमे माषपर्ण्यपि । वरारोहो० ।

॥ अथ पञ्चमः काण्डः ॥

स्यादाच्छुरितकं हासनखघातविशेषयोः ।
[1]कक्षावेक्षकः शुद्धान्तपालकोद्यानपालयोः ॥ १ ॥
द्वाःस्थे पिङ्गे कवौ रङ्गाजीवेऽथ कटखादकः ।
खादके काचकलशे शृगालबलिपुष्टयोः ॥ २ ॥
कृमिकण्टकं चित्रायामुदुम्बरविडङ्गयोः ।
स्याद्गोजागरिकं भक्ष्यकारके मङ्गलेऽपि च ॥ ३ ॥
चिलमीलिका खद्योते कण्ठीभेदे तडित्यपि ।
जलकरङ्कः स्यान्मेघे नालिकेरतरोः फले ॥ ४ ॥

अर्हं । अथ पंचमं पंचस्वरं काण्डमारभ्यते । तत्रादौ **कान्ताः** । **स्यादाच्छुरितकं हासनखघातविशेषयोः** । आच्छुरणमाच्छुरितकम् । हासविशेषे सोत्प्रासहासे यथा—गौरीकृताच्छुरितकं रतये बभूव । नखघातविशेषे यथा—अङ्गुष्ठाग्रेण बुद्धैः कररुहनिकरैर्यत्कृतं स्वल्परेखम् । देहे रोमांचकारि प्रभवति नितरां स्पर्शमात्राद्द्रवेषु । तत्कर्त्तव्यं प्रवीणैरुरसिजयुगले मन्द—सीत्कारयुक्तम् । हन्वोरन्ते च नाम्नाच्छुरितकमुदितं कामभोगप्रधानम् । **कक्षावेक्षकः शुद्धान्तपालकोद्यानपालयोः । द्वाःस्थे पिङ्गे कवौ रङ्गाजीवे** । कक्षाया अवेक्षकः । कक्षावेक्षकः । वाच्यलिङ्गः ॥ १ ॥ **अथ कटखादकः । खादके काचकलशे शृगालबलिपुष्टयोः** । कटं भृशं शवं वा खादति कटखादकः । खादके वाच्यलिङ्गः ॥ २ ॥ **कृमिकण्टकं चित्रायामुदुम्बरविडङ्गयोः** । कृमीणां कण्टकं कृमिकण्टकम् । चित्रा ओषधिः । **स्याद्गोजागरिकं भक्ष्यकारके मङ्गलेऽपि च** । गोजागरोऽस्त्यत्र गोजागरिकम् । अतोऽनेकस्वरादितीकः । भक्ष्यकारके वाच्यलिङ्गः ॥३॥ **चिलमीलिका खद्योते कण्ठीभेदे तडित्यपि** । चिलति चिलः । नाम्युपान्त्येति । (५-१-५४) कः । तं मीलयति—चिलमीलिका ।

१. उपकारिका पिष्टभेदोपकारेश्मवेश्मसु । कक्षा०

*नवफलिका तु नवे नवरजःस्त्रियामपि ।
नागवारिको गणिस्थराजे राजेभहस्तिपे ॥ ५ ॥
चित्रमेखले गरुडेऽप्यथ स्याद्व्यवहारिका ।
लोकयात्रेङ्गुदीवर्द्धनीष्वथ व्रीहिराजिकः ॥ ६ ॥
चीनान्ने कामलिकायामप्यथो शतपर्व्विका ।
स्याद्वचादूर्वयोः शीतचम्पकौ दीपतर्पणौ ॥ ७ ॥
हेमपुष्पकश्चम्पके हेमपुष्पिका यूथिका ।
मलिनमुखस्तु गोलाङ्गूले प्रेतेऽनले खले ॥ ८ ॥

जलकरङ्कः स्यान्मेघे नालिकेरतरोः फले । शंखे । जलस्य करङ्को जलकरङ्कः ॥ ४ ॥ **नवफलिका तु नवे नवरजःस्त्रियाम्** । नवफलमेव नवं फलं यस्या वा नवफलिका । **नागवारिको गणिस्थराजे राजेभहस्तिपे । चित्रमेखले गरुडेऽपि** । नागान् वारयति नागवारिकः । कुशकेति साधुः । गणिस्थराजो वृक्षः ॥ ५ ॥ चित्रमेखलो मयूरः । **अथ स्याद्व्यवहारिका । लोकयात्रेङ्गुदीवर्द्धनीषु** । व्यवहरति व्यवहारिका । वर्द्धनी सम्मार्जनी । **अथ व्रीहिराजिकः चीनान्ने कामलिकायामपि** । व्रीहिवद्राजयोऽस्य व्रीहिराजिकः ॥६॥ कामलिका रोगविशेषः । **अथो शतपर्व्विका । स्याद्वचादूर्वयोः** । शतं पर्व्वाण्यस्याः शतपर्व्विका । **शीतचम्पकौ दीपतर्पणौ** । शीतश्चासौ चम्पकश्च शीतचम्पकः । दीपे तर्पणे च ॥७॥ **हेमपुष्पकश्चम्पके** । हेमवर्णानि पुष्पाण्यस्य हेमपुष्पकः । यथा—मधौ वनं राजति हेमपुष्पकैः । **हेमपुष्पिका यूथिका** । पीतवर्णेति शेषः ॥ अथ खान्ताः । **मलिनमुखस्तु गोलाङ्गूले प्रेतेऽनले खले** । मलिनं मुखमस्य मलिनमुखः । खले वाच्यलिङ्गः । गोलाङ्गूले यथा—मलिनमुखसहस्रैर्वेष्टयामास लङ्कां ॥ ८ ॥ **शीतमयूखः कर्पूरे चन्द्रे** ।

* मु. मू. । शङ्खे जललतायाश्च जलनायको मत्स्यके । काकोच्यां राजशफरे नवफलिका नूतने । नवजातरजोनार्यामप्यथो नागवारिकः सुवसन्तक इत्येष वासन्त्यां मदनोत्सवे हेम०

शीतमयूखः कर्पूरे चन्द्रेऽथ सर्वतोमुखः ।
विधावात्मनि रुद्रे च सर्वतोमुखमम्बु खम् ॥ ९ ॥
कथाप्रसङ्गो वातूले विषस्य च चिकित्सके ।
नाडीतरङ्गः काकोले हिण्डके रतहिण्डके ॥ १० ॥
रतनारीचो मन्मथे शुनि स्त्रीणां च सीत्कृतौ ।
ऋषभध्वजः प्रथमजिनेन्द्रे शशिशेखरे ॥ ११ ॥

शीता मयूखा अस्य शीतमयूखः । चन्द्रे यथा—सन्तोऽप्यसन्त इति चेत्प्रतिभान्ति भानो भासावृते नभसि शीतमयूखमूख्याः । अथ **सर्वतोमुखः** । **विधावात्मनि रुद्रे च** । सर्वतो मुखमस्य सर्वतोमुखः । विधौ ब्रह्मणि यथा—अथ सर्वस्य धातारं सर्वे ते सर्वतोमुखम् । **सर्वतोमुखमम्बु खम्** ॥ ९ ॥ अम्बुनि यथा—प्रभाते सोऽथ राजेन्द्रो वन्दित्वा सर्व्वतोमुखम् । खं व्योम ॥ ९ ॥

॥ अथ गान्ताः ॥

कथाप्रसङ्गो वातूले विषस्य च चिकित्सके । कथायां प्रसङ्गोऽस्य कथाप्रसङ्गः । वाच्यलिङ्गः । विषयस्य चिकित्सके—यथा कथाप्रसङ्गेन जनैरूदाहृतादनुस्मृताखण्डलसूनुविक्रमः । तवाभिधानाद्व्यथते नताननः सुदुःसहान्मंत्रपदादिवोरगः । **नाडीतरङ्गः काकोले हिण्डके रतहिण्डके** । नाड्यां तरङ्गा अस्य नाडीतरङ्गः । काकोलः काकः । रतहिण्डकः कामुकः । तत्र हिण्डके वाच्यलिङ्गः ॥ १० ॥

॥ अथ चान्ताः ॥

रतनारीचो मन्मथे शुनि स्त्रीणां च सीत्कृतौ । रताय नारीमञ्चति रतनारीचः । अणि पृषोदरादित्वात् ।

॥ अथ जान्तौ ॥

ऋषभध्वजः प्रथमजिनेन्द्रे शशिशेखरे । ऋषभो ध्वजोऽस्य ऋषभध्वजः । द्वयोर्यथा—स श्रीमानृषभध्वजः प्रतिकलं स्वःश्रेयसायास्तु वः ॥११॥ **मुनिभेषजं-**

मुनिभेषजंस्त्वगस्तिपथ्यायां लङ्घनेऽपि च ।
दशनोच्छिष्टो निःश्वासे चुम्बने दन्तवाससि ॥ १२ ॥
अवग्रहणं रीढायां रोधनेऽथाऽवतारणम् ।
वस्त्राञ्चलार्चने भूतावेशेऽथ प्रविदारणम् ॥ १३ ॥
दारणे युधि च परिभाषणं तु प्रजल्पने ।
नियमे निन्दोपालम्भोक्तौ चाथो मत्तवारणः ॥ १४ ॥
प्रासादवीथीवरण्डे मत्तहस्तिन्यपाश्रये ।
मण्डूकपर्णोऽरलुकशोणकयोः कपीतने ॥ १५ ॥

त्स्त्वगस्तिपथ्यायां लङ्घनेऽपि च । मुनीनां भेषजं मुनिभेषजम् । अगस्तिपथ्या हरीतकीभेदः ।

॥ अथ टान्ताः ॥

दशनोच्छिष्टो निःश्वासे चुम्बने दन्तवाससि । दशनैरुच्छिष्टो दशनोच्छिष्टः । चुम्बने यथा—रेवती दशनोच्छिष्टपरिपूतपुटे दृशौ । दन्तवासा अधरः ॥ १२ ॥

॥ अथ णान्ताः ॥

• **अवग्रहणं रीढायां रोधने** । अवगृह्यते अवग्रहणं । रीढा अवज्ञा । **अथावतारणम्** । **वस्त्राञ्चलार्चने भूतावेशे** । अवतार्यते अवतारणम् । वस्त्रांचलार्चने यथा—सामानिकादिदेवीभिः क्रियमाणोऽवतारणः । **अथ प्रविदारणम्** । **दारणे युधि च** । प्रविदार्यते प्रविदार्यतेऽस्मिन्वा प्रविदारणम् । द्वयोर्यथा—बिभ्यति प्रविदारणात् ॥ १३ ॥ **परिभाषणं तु प्रजल्पने** । **नियमे निन्दोपालम्भोक्तौ च** । परिभाष्यते परिभाषणम् । निन्दायां उपालम्भस्योक्तिः । त्रिष्वपि यथा—बाला इव प्रवर्त्तन्ते कृतेऽपि परिभाषणे । **अथो मत्तवारणः** । **प्रासादवीथीवरण्डे मत्तहस्तिन्यपाश्रये** । मत्तान् वारयति मत्तवारणः ॥१४॥ अपाश्रयो गवाक्षः । त्रिष्वपि यथा—राजते राजवेश्मेदं सर्वतो मत्तवारणैः । **मण्डूकपर्णोऽरलुकशोणकयोः कपीतने** । मण्डूकवत्पर्णान्यस्य मण्डूकपर्णः । त्रयोऽपि

मण्डूकपर्णी मञ्जिष्ठाब्रीह्योर्गोजिह्विकौषधे ।
स्याद्रोमहर्षणाख्या तु रोमोद्गमे विभीतके ॥१६॥
वातरायणः क्रकचे सायके शरसंक्रमे ।
निष्प्रयोजननरे चापि, (चाप्य) अवलोकितमीक्षिते ॥१७॥
[1]अवलोकितस्तु बुद्धेऽपराजितोऽच्युते हारे ।
अजितेऽपराजिता तु दुर्गा श्वेता जयन्त्यपि ॥ १८ ॥
उपधूपित आसन्नमरणे धूपितेऽपि च ।
स्याद्गणाधिपतिर्विघ्ननायके पार्व्वतीपतौ ॥ १९ ॥

वृक्षाः । शोणकोऽरलुकभेदः ॥१५॥ **मण्डूकपर्णी मञ्जिष्ठाब्रीह्योर्गोजिह्विकौषधे** । पाककर्णीति ङीः । तिस्रोऽपि ओषधयः । **स्याद्रोमहर्षणाख्या तु रोमोद्गमे विभीतके** । रोमाणि हर्षयति रोमहर्षणम् । रोमोद्गमे यथा—स्वेदबिन्दुततिलांछितालिकः सर्वतो विततरोमहर्षणः ॥ १६ ॥ **वातरायणः क्रकचे सायके शरसंक्रमे । निष्प्रयोजननरे चापि** । वातमियर्त्ति वातरायणः । विदनगगनेति (उ. २७५) साधुः । सायको बाणः । शरसंक्रमः शरसेतुः ।

॥ अथ तान्ताः ॥

अवलोकितमीक्षिते । अवलोक्यते अवलोकितम् । यथा- गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ १७ ॥ **अवलोकितस्तु बुद्धे** । बुद्धः सुगतविशेषः । **अपराचितोऽच्युते हारे । अजिते** । न पराजीयते अपराजितः । अजिते वाच्यलिङ्गः । त्रिष्वपि यथा—त्रिलोकी रक्षिता येन स जयत्यपराजितः । **अपराजिता तु दुर्गा श्वेता जयन्त्यपि** । दुर्गा चण्डी, श्वेता गिरिकर्णिका । जयन्ती ओषधिः ॥ १८ ॥ **उपधूपित आसन्नमरणे धूपितेऽपि च** । उपधूप्यते उपधूपितः । वाच्यलिङ्गः । **स्याद्गणाधिपतिर्विघ्ननायके पार्व्वतीपतौ** । गणानामधिपतिर्गणाधिपतिः । विघ्ननायके यथा—सर्व्वविघ्नच्छिदे तस्मै गणाधिपतये नमः । पार्व्वतीपतौ यथा—कलया तुषारकिरणस्य पुरः परिमन्दभिन्नतिमि-

१. समुद्धरणं वान्तान्ने जलस्योद्धारणे ग्रहे । अव०

पृथिवीपतिस्तु भूपे कृतान्ते ऋषभौषधे ।
मूर्द्धाभिषिक्तः प्रधानक्षत्रियक्षितिपालयोः ॥ २० ॥
[1]यादसांपतिः पाशयब्ध्योः वसन्तदूत आम्रके ।
पिके पञ्चमरागे वसन्तदूत्यति मुक्तके ॥ २१ ॥

रौघजटं क्षणमभ्यपद्यत जनैर्मृषा गगनं गणाधिपतिमूर्त्तिरिति ॥१९॥ **पृथिवीपतिस्तु भूपे कृतान्ते ऋषभौषधे** । पृथिव्यां पतिः पृथिवीपतिः । भूपे यथा—स गण्डपालीं बिसदण्डपाण्डुरां ददर्श देव्याः पृथिवीपतिस्ततः । **मूर्द्धाभिषिक्तः प्रधानक्षत्रियक्षितिपालयोः** । मूर्द्धन्यभिषिच्यते स्म मूर्द्धाभिषिक्तः । त्रिष्वपि यथा—मूर्द्धाभिषिक्तशतसंश्रितपादपद्मः ॥ २० ॥ **यादसांपतिः पाशयब्ध्योः** । पाशी वरुणः, द्वयोः यादसां जलचराणां पतिर्यादसाम्पतिः । बाहुलकादलुप् । यथा—यादसांपतिरपारपयोभिः । **वसन्तदूत आम्रके पिके पञ्चमरागे** । वसन्तस्य दूत इव वसन्तदूतः । त्रिष्वपि यथा—वसन्तदूतज्वरिता वियोगिनः । **वसन्तदूत्यतिमुक्तके । पाटलायां** । अतिमुक्तको माधवी ॥ २१ ॥

॥ अथ दान्तः ॥

अथ सहस्रपादो यज्ञपुरुषे कारण्डसूर्ययोः । सहस्रं पादाऽस्य सहस्रपादः । समासान्तविधेरनित्यत्वात्पाद्भावाभावः । सहस्रं पद्यते वा कर्म्मणोऽण् । यज्ञपुरुषो विष्णुः । कारण्डः पक्षिभेदः । यज्ञपुरुषसूर्ययोर्यथा—नमः सहस्रपादाय तमःस्तोमविघातिने ।

॥ अथ धान्तः ॥

योजनगन्धा व्यासमातरि । कस्तूरीशीतयोश्च । योजनगामी गन्धोऽस्या योजनगन्धा । व्यासमातरि यथा—तस्यास्तु योजनाद्गन्धमाजिघ्रन्ति नरा भुवि । तेन योजनगन्धेति नाम तस्याः प्रतिश्रुतम् ॥ २२ ॥

१. यादसांपतिरम्भोधौ प्रतीचीदिग्पतावपि ।

पाटलायामथ सहस्रपादो यज्ञपुरुषे ।
कारण्डसूर्ययोः योजनगन्धा व्यासमातरि ॥ २२ ॥
कस्तूरीशीतयोश्चातिसर्जनं वधदानयोः ।
अपवर्जनं निर्वाणे परित्यागे विहायिते ॥ २३ ॥
अभिनिष्टानस्तु वर्णे विसर्गेऽथानुवासनम् ।
स्नेहने धूपने चान्तावसायी श्वपचे मुनौ ॥ २४ ॥
स्यादुपस्पर्शनं स्नाने स्पर्शाचमनयोरपि ।
उपसम्पन्नं पर्याप्ते सत्कृतप्राप्तयोर्मृते ॥ २५ ॥

॥ अथ नान्ताः ॥

अतिसर्जनं वधदानयोः । अतिसृज्यते अतिसर्जनम् । वधे यथा–त्यजेत्प्राण्यतिसर्जनम् । दाने यथा–प्रार्थनार्थरहितं तदा भवदीयतामितिवचोऽतिसर्जने । **अपवर्जनं निर्वाणे परित्यागे विहायिते ।** अपवृज्यते अपवर्जनम् । निर्वाणे यथा-उद्यम्यते मुनिजनैरपवर्जनाय । परित्यागे यथा–विधेयं सर्वदा विज्ञैर्दुर्जनस्यापवर्जनम् । विहायितं दानं, तत्र यथा–भोगाढ्यं सफलयत्यपवर्जनाद्वा ॥ २३ ॥ **अभिनिष्टानस्तु वर्णे विसर्गे ।** अभि निष्टन्यते अभिनिष्टानः । कर्मणि घञ् । अभिनिष्टान इति षत्वं । वर्णोऽक्षरं, विसर्गस्तद्भेदो बिन्दुद्वयम् । तयोर्यथा- अश्वकण्ठेषु मण्यल्पोऽभिनिष्टानावलीनिभाः । **अथानुवासनं स्नेहने धूपने च ।** अनुवास्यते अनुवासनम् । **अन्तावसायी श्वपचे मुनौ ।** अन्तमवस्यति अन्तावसायी । नापितेऽपि । तत्र श्वपचे च यथा अन्तावशायिसंस्पर्शे स्नानं नैमित्तिकं स्मृतम् । २४ ॥ **स्यादुपस्पर्शनं स्नाने स्पर्शाचमनयोरपि ।** उपस्पृश्यते उपस्पर्शनं यथा । स्नानाचमनयोर्यथा–कृतोपस्पर्शने शुचौ । स्पर्शे- यथा–यूपोपस्पर्शने स्नानं । **उपसम्पन्नं पर्याप्ते सत्कृतप्राप्तयोर्मृते ।** उपसम्पद्यते स्म उपसम्पन्नं । वाच्यलिङ्गः । चतुर्ष्वपि यथा–उपसम्पन्नं पथिकैरुपसम्पन्नं निरीक्ष्य वियदभ्रैः ॥ २५ ॥ **कलानुनादी चटके चंचरीके कपिंजले ।**

कलानुनादी चटके चञ्चरीके कपिजले ।
गन्धमादनः कप्यद्रिभिदोरलिनि गन्धके ॥ २६ ॥
गन्धमादनी सुरायामथ जायानुजीविनः ।
बकाश्विन नटदुःस्थाः स्याद्धूमकेतनोऽनले ॥ २७ ॥
ग्रहभेदे च प्रतिपादनं बोधनदानयोः ।
पद्मलाच्छनो धनदे लोकेशे रविवेधसोः ॥ २८ ॥
पद्मलाच्छना तारायां सरस्वत्यां श्रियामपि ।
पीतचन्दनं स्याद्धरिद्रायां काश्मीरजन्मनि ॥ २९ ॥

कलं मनोज्ञमनुनदति कलानुनादी । त्रयोऽपि पक्षिणः । चंचरीके स्त्रीपुंसः । **गन्धमादनः कप्यद्रिभिदोरलिनि गन्धके ।** गन्धेन मदयति गन्धमादनः । रम्यादित्वादनटि बाहुलकात् । ह्रस्वाभावः । अद्रिभिदि पुंक्लीबः । तत्र यथा–त्वामियं स्थितिमतीमुपस्थिता गन्धमादनवनाधिदेवता । अलिनि भ्रमरे स्त्रीपुंसः ॥२६॥ **गन्धमादनी सुरायां ।** टीत्वाङ्गीः । **अथ जायानुजीविनः । बकाश्विननटदुःस्थाः ।** जायामनुजीविनः जायानुजीविनः । चतुर्ष्वर्थेषु । अश्विनौ अश्विनीकुमारौ । **स्याद्धूमकेतनोऽनले । ग्रहभेदे च ।** धूमः केतनमस्य धूमकेतनः । द्वयोर्यथा–धूमकेतनरुचा विजृम्भितम् ॥२७॥ **प्रतिपादनं बोधनदानयोः ।** प्रतिपाद्यते प्रतिपादनः । बोधने यथा–शास्त्रस्य शिष्यप्रतिपादनं यथा । दाने यथा- फलं हि पात्रप्रतिपादनं श्रियः । **पद्मलाञ्छनो धनदे लोकेशे रविवेधसोः ।** पद्मं लाञ्छनमस्य पद्मलाञ्छनः । लोकेशः शम्भुः । चतुर्ष्वपि यथा–पुष्णातु भक्तिनिष्णानां वाञ्छितं पद्मलाञ्छनः ॥ २८ ॥ **पद्मलाञ्छना तारायां सरस्वत्यां श्रियामपि ।** तारा बौद्धानां देवी । **पीतचन्दनं स्याद्धरिद्रायां काश्मीरजन्मनि ।** पीतं च तच्चन्दनं च पीतचन्दनं । द्वयोर्यथा–पीतचन्दनपिशंगितं वपुः ॥ २९ ॥ **महारजनं कुसुम्भे स्वर्णे ।** रज्यतेऽनेन रञ्जनं । तुदादिवृजिरंजीति (उ० २७३) किदनः । महच्च तद्रजनं च महा–

महारजनं कुसुम्भे स्वर्णेऽथ मधुसूदनः ।
भ्रमरे केशवे मृत्युवञ्चनः श्रीफले हरे ॥ ३० ॥
द्रोणकाकेऽप्यथ वरचन्दनं देवदारुणि ।
कालेये वरवर्णिन्यङ्गनालाक्षाप्रियङ्गुषु ॥ ३१ ॥
रोचनायां हरिद्रायामथ स्याच्छकुलादनी ।
कट्वां मांसी पिचुलिका जलपिप्पलिकासु च ॥ ३२ ॥
शालाङ्कायनो नन्दूदृष्योः [1]स्याच्छ्वेतवाहनः शशी ।
पार्थोऽथ सहस्रवेधी चुक्रे सहस्रवेधि तु ॥ ३३ ॥

रजनं । द्वयोर्यथा—महारजनराजिता शुकवतीव संध्यावधूः । **अथ मधुसूदनः । भ्रमरे केशवे** । मधुं सूदितवान् मधुसूदनः । द्वयोर्यथा—कोऽयं द्वारि हरिः प्रयाह्युपवनं शाखामृगस्यात्र किं कृष्णोऽहं दयिते बिभेमि सुतरां कृष्णादहं वानरात् । कान्तेऽहं मधुसूदनो व्रज लतां तामेव मध्वन्वितामित्थं निर्वचनीकृतो दयितया ह्रीतो हरिः पातु वः । **मृत्युवञ्चनः श्रीफले हरे । द्रोणकाकेऽपि** । मृत्युं वञ्चयति मृत्युवञ्चनः । श्रीफलो बिल्वः । त्रिष्वपि यथा—मृत्युवञ्चनपत्रैर्यः पूजयेन्मृत्युवञ्चनं स मृत्युवंचन इव चिरायुर्जायते नरः ॥ ३० ॥ **अथ वरचन्दनं देवदारुणि । कालेये** । वरं चन्दनं वरचन्दनम् । देवदारुणि यथा—कर्णे नवानि वरचन्दनपल्लवानि । कालेये कुंकुमे यथा—भालस्थलीषु वरचन्दनमण्डनानि । **वरवर्णिन्यङ्गनालाक्षाप्रियङ्गुषु । रोचनायां हरिद्रायां** । वरवर्णोऽस्त्यस्या वरवर्णिनी । अङ्गनायां यथा—एतां विहाय वरवर्णिनि ताम्रपर्णीं नान्यत्र सम्भवति मौक्तिककामधेनुः । शेषा ओषधयः ॥ ३१ ॥ **अथ स्याच्छकुलादनी । कट्वां मांसी पिचुलिका जलपिप्पलिकासु च** । शकुलानत्ति शकुलादनी । रम्यादित्वादनटि ङीः (५-३-१२६) । सर्वा ओषधयः ॥ ३२ ॥ **शालाङ्कायनो नंदूदृष्योः** । शलङ्कोरपत्यं शालङ्कायनः । क्रोष्टृशलङ्कोर्न लुक्चेति (६-१-५६) आयनण् । अन्तलुक् च । नन्दी हरप्रतीहारः । ऋषिर्मुनि-

[1] शिवकीर्तिनशब्दस्तु भृङ्गरीटेऽसुरद्विषि । श्वेत० ।

हिङ्गौ [1]चामरपुष्पस्तु केतके चूतकाशयोः ।
गोरक्षजम्बूर्गोधूमधान्ये गोरक्षतण्डुले ॥ ३४ ॥
धूलीकदम्बस्तिनिशे नीपे वरुणपादपे ।
शृगालजम्बूर्गोडुम्बे फले च बदरीतरोः ॥ ३५ ॥
अभ्युपगमः समोपागमने स्वीकृतावपि ।
नक्षत्रनेमिः शीतांशुरेवत्यौत्तानपादिषु ॥ ३६ ॥

विशेषः । **स्याच्छ्वेतवाहनः शशी पार्थः** । श्वेतं वाहनमस्य श्वेतवाहनः । **अथ सहस्रवेधी चुक्रे** । सहस्रं वेधयति सहस्रवेधी । चुक्रोऽम्लवेतसः । **सहस्रवेधि तु । हिङ्गौ** । हिंङ्गु रामठं । पुंसीत्यन्ये । अथ पान्ताः ॥ ३३ ॥ **चामरपुष्पस्तु केतके चूतकाशयोः** । चामरवत्पुष्पमस्य चामरपुष्पः ।

॥ अथ वान्ताः ॥

गोरक्षजम्बूर्गोधूमधान्ये गोरक्षतण्डुले । गोरक्षाणां जम्बूरिव गोरक्षजम्बूः ॥ ३४ ॥ **धूलिकदम्बस्तिनिशे नीपे वरुणपादपे** । धूल्याः कदम्बो धूलीकदम्बः । नीपे यथा— धूलीकदम्बपरिधूसरदिङ्मुखस्य । **शृगालजम्बूर्गोडुम्बे फले च बदरीतरोः** । शृगालस्य जम्बूरिव शृगालजम्बूः गोडुम्ब ओषधम् ॥ ३५ ॥

॥ अथ मान्तौ ॥

अभ्युपगमः समोपागमने स्वीकृतावपि । अभ्युपगम्यते अभ्युपगमः । स्वीकृतौ यथा—करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः । **नक्षत्रनेमिः शीतांशुरेवत्यौत्तानपादिषु** । नक्षत्राणां नेमिरिव नक्षत्रनेमिः । शीतांशुरिन्दुः । रेवतीभम् । औत्तानपादिर्ध्रुवः ॥ ३६ ॥

[1] हरिचन्दनमाख्यातं गोशीर्षे देवपादपे । हरिवाहन इत्युक्तो भास्करामरनाथयोः । भवेच्चामर पुष्पस्तु ।

कालानुसार्यं शैलेये कालिये शिंशपातरौ ।
अथ स्याद् दुग्धतालीयं दुग्धाग्रं दुग्धफेनयोः ॥ ३७ ॥
[1]वृषाकपायी जीवन्त्यां शतावर्युमयोः श्रियां ।
उत्पलपत्रं उत्पलदले स्त्रीणां नखक्षते ॥ ३८ ॥

॥ अथ यान्ताः ॥

कालानुसार्यं शैलेये कालीये शिंशपातरौ । कालेनानुस्रियते कालानुसार्यम् । शैलेयं धातुविशेषः । कालीयं गन्धद्रव्यम् । **अथ स्याद्दुग्धतालीयं दुग्धाग्रं दुग्धफेनयोः ।** दुग्धं ताडयति दुग्धतालीयम् । गयहृदयादय (उ०३७०) इति साधु । दुग्धाग्रं दुग्धसारः ॥३७॥ **वृषाकपायी जीवन्त्यां शतावर्युमयोः श्रियां ।** वृषाकपेर्भार्या वृषाकपायी । पूतक्रत्विति (२-४-६०) डीः एचान्तस्य । जीवन्तीशतावर्यावोषधी । तयोर्वृषाकपायीव वृषाकपायी । उमायां यथा—वसत्यजस्रं विहरान् वनान्तरे । वृषाकपायी सहितो वृषध्वजः । श्रियां यथा—वृषाकपायी यदि हेलया पदं ददाति गण्याः क्व भवादृशास्ततः । वृषाकपिशब्दस्याग्न्याद्यनेकार्थत्वात् । धवयोगात्तद्भार्यासु स्वाहादिष्वपि वृषाकपायी शब्दः प्रयुज्यते । तत्र स्वाहायां यथा—वन्द्या वृषाकपायीति । इन्द्राण्यां यथा—वृषाकपायीमभ्येति सत्रपः किं न गौत्रभित् । ऋषिविशेषभार्यायां यथा—वृषाकपायीजलसेकवर्द्धितैर्मनोहरैराश्रमवृक्षकैरिमम् ।

॥ अथ रान्ताः ॥

उत्पलपत्रं, उत्पलदले स्त्रीणां नखक्षते । उत्पलस्य पत्रमिव वा उत्पलपत्रम् । उत्पलदले यथा—धारांशितां रामपरश्वधस्य सम्भावयत्युत्पलपत्रसाराम् । स्त्रीणां नखक्षते यथा—उत्पलपत्राकाराणि यानि कररुहपदानि तत्कथितम् । उत्पलपत्रकमुचितं कांची मार्गेऽथ कक्षासु ॥ ३८ ॥ **कपिलधारा त्रिदशापगायां तीर्थभिद्यपि ।** कपिलस्य धारा कपिलस्य धाराऽत्र वा कपिल-

1. भवेत्प्रवचनीयाख्या प्रवाच्ये च प्रवक्तरि । वृषा०

कपिलधारा त्रिदशापगायां तीर्थभिद्यपि ।
तमालपत्रं तिलके तापिच्छे पत्रकेऽपि च ॥ ३९ ॥
तालीशपत्रन्तु तामलक्यां तालीशके क्वचित् ।
पादचत्वरः करके परदोषैकभाषिणि ॥ ४० ॥
सैकते छगलेऽश्वत्थद्रुमेऽथ पांसुचामरः ।
वर्द्धापके प्रशंसायां दूर्वाञ्चिततटी भुवि ॥ ४१ ॥
पुरोटौ धूलिगुच्छे पीतकावेरं तु कुङ्कुमे ।
पित्तले वस्वोकसारा त्विन्द्रस्य धनदस्य च ॥ ४२ ॥

धारा । **तमालपत्रं तिलके तापिच्छे पत्रकेऽपि च ।** तमालश्च तत्पत्रं च तमालस्य पत्रं पत्रमिव वा तमालपत्रम् । तापिच्छस्तमालः । पत्रकं सुगन्धिद्रव्यम् । त्रिष्वपि यथा—तमालपत्रं मृगनाभिगन्धि वनान्तलक्ष्म्या वदने विभाति ॥ ३९ ॥ **तालीश(स)पत्रं तु तामलक्यां तालीशके क्वचित् ।** तालीसवत्पत्रं यस्य तालीसपत्रम् । द्वावपि वृक्षभेदौ । क्वचित्तालीसके लक्ष्यानुसारेण । **पादचत्वरः करके परदोषैकभाषिणि । सैकते छगले अश्वत्थद्रुमे ।** पादे पादस्य वा चत्वरमस्यास्माद्वा पादचत्वरः । परदोषैकभाषिणि वाच्यलिङ्गः ॥ ४० ॥ **अथ पांसुचामरः । वर्द्धापके प्रशंसायां दूर्वाञ्चिततटीभुवि । पुरोटौ धूलिगुच्छे ।** पांसुमिश्रं चामरमस्य पांसुचामरः । पुरोटिर्नद्यादौ पूरानीतकचवरः ॥ ४३ ॥ **पीतकावेरं तु कुङ्कुमे, पित्तले ।** कावेरी देवताऽस्य कावेरं । पीतं च तत्कावेरं च पीतकावेरं । **वस्वोकसारा त्विन्द्रस्य धनदस्य च । नलिनो पुर्यौः ।** वसुयुक्तानि ओकांसि सारमस्यां वस्वोकसारा । पृषोदरादित्वात् । इन्द्रधनदपुर्योर्यथा—वस्वोकसारामभिभूयसाहं सौराज्यबद्धोत्सवया विभूत्या समग्रशक्तौ त्वयि सूर्यवंश्ये सति प्रपन्ना करुणामवस्थाम् ॥ ४२ ॥ **विप्रतिसारस्त्वनुशये रुषि कौ कृत्ये ।** विप्रति स्रियते विप्रतिसारः । अनुशयः पश्चात्तापः । रुट् कोपः । तयोर्यथा—प्रापि चेतसि स विप्रतिसारे सुभ्रुवामवसरः सरकेण । कुः

नलिनीपुर्योर्विप्रतिसारस्त्वनुशये रुषि ।
कौ कृत्ये सर्वतोभद्रस्त्वोकोभित् काव्यचित्रयोः ॥ ४३ ॥
निम्बेऽथ सर्वतोभद्रा गम्भार्यां नटयोषिति ।
समभिहारस्त्वाभीक्ष्ण्ये भृशार्थेऽथासुतीबलः ॥ ४४ ॥
शौण्डिके यज्वन्युद्दण्डपालो मत्स्याहिभेदयोः ।
स्यादेककुण्डलो बलभद्रे किम्पुरुषेश्वरे ॥ ४५ ॥
कूपीटपालस्तु केनिपाते जलनिधावपि ।
स्यात्पाण्डुकम्बलः श्वेतकम्बलग्रावभेदयोः ॥ ४६ ॥

पृथिवी । कृत्यं कार्यं । **सर्वतोभद्रस्त्वोकोभित्काव्यचित्रयोः । निम्बे ।** सर्वतोभद्राण्यस्य सर्वतोभद्रः । व्यूहभेदकल्याणवतोरपि । चित्रकाव्यव्यूहभेदयोर्यथा—विषमं सर्वतोभद्रचक्रगोमूत्रिकाभिदिः । श्लोकैरिव महाकाव्यं व्यूहैस्तदभवद्बलं । ओकोभिदि कल्याणवति च यथा—स्वेच्छाप्रवेशा वाचस्ताः सर्वतोभद्रतां गताः ॥ ४३ ॥ **अथ सर्वतोभद्रा गम्भार्यां नटयोषिति ।** गम्भारी श्रीपर्णीवृक्षः । **समभिहारस्त्वाभीक्ष्ण्ये भृशार्थे ।** समभिहरणं समभिहारः । द्वयोर्यथा—क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ।

॥ अथ लान्ताः ॥

अथासुतीबलः । शौण्डिके यज्वनि । आसुतिः सन्धानं विद्यतेऽस्य आसुतीबलः । कृष्यादित्वाद् वलच् (७-२-२७) । पित्रादेरिति दीर्घः । द्वयोर्यथा—आसुतीबलशालात्र क्व देशे तु सुरांचिता । इति होत्रार्थितश्छात्रः शुण्डास्थानमदर्शयत् ॥ ४४ ॥ **उद्दण्डपालो मत्स्याहिभेदयोः ।** उद्युक्तो दण्डपालोऽत्र उद्दण्डपालः । मत्स्यभेदेऽहि भेदे च । **स्यादेककुण्डलो बलभद्रे किंपुरुषेश्वरे ।** एकं कुण्डलमस्य एककुण्डलः । द्वयोर्यथा—एककुण्डलयुतं वृषाकपिम् । **कूपीटपालस्तु केनिपाते जलनिधावपि ।** कूपीटं जलं पालयति कूपीटपालः । केनिपातोऽरित्रम् ।

सुरतताली शिरस्स्रग्दूत्योरथाशितम्भवः ।
अन्नादौ तृप्तौ च [1]नभश्चमसश्चन्द्रमाययोः ॥ ४७ ॥
चितायूपे हिङ्गुनिर्यासो हिङ्गुरसनिम्बयोः ।
हिरण्यरेता ज्वलने सहस्रकिरणेऽपि च ॥ ४८ ॥

इत्याचार्यहेमचन्द्रसूरीश्वररचितेऽनेकार्थसंग्रहे
पञ्चस्वरकाण्डः पञ्चमः ॥ ५ ॥

स्यात्पाण्डुकम्बलः श्वेतकम्बलग्रावभेदयोः । पाण्डुश्चासौ कम्बलश्च पाण्डुकम्बलः ॥ ४६ ॥ **सुरतताली शिरःस्रग्दूत्योः ।** सुरतेन ताड्यते सुरतताली ।

॥ अथ वान्ताः ॥

अथाशितम्भवः अन्नादौ तृप्तौ च । आशितस्तृप्तो भवत्यनेन आशितस्य भवनमिति वा । आशितम्भवः । भावे चाशिताद्भुवः खः (५-१-१३०) ॥ द्वयोर्यथा—आशितम्भव मात्रद्र्चा कश्चिच्छेदाशितं भवम् ।

॥ अथ सान्ताः ॥

नभश्चमसश्चन्द्रमाययोः । चितायूपे । नभश्चमति नभश्चमसः । तप्यणीत्यसः ॥ (उ० ५६९) ॥ माया इन्द्रजालम् ॥४७॥ **हिंगुनिर्यासो हिंगुरसनिम्बयोः ।** निर्यस्यते निर्यासः । हिंगोर्निर्यासो हिंगुरिव निर्यासोऽस्येति वा हिंगुनिर्यासः । **हिरण्यरेता ज्वलने सहस्रकिरणेऽपि च ॥ ४८ ॥** हिरण्यं रेतोऽस्य हिरण्यरेताः । ज्वलने यथा—ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।

इत्याचार्यश्रीहेमचन्द्रविरचितायामनेकार्थकैरवाकरकौमुदी—
त्यभिधानायां स्वोपज्ञानेकार्थसंग्रहटीकायां पंचस्वर-
काण्डः पंचमः समाप्तः ॥ ५॥

१. स्यादाषाढभवो भौमे नवीनजलदेऽपि च । स्यान्नभ० ।

॥ अथ षष्ठः काण्डः ॥

ग्राममद्गुरिका युद्धशृङ्ग्योः मातुलपुत्रकः[१] ।
धत्तूरकस्य च फले मातुलस्य च नन्दने ॥ १ ॥
लूतामर्कटकः पुत्रीनवमालिकयोः कपौ ।
वर्णबिलोडकः काव्यच्छाया हृत्सन्धिचौरयोः ॥ २ ॥
सिन्दूरतिलको[२] हस्ती सिन्दूरतिलकाऽङ्गना ।
दोहदलक्षणं गर्भे स्यात्सन्धौ यौवनस्य च ॥ ३ ॥

अर्हं । अथ षष्ठं षट्स्वरकाण्डमारभ्यते । तत्रादौ कान्ताः । **ग्राममद्गुरिका युद्धशृङ्ग्योः** । ग्राममद्गुवत् रायन्ति शब्दायन्ते नरा अत्रेति ग्राममद्गुरिका । कुशिकेति (उ० ४५) साधुः । शृङ्गी ओषधिः । मत्सीभेदो वा । **मातुलपुत्रकः । धत्तूरकस्य च फले मातुलस्य च नन्दने** । मातुलो धतूरो मातुः भ्राता च । तस्य पुत्रो मातुलपुत्रकः । **लूतामर्कटकः पुत्रीनवमालिकयोः कपौ** । लूता-मर्कति दिव्यचीत्यटे के च लूतामर्कटकः । पुत्री ओषधिः । **वर्णबिलोडकः काव्यच्छाया हृत्सन्धिचौरयोः** । वर्णं छायां ब्राह्मणादि वा । विलोडयति वर्ण-विलोडकः । वाच्यलिङ्गः । सन्धिचौरः सुरङ्गाचौरः ॥ २ ॥ **सिन्दूरतिलको हस्ती** । सिन्दूरेण तिलकोऽस्य सिन्दूरतिलकः । **सिन्दूरतिलकाङ्गना** । द्वयो-र्यथा—सिन्दूरतिलकारूढः सिन्दूरतिलकावृतः । स ययौ रन्तुमुद्याने साक्षादिव पुरन्दरः ।

॥ अथ णान्तौ ॥

दोहदलक्षणं गर्भे स्यात्सन्धौ यौवनस्य च । दोहदो लक्षणमस्य दोहद-लक्षणम् । गर्भे यथा—निदानमिक्ष्वाकुकुलस्य सन्ततेः सुदक्षिणादोहदलक्षणं

१. स्यान्मदनशलाका तु सार्यां कामोद्यौषधौ । मातुल० ।
२. स्नानाचिकित्सकश्चातुर्मास्यव्रतकरे नरे । स्नानाचिकित्सकं प्रोक्तं नारीपुष्प-तपस्ययोः । सिन्दूर० ।

यौवनलक्षणं वक्षोरुहे च लवणिम्नि च ।
अर्द्धपारापतश्चित्रकण्ठे स्यात्त्तित्तिरावपि ॥ ४ ॥
प्रत्युद्गमनीयमुपस्थेये धौतांशुकद्वये ।
विष्वक्सेनप्रिया त्रायमाणौषध्यां श्रियामपि[१] ॥ ५ ॥

इत्याचार्यश्रीहेमचन्द्रसूरीश्वरविरचितेऽनेकार्थसंग्रहे
षट्स्वरकाण्डःषष्ठः ॥६॥

दधौ । सन्धौ यौवनस्येति बाल्ययौवनयोः सन्धावित्यर्थः ॥ ३ ॥ **यौवनलक्षणं वक्षोरुहे च लवणिम्नि च** । यौवनस्य लक्षणं यौवनलक्षणं । द्वयोर्यथा—अलङ्कृतां यौवनलक्षणेन दृष्ट्वा मृगाक्षीं मुमुहुर्युवानः ।

॥ अथ तान्ताः ।

अर्द्धपारापतश्चित्रकण्ठे स्यात्तित्तिरावपि । अर्द्धेन पारापतोऽर्द्धपारापतः । द्वावपि पक्षिभेदौ ॥ ४ ॥

॥ अथ यान्तौ ॥

प्रत्युद्गमनीयमुपस्थेये धौतांशुकद्वये । प्रत्युद्गम्यते प्रत्यद्गमनीयम् । उपस्थेये वाच्यलिङ्गः । धौतांशुकद्वये यथा—सा मङ्गलस्नानविशुद्धगात्री गृहीत-प्रत्युद्गमनीयवस्त्रा । **विष्वक्सेनप्रिया त्रायमाणौषध्यां श्रियामपि** । विष्वक्-सेनस्य प्रिया विष्वक्सेनप्रिया । श्रियां यथा- विष्वक्सेनप्रियादेया तुभ्यमभ्य-धिकां श्रियाम् ॥ ५ ॥

इत्याचार्यश्रीहेमचन्द्रसूरीश्वरविरचितायामनेकार्थकैरवाकर-
कौमुदीत्यभिधानायां स्वोपज्ञानेकार्थसंग्रहटीकायां
षट्स्वरकाण्डः षष्ठः समाप्तः ॥६॥

१. विश्वक्सेनप्रिया लक्ष्म्यां त्रायमाणौषधावपि ।
समुद्रनवनीते स्यात्पीयूषे च सुधाकरे ॥

॥ अथ सप्तमः (परिशिष्ट) अव्ययकाण्डः ॥

अथाव्ययानि वक्ष्यन्ते प्राग्वदेव स्वरक्रमात् ॥
अ स्वल्पार्थेऽप्यभावेऽपि स्यादास्मरणवाक्ययोः ॥ १ ॥
आङीषदर्थेऽभिव्याप्तौ क्रियायोगेऽवधावपि ।
आं स्यादविस्मृत्योराः सन्तापप्रकोपयोः ॥ २ ॥

अर्हं । अथ सप्तममनेकार्थशब्दशेषमनेकार्थाव्ययकाण्डमारभ्यते । **अथाव्ययानि वक्ष्यन्ते प्राग्वदेव स्वरक्रमात्** । अथेति षट्काण्ड्यनन्तरमव्ययानि भण्यन्ते । अत्र पूर्ववदेव स्वराद्याद्यन्त क्रमो विज्ञेयः । तत्रादौ एकस्वराः । तत्र च अकारः । **अः स्वल्पार्थेऽप्यभावेऽपि** । अतति अटति वा । कचिदिति । डे । स्वल्पार्थे यथा—अल्पमपि प्रत्याख्यानमावृणन्ति अप्रत्याख्यानावरणाः क्रोधादयः । अभावे यथा—असंशयं क्षत्रपरिग्रहक्षमा । अथ आकारौ । **स्यादास्मरणवाक्ययोः** ॥ १ ॥ अनिति आ । डिदिति (उ० ६०५) आप्रत्ययः । स्मरणे यथा—आ ज्ञातं मधुलम्पटैर्म्मधुकरैराबद्धकोलाहले नूनं साहसिकेन चूतमुकुले दृष्टिः समारोपिता । वाक्ये यथा—यदि आ एवं नु मन्यसे ॥ १ ॥ **आङीषदर्थेऽभिव्याप्तौ क्रियायोगेऽवधावपि** । ङकारोऽनुबन्धमात्रं । ईषदर्थे यथा—आ पिंगजूटतटटंकितचन्द्रलेखं । अभिव्याप्तौ अभिविधौ यथा—सोहमाजन्मशुद्धानामाफलोदयकर्मणां । क्रियायोगे यथा—आमुक्तमुक्तालतमस्य वक्षः । अवधौ यथा—आ समुद्रक्षितीशानां । अथाकारादिर्मा॑तः । **आं स्यादवधिस्मृत्योः** । अमते राङ्पूर्वात्क्विपि आं । द्वयोर्यथा—आं ज्ञातं मधुसूदनाङ्घ्रियुगलं मुक्त्वास्ति नान्या गतिः ।

॥ अथाकारादिः सान्तः ॥

आः सन्तापप्रकोपयोः । आस्तेः क्विपि आः । सन्तापे यथा—आः पूर्णस्वकलाभिरिन्दुरमलो यातश्च राहोर्मुखम् । प्रकोपे यथा—आः पापतापसकिरातकृशानुकीर्णं वज्रं न किं पतति मूर्द्धनि ते नभस्तः । आश्चर्येऽपि

इ स्यात्खेदे प्रकोपोक्तौ,[१] ई क्रोधे दुःखभावने[२] ।
प्रत्यक्षे सन्निधौ चाप्यु रोषोक्त्याऽऽमन्त्रणार्थयोः[३] ॥ ३ ॥
उत्प्राधान्ये प्रकाशे च प्राबल्यास्वास्थ्यशक्तिषु ॥
विभागे बन्धने मोक्षे भावे लाभोर्ध्वकर्मणोः ॥ ४ ॥

यथा—आः किमेतदपूर्वोयं दृष्टः क्षत्रियपोतकः ॥ २ ॥ अथ इकारः । **इ स्यात्खेदे प्रकोपोक्तौ** । एति क्विपि इ । आगमशासनस्याऽनित्यत्वात्तागमाभावः । द्वयोर्यथा—अमी अमुमु ई चोस्य नखाः कण्ठे इ ईक्षिता । अथ ईकारः । **ई क्रोधे दुःखभावने । प्रत्यक्षे सन्निधौ चापि** । ईङ् गतौ । क्विपि ई । चतुर्ष्वर्थेषु यथा—ई ईदृशी रतिः कथम् । अथ उकारः । **उ रोषोक्त्यामन्त्रणार्थयोः** । उङ् शब्दे क्विपि तागमाभावे उ । रोषोक्तौ यथा—उ (उ अ) एहि त्वमुत्तिष्ठ । आमन्त्रणार्थे यथा—क्वचित्कदाचित्किमु किंचिदेव कृतं मया सुन्दरि विप्रियन्ते ॥ ३ ॥

॥ अथ उकारादिर्दान्तः ॥

उत्प्राधान्ये प्रकाशे च प्राबल्यास्वास्थ्यशक्तिषु । विभागे बन्धने मोक्षे भावे लाभोर्ध्वकर्मणोः । उन्देर्वदेर्वा क्विपि उत् । प्राधान्ये यथा—उत्तमा मानमिच्छन्ति । प्रकाशे यथा—उद्भूतः सरसिजसम्भवः परागः । प्राबल्ये यथा—उत्कम्पिनी भयपरिस्खलितांशुकान्ता । अस्वास्थ्ये यथा—येनान्तर्जलचारिभिर्जलचरैरत्युक्तमुत्कूजितम् । शक्तौ यथा—माघेन विघ्नितोत्साहानोत्साहान्त पदक्रमे । विभागे यथा—उत्पथप्रतिपन्नस्य परित्यागो विधीयते । बन्धने यथा—पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः । मोक्षे यथा—उच्छृंखलं वलातिवाजिराजः । भावे सम्भावे यथा—परार्द्धबद्धकक्षाणां त्वादृशामुद्भवः कुतः । लाभे यथा—उत्पन्नभक्षकं मूर्खम् । ऊर्द्ध्वकर्मणि यथा—उत्तिष्ठन्त्या

१. प्रकोपोक्तौ कामदेवे त्वनव्ययम् ।
२. ई लक्ष्म्यां तु च नाव्ययम् ।
३. शिववाची त्वनव्ययम् ।

उं प्रश्नेऽङ्गीकृतौ रोषेऽप्यूं प्रश्ने रोषवाचि च ।
ऋ [1]कुत्सावाक्ययोरे ऐ हे है शब्दाविव स्मृतौ ॥ ५ ॥
आमन्त्रणाह्वानयोरों प्रणवेऽङ्गीकृतावपि ।
ओ औ शब्दौ तु हो हौ वद् हूतौ सम्बोधनेऽपि च ॥ ६ ॥

रतान्ते भरसुरगपतौ पाणिनैकेन कृत्वा ॥ ४ ॥ अथ उकारादिर्म्मान्तः । **उं प्रश्नेऽङ्गीकृतौ रोषेऽपि** । वेंग् तन्तुसन्ताने । बाहुलकात् किितिम उं । प्रश्नाङ्गीकृत्योर्यथा—कोयं नाथ जिनो भवेत्तव वशी उंहुं प्रतापी प्रिये । रोषे यथा—उं तनोमि तवेप्सितं । अथ ऊकारादिर्म्मान्तः । **ऊं प्रश्ने रोषवाचि च** । ऊपैङ् तन्तुसन्ताने । बाहुलकात् किमिति ऊं । प्रश्ने यथा—ऊं कास्ति मे जानकी । रोषवाचि यथा—ऊं सैवास्मि तव प्रिया । अथ ऋकारः । **ऋ कुत्सावाक्ययोः** । ऋक् गतौ क्विपि, तागमाभावे ऋ । द्वयोर्यथा—बाले किमृविमृद्नासि । अथ एकारऐकारौ । **ए ऐ हे है शब्दाविव स्मृतौ । आमन्त्रणाह्वानयोः** । इण्क् गतौ विचि ए । बाहुलकाद् वृद्धौ ऐ । हिनोतेर्विचि हे । बाहुलकाद्वृद्धौ है ॥ ५ ॥ आमन्त्रणाह्वानयोर्यथा—ए इतो भव ऐ भयंकरं श्मशानम् । तां द्रष्टुं जनकात्मजां हृदय हे नेत्राणि मित्रीकुरु । हे देवदत्त चल है व्रज यज्ञदत्त । अथ ओंकारादिर्म्मान्तः । बंधानुरोधात्तु प्रथममुक्तः । **ओं प्रण-**

१. ऊ रक्षणे रक्षके च सूच्यां स्यूतावनव्ययम् ।
ऋ कुत्सायां च वाक्ये च देवमातर्यनव्ययम् ।
ॠ वाक्यकुत्सयोर्दैत्यजनन्यामायनव्ययम् ॥
ऌ कुत्सायां विस्मये च ऌशब्दोऽपि तदर्थकः ।
देवमातरि वाराह्यां क्रमात्तावाप्यनव्ययौ ॥
एऐशब्दौ तु हेहैवत् स्मृत्यामंत्रणहूतिषु ।
क्रमाच्चतुर्भुजे शम्भावे ऐशब्दावनव्ययौ ॥
ओमित्यनुमतौ प्रोक्तं प्रणवे चाप्युपक्रमे ।
ओसौशब्दौ तु होहौव सम्बुद्ध्याह्वानयोर्मतौ ।
विधातरि क्रमाद्विष्णावे औशब्दावनव्ययौ । कु०

कु पापीयसि कुत्सायामीषदर्थे निवारणे ।
कं सुखे वारिशिरसोः किं प्रश्ने कुत्सनेऽपि च ॥ ७ ॥
चान्योऽन्यार्थसमाहारान्वाचयेषु समुच्चये ।
हेतौ पक्षान्तरे तुल्ययोगिता विनियोगयोः ॥ ८ ॥

वेऽङ्गीकृतावपि । अवति ओं । अविर्म्मः । प्रणवे यथा—समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदं । अङ्गीकृतौ यथा—ओमित्युक्तवतोऽथ शार्ङ्गिण इति । अथ ओकार-औकारौ । **ओ औ शब्दौ तु हो-हौ-वद् हूतौ सम्बोधनेऽपि च** । उङ्शब्दे विचि ओ । बाहुलकाद् वृद्धौ औ । एवं जुहूतेः हो हौ । द्वयोर्यथा—तदो अलमनेनेति सखीमाहा ओ मानिनी । औ कुत्र गतो गौः । हो पश्य वराहोऽयं । हौ सर्प्पत्यहौ यासि किम् ॥ ६ ॥

॥ अथ कादिः ॥

कु पापीयसि कुत्सायामीषदर्थे निवारणे । कौतेः क्विपि तागमाभावे कु । कायति वा । डुकेति किदुः । पापीयसि यथा—यद्द्रोग्धुमित्रं किमतः कुकृत्यं । कुत्सायां यथा—कुमित्रे नास्ति विश्वासः । ईषदर्थे यथा—कोष्णं किन्नु निषिच्यते तव बलात्तैलं सखिश्रोत्रयोः ।

॥ अथ कादी मान्तौ ॥

कं सुखे वारिशिरसोः । कामयतेः,''गमि जमि क्षमि कमी''(ऊ० ९३७) ति डित्यमिकं । त्रिष्वपि यथा—रेजे कादम्बिनी वेयं, कामिनी कम्रकन्धरा । **किं प्रश्ने कुत्सनेऽपि च** । कौतेः कोर्डिन् । किं प्रश्ने यथा—किं ते भूयः प्रियमुपकरोमि । कुत्सने यथा–स किंसखा साधु न शास्ति योऽधिपं, हितान्न यः संश्रुणुते स किंप्रभुः ॥ ७ ॥ अथ चादिः । **चान्योऽन्यार्थसमाहारान्वाचयेषु समुच्चये । हेतौ पक्षान्तरे तुल्ययोगिताविनियोगयोः । पादपूरणेऽवधृतौ** । चिनोति चः । क्वचिदिति डः । अन्योऽन्यार्थे इतरेतरयोगे यथा—तयोर्जगृहतुः पादौ राजा राज्ञी च मागधी । तौ गुरुर्गुरुपत्नी च, प्रीत्या प्रतिनन-

पादपूरणेऽवधृतौ तु विशेषेऽवधारणे ।
समुच्चये पादपूर्तौ धिक् निर्भर्त्सननिन्दयोः ॥ ९ ॥

न्दतुः ॥ अत्र इतरेतरयोगस्योद्भूतावयवभेदत्वात् जगृहतुर्जगृहतुरिति द्विवचनम् । समाहारे तु तिरोहितावयवभेदत्वादेकवचनम् । यथा–अर्थस्य मूलं निकृतिः क्षमा च, कामस्य वित्तञ्च वपुर्वयश्च । धर्मस्य दानञ्च दया दमश्च, मोक्षस्य सर्व्वार्थनिवृत्तिरेव ॥ अन्वाचये यथा–हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता, क्रीडाशैले यदि च विचरेत्पादचारेण गौरी । समुच्चये यथा–विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते । हेतौ यथा–गुरोर्नियोगाच्च नगेन्द्रकन्या । पक्षान्तरे यथा—कैकेय्याः क्व वरो वरेण विपिनप्रस्थानयाञ्चाक च, क्वायं वंशशरो विकर्त्तनविधिः, सीतापहारः क्व च । सुग्रीवानुगतिः क्व च क्व च वधस्तस्यापि लङ्कापतेरेकैकं चरितादभुतं समभवत्पुण्यैः कवीनामदः ॥ तुल्ययोगितायां यथा–प्रतिग्रहीतुं प्रणयिप्रियत्वात्, त्रिलोचनस्तामुपचक्रमे च । सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोधं समधत्त बाणम् ॥ १ ॥ विनियोगे यथा–मधुश्च ते मन्मथ साहचर्यादसावनुक्तोऽपि सहाय एव ॥८॥ पादपूरणे यथा–धर्म्मे चार्थे च कामे च, मोक्षे च भरतर्षभ । अवधृतौ यथा–कर्म्मक्षयाच्च निर्वाणम् । अथ तादिः । **तु विशेषेऽवधारणे । समुच्चये पादपूर्त्तौ** तौतेः क्विपि तागमाभावे तु । विशेषे यथा–किमस्या न प्रेयो यदिपरमसह्यस्तु विरहः । **अवधारणे** यथा–ननु खण्डेन्दुजूटस्य प्रियाविरहजं तमः । पादपूर्त्तौ यथा–दूरादेव कृतोऽञ्जलिर्न तु पुनः पानीयपानोचितः । अथ धादिकान्तः । **धिक् निर्भत्सननिन्दयोः ।** दधातेर्द्रागादित्वात्किकि धिक् । निर्भर्त्सने यथा–धिक् धि शत्रुजितं । निन्दायां यथा–धिक् तस्य जीवितं लोके । अथ नादयः ॥ ९ ॥ **नि स्यात्क्षेपे भृशार्थे च नित्यार्थे दानकर्मणि । संधानोपरमयोः संश्रयाश्रयराशिषु । मोक्षेऽन्तभावेऽधोभावे बन्धने कौशलेपि च ।** नयतेर्नीवी प्रह्वम्यो डिदिति इ प्रत्यये (उ० ६१६)। निक्षेपे यथा–रे रे क्षत्रनिकृष्ट-

नि स्यात्क्षेपे भृशार्थे च नित्यार्थे दानकर्मणि ।
सन्धानोपरमयोः संश्रयाश्रयराशिषु ॥ १० ॥
मोक्षेऽन्तभावेऽधोभावे बन्धने कौशलेऽपि च ।
नु प्रश्नेऽनुशयेऽतीतार्थे विकल्पवितर्कयोः ॥ ११ ॥
नञीषदर्थे सादृश्ये तद्विरुद्धतदन्ययोः ।
व्यतिक्रमे स्वरूपार्थे निषेधाभावयोरपि ॥ १२ ॥

दुष्टकुमते । भृशार्थे यथा–तमार्यगृह्यं निगृहीतधेनुः । नित्यार्थे यथा–स्मर नित्यमनित्यताम् । दानकर्म्मणि यथा–निवापः सहकारमञ्जरीः प्रियचूतप्रसवो हिते सखा । सन्निधाने यथा–कटु रटति निकटवर्ती । उपरमे यथा–निवर्त्तयास्मादसमी(दी)प्सितान्मनः । संशयेयथा–निरेकमेकोऽपि निराकरोति । आश्रये यथा–अयं वारामेको निलय इति । राशौ यथा–निजकरनिकरसमृद्धया ॥ १० ॥ मोक्षे यथा–भोजेन दूतो रघवे निसृष्टः । अन्तभावे यथा–रुचिरार्थाः किमिह निष्ठिता वाचः । अधोभावे यथा–अपि निपतति पौरे (पूरे) पाथसां वारिदेभ्यः । बन्धने यथा–बद्धा पराणि परितो निगडान्यलावीत् । कौशले यथा–शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति । **नु प्रश्नेऽनुशयेऽतीतार्थे विकल्पवितर्कयोः ।** नौतेः क्विपि तागमाभावे । नु प्रश्ने यथा–रक्ताशोककृशोदरी क्व नु गता, त्यक्त्वानुरक्तं जनम् । अनुशये कोपे यथा–तूलं तूलं नु गाढं प्रहर हरेति । विकल्पे यथा–स्वप्नो नु माया नु मतिभ्रमो नु । वित्तर्कें यथा–क्व नु पुनः सर्वत्र सर्वे गुणाः ॥ ११ ॥ **नञीषदर्थे सादृश्ये, तद्विरुद्धतदन्ययोः । व्यतिक्रमे स्वरूपार्थे, निषेधाभावयोरपि ।** नह्यते क्वचिदिति डे नञकारोनुबन्धार्थः । ईषदर्थे यथा–अनुदरा कन्या । सादृश्ये यथा–अब्राह्मणः ब्राह्मणसदृशः । क्षत्रियादिरित्यर्थः । तद्विरुद्धे यथा–अधर्मः धर्मविरोधी पाप्मेत्यर्थः । तदन्यस्मिन्यथा–अनग्निः । अग्नेरन्य इत्यर्थः । व्यतिक्रमे यथा–न ते मुखं चन्द्रं मन्ये । चन्द्रमतिक्रम्य ततोऽधिकम्मन्ये इत्यर्थः । स्वरूपार्थे यथा–न न न मम मा मा मां स्प्राक्षीर्निषेध-

निर्निश्चये क्रान्ताद्यर्थे निःशेषप्रतिषेधयोः ॥
प्राक् पूर्वस्मिन् प्रभाते दिग्देशकालेष्वनन्तरे ॥ १३ ॥
अतितेऽग्रेऽप्यथ प्र स्याद्गताद्यर्थप्रकर्षयोः ।
वा समुच्चय एवार्थ उपमानविकल्पयोः ॥ १४ ॥

परं वचः। निषेधे यथा—नायं नायं न चायम्। अभावे यथा—अवचनं वचनं प्रियसन्निधावनवलोकनमेव विलोकनम्। अथ नादिः सन्तो रान्तो वा ॥ १२ ॥ **निर्निश्चये क्रान्ताद्यर्थे निःशेषप्रतिषेधयोः।** नयतेर्निर्योडिति (उ. ४५४) डिसिनिस्निपातनात् रुत्वे निर्। निश्चये यथा—अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति। क्रान्ताद्यर्थे यथा—निर्नाभिकौशेयमुपात्तबाणम्। निःशेषे यथा—योग्यस्य त्रिनयनलोचनानलार्चिर्निर्दग्धस्मरपृतनाधिराज्यलक्ष्म्याः। प्रतिषेधे यथा—निरालोकं लोकम्। अथ पकारादिश्चान्तः। **प्राक् पूर्वस्मिन् प्रभाते दिग्देशकालेष्वनन्तरे। अतीतेऽग्रेऽपि।** प्राञ्चति क्विपि प्राक्। प्राची दिग्देशः कालो वा रमणीय इति वा दिग्शब्दादिति धास्तस्थ, लुबञ्चे (७-२ १२३) रिति लुप्। पूर्वस्मिन् प्रथमे यथा—प्रागजीयत घृणा ततो मही। प्रभाते यथा—प्रागुत्थानं च युद्धं च सम्विभागं च बन्धुषु। स्त्रियमाक्रम्य भुञ्जीत शिक्षेच्चत्वारि कुक्कुटात् ॥ १ ॥ दिशि यथा—तां प्राङ्मुखीं तत्र निवेश्य तन्वीम्। देशे यथा—प्राचीनाचलकाननानि भजते देवस्तमीवल्लभः। काले यथा—प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः। अनन्तरे यथा—स्नातः पुरा प्राक् विलिलेप देहम् ॥ १३ ॥ अतीते यथा—अये किमुत्साहवर्द्धनाय प्राग्भवीयमन्तःकरणं स्मारितमनयोस्तदेतावदेवास्तु। अग्रे यथा—प्राग्गामि पुण्यं नृणाम्।

॥ अथ पकारादि रान्तः ॥

अथ प्र स्याद्गताद्यर्थप्रकर्षयोः। प्रातेः "क्वचिदिति" डे। प्रगतार्थे यथा—कुशपूतं प्र(प्रभ)वयास्तु विष्टरम्। प्रकर्षे यथा—प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः। आदिशब्दादादिकर्म्मोदीरणैश्वर्ये सम्भवनि-

वि श्रेष्ठेऽतीते, नानार्थे वै हेतौ पादपूरणे[1] ।
शं कल्याणे सुखेऽथ स्वित् परिप्रश्नवितर्कयोः ॥१५॥
सं संगार्थे प्रकृष्टार्थे शोभनार्थसमार्थयोः ।
[2]स्माातीते पादपूर्त्तौ ह सम्बुद्धौ पादपूरणे ॥ १६ ॥

योगशुद्धीच्छाप्रीतिशान्तिपूजादर्शनतत्परप्रशंसासंगदिक्योगावयववियोगान्तर्भावबहुत्वमहत्त्वस्थितिदाननानार्थदक्षिणानुवृत्त्यादिषु। अथ वादयः। **वा समुच्चय एवार्थ उपमानविकल्पयोः ॥** वातेः क्विपि वा। समुच्चये यथा—यशो हि (धि)गन्तुं सुखमीहितुं वा। मनुष्यसंख्यामतिवर्त्तितुं वा। उपमाने यथा—विशेषको वा विशिशेष यस्याः श्रियं त्रिलोकी तिलकः स एव। विकल्पे यथा—एको वासः पत्तने वा वने वा ॥ १४ ॥ **वि श्रेष्ठेऽतीते नानार्थे।** वींक् प्रजनादौ, [1]नीवी प्रह्वभ्योदिडिति (उ० ६१६) इकारे वि। श्रेष्ठे यथा—विशिनष्टचन्तरात्मानं वर्णरूपापि भारती। अतीते यथा—तामेकतस्तव बिभर्त्ति गुरुर्विनिद्रः। नानार्थे यथा—विचित्राश्चित्तवृत्तयः। **वै हेतौ पादपूरणे।** वातेर्बाहुलकात् डै वै। हेतौ यथा—परमार्थं वृणीते वै तेनास्य तन वै स्तवम्। पादपूरणे यथा—आत्मा वै जायते पुत्रः।

॥ अथ शादिर्मान्तः ॥

शं कल्याणे सुखे। शाम्यतेर्गमिजमी (उ० १३७)ति डित्यमि शं। द्वयोर्यथा—त्वं शं करोषि भुवनत्रयशङ्करत्वात्।

॥ अथ सादिर्दान्तः ॥

अथ स्वित् परिप्रश्नवितर्कयोः। स्विद्यतेः क्विपि स्वित्। परिप्रश्ने यथा—द्विपं स्विदश्वः समरेभ्युपैति। वितर्के यथा—देवी स्विदेषा नरसम्भवा वा ॥ १५॥

॥ अथ सादी मान्तौ ॥

सं संगार्थे प्रकृष्टार्थे शोभनार्थसमार्थयोः। समतेर्गमिजमी ति डित्यमि

१. नानार्थे पक्षिवाचि त्वनव्ययम्। वै पादपुरणे हेतौ सम्बुद्ध्यनुनयेऽपि च ॥ शं॰
२. सु पूजायां भृशार्थानुमतिकृच्छ्रसमृद्धिषु। स्मा॰।

हा शुग्दुःखविषादेषु हि हेतावबधारणे।
विशेषे पादपूर्णौ च ही विस्मयविषादयोः ॥ १७ ॥
दुःखहेतौ च हं रोषे भाषणेऽनुनयेऽपि च।
हुं वितर्के परिप्रश्ने[1] स्यान्मनागल्पमन्दयोः ॥ १८ ॥

सम्। सङ्गार्थे यथा—संगमविरहविकल्पे। प्रकृष्टार्थे यथा—साम्राज्यं परमेऽपि तेजसि तव प्राज्यं समुज्जृम्भते। शोभनार्थे यथा—नीवीबन्धवदागतं शिथिलतां सम्मात्तमाणे ततः। समार्थे यथा—संविभागं च बन्धुषु। **स्मातीते पादपूर्तौ**। अस्यतीति रुक्मग्रीष्मेति निपातनात् म अकारलोपे च स्म। अतीते यथा—इति पृच्छत्यनुवेलमादतः प्रियासखीरुत्तरकोशलेश्वरः। पादपूर्तौ यथा—सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः। अथ हादयः। **ह सम्बुद्धौ पादपूरणे**। जहातेः क्वचिदिति डे ह। द्वयोर्यथा—निचकार विप्रान् ह जघान शश्वत् ॥१६॥ **हा शुग्दुःखविषादेषु**। जहातेर्विचिहा त्रिष्वपि यथा—पाषाणोपम हा कृतघ्नहृदय स्मृत्वा न किं दीर्यसे। **हि हेतावबधारणे पादपूर्णौ**(र्तौ) **च**। हिनोतेः क्विपि तागमाभावे हि। हेतौ यथा—सदाभिमानैकधना हि मानिनः। अवधारणे यथा—मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता। विशेषे यथा—स्पृशन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृशः। पादपूर्तौ यथा—के दारेषु हि पश्यन्त्यः केदारेषु विनिःस्पृहा। **ही विस्मयविषादयोः**। **दुःखहेतौ च**। जहातेर्वातात्प्रमः किदिति। बाहुलकादीकारे ही। विस्मये यथा—हतविधिललितानां ही विचित्रो विपाकः। विषाददुःखहेत्वोर्यथा—ही स एव मुनिः पाणिरधस्ताद्विन्ध्यभूभृतः ॥ १७ ॥

॥ अथ हादौ मान्तौ ॥

हं रोषे भाषणेऽनुनयेऽपि च। हम्म गतावित्यतो विचि पृषोदरादित्वात् मलोपे च हं। रोषे भाषणे यथा—हं वृषल मामाक्षिपसि। अनुनये

1. हुं लज्जायां निवारणे। भयादौ भर्त्सने कोपेऽप्यनिच्छायां च कुत्सने।

अङ्ग सम्बोधने हर्षे पुनरर्थे च किंच तु।
साकल्यारम्भयोः तिर्यक् स्यात्तिरश्चीनवक्रयोः ॥ १९ ॥

यथा—हं नतोऽस्मि तव पादयोः प्रिये। **हुं वितर्के परिप्रश्ने**। जुहोतेः क्विपि निपातनान्मान्तत्वे हुं। वितर्के यथा—हुं जातं यदि वा दिवा निशमपि त्वामेव यः सेवते। परिप्रश्ने यथा—रामो नाम बभूव हुं तदबला सीतेति हुं तां पितुर्वाचा पञ्चवटीवने विहरतस्तस्या हरद्रावणः॥

॥ अथ द्विस्वराः ॥ तत्रादौ कान्तः ॥

स्यान्मनागल्पमन्दयोः। मन्यतेर्द्रागादित्वात् मनाक्। द्वयोर्यथा—मनागनल्पा वृत्त्या वा कामं क्षाम्यतु यः क्षमी ॥ १८ ॥

॥ अथ गान्ताः ॥

अङ्ग सम्बोधने हर्षे पुनरर्थे च। अम गतौ गम्यमीति गे। अङ्ग सम्बोधने यथा—मम तावन्मतमदः श्रूयतामङ्ग वामपि। हर्षे यथा—पूर्वमङ्ग जुहुधि त्वमेव वा। पुनरर्थे यथा—हरति हृदयं नामैवास्याः किमङ्ग न सङ्गतिः।

॥ अथ चान्ताः ॥

किञ्च तु साकल्यारम्भयोः। किंचिनोति। क्वचिदिति डे। किंच। साकल्ये यथा—देव त्वं किञ्च शत्रून् समिति विजयसे। आरम्भे यथा—किञ्चैतस्मिन् सुरतसुहृदस्तन्विते वान्ति वाताः। **तिर्यक् स्यात्तिरश्चीनवक्रयोः**। तिरोऽञ्चति क्विपि। तिरसस्तिर्यती (३-२-१२४) ति तिर्यादेशे तिर्यक्। तिरश्चीने यथा—तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः। वक्रे यथा—उद्बुद्धमुग्धकनकाब्जनिभं वहन्तीमासज्जतिर्यगपवर्त्तितदृष्टिवक्त्रम् ॥ १९ ॥ **हिरुक् मध्ये विनार्थे**। हिनोतेर्बाहुलकात् " कितिरुच् प्रत्यये हिरुक्। मध्ये यथा—वाडवस्य रुचिर्वारांनिधेर्हिरुक् विजृम्भते। विनार्थे यथा—हिरुक्कर्म्मणां मोक्षः। कर्मक्षये मोक्ष इत्यर्थः। कान्तोऽपि।

हिरुक् मध्ये विनार्थेऽति प्रकर्षे लङ्घने भृशे ।
स्तुतावसं प्रतिक्षेपेऽप्यस्तु पीडानिषेधयोः ॥ २० ॥
असूयायामनुज्ञायामाराद्दूरसमीपयोः ।
इति स्वरूपे सान्निध्ये विवक्षानियमे मते ॥ २१ ॥

॥ अथ तान्ताः ॥

अति प्रकर्षे लङ्घने भृशे । स्तुतावसंप्रतिक्षेपेऽपि । अततेर्मण्यादित्वादि-प्रत्यये अति । प्रकर्षे यथा—अतिरूपात् हृता सीता । लङ्घने यथा—नीवीमतिक्रम्य सितेतरस्य तन्मेखला मध्यमणेरिवार्चिः । भृशार्थे यथा—अतिवृष्टिरवृष्टिर्वा भवेद्यन्नोपतापकृत् । स्तुतौ पूजायां यथा—शरोधैरतिसिञ्चन्तः । पर्यानिन्युर्दिशोऽन्धताम् । असंप्रत्यर्थे यथा—अतिकम्बलं कम्बलानां न सम्प्रति । उपभोगकाल इत्यर्थः । क्षेपो निन्दाप्रेरणं च । तत्र यथा—अतिवाहितमतिगहनं विनापवादेन यौवनं येन । **अस्तु पीडानिषेधयोः । असूयायामनुज्ञायाम् ।** अस्यतेः कृशिकम्यमीति तुनि अस्तु । पीडायां यथा—अस्तु नाम विधुरेण वेधसा साधुरप्यलमुपाधिभिर्ध्रुवम् । बाध्यते किमधिकैरथाधिभिर्दैवमेव शरणं विधीयताम् । निषेधे यथा—अस्तु साम प्रयोगेण । असूयायां यथा—अस्तु ज्ञास्यति कालेन सोऽल्पेनैव न भूयसा । फलं तस्येह पापस्य यत्नेनापकृतं मम ॥२०॥ अनुज्ञायां यथा—अस्त्वेवं जडधामता तु भवतो यद्व्योम्नि विस्फूर्जति । **आराद्दूरसमीपयोः ।** आङ्पूर्वाद्रातेः संश्चद्वेहदिति निपातनात् । दूरे यथा—दिदृक्षमाणाः प्रतिरथ्यमीयुर्मुरारिमारादनघं जनौघाः । समीपे यथा- चित्तव्यामोहता आरादपि सन्नहि पश्यति । **इति स्वरूपे सान्निध्ये विविक्षानियमे मते । हेतौ प्रकार-प्रत्यक्षप्रकार्थेष्ववधारणे । एवमर्थे समाप्तौ स्यात् ।** एतेर्द मुशीति किति ताविति । स्वरूपे यथा—इति स्म पृच्छत्यनुवेलमादृतः । सान्निध्ये यथा—पतेति तत्प्रणतिं विधेहि । विवक्षेत्येव भवितुमर्हति । विवक्षानियमे यथा-तदस्यास्त्यस्मिन्निति मतुरिति । अत्र हीति शब्दो विवक्षार्थः । मते यथा—उरस्यौ ह विसर्गौ तु-सम्प्राहुः पाणिनेरिति । अत्र हि पाणिनेरितीति पाणिनेर्मतेनेत्यर्थः । हेतौ यथा—

हेतौ प्रकारप्रत्यक्षप्रकाशेष्ववधारणे ।
एवमर्थे समाप्तौ स्यादुत प्रश्नवितर्कयोः ॥ २२ ॥
समुच्चये विकल्पे च तावद् यावद् दिवाऽवधौ ।
कार्त्स्न्येऽवधारणे माने प्रतीत्थं भूतभागयोः ॥ २३ ॥

अयं वारामेको निलय इति रत्नाकर इति श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः । प्रकारे यथा—पाणिगृहीतीति । अत्र हीति शब्दः प्रकारार्थः । प्रत्यक्षे यथा—कियदिति दितिसूनोस्तेन जिग्येयदिन्द्रः । अत्र कियदिति कियदिदमित्यर्थः । प्रकाशे यथा—इति भद्रबाहुः, इति पाणिनिः । भद्रबाहुपाणिनिशब्दौ लोके प्रकाशेत इत्यर्थः । अवधारणे यथा—अङ्गीकृत्येति पार्थिवः । एवमर्थे यथा—इत्यूचिवांस्तमेवार्थम् । समाप्तौ यथा—इति कथितकथः सन् सोथ हंसो व्यरंसीत् । **उत प्रश्नवितर्कयोः । समुच्चये विकल्पे च ।** उम्भेः पुतपित्तनिमित्तोतेति निपातनात् तेऽन्तलुकि च उत । प्रश्ने यथा—स्मरसि स्मर मेखलागुणैरुत गोत्रस्खलितेषु बंधनम् । वितर्के यथा—किं लक्ष्मीः स्वयमागता मुररिपोर्दैवस्य वक्षस्थलात्कोपात्पत्युरुतावतारमकरोद्देवी भवानी भुवि ॥२२॥ समुच्चये यथा—शौर्यं गाम्भीर्यमौदार्यं दाक्षिण्यमुत विक्रमः । विकल्पे यथा एकमेव वरं पुंसामुत राज्यमथाश्रमः । **तावद्यावद्दिवाऽवधौ । कार्त्स्न्येऽवधारणे माने ।** तनोतेर्यातेश्च सश्चद्वेहदिति । अतिनिपातनात् । तावद यावद् । अवधौ यथा—तावद्धरस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरूपम् । प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात्पुरशासनस्य । आरंकाद्भूपतिं यावदौचितीं न विदन्ति ये । कार्त्स्न्ये यथा—यावदन्नं तावदेवात्र भुक्तम् । अवधारणे यथा—यावदमत्रं तावद्ब्राह्मणान् भोजय । यावन्ति अमत्राणि तावत एव ब्राह्मणान् भोजयेत्यर्थः । माने यथा—यावच्चयेन च यथा च यदा च यच्च यस्माच्च यत्र च शुभाशुभकर्म्मलभ्यम । तावच्च तेन च तथा च तदा च तच्च तस्माच्च तत्र च कृतान्तवशादुपैति । **प्रतीत्थं भूतभागयोः । प्रतिदाने प्रतिनिधौ वीप्सालक्षणयोरपि ।** प्रथतेः प्रथेर्लुक्चेति तौ प्रति । इत्थंभूते यथा—तां

प्रतिदाने प्रतिनिधौ वीप्सालक्षणयोरपि ।
पश्चात् प्रतीच्यां चरमे बताऽऽमन्त्रणखेदयोः ॥२४॥

धृत्याश्चर्यानुकम्पासु यद्वत्प्रश्नवितर्कयोः ।
शश्वत्सह पुनर्नित्ये सकृत्सहैकवारयोः ॥ २५ ॥

प्रत्यभिव्यक्तमनोरथानां । भागे यथा—किंचिन्मां प्रतिदीयतां यदुचितं चेतोऽविसम्वादकृत् ॥ २३ ॥ प्रतिनिधिप्रतिपादनयोर्यथा—प्रतिद्विपमदामोदाद्गन्धं सप्तच्छदान्यधुः । शेफालीभ्यो ददुर्लास्यं प्रतिगन्धाच्च मारुतः ॥ वीप्सायां यथा—प्रतिक्षणं सा कृतरोमविक्रिया । लक्षणे यथा—किंचिन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम् । **पश्चात् प्रतीच्यां चरमे** । अपरा दिग् देशः कालो वारणीयः । "अधरापराच्चादिति" आतिप्रत्यये पश्चोऽपरस्य दिग् पूर्वस्य चातीति पश्चादेशे पश्चात् । प्रतीच्यां यथा—पश्चादस्तं गन्तुं सपदि दिनेशः प्रपद्यते पश्य । चरमे यथा—ययौ पश्चाद्रथानीकं चतुःस्कन्धेव सा चमूः । **बतामन्त्रणखेदयोः** । **धृत्याश्चर्यानुकम्पासु** । वनुतेः शीरी भूद् श्विति क्रिति ते, यमि रमि नमीति नलोपे च बत । आमन्त्रणे यथा—बत वितरतो यं तोयवाहा नितान्तम् । खेदे यथा—दिवसो नु मित्रमगमद्विलयं किमिवास्यते बत मया वलया ॥२४॥ धृतौ यथा—अनुभवन्ति सकृत् सकलेन्द्रियाण्यभिमुखागतमिष्टजनं बत । आश्चर्ये यथा—वराहो राहुर्वा बत बलचमत्कृत्यतिशयम् । अनुकम्पायां यथा—विरम चातक दैन्यमपास्यतां बत कियन्ति बहूनि करिष्यति । **यद्वत् प्रश्नवितर्कयोः** । याति यद्वत् संश्चद्वेहदिति साधुः । प्रश्ने यथा—गुरोर्यद्वत्परीवादं त्वं कद्वद इवावदः । वितर्के यथा—यद्वत्सरोजं मुखमेव यद्वत् । **शश्वत्सह पुनर्नित्ये** । शशप्लुतगता वित्यस्य, शश्वद्वेहत्साक्षादय इत्यादि शब्दात् शश्वत् । सहार्थे यथा—शश्वत्ते मुनयस्तत्र तमसेवन्त योगिनम् । पुनरर्थे यथा—शश्वदेव स गतस्तमाश्रमम् । नित्यार्थे यथा-जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि । **सकृत्सहैकवारयोः** । एको वारोऽस्य

स्वस्त्याशीः क्षेमपुण्यादौ साक्षात्प्रत्यक्षतुल्ययोः ।
हन्त दानेऽनुकम्पायां वाक्यारम्भविषादयोः ॥ २६ ॥
निश्चये च प्रमोदे चाप्यथोऽथ समुच्चये ।
मङ्गले संशयारम्भाधिकारानन्तरेषु च ॥२७॥

सकृत् । एका सकृच्चास्येति सुच् । सहार्थे यथा—अनुभवन्ति सकृत्सकलेन्द्रियाण्यभिमुखागतमिष्टजनं बत । एकवारार्थे यथा—सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनः ॥ २५ ॥ **स्वस्त्याशीःक्षेमपुण्यादौ** । सुपूर्वादस्तेः सोरस्तेः स्विदिति तौ स्वस्ति । आशिषि यथा—देव स्वस्ति वयं द्विजास्तत इतः स्नानेन निष्कल्मषाः । क्षेमे यथा—भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते । पुण्ये यथा—स्वस्ति प्रस्तुतवस्तु किंचिदुचितं चेतो गतं ब्रूमहे । आदिशब्दात् अविनाशादौ । अविनाशे यथा—स्वतिमानस्ति कैलासः । **साक्षात् प्रत्यक्षतुल्ययोः** । समीक्ष्यते साक्षात् । संश्चद्वेहदिति (उ० ८८२) साधुः । प्रत्यक्षे यथा—त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनामपि । तुल्ये यथा—इयं साक्षाल्लक्ष्मीर्मदयति मृगाक्षी मम मनः । **हन्त दानेऽनुकम्पायां वाक्यारम्भविषादयोः** । **निश्चये प्रमोदे चापि** । हन्तेर्दम्यमीति बहुवचनात्ते हन्त । दाने यथा—स्वयं स दशकन्धरो विनयवामनैराननैः । स्तुवन् सुदति याचते वचन हन्तकारं त्वयि । अनुकम्पायां यथा—अभि हन्ति हन्त कथमेवमाधवं सुकुमारकायमनवग्रहः स्मरः । वाक्यारम्भे यथा—हन्त ते कथयिष्यामि । विषादे यथा-हन्त चिन्तामणिभ्रान्त्या याचितोऽसि स्तुतोऽसि यत् । तत्सर्वं वृत्तपाषाणक्षम्यतामर्थिनो वयम् ॥ २६ ॥ निश्चये यथा—निराश्रया मन्त हता मनस्विता । निश्चयेन हतेत्यर्थः । प्रमोदे यथा—बाला चन्द्र कलेव कान्तिमधुरा हन्त प्रिया दृश्यते ।

॥ अथ थान्ताः ॥

अथो अथ समुच्चये । मङ्गले संशयारम्भाधिकारानन्तरेषु च । अन्वादेशे प्रतिज्ञायां प्रश्नसाकल्ययोरपि । अथ शब्दस्य बाहुलकादोत्वे

अन्वादेशे प्रतिज्ञायां प्रश्नसाकल्ययोरपि ।
तथा स्यान्निश्चये पृष्ठप्रतिवाक्यसमुच्चये ॥ २८ ॥
यथा निदर्शने द्वौ तूद्देशे निर्देशसाम्ययोः ।
हेतूपपत्तौ च वृथात्वविधौ स्यादनर्थके ॥ २९ ॥

अथो । अमतेः पथ्यूथेति निपातनात् अथ । समुच्चये यथा-सुजनः सुधानिधिरथो नयनानन्दं न कस्य विदधाति । आयुषो राजचित्तस्य पिशुनस्य धनस्य च । अथ स्नेहस्य देहस्य नास्ति कालो विकुर्व्वतः ॥ मङ्गले यथा–अथ प्रमाणमीमांसाम् । संशये यथा–किमलम्बतां वरविलग्नमधः किमवर्द्धतोद्ध्वमवनीतलः प्रससार तिर्यगथ दिग्भ्य इति प्रचुरी भवनिरधारितमः । आरम्भे यथा–अथेप्सितं भर्तुरुपस्थितोदयम् । अधिकारे यथा–अथ प्राकृतं । अनन्तरे यथा–प्रथमं कला भवदथार्द्धमथो हिमदीधितिर्म्महदभूदुदितः ॥ २७ ॥ अन्वादेशे यथा–धनवांस्त्वमथो त्वालोको मानयति जुहूस्रुचावानय तावदेते अथैनयोः प्रक्षिपसर्पिराशु ॥ प्रतिज्ञायां यथा–सर्वमनेकात्मकं वस्त्वथेति ब्रूमः । प्रश्ने यथा–अथ शक्नोषि(मि) भोक्तुम् । साकल्ये यथा–स्तुतं महाभाग्यं यदभिजनतो यच्च गुणतः । प्रसंगाद्वस्तस्येत्यथ खलु विधेयः परिचयः । अत्र हि परिचयमात्रं विधेयं कार्यजातं तु साकल्येन सम्पन्नमित्यर्थः । सर्व्वत्राथवदथो अप्यूह्यम् । **तथा स्यान्निश्चये पृष्ठप्रतिवाक्यसमुच्चये ।** तनोतेः । पथयूथे (उ० २३१)ति निपातनात् तथा । निश्चये यथा–लोकानुग्रहहेतोस्त्वमवतीर्ण्णः प्रदश्यसे । कस्तथात्वेन जानीते स्वरूपं तव केशव । पृष्ठप्रतिवाक्ये यथा–तथेति शेषामिव भर्तुराज्ञाम् । समुच्चये यथा–आगता मुनयस्तत्र भृगुरत्रिर्यमस्तथा ॥२८॥ **यथा निदर्शने ।** यमेः पूर्ववत् यथा–निदर्शनं दृष्टान्तस्तत्र यथा–संचरन्ति महाधूर्त्ता वटे वररुचिर्यथा । **द्वौ तूद्देशे निर्देशसाम्ययोः । हेतूपपत्तौ च ।** द्वौ तु तथा यथा शब्दौ उद्देशनिर्देशयोर्यथा–तथा भव यथा तात त्रैलोक्योदरदर्प्पणे ।

अनु लक्षणवीप्सेत्थंभूतभागेषु सन्निधौ ।
सादृश्यायामहीनेषु पश्चादर्थसहार्थयोः ॥ ३० ॥

विशेषैर्भूषितास्तैस्तैर्नित्यमात्मानमीक्षसे । न च मेऽवगच्छति यथा लघुतां करूणां यथा च कुरुते स मयि निपुणं तथैनमभिगम्य वदे रभिदूतिका चिदिति सन्दिदिशे । अत्र पूर्वोक्तौ यथा तथा शब्दौ उद्देशे उत्तरोक्तौ तु निर्देशे । साम्ये यथा–गतच्छायश्चन्द्रो जगदपि तथावस्थमभवत् । जन्तूंस्तन्तून् यथा–यानतनु वितनुते तिग्मरोचिर्म्मरीचीन् । हेतूपपत्तौ यथा–सरस्यामेतस्यामुदरवलिवीचीविवलितम् । यथा लावण्यां भो जघनपुलिनोल्लङ्घनपरम् । यथा–दश्यश्चायं चलनयनमीनव्यतिकरस्तथा मन्ये मग्नः प्रकटकुचकुम्भः स्मरगजः । **वृथा त्वविधौ स्यादनर्थके ।** वृणोते । वृमृथिदशिभ्यस्त्वयथाश्चान्ता (उ० ६०१) इति क्रिया प्रत्यये, थागमे च वृथा । अवधिः शास्त्रोक्तक्रियातिक्रमः । तत्र यथा–आविकं सन्धिनी क्षीरं वृथा मांसं तथैव च । अनर्थके यथा–प्रयुक्तमप्यन्नमितो वृथा स्यात् ॥ २९ ॥

॥ अथ नान्ताः ॥

अनु लक्षणवीप्सेत्थंभूतभागेषु सन्निधौ । सादृश्यायामहीनेषु पश्चादर्थसहार्थयोः । अनितेः, "भृमृतृत्सरी (उ० ७१६) त्युप्रत्यये अनु । लक्षणे यथा-विस्फारारुद्धवसुधेऽन्वचलं चचाल । वीप्सायां यथा–स्फुरति चानुवनं चमरीचयः । इत्थंभूते यथा–तमनुप्रसक्तहृदयेयमिति । भागे यथा–बभ्रुः प्रतिनृपं ग्रामपतिं पर्यनुकर्षकं प्रतिग्रामं दिशं पर्यनुक्षेत्रं सस्यसम्पदः । सन्निधौ यथा–अनु नदि शुश्रुविरे चिरं रुतानि । सादृश्ये यथा–ततोऽनुकुर्याद्विशदस्य तस्यास्ताम्रौष्ठपर्यन्तरुचः स्मितस्य । आयामे यथा–अत्रानुगोदं मृगया निवृत्तः । गोदायामलक्षिताया मृगयाया निवृत्तः इत्यर्थः । हीने यथा–मित्रलाभमनुलाभसम्पदः । पश्चादर्थे यथा–अनुवपुरपरेण बाहुमूलप्रहितभुजाकलितस्तनेन निन्ये । सहार्थे यथा–दिवसोनु मित्रमगमद्विलयम् ॥३०॥ **नन्वाक्षेपे परिप्रश्ने**

नन्वाक्षेपे परिप्रश्ने प्रत्युक्ताऽवधारणे ।
वाक्यारम्भेऽप्यनुनयामन्त्रणानुज्ञयोरपि ॥ ३१ ॥
नाना विनोभयोनेकार्थेषु स्थाने तु कारणे ।
युक्ते साम्येऽप्यप स्तेयेऽपकृष्टे वर्ज्जने मुदि ॥ ३२ ॥

प्रत्युक्ताऽवधारणे । वाक्यारम्भेऽप्यनुनयामन्त्रणानुज्ञयोरपि । नञ् पूर्वात् नौतेः क्विपि बाहुलकात्तागमाभावे ननु । आक्षेपे यथा—नमस्यामो देवान्ननु हत-विधेस्तेपि वशगाः । परिप्रश्ने यथा—तत्त्वं तत्त्वं कथय ननु नः कासि कस्यासि पत्नी । प्रत्युक्तौ यथा—तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते । नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥ अवधारणे यथा-अमीभिः संसिक्तैस्तव किमु फलं वारिद घटैर्यदेतेऽपेक्षन्ते सलिलमवटेभ्योऽपि तरवः । अयं युक्तो व्यक्तं ननु सुखयितुं चातकशिशुर्य एष ग्रीष्मेऽपि स्पृहयति न पाथस्त्वदपरात् । वाक्यारम्भे यथा—ननु स्वलक्षणाभासं ज्ञानमेकं परं पुनः । अनुनयामन्त्रणे यथा—त्वमनङ्गशरैर्विशीर्यसे द्राक् स च कण्ठस्थितजीवमात्रशेषः । विषयो युवयोर्न दृश्यतेऽन्यो ननुन मानं कमलाक्षि मा कृथास्तत् । अनुज्ञायां यथा-विपदो ननु संसरन्तु ता ननु या व्याधिभिराहितास्पदाः ॥ ३१ ॥ **नाना विनोभयोनेकार्थेषु ।** न. आनयति तादात्म्यमिति ॥ डिदित्याप्रत्यये नखादित्वान्नाना । विनार्थो वर्जनं तत्र यथा—नानानारी निष्फला लोकयात्रा । उभयोर्यथा-नानापक्षावमर्शः संशयः । अनेकार्थे यथा—नानाविधं कृतकदेहभृतां समाजम् । **स्थाने तु कारणे युक्ते साम्येऽपि ।** ईन्ध (इद्ध) गतौ स्थाने मीयते स्थाने । कारणं हेतुस्तत्र यथा—स्थाने सृष्टेर्यः स्थितेः संहृतेश्च । युक्ते यथा—स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथा हिते । साम्ये यथा—पितुः स्थाने गुरुं विदुः ॥

॥ अथ पान्ताः ॥

अप स्तेयेऽपकृष्टे वर्ज्जने मुदि । विपर्यये वियोगे च निर्द्देशे विकृतावपि । अवतेरुम्यतेर्लुक् चेति पे वलोपे च अप । स्तेये यथा—च्छायामपहरति कविः । अपकृष्टे यथा—परापवादसस्येभ्यो गां चरन्तीन्निवारय । वर्ज्जने यथा—आसिन्धोः शाद्वलान्यासन्नास्मरात्पर्यपोषरात् । मुदि यथा—रोधांसि धीरमपचस्करिरे महोक्षाः । ३२ ॥ विपर्यये यथा—चतुर्थोपायसाध्ये तु शत्रौ सांत्वमपक्रिया । वियोगे यथा—कान्ताऽपयुक्तः सुतरां मुमूर्च्छ । निर्देशे यथा—अपदिश्य दिवं गतां प्रियां विधिना तेन दशाहतः परे विदुषा विधयः समर्थिताः । विकृतौ यथा—अपकुर्व्वत्यव्यक्तं क्षुद्रं कुर्वन्तु किं महान्तोऽपि । **अपि सम्भावनाशङ्कागर्हणासु समुच्चये । प्रश्ने युक्तपदार्थेषु कामचारक्रियासु च ।** आप्नोतेः सृभृम्यद्यापिदम्भीति ॥ इ प्रत्यये, अपादेशे च अपि । सम्भावनायां यथा—अपि स दिवसः किं स्याद् यस्मिन् प्रियामुखपङ्कजे मधु मधुकरीवाऽस्मद्दृष्टिर्विकासिनि पास्यति । शंकायां यथा—अप्याज्ञया शासितुरात्मना वा प्राप्तासि सम्भावयितुं वनान्माम् । अत्राहमेवं शंके मां संभावयितुं प्राप्तोऽसि इत्यर्थः । गर्हणायां यथा-अपि तत्रभवान् सावद्यं सेवते । समुच्चये यथा-साऽपि गता सोऽपि गतस्तदपि गतं ॥ ३३ ॥ प्रश्ने यथा—अपीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः । युक्तानि सम्बद्धानि पदानि तेषामर्थायुक्तपदार्थास्तत्र यथा—ये पक्षिणः प्रथममम्बुनिधिं गतास्ते येऽपीन्द्रपाणितुलितायुधलूनपक्षाः । ते जग्मुरद्रिपतयः सरसीर्विगाढुंमाक्षिप्रकेतुकुथसैन्यगजच्छलेन ॥ कामचारक्रियासु यथा—भवानपि छत्रं गृह्णातु । **उपाऽऽसन्नेऽधिके हीने सादृश्यप्रतियत्नयोः । तद्‌योगव्याप्तिपूजासु शक्तावारम्भदानयोः दाक्षिण्याचार्यकरणदोषाख्यानात्ययेषु च ।** उम्भतेरुम्यवेर्लुक्वेति (उ० ३०३) पे उप । आसन्ने यथा-उपपरिसरं गोदावर्याः परित्यजताध्वगाः । अधिके यथा—

विपर्यये वियोगे च निर्द्देशे विकृतावपि ।
अपि सम्भावनाशङ्कागर्हणासु समुच्चये ॥ ३३ ॥
प्रश्ने युक्तपदार्थेषु कामचारक्रियासु च ।
उपाऽऽसन्नेऽधिके हीने सादृश्यप्रतियत्नयोः ॥ ३४ ॥

तद्योगव्याप्तिपूजासु शक्तावारम्भदानयोः ।
दाक्षिण्याचार्यकरणदोषाख्यानात्ययेषु च ॥ ३५ ॥
अभि वीप्सालक्षणयोरित्थम्भूताभिमुख्ययोः ।
स्यादमा सन्निधानार्थे सहार्थेऽलं निवारणे ॥ ३६ ॥

उपरवार्यामिव द्रोणो मिलत्यागादबलेऽधिकं । हीने यथा—उपगङ्गामिवापगाः । सादृश्ये यथा—जातास्तदूर्वोरुपमानबाह्याः । प्रतियत्ने यथा—विधाय सहजाशौचमुपस्कारैर्नवं नवम् ॥३४॥ तद्योगे यथा- रोगोपसृष्टतनुदुर्व्वसति मुमुक्षुः । व्याप्तौ यथा—उपकीर्णं वनं पुष्पैः । पूजायां यथा—गिरिशमुपचचार प्रत्यहं सा सुकेशी । शक्तौ यथा—उपचितेषु परेष्वसमर्थतां व्रजति कालवशादबलवानपि । आरम्भे यथा—इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः । दाने यथा-दिवोपहारव्याजेन यज्ञव्याजेन येऽथवा । दाक्षिण्ये यथा-विनोपरोधात् स्वहितेच्छयैव महीपतिर्यस्य वचश्चकार । आचार्यकरणे यथा—उपदिशति कामिनीनां यौवनमद एव ललितानि । दोषाख्याने यथा—इति स्वहस्तालिखितश्च मुग्धया रहस्युपालभ्यत चन्द्रशेखरः । अत्यये यथा—उपरतसर्वेच्छो वा यो वा सम्पन्नसर्वेच्छः ॥ ३५ ॥

॥ अथ भान्ताः ॥

अभि वीप्सालक्षणयोरित्थंभूताभिमुख्ययोः । अमुङ् शब्दे इत्यतो अम्भि कुण्ठीति इ (उ० ६१४) प्रत्यये न लोपे च अभि । वीप्सायां यथा—वृक्षं वृक्षमभिसेकः । लक्षणे यथा—मुदा विकाशं यतिमभ्युपेयुषी । इत्थंभूते यथा—अभिदिग्विजयं साधुरुपतस्थे शरत् क्षणात् । आभिमुख्ये यथा—प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ।

॥ अथ मान्ताः ॥

स्यादमा संनिधानार्थे सहार्थे । नञ् पूर्वात् मातेर्डिदित्याकारे अमा । "द्वयोर्यथा—अमा सह सन्निधाने वा वसतः सूर्याचन्द्रमसावस्यामिति अमावास्या । **अलं निवारणे अलङ्करणसामर्थ्ये पर्याप्तिष्ववधारणे** । अलीभूषणादावित्यतः । सोरेतेरमिति (उ० ९३४) बाहुलकादमि अलं । निवारणे यथा—अलं महीपाल तव श्रमेण ॥ ३६ ॥ अलङ्करणे यथा—सृजति तावदशेषगुणाकरं पुरुषरत्नमलङ्करणं भुवः । सामर्थ्ये यथा—ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम् । पर्याप्तौ परिपूर्णतायां यथा—तस्यालमेषा क्षुधितस्य तृप्त्यै, प्रदिष्टकाला परमेश्वरेण, उपस्थिता शोणितपारणा मे । परिपूर्णपारणेत्यर्थः । अवधारणे यथा—तदलममलं काव्यं कर्तुं यतेत समाहितः । **एवं प्रकारेऽङ्गीकारेऽवधारणसमन्वयोः** । एतेर्लेटि खटी (उ० ५०५) ति वे बाहुलकात् मांतत्वे च एवं । प्रकारे यथा—एवमालिनिगृहीतसाध्वसं शङ्करे रहसि सेव्यतामिति । अङ्गीकारे यथा—एवमस्तु कथया किमन्यया । अवधारणे यथा—अहार्यमेवं मृगनाभिपत्रम् । अहार्यमेवेत्यर्थः । समत्वे तुल्यत्वे यथा—रोलंबगवलव्यालतमालमलिनात्विषः । वृष्टिं व्यभिचरन्तीह नैवं प्रायाः पयोमुचः ॥ न ईदृशा इत्यर्थः ॥३७॥ **कथं प्रश्ने प्रकारार्थे संभ्रमे सम्भवेऽपि च** । केन प्रकारेण कथं । कथमित्थमिति (७-२-१०३) साधुः । प्रश्ने यथा—अवस्तुनिर्बन्धपरे कथं नु ते करोयमाबद्धविवाहकौतुकः । करेण शम्भोर्वलयी कृताहिना सहिष्यते तत्प्रथमावलंबनम् । प्रकारार्थे यथा-कथंकारमनालम्बा कीर्त्तिर्द्यामधिरोहति । सम्भ्रमे यथा—कथं समायाता एव तातपादाः । सम्भवे यथा—कथं स एवार्यतापसः । **काममसूयानुगमे प्रकामेऽनुमतावपि** । कामयतेर्बाहुलकादमि कामं । त्रिष्वपि यथा—कामं सन्तु दृढं कठोरहृदयो रामोस्मि सर्वंसहे ॥३८॥ **किमु सम्भावनायां विमर्शे** । उंङ्शब्दे किम्पूर्वात् क्विपि । बाहुलकात्ताग-

अलङ्करणसामर्थ्ये पर्याप्तिष्ववधारणे ।
एवं प्रकारेऽङ्गीकारेऽवधारणसमन्तयोः ॥ ३७ ॥
कथं प्रश्ने प्रकारार्थे संभ्रमे सम्भवेऽपि च ।
काममसूयानुगमे प्रकामेऽनुमतावपि ॥ ३८ ॥

किमु सम्भावनायां विमर्शे जोषं सुखे स्तुतौ ।
मौनलंघनयोश्चापि नाम प्राकाश्यकुत्सयोः ॥ ३९ ॥
सम्भाव्याभ्युपगमयोरलीके विस्मये क्रुधि ।
नूनं तर्के निश्चिते च प्राध्वं नम्र्मानुकूलयोः॥ ४० ॥
भृशं प्रकर्षेऽत्यर्थे च सामि त्वर्धे जुगुप्सिते ।
अयि प्रश्नेऽनुनये स्यादये क्रोधविषादयोः ॥ ४१ ॥

माभावे किमु । सम्भावनायां यथा—क्षुभ्यन्ति प्रसभमहो विनाऽपि हेतोर्लीलाभिः किमु सति कारणे रमण्यः । विमर्शे यथा—किं नन्दी किं मुरारिः किमु रतिरमणः । **जोषं सुखे स्तुतौ । मौनलङ्घनयोश्चापि** । जुषेर्बाहुलकादमि जोषं । सुखे यथा—सन्तोषतंसोऽपि पुपोष जोषम् । स्तुतौ यथा—जोषं सरोषेऽपि गुरौ विधेयं । मौने यथा—इति जोषमवस्थितं द्विषः प्रणधिं गामभिधाय सात्यकिः । लङ्घने अतिक्रमे यथा—जोषं सदोषेऽपि गुरौ न कुर्यात् । **नाम प्राकाश्यकुत्सयोः । सम्भाव्याभ्युपगमयोरलीके विस्मये क्रुधि** । नमेर्धञ्जि नाम । प्राकाश्ये यथा—हिमालयो नाम नगाधिराजः। कुत्सायां यथा—को नाम वह्निनौपम्यं कुर्वीत शशलक्ष्मणः ॥ ३९ ॥ सम्भाव्ये यथा—कथं नाम समेष्यसि ।अभ्युपगमे यथा—भानु नाम सदृशां दशनां कः पाटलो धवलगण्डतलेषु । अलीके यथा—परिश्रमं नाम विनीय वक्षणम् । विस्मये यथा—को नामायमपूर्वनाटकविधिर्यै शिक्षितो दुर्जनः। क्रुधि यथा—ममापि नाम रावणस्य परैः परिभवः । **नूनं तर्के निश्चिते च** । नुवतेर्नशिनूम्यामित्यमि नूनादेशे च नूनं । तर्के यथा—नूनं तस्या प्रबलरुदितोच्छूननेत्रं प्रियायाः । निश्चिते यथा—नूनमस्तंगतो वादी सिद्धसेनदिवाकरः । **प्राध्वं नम्र्मानुकूलयोः** । प्राङ्पूर्वकादधाते बाहुलकादमि वान्तत्वे च प्राध्वम् । नर्म्मणि यथा—प्राध्वमध्वनि मुधा विदधासि। अनुकूले यथा—पाणौ कृत्य रिपोर्लक्ष्मीं प्राध्वं कृत्यापरः परम् ॥ ४० ॥ **भृशं प्रकर्षेऽत्यर्थे च** । विभर्त्तेः क्वृभ्वनिम्यः किदिति शे वा बाहुलकान्मान्तत्वे च भृशम् । द्वयोर्यथा—अस्मद्विना मा भृशमुन्मनी भूः । **सामि त्वर्धे जुगुप्सिते** । स्यते नीसावृञ्विति मौ

सम्भ्रमे स्मरणे चान्तरन्ते स्वीकारमध्ययोः ।
उरर्यूररीवदूरी विस्तारेऽङ्गीकृतावपि ॥ ४२ ॥
पराभिमुख्ये प्राधान्ये विमोक्ष्यप्रतिलोम्ययोः ।
गतिधर्षणहिंसासु भृशार्थे विक्रमेऽपि च ॥ ४३ ॥

सामि । अर्द्धे यथा—अर्द्धमुन्मिषति पंकजाकरे सामिकैरववने निमीलति । जुगुप्सिते यथा—तत्सामि यजतेऽध्वर्युर्यद्याज्यां ते वषट् कृतम् ।

॥ अथ यान्तौ ॥

अयि प्रश्नेऽनुनये स्यात् । एतेः स्वरेभ्य इरीति, इ प्रत्यये अयि । प्रश्ने यथा—अयि स्वशक्त्या तपसि प्रवर्तते । अनुनये यथा—अयि निमिकुलजाते क्षत्रिये म्लानि मूलं परपरिभवभाषां सम्वृणु वीडितोऽस्मि । **अये क्रोधविषादयोः । सम्भ्रमे स्मरणे च** । अयीत्यस्य बाहुलकादेत्वे अये । क्रोधविषादयो र्यथा—अये वेलाहेलातुलितकुलशैले जलनिधौ कुतो वारामोघं वद जलदमोघं वितरति ॥ ४१ ॥ संभ्रमे यथा—अये केयं धन्या धवलगृहवातायनतलात्तुलाकोटिक्वाणैः कुसुमधनुषं जागरयति । स्मरणे यथा—अये रामो दाशरथिः ।

॥ अथ रान्ताः ॥

अन्तरन्ते स्वीकारमध्ययोः । अमतेः पूसन्यमिभ्य इत्यरि अन्तादेशे च अन्तर । अन्ते यथा—यौवनान्तरुपतिष्ठति जरा । स्वीकारे यथा—अन्तर्हत्वा श्येनो मूषिकां गतः । परिगृह्येत्यर्थः । मध्ये यथा—अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ । **उरर्यूररीवदूरी विस्तारेऽङ्गीकृतावपि** । रीङ् श्रवणे उरः । पूर्वात् क्विपि पृषोदरादित्वात् सलपे उररी । एवमुरुपूर्वात् उरुरी । अवति क्विपि मव्यर्वीति । ऊटि उरस्तं रीयते उरी । द्वयोर्यथा—कोपदीप्तमुररीकृतधैर्यम् । एवमुरुरीत्यपि । तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते ॥४२॥ **पराभिमुख्ये प्राधान्ये विमोक्ष्यप्रतिलोम्ययोः । गतिधर्षणहिंसासु भृशार्थे विक्रमेऽपि च** । पृणोतेर्बाहुलकात् आप्रत्यये परा । आभिमुख्ये यथा—परापतन्तम्पतगाधि-

परि व्याधावुपरमे वर्जने लक्षणादिषु ।
आलिङ्गने शोके च पूजायां दोषकीर्त्तने ॥ ४४ ॥
भूषणे सर्वतोभावे व्याप्तौ निवसनेऽपि च ।
पुरा भविष्यदासन्ने चिरातीतप्रबन्धयोः ॥ ४५ ॥

राजम् । अनाभिमुख्येऽपि यथा—अनुनयमगृहीत्वा व्याजसुप्तापराची । प्राधान्ये यथा—पराणयन्ति मां नाथ परामानन्दसम्पदम् । विमोक्षे यथा—पराकीर्णै र्बाणै-र्दिशि दिशि बभूवांधतमसम् । प्रातिलोम्ये यथा—परावृत्तं सैन्यं हतविधिवशात्ता-वकमिदम् । गतौ यथा—पुत्रं परासुमनुगंतुमनाः सदारः । अत्र हि परागता असवो यस्येत्यर्थः । धर्षणे तिरस्कारे यथा—परैरपर्यासितवीर्यसंपदां पराभवोऽप्युत्सव एव मानिनाम् । हिंसायां यथा—परासनं यो विदधे परंषाम् । भृशार्थे यथा—मधुप-राजिपराजितमानिनी । विक्रमे यथा—पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥४३॥ **परिव्याधावुपरमे वर्जने लक्षणादिषु । आलिङ्गने शोके च पूजायां दोष-कीर्त्तने । भूषणे सर्वतो भावे व्याप्तौ निवसनेऽपि च** । पृणातेः स्वरेभ्य इरीति प्रत्यये परि । व्याधौ यथा—कदन्नं परितापाय । उपरमे यथा—परिणति-मिति रात्रेर्म्मागधा माधवाप । वर्ज्जने यथा—परित्रिगर्त्तं व्यष्टादेवः । लक्षणे यथा—वृक्षं परिविद्योतते विद्युत् । आदिशब्दाद्वीप्सेत्थंभूतभागेषु । यथा—वृक्षं वृक्षं परि-सेकः । साधुश्चैत्रोमातरम्प्रति । यदत्र मां परिस्यात्तदीयताम् । आलिङ्गने यथा—अशिथिलपरिरम्मैर्दत्तसम्वाहनानि । शोके यथा—प्राणाः स्वयं व्रजत किं परि-देवितेन । पूजायां यथा—ग्रहीतुमार्षा(र्या)न्परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः । दोषकीर्त्तने यथा—सत्यव्रतस्य च सतस्तनयं वनाय प्रस्था-पयन्न परिवादपदं भवामि ॥ ४४ ॥ भूषणे यथा—भज सुवर्णपरिष्कृतमासनम् । सर्व्वतो भावे यथा—परितस्तमांसि परितस्तरिरे । व्याप्तौ यथा —जलतिवि-डितवक्त्रव्यक्तनिम्नोन्नताभिः । परिगततटभूमिस्नानमात्रोत्थिताभिः । निवसने यथा—हलधरपरिधानश्यामलैरम्बुवाहैः । **पुरा भविष्यदासन्ने चिरातीत-प्रबन्धयोः** । पुरत् अग्रगमने दिवि पुरीत्या प्रत्यये पुरा । भविष्यदासन्ने यथा—

पुनरप्रथमे भेदे किल सम्भाव्यवार्तयोः ॥
हेत्वरुच्योरलीके च खलु वीप्सानिषेधयोः ॥ ४६ ॥
जिज्ञासायामनुनये वाक्यालङ्करणेऽपि च ।
अवाऽऽलम्बनविज्ञानवियोगव्याप्तिशुद्धिषु ॥ ४७ ॥

आलोके ते निपतति पुरा सावलिव्याकुला वा । चिरातीते यथा—विप्रं पुरापत-गराडिव निर्जगार । प्रबन्धसातत्ये यथा—वसन्तीह पुरा छात्राः । सततं वसन्ति स्मेत्यर्थः ॥ ४५ ॥ **पुनरप्रथमे भेदे** । पुनाते पूसन्यमिभ्य इत्यरिप्रत्यये पुना-देशे पुनः । अप्रथमे द्वितीयवेलायां यथा—अनुग्रहीतुं पुनरिन्दुवंशं श्रीभीमदेवः किल भीम एव । भेदे विशेषे यथा—किं पुनः क्लृप्तसन्धानपुलिन्द्रकृतसन्निधिः ।

॥ अथ लान्तौ ॥

किल सम्भाव्यवार्त्तयोः । हेत्वरुच्योरलीके च । किलतेर्नाम्युपा-न्तेति के किल । सम्भाव्ये यथा—लघूकरिष्यन्नति भारभङ्गुराममूं किल त्वं त्रिदिवादवातरः । वार्त्तायां यथा—षट् रसाः किल वैद्येषु भरतेऽष्टौ नवापि ते । हेतौ यथा—क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः । अरुचौ यथा-तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्नं विद्यते । अलीके यथा—कथमपि परिवृत्तानिद्रयान्धा किल स्त्री मुकुलितनयनैव श्लिष्यति प्राणनाथम् । **खलु वीप्सानिषेधयोः** ॥ ४६ ॥ **जिज्ञासायामनुनये वाक्यालङ्करणेऽपि च** । खलतेर्भृमृतृत्सरी । बहुवचनादुप्रत्यये खलु । वीप्सायां यथा—विद्वद्भिः खलु कर्त्तव्यः शास्त्रेऽभ्यासः समाहतैः । शास्त्रे शास्त्रे इत्यर्थः । निषेधे यथा—निर्द्धारितेऽर्थे लेखेन खलूक्त्वा खलुवाचिकम् ॥४६॥ जिज्ञासायां यथा—कः खलु युवा धन्योऽधरं धास्यति । अनुनये यथा—न खलु न खलु मुग्धे साहसं कार्यमेतत् । वाक्यालङ्करणे यथा—योषितामतितरांनखलूनं गात्रमुज्वल-तया नखलूनम् ।

॥ अथ वान्तौ ॥

अवाऽऽलम्बनविज्ञानवियोगव्याप्तिशुद्धिषु । अवतेरवि अवः ।

एवौपम्ये परिभव ईषदर्थेऽवधारणे ।
उषा रात्रौ तदन्ते च दोषा निशि निशामुखे ॥ ४८ ॥
मङ्क्षु शीघ्रे भृशे तत्त्वेऽतो हेतोरपदेशवत्
निर्देशे पञ्चम्यर्थे च इतो यतश्च विभागवत् ॥ ४९ ॥

आलम्बने यथा—दन्तावष्टम्भपातक्रमनमितबहिर्गर्त्तवद्दण्डभित्तिः । विज्ञाने यथा-अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः । वियोगे यथा—कन्याऽवमुक्तनूपुरा । व्याप्तौ यथा—किमपैति रजोभिरौर्वैरैरवकीर्णस्य मणेर्म्महार्घता । शुद्धौ यथा—क्रीतं वैरिकुलात्त्वया किल दलत्कुन्दावदातं यशः ॥ ४७ ॥ **एवौपम्ये परिभव ईषदर्थेऽवधारणे** । एतेर्लटि खटीति (उ०५०५) वे एव । औपम्ये यथा—तवैव मे सन्तु सदापि सम्पदः । परिभवे यथा—बुद्धावाजितमपरेण काममाविष्कुर्वीत स्वगुणमपत्रपः क एव । ईषदर्थे यथा—किंचिदेव वदति स्म सस्मयः । अवधारणे यथा—वपुरेव तवाचष्टे भगवन् वीतरागताम् ।

॥ अथ षान्ताः ॥

उषा रात्रौ तदन्ते च । ओषतेर्दिवि पुरीति (उ० ५९९) बहुवचनात् क्रित्याप्रत्यये उषा । द्वयोर्यथा—गलकेलिक्लमारामाः पव मानैरुषातनैः । **दोषा निशि निशामुखे** । दुष्यतेः समिक्षमीत्या प्रत्यये दोषा । द्वयोर्यथा—दोषामन्यं विदधति सुरतक्रीडायासश्रमशमपटवः ॥ ४८ ॥ **मङ्क्षु शीघ्रे भृशे तत्त्वे** । मज्जतेः मरुजीष्यशिम्यः सुकिति सुकि मंक्षु । शीघ्रभृशंयोर्यथा—मङ्क्षूदपाति परितः पटलैरलीनाम् । तत्त्वे यथा—वीक्षते किमपि मङ्क्षु मुमुक्षुः ।

॥ अथ सान्ताः ॥

अतो हेतोरपदेशवत् । निर्देशे पञ्चम्यर्थे च । एतस्मात् अतः । इतोतः कुत इति साधुः । त्रिष्वर्थेषु । हेतोरपदेशवदिति यथा हेतोरपदेशे वर्त्तते तथा । निर्देशे पञ्चम्यर्थे चेत्यर्थः । हेत्वपदेशे यथा—अतोऽत्र किंचिद्भवतीं बहुक्षमाम् । निर्देशे यथा—अतोगतः सम्प्रति भानुरेषः । पञ्चम्यर्थे यथा—

पञ्चम्यर्थे नियमे च तत आदौ कथान्तरे ॥
पञ्चम्यर्थे परिप्रश्ने तिरोन्तर्धौ तिरश्चि च ॥ ५० ॥
नीचैः स्वैराल्पनीचेषु प्रादुर्नामप्रकाशयोः ।
पुरोऽग्रे प्रथमे च स्यान्मिथोऽन्योन्यं रहस्यपि ॥ ५१ ॥

त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनामपि । **इतो यतश्च विभागवत् । पञ्चम्यर्थे नियमे च** । अस्मादितः । यस्माद्यतः । विभागे यथा—इतो वसति केशवः पुरमितस्तदीयद्विषां यतो यतः पाण्डुरणो निवर्त्तते ततस्ततः प्रेषितलोललोचना ॥ ४९ ॥ पंचम्यर्थे यथा—इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् । यतस्त्वया ज्ञानमशेषमाप्तं चैतन्यमुग्रादिव दीक्षितेन । नियमे यथा—इतः कुराज्यं नरकान्तमाहुः । नरकान्तमेव वा इत्यर्थः । यतो नियोगो बत बन्धनान्तः । बन्धनान्त एवेत्यर्थः । **तत आदौ कथान्तरे । पञ्चम्यर्थे परिप्रश्ने** । तस्मात्ततः । आदौ यथा—ततः प्रयाते वसुदेवसूनौ । आदौ गतेत्यर्थः । कथान्तरे यथा—श्रवणाततश्च क्रमेणैष सुतीक्ष्णादीनुपस्थाय महामुनीनित्यादि । पञ्चम्यर्थे यथा—ततो गृहीतन्तु मृगाङ्कनाभिः । परिप्रश्ने यथा—जाम्बवान् ततस्ततः । **तिरोन्तर्धौ तिरश्चि च** । तरतेर्मिथिरंज्युषीति (उ०९७१) किदसितिरः । अन्तर्द्धौ यथा—पद्मयोनिस्तिरोदधे । तिरश्चि तिर्यगर्थे यथा—तिरो विवर्त्तितग्रीवम् ॥ ५० ॥ **नीचैः स्वैराल्पनीचेषु** । निपूर्वादंचतेर्न्यद्भ्यामञ्चेरिति कैसिनलोपे । अच्च प्राग्दीर्घश्चेति दीर्घत्वे नीचैः । स्वैरे यथा—चरति स्वैरिणी नीचैः । स्वैरं चरतीत्यर्थः । अल्पे यथा—नीचैर्वास्यत्युपजिगमिषोर्दे-वपूर्वः गिरिन्ते । नीचे यथा—उपपतिरिवनीचैः पश्चिमान्तेन चन्द्रः । **प्रादुर्नामप्रकाशयोः** । प्रपूर्वाददतेरुद्वतीति उसिं प्रादुः । नाम्नि नामधेये यथा—प्रादुर्भावाहरेर्दश । मत्स्यकूर्म्मादीनि दशनामानीत्यर्थः । प्रकाशे यथा—प्रादुःष्यात्क इव जितपुरः परेण । **पुरोऽग्रे प्रथमे च स्यात्** । पृणातेर्मिथि रंज्युषीति कित्यसि पुरः । अग्रे यथा—पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहां । **प्रथमे** यथा—यथा समस्तं तिमिरांशुकं तया पुरोपि रागाद्गलितं न लक्षितं । **मिथोऽन्योन्यं रहस्यपि ।**

***अहा धिगर्थे शोके च करुणार्थविषादयोः ।**
अह क्षेपे नियोगे चाप्याहो प्रश्नविचारयोः ॥५२॥
सह सम्बन्धसादृश्ययोगपद्यसमृद्धिषु ।
साकल्ये विद्यमाने च । हीही विस्मय हास्ययोः ॥५३॥

मेथते म्मिथि रंजिति कित्यसि मिथः। अन्योन्यस्मिन् यथा—मिथो विवदमानयोः । रहसि एकान्ते यथा—वक्तुं मिथः प्राक्रमतैनमेवम् ॥ ५१ ॥

॥ अथ हान्ताः ॥

अहा धिगर्थे शोके च करुणार्थविषादयोः । नञ्पूर्वाज्जहातेः किपि अहा । धिगर्थे यथा-अहा महापातकिनं भवन्तम् । शोकः स्थायीभावः । करुणो रसः । विषादो व्यभिचारीभावः । त्रिष्वपि यथा—देवी का जनकाधिराजतनयाऽहा जानकि कासि हा । **अह क्षेपे नियोगे चापि** । नञ् पूर्वाज्जहातेः क्वचिदिति डे अह । द्वयोर्यथा—विहितमथविधात्रा यत्तदेवोपयोज्यम् । **आहो प्रश्नविचारयोः** । आङ् पूर्वाज्जहोतेर्विचि आहो । प्रश्ने यथा—आहो किमेषा सुतनुर्विरौति ॥ विचारे यथा—किं तावत्सरसि सरोजमेतदारादाहोस्वित् मुखमवभासते युवत्याः ॥५२॥ **सह सम्बन्धसादृश्ययौगपद्यसमृद्धिषु । साकल्ये विद्यमाने च** । सहतेरवि सह । सम्बन्धे यथा—पण्डितैश्च विनीतैश्च धर्म्मज्ञैर्यशशालिभिः । तिष्ठेद्बिबन्धनस्योऽपि न तु राज्यं खलैः सह ॥ पण्डितादिभिः सम्बन्धं बन्धनमपि श्रेयो न तु खलसम्बन्धं राज्यमपीत्यर्थः । सादृश्ये इवार्थे यथा—सिक्ता इवामृतजलेन मुहुर्जनानां क्रान्तिच्छिदा वनवनस्पतयस्तदानीम् । शाखाऽवसक्तवसनाऽभरणाभिरामाः कल्पद्रुमैः सह विचित्रफलैर्विरेजुः ॥ कल्पद्रुमा इवेत्यर्थः । यौगपद्ये तुल्ययोगे यथा— रघुभृशं वक्षसि तेन ताडितः पपात भूमौ सहसैनिकाश्रुभिः ॥ समृद्धौ यथा—समद्रं मद्राणां समृद्धिरित्यर्थः । साकल्ये यथा—सतृणमभ्यवहरति । विद्यमाने यथा—सहैव दशभिः पुत्रैः भारं वहति

* शनैः शनैश्चरे स्वैरे सहस्साहसतेजसोः ।

ननु च प्रश्ने दुष्टोक्तौ सम्यग्वादे स्तुतावपि ।
अपष्ठु चारौ निर्दोषे किमुत प्रश्नवादयोः ॥ ५४ ॥

गर्दभी । ही हो **विस्मयहास्ययोः** ॥ ५३ ॥ जहातेः किपि ईत्वे च ही । हियं जहाति ही । द्वयोर्यथा—ही ही सम्पन्ना मे प्रियवयस्यमनोरथाः ॥५३॥

॥ अथ त्रिस्वरास्तत्र चान्ताः ॥

ननु च प्रश्ने दुष्टोक्तौ सम्यग्वादे स्तुतावपि । ननु चिनोति ननु च क्वचिदिति डः । प्रश्ने यथा—ननु च विप्रतिषिद्धमेतत् । दुष्टोक्तौ यथा—ननु च द्वयेषामित्यपशब्दोऽयम् । सम्यग्वादे यथा—ननु च एवमेवैतत् । स्तुतौ यथा—ननु च कोऽस्य समः सुकृती भुवि ।

॥ अथ ठान्ताः ॥

अपष्ठु चारौ निर्दोषे । अपतिष्ठति अपष्ठु । दुःस्वपवनिभ्यः स्थ इति किदुः । भीरुष्ठानादित्वात्षत्वम् । चारु सगुणं । निर्दोषो दोषहीनम् । द्वयोर्यथा—तव धर्मराज इति नाम कथमिदमपष्ठु पठ्यते । भौमादिनमभिदधत्यथवा भृशमप्रशस्तमपि मंगलं जनाः ॥

॥ अथ तान्तौ ॥

किमुत प्रश्नवादयोः । विकल्पे अतिशये चापि । किम्पूर्वाद्वयतेः क्ते यत्वृति किमुत । प्रश्ने यथा—प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेण वा किमुत सकले पाते वह्नित्वमद्य समेष्यसि । वादे यथा—नित्यः शब्दः किमुताऽनित्यः ॥५४॥ विकल्पे यथा—किम्वा विद्याधरोऽयं किमुत सुरपतिः । अतिशये यथा—यदास्यमप्यस्य लभेत नारी सा स्यात्कृतार्था किमु-

विकल्पेऽतिशये चापि पुरस्तात् प्रथमेऽग्रतः ।
पूर्वस्यां च पुरार्थे चाभीक्ष्णं शीघ्रप्रकर्षयोः ॥ ५५ ॥
पौनःपुन्ये सन्तते चावश्यं निश्चयनित्ययोः ॥
इदानीं साम्प्रतं वाक्यालङ्कारे तद्दिनं पुनः ॥ ५६ ॥

ताङ्कशय्याम् । **पुरस्तात् प्रथमेऽग्रतः । पूर्वस्यां च पुरार्थे च ।** पूर्वस्यां दिशि देशे काले वा पुरस्तात् । पूर्वापराधरेभ्यस्तातिपुरादेशः । पृणाति वा संश्चद्वेहदिति साधुः । प्रथमे यथा—अनुचितमिति मत्वा तत्पुरस्तात् निरस्तम् । अग्रतो यथा—रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्तात् । पूर्वस्यां दिशि यथा—पुरस्तादुदयः पश्चात्तथैवास्तमयो ध्रुवः । व्यभिचारो न चेदस्ति तत्र का परिवेद(देव)ना । पुरार्थो भविष्यदासन्नचिरातीतप्रबन्धास्तेषु तद्वदुदाहरणं द्रष्टव्यम् ॥

अभीक्ष्णं शीघ्रप्रकर्षयोः। पौनःपुन्ये सन्तते च । अभीक्षते भ्रूणतृणेतिणो बाहुलकान्मान्तत्वे च अभीक्ष्णम् । शीघ्रप्रकर्षयोर्यथा—तक्ष्णोर्तीव तथान्योऽभीक्ष्णन्तीक्ष्णक्षरक्षारैः ॥५५॥ सन्ततपौनःपुन्ययोर्यथा—अभीक्ष्णमक्षुण्णतयातिदुर्गमम् । **अवश्यं निश्चयनित्ययोः ।** अवश्यायतेर्गमिजमीति बहुवचनात् डिदमि अवश्यम् । निश्चये यथा—अवश्यं यातारश्चिरतरमुषित्वाऽपि विषयाः । नित्यं शास्वतमनवरतं च । शास्वते यथा—अवश्यं पृथ्वीयं क्षितिपतिसहस्राणि तु ययुः । अनवरते यथा—अवश्यं कर्त्तव्यं शयनमशनं च द्वयमपि । **इदानीं साम्पतं वाक्यालङ्कारे** । अस्मिन् काले इदानीं सदाधुनेति साधुः । साम्प्रतमित्यस्यार्थे यथा—इदानीमस्माकं पटुतरविवेकाञ्जनजुषां समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ वाक्यालङ्कारे यथा—इदानीं भो दानी वितरसि कथं न त्वमधुना । **तद्दिनं पुनः । दिनमध्ये प्रतिदिने ।** तच्च तद्दिनं च तद्दिनम् ॥ बाहुलकान्मान्तत्वम् द्वयोर्यथा—देवार्चन्ते तद्दिनं कुर्यात् ॥५६॥ **साम्प्रतं तूचितेऽधुना ।** सम्प्रति युज्यते साम्प्रतम् ।

॥ अथ मान्ताः ॥

दिनमध्ये प्रतिदिने साम्प्रतं तूचितेऽधुना ।
समयानिकषे चान्तर्निकटे चाऽन्तरा पुनः ॥ ५७ ॥
विनार्थे सन्निधौ मध्येऽभितोऽभिमुखकात्स्न्र्ययोः ।
समीपोभयतः शीघ्रेष्वग्रतः प्रथमाग्रयोः ॥ ५८ ॥

क्वचिदित्यणि बाहुलकान्मान्तत्वम् ॥ द्वयोर्यथा—तन्मैथिल्यीं प्रत्याहर्त्तुमुपक्रमः परमितो नः साम्प्रतं साम्प्रतम् ॥

॥ अथ यान्ताः ॥

समया निकषे चान्तर्निकटे च । समेतेर्निकषेश्च समिण् निकषिभ्यामा इत्याप्रत्यये समया-निकषा लाघवार्थं षान्तस्यापि यान्तेषु पाठः । द्वयोर्यथा गुणदोषाभिव्यक्तिर्व्वचसां संजायते सतः समया । प्रादुःषन्ति विशेषा हेम्नां निकषोपलं निकषा ॥

॥ अथ रान्ताः ॥

अन्तरा पुनः । विनार्थे सन्निधौ मध्ये । अन्तौ राति डिदित्याः अन्तरा ॥५७॥ विनार्थे यथा—न सुखं धर्ममन्तरा । सन्निधौ मध्ये च यथा—गतासुरन्तरादन्तीव रण्डक इवाभवत् ।

॥ अथ सान्ताः ॥

अभितोऽभिमुखकात्स्न्र्ययोः । समीपोभयतःशीघ्रेषु । उभयस्मात् अभितः । पयभेः सर्वो भय इति तस् । अभितः स्यति वा क्विप् । अभिमुखकात्स्न्र्ययोर्यथा—याञ्चादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं वृणु त्वं वृण्वित्यभितो मुखानि सदशग्रीवः कथं वर्ण्यते ॥ शीघ्रसमीपयो यथा—अव्याकुला पटमयान्यभितो वितत्य । उभयतोऽर्थे यथा—भेजेऽभितः पातुकसिद्धसिन्धोरभूतपूर्वां रुचरम्बुराशेः । **अग्रतः प्रथमाग्रयोः ।** अर्ग्र

अन्ततोऽवयवोत्प्रेक्षापञ्चम्यर्थेषु शासने ।
पुरतोऽग्राद्ययोः पूर्वेद्युर्पूर्वाह्णप्रभातयोः ॥ ५९ ॥
अहहेत्यद्भुते खेदेऽन्तरेणान्तर्विनार्थयोः ॥
अहो बतानुकम्पायां खेदामन्त्रणयोरपि¹ ॥ ६० ॥

इत्याचार्यहेमचन्द्रविरचितेऽनेकार्थसङ्ग्रहेऽव्ययशब्दकाण्डः

सप्तमः समाप्तः ॥९॥

शुभं भवतु । कल्याणमस्तु ॥

अग्रतः आद्यादित्वात्तस् ॥ प्रथमे यथा—अग्रजन्माग्रतःसृष्टः । अग्रे यथा—अग्रतो बाहुपाशेन केशपाशेन पृष्ठतः । पार्श्वतः कर्णपाशेन सर्वतो बन्धनं हि सा ॥ **अन्ततोऽवयवोत्प्रेक्षापंचम्यर्थेषु शासने** । अन्ते अन्ततः । आद्यादित्वात्तस् ॥ पंचम्यर्थो हेतुः । शासनं शिक्षा । चतुर्ष्वपि यथा—किंचिदप्यधीष्व अन्ततः प्रज्ञां प्राप्स्यसि । **पुरतोऽग्राद्ययोः** । पृणाति पुरतः । विहायसिति बहुवचनात् साधुः ॥ अग्रे यथा—वक्त्रे नागरखण्डमस्तु पुरतः प्रेमाकुला कुन्तली । आद्ये यथा—भोजने पुरतः पुत्रः संग्रामे पश्चिमः सदा । **पूर्व्वेद्युर्पूर्वाह्प्रभातयोः** । पूर्वस्मिन्नहनि पूर्वेद्युः । परापरेत्येद्युस् । द्वयोर्यथा—पूर्व्वेद्युर्वितरंति सन्ततमहो दानं निदानं श्रियाम् ॥५९॥

॥ अथ हान्ताः ॥

अहहेत्यद्भुते खेदे । अहपूर्वाज्जहातेः क्वचिदिति डे अहह । अद्भुते यथा—अचिन्त्याः पन्थानः किमपि महतामन्धकरिपोर्यदक्ष्णोभूत्तेजस्तदकृतकथामप्यमदनाम् ॥ मुनेरत्रे नेत्राद्यदजनि पुनर्ज्योतिरहह प्रतेने तेनेदं मदनमयमेतत्त्रिभुवनम् । खेदे यथा—मुदा यत्र प्राणांस्तृणमिव परार्थप्रणयिनस्त्यजन्तो लज्जन्ते कियदिति धिया तद्युगमगात् । तृणप्राणप्रायं त्यजति न जनो यत्र समये वयं जातास्तत्रेत्यहह कृपणं जीवितमिदम् ॥

१. खेदामन्त्रणयोरपि । अनपयति प्रभाते क्षणं क्षणं क्षणार्थके ।

॥ अथ चतुःस्वरो तत्र णान्तः ॥

अन्तरेणान्तर्विनार्थयोः ॥ अन्तरेति अन्तरेण । भ्रूणतृणगुणेति साधुः । द्वयोर्यथा—तत्तं निहंतुमवनीं दिवमंतरेण त्वामंतरेण नहि संप्रति कश्चिदीशः ।

॥ अथ तान्तः ॥

अहोबतानुकम्पायां खेदामन्त्रणयोरपि ॥ ६० ॥ अहोपूर्वात् वनतेः शरीति किति ते यमिरमीति न लोपे अहोबत । अनुकम्पायां खेदे च यथा—अहो बत महत् कष्टं चक्षुष्मानपि याचते । अदृष्टसुखभंगस्य युक्तमंधस्य याचितुम् ॥ आमन्त्रणे यथा—सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम् । चापेन ते कर्म न चातिहिंस्रमहोबतासि स्पृहणीयवीर्यः ॥

एषां चाव्ययानां अर्थकथनमुपलक्षणमात्रम् । अन्यथा भूयांसोऽप्यर्थाः सन्ति । यदाहुः—निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः । अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायामनेकार्थकैरवाकरकौमुदीत्यभिधानायां स्वोपज्ञानेकार्थसंग्रहटीकायामनेकार्थशेषाव्ययकांडः सप्तमः समाप्तः ॥ ७ ॥

॥ प्रशस्तिः ॥

श्रीहेमसूरिशिष्येण श्रीमन्महेन्द्रसूरिणा ।
भक्तिनिष्ठेन टीकेयं तन्नाम्नैव प्रतिष्ठिता ॥ १ ॥

सम्यग्ज्ञाननिधिर्गुणैरनवधिः श्रीहेमचन्द्रप्रभोः ।
ग्रन्थे व्याकृतिकौशलं विलसति कास्मादृशां तादृशम् ।
व्याख्यामः स्म तथापि तं पुनरिदं नाश्चर्यमन्तर्म्मनः
तस्याजस्रमपि स्थितस्य हि वयं व्याख्यामनुब्रूमहे ॥ २ ॥

यल्लक्ष्यं स्मृतिगोचरं समभवद्दृष्टं च शास्त्रान्तरे
तत्सर्वं समदर्शि किन्तु कतिचिन्नो दृष्टलक्ष्याः क्वचित् ।
अभ्यूह्यं स्वयमेव तेषु सुमुखैः शब्देषु लक्ष्यं बुधैः
यस्मात्सम्प्रति तुच्छकश्मलधियां ज्ञानं कुतः सर्वतः ॥ ३ ॥

एकत्रापि कृताभिधेयविषये व्युत्पत्तिरर्थान्तरे
कर्त्तव्यास्वयमेव दर्शितदिशानिर्वेदवन्ध्यैर्बुधैः ।
वर्णाद्यक्रमवर्णनं न च कृतं तच्चापि कार्यं स्वयं
यत्कृत्स्नप्रतिपादने न विवृतिः कामं वरीवृद्ध्यते ॥ ४ ॥

परिपूर्णा चेयमनेकार्थसंग्रहटीका अनेकार्थकैरवाकरकौमुदीत्यभिधानेति ॥

शब्दक्रमः

त्रिस्वराः शब्दाः

कान्ताः ।

शब्दः	श्लोकः	पृष्ठं
॥ अथ ठान्ताः ॥		
अम्बाष्ठः	१६२	७१
अम्बष्ठा	१६२	७१
कनिष्ठो	१६३	७१
कानष्ठा	१६३	७१
कमठः	१६३	७१
जरठः	१६४	७२
नर्मठः	१६४	७२
प्रकोष्ठः	१६४	७२
प्रतिष्ठा	१६५	७२
मत्कुष्ठः	१६५	७२
लघिष्ठः	१६६	७३
वरिष्ठः	१६६	७३
वरिष्ठं	१६६	७३
वैकुण्ठः	१६७	७३
श्रीकण्ठः	१६७	७६
साधिष्ठः	१६७	७३
॥ अथ डान्ताः ॥		
कारण्डः	१६८	७३
कुष्माण्डः	१६८	७३
कुष्माण्डी	१६८	७३
कोदण्डः	१६९	७४
गारुडं	१६९	७४
तित्तिडः	१६९	७४
तित्तिडी	१७०	७४
तिन्तिडी	१७०	७४
निर्गुण्डी	१७०	७४

शब्दः	श्लोकः	पृष्ठं
प्रचण्डः	१७१	७५
प्रकाण्डः	१७१	७५
पिचण्डः	१७२	७५
पूत्यण्डः	१७२	७५
मेरुण्डः	१७३	७६
मेरुण्डा	१७३	७६
भ्मरुण्डः	१७३	७६
मार्तण्डः	१७४	७६
वरण्डः	१७४	७६
वतण्डा	१७४	७६
वारुण्डः	१७५	७७
वितण्डा	१७५	७७
शिखण्डः	१७६	७७
सरण्डः	१७६	७७
॥ अथ ढान्ताः ॥		
अध्यूढः	१७७	७८
अध्यूढा	१७७	७८
आषाढः	१७७	७८
उपोढः	१७८	७८
उदूढः	१७८	७८
प्ररूढः	१७८	७८
प्रगाढः	१७८	७८
वारूढः	१७९	७९
विरूढः	१७९	७९
विगूढः	१७९	७९
समूढः	१८०	७९
संरूढः	१८०	७९

शब्दः	श्लोकः	पृष्ठं
॥ अथ णान्ताः ॥		
अरुणः	१८०	७९
अरुणाः	१८१	७९
अमीक्ष्णं	१८२	८०
इन्द्राणी	१८२	८०
उषणा	१८२	८०
करुणः	१८३	८०
करुणा	१८३	८०
करणं	१८३	८०
करणः	१८५	८१
कङ्कणं	१८५	८१
कल्याणं	१८६	८२
अरणिः	(१८६)	८२
इरिणं	(१८६)	८२
इक्षणं	(१८६)	८२
उषणं	(१८६)	८२
एषणी	(१८६)	८२
कत्तृणं	१८६	८२
करेणुः	१८६	८२
कारणं	१८७	८३
कारणा	१८७	८३
कार्मणं	१८८	८३
काकणी	१८८	८३
कृपाणी	१८९	८४
कृपाणः	१८९	८४
क्षेपणी	१८९	८४
कौङ्कणः	१९०	८४
कौङ्कणं	१९०	८४
ग्रहणं	१९०	८४

शब्दः	श्लोकः	पृष्ठं
ग्रहणी	(१९०)	८४
ग्रामणीः	१९१	८५
ग्रामिणी	१९१	८५
गोकर्णः	१९२	८५
गोकर्णी	१९३	८६
चरणः	१९३	८६
चरणं	१९३	८६
जरणः	१९४	८६
तरुणः	१९४	८६
तरणिः	१९५	८६
दक्षिणः	१९५	८६
दक्षिणा	१९६	८७
दुघणः	१९६	८७
दुर्वर्णं	१९७	८७
दौवीर्णं	१९७	८७
धरणः	१९८	८८
धरणं	१९८	८८
धरणी	१९८	८८
घर्षणं	१९९	८८
धर्षणी	१९९	८८
धिषणः	१९९	८८
धिषणा	१९९	८८
निर्याणं	२००	८९
निर्वाणं	२००	८९
निर्माणं	२०१	८९
निःश्रेणिः	२०१	८९
प्रघणः	२०२	९०
प्रवणः	२०२	९०
प्रमाणं	२०३	९०
पत्तोणं	२०४	९०

॥ अथ तान्ताः ॥

॥ अथ थान्ताः ॥

॥ अथ दान्ताः ॥

शब्दः	श्लोकः	पृष्ठं	शब्दः	श्लोकः	पृष्ठं
अन्तरं	,,	,,	उद्धारः	५१८	,,
अवरं	५०८	,,	उदारः	,,	,,
अवरा	५०९	२१९	उर्वरा	५१९	२२३
अक्षरं	,,	,,	ऋक्षरं	,,	,,
अधरः	५१०	,,	ऋक्षरः	,,	,,
अम्बरं	,,	,,	एकाग्रः	५२०	,,
अररं	५११	,,	उशीरं	,,	,,
अङ्कुरः	,,	,,	कररः	,,	,,
अजिरं	५१२	२२०	कर्बुरं	५२१	,,
अशिरः	,,	,,	कर्बुरः	,,	,,
अङ्गारः	,,	,,	कन्दरः	,,	,,
अण्डीरः	५१३	,,	कर्करः	५२२	५२४
असुरः	,,	,,	कदरः	,,	,,
असुरा	,,	,,	कर्परः	५२३	,,
अगुरुः	,,	,,	कङ्करं	,,	,,
अवीरा	(५१४)	,,	कडारः	,,	,,
आहारः	५१४	,,	कञ्जारः	५२४	,,
आसारः	,,	,,	करीरः	,,	,,
आकारः	५१५	२२१	कलत्रं	५२५	२२५
आधारः	,,	,,	कटित्रं	,,	,,
आकरः	,,	,,	कच्छुरः	५२६	,,
इतरः	५१६	,,	कच्छुरा	,,	,,
इत्वरः	,,	,,	कवरं	,,	,,
इत्वरी	,,	,,	कबरी	५२७	,,
ईश्वरः	५१७	२२२	कन्धरः	,,	,,
ईश्वरा	,,	,,	कन्धरा	,,	,,
उदरं	,,	,,	कशेरुः	,,	,,
उत्तरं	,,	,,	कणेरुः	५२८	२२६
उत्तरः	५१८	,,	गणेरुः	,,	,,
उत्तरा	(५१८)	,,	कटप्रूः	,,	,,

शब्दः	श्लोकः	पृष्ठं
कर्चरं	(५२९)	,,
कठोरः	,,	,,
कान्तारं	५२९	,,
काश्मीरं	५३०	,,
कावेरी	,,	,,
किर्मीरः	५३१	,,
किशोरः	,,	,,
किंशारुः	,,	,,
कुहरं	५३२	२२७
कुक्कुरं	,,	,,
कुक्कुरः	,,	,,
कुबेरः	५३२	२२७
कुर्परः	५३३	,,
कुमारः	,,	,,
कुमारं	५३४	२२८
कुमारी	,,	,,
कुटारं	५३५	,,
कुञ्जरः	,,	,,
कुञ्जरा	,,	,,
कुठारुः	५३६	,,
कूवरः	,,	,,
केसरः	,,	,,
केसरं	५३७	२२९
केदारः	५३८	,,
केनारः	,,	,,
केटिरुः	५३९	,,
कोट्टारः	,,	,,
खर्परः	५४०	२३०
खपुरः	,,	,,
खर्जूरं	५४१	,,

शब्दः	श्लोकः	पृष्ठं
खर्जूरः	,,	,,
खदिरी	५४२	,,
खदिरः	,,	,,
खिंखिरः	,,	२३१
खिखिरा	५४३	२३१
गह्वरः	,,	,,
गर्गरः	,,	,,
गर्गरी	,,	,,
गान्धारः	५४४	,,
गायत्री	,,	,,
गोपुरं	,,	,,
घर्घरः	५४५	,,
चन्दिरः	,,	,,
चत्वरं	५४६	२३२
चङ्कुरः	,,	,,
चकुरः	,,	,,
चमरः	५४७	,,
चमरी	,,	,,
चिकुरः	५४८	,,
छिदिरः	,,	,,
छित्वर	५४९	,,
छित्वरं	,,	२३३
जठरः	,,	,,
जर्जरं	५५०	,,
जम्बीरः	,,	,,
झर्झरः	५५१	२३४
झल्लरी	,,	,,
झलरी	,,	,,
टङ्कारः	५५२	,,
टगरः	,,	,,
टट्टरी	५५३	,,

॥ अथ खान्ताः ॥

॥ अथ गान्ताः ॥

॥ अथ चान्ताः ॥

॥ अथ लान्ताः ॥

शब्दः	श्लोकः	पृष्ठं	शब्दः	श्लोकः	पृष्ठं
अनु	३०	४४५	किल	,,	,,
ननु	३१	४४६	खलु	,,	,,
नाना	३२	,,	अव	४७	,,
स्थाने	,,	,,	एव	४८	४५४
अप	,,	,,	उषा	,,	,,
अपि	३३	४४७	दोषा	,,	,,
उपा	३४	,,	मङ्क्षु	४९	,,
अभि	३६	४४८	अतः	,,	,,
अमा	,,	,,	इतः	,,	,,
अलं	३६	४४८	यतः	,,	,,
एवं	३७	४४९	ततः	५०	४५५
कथं	३८	,,	तिरः	,,	,,
कामं	,,	,,	नीचैः	५१	,,
किमु	३९	४५०	प्रादुः	,,	,,
जोषं	,,	,,	पुरः	,,	,,
नाम	,,	,,	मिथः	,,	,,
नूनं	४०	,,	अहा	५२	४५६
प्राध्वं	,,	,,	अह	,,	,,
मृशं	४१	,,	आहो	,,	,,
सामि	,,	,,	सह	५३	,,
अयि	,,	,,	ही ही	५३	४५६
अये	,,	,,	ननु च	५४	४५७
अन्तर्	४२	४५१	उपष्ठु	,,	,,
ऊररी	,,	,,	किमुत	,,	,,
ऊरुरी	,,	,,	पुरस्तात्	५५	४५८
ऊरी	,,	,,	असीक्ष्णं	,,	,,
परा	४३	,,	अवश्यं	५६	,,
परि	४४	४५२	इदानीं	,,	,,
पुरा	४५	,,	तद्दिनं	,,	,,
पुनर्	४६	४५३	साम्प्रतं	५७	४५९

शब्दः	श्लोकः	पृष्ठं	शब्दः	श्लोक	पृष्ठं
समया	,,	,,	पूर्व्वेद्युः	,,	,,
अन्तरा	,,	,,	अहह	६०	,,
अभितः	५८	,,	अन्तरेण	,,	,,
अप्रतः	,,	,,	अहोबत	,,	,,
अन्ततः	५९	४६०	क्षणंक्षणं	(६०)	,,
पुरतः	,,	,,			

॥ शब्दक्रमः समाप्तः ॥

॥ शुद्धिपत्रकम् ॥

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
१	१४	०तशे०	तरा
६	४	कमण्डलौ	करे कमण्डलौ
६	१६	मण्डलौ	कमण्डलौ
७	५	०चर्मणोः	०मणोः
७	१८	क्व०	क्वो०
७	२०	च व"	च वा"
८	५	क्षुद्रवरिणि	क्षुद्रवैरिणि
८	१९	नव	नैव
१०	१६	०विदूरतः	०विदूरतः
१६	१५	गृह्णाति	गृह्णामि
१९	३	जीविको	जीवकः
२१	२३	यद्यापि	यद्यपि
२२	२४	धने	धवे
२४	२२	व्योयोम्नि	व्योम्नि
२७	७	प्रियङ्गः	प्रियङ्गुः
२८	२३	साधकश्चव	साधकश्चैव
२९	२१	पेचकः	पेचकैः
३०	१२	(उकः)	(ऊकः)
३०	२३	शिशो० वलिधौ	शिशौ० वालधौ
३२	११	इवष	इवैष
३२	२०	उकः	ऊकः
३८	२१-२४	वाल्हिकः	वाह्लिकः
३९	१-२	"	"
४१	२३	वडूर्य०	वैडूर्य०
४५	१८	त्रिशिखं	त्रिशिखं स्यात्
४७	१५	चलपाङ्गं	चलापाङ्गां
४७	२२	यथा-द्दयः	यथा-यथाद्दयः
४८	२०	स्फुली०	स्फुलि०

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
५०	२-९	०तूर्णं०	०तूण०
५५	२	०निरोग०	०नीरोग०
५८	५	न नो धनम्	नो धनम्
६१	९	रूरुधु०	रुरुधु०
६२	१६	शङ्करे	शङ्करे
६२	२१	०नेव्यस्य	०नेप्यस्य
६३	८	दुष्टरिष्ट०	दुष्टारिष्ट०
६४	१	केर्कटः	कर्कटः
६९	६	वराटा	वरटा
७४	८	०लाडकौ	०लाटकौ
७६	१७	तरुणौ	तरणौ
७७	२४	स्यादत्क०	स्यात्क०
७८	१९	जरठे वृषे	जठरे वृद्धे
७९	८	गङ्ग०	गङ्गा०
७९	२०	कहाय	अहाय
८१	१३	०मतया	०मत्तया
८१	२२	०विशङ्कुः	०विंशङ्कुः
८२	२	रोहिणं	रौहिषं
८५	३	प्रथमान्तरे	प्रमथान्तरे
८६	५-२२	०केंऽशौ	०केंऽशौ
८९	२४	कलसे	कलशे
९०	१	"	"
९१	२३	शाल्णलिद्रुमे	शाल्मलिद्रुमे
९२	५	मसृणा०	मसृणो०
९२	२३	०कढिने	कठिने
१००	५	चाक्षतः	चाक्षतं
१००	६	षंडे	षण्डे
१०१	७	षंड०	षण्ड०
१०६	१८	यद्ददाह	यद्ददाह
१०८	२-१०-१२-१३-१४-१६		उद्दात

॥ शब्दक्रमः समाप्तः ॥

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
११०	१९	गमेर्डीः	गमेर्डीः
११२	१३	शब्दकर्ता	शब्दकर्त्ता
११४	३	त्वरित्वोदये	त्वरितोदये
११५	५	निमियते	निमीयते०
११७	६	सोय	सोयं
११८	१७	०सोद्बोध	०सद्बोध
११९	४-२५	प्रत्यात्पू०	प्रत्ययात्पू०
१२०	१४	प्रवाहे	वार्त्तायां प्रवाहे
१२०	१५	चारितार्थो०	चरितार्थो०
१२२	१०	मरातधिपः	भरताधिपः
१२२	२२	०स्वस्तभक्ते०	०श्च स्वभक्ते०
१२३	८	०तधृष्योः	०तनिधृष्योः
१२४	७	धवले शोणिते च यथा-प्रतिफलति	धवले शोणिते च यथा–रजतमराजत–वसनं । हारे यथा–राजते रजतैः कण्ठः दुर्वर्णे । रूप्ये यथा–
१२४	१७	उदितत्वाड्डोः	उदितत्वाड्डीः
१२५	१	रोहितद्रुमे	रोहितकद्रुमे
१२५	१२	केवलपमज्या०	केवलमपज्या०
१२७	२२	विविस्वांस्तु	विवस्वांस्तु
१२८	६	भयमुपययुम्तस्य	भयमुपययुस्तस्य
१२९	२१	स हसर्व०	सह सर्व०
१३०	२४	इति	इति वा
१३१	११	डोः	डीः
१३५	२४	तप्ता	तृप्ता
१४१	८	आसमन्तत्पदं	आसमन्तात्पदं
१४१	१०	श्राश्च	श्रीश्च
१५२	११	कर्म चा	कर्म वा
१५२	२०	अयंतेऽम्मिन्निति	अयंतेऽस्मिन्निति

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
१५३	१८	शमली	शम्भली
१५३	१९	अगन	अंगनं
१६२	५	०पट्यां०	०पद्यां०
१६३	७	०पट्यां०	०पद्यां०
१६४	१३	लिग्नकंचुकाः	लग्नकञ्चुकाः
१६५	४	भल्ला०	भल्ला०
१७२	१८	पिंडयोमिति	पिण्डयामिति
१७३	२३	तत्रं	तत्र
१७५	१०	पोता	पोते
१८७	४	त्वद्दध्वन्विनोः	त्वष्टध्वन्विनोः
२०१	३	०रौंकारे	०रौंकारे
२१८	६	अमर	अमरा
२१९	१५	०वों	०र्वं०
२२०	८	वास्यत्यसी०	वास्यसो०
२२४	२३	दौहः	दौटः
२२६	६	विश्वायां	वेश्यायां
२२७	१२	शलि०	शालि०
२३३	२३	फणिज्जुकः	फणिज्जकः
२३५	३-१८	तुंबरी	तुबरी
२३९	८	लोहपयी	लोहमयी
२३९	१८	०यामायोरपि	०यामयोरपि
२४१	२३	थार्थान्तरे	तीर्थान्तरे
२४२	७	पाठे०	पीठै०
२४२	८	वरै०	वीरै०
२४३	२२	ऊकरादे०	ऊरादे०
२४७	६	मंजर्योः	कुञ्जमञ्जर्योः
२४८	७	जीवीतेश०	जीवितेश०
२४९	२०	घूत	धृत०
२५१	१२	शर्कयुरुदेशः	शर्करायुरुदेशः
२५४	२०	०नंभसां	०नांभसां

पृष्ठ	पंक्तिः	अशुद्धम्	शुद्धम्
२५५	१८	द्वारशंगारेति	द्वारशृंगारेति
२५५	२५	सरन्ध्र्या	सैरन्ध्र्या
२६१	६	कुशलौ०	कुशलो०
२७१	१५	(दरिणीदृशः)	(हरिणीदृशः)
२७३	१६	करायिका	कारायिका
२७३	१७	कररः	कुररः
२८२	१२	गृध्न	गृध्र
२८३	१८	सामुन्द्रं	सामुद्रं
२८५	२३	०धनुष्यापि	०धनुष्यपि
२८८	७	रोषादधाना०	रोषाद्दधाना०
२९३	३–२४	गिरिशो	गिरीशो
२९४	२१	नूपैः	नृपैः
२९७	५	विपशा	विपाशा
२९९	२५	०निनानी	०निनीनां
३००	१	गण्डूक्षो	गण्डूषो
३०१	२१	पीयूस०	पीयूष०
३०६	११	दिर्घ०	दीर्घ०
३०९	६	अतिवाठे	अतिवाढे
३०९	२२	०रवयः	०षवयः
३१०	६	अतिवाठे	अतिवाढे
३१३	१९	सौ डार्य	सौ डीर्य
३१५	२१	श्रहेम०	श्रीहेम०
३१९	८	कौ यकः	कौलेयकः
३२४	१६	प्रयाजन	प्रयोजन
३२९	१४	अवपर्जन०	अपवर्जन०
३३०	१	०वुपसर्गै	०वुपसर्ग
३४४	१०	अपि	अप-
३४५	३	०परुच्चितः	०पच्चितः
३५७	१०	वषुकाब्दे	वर्षुकाब्दे
३६०	१२	कन्य०	कान्य०

पृष्ठ	पंक्तिः	अशुद्धम्	शुद्धम्
३६३	२	स्यादुतन०	स्यादुत्पतन०
३६३	१०	प्रणये । उपाधी	प्रणये ।
३६३	११	नागाङ्के	नागाङ्कं
३७९	२०	प्रतिश्रियः	प्रतिश्रयः
३८४	१	नद्यदि०	नद्यादि०
३८४	२	अग्निहोत्रे०	अग्निहोत्रो०
३८५	२०	त्वमनरङ्गः	त्वमनङ्गः
३९०	१२	(७–१–६६)	(६–१–६६)
३९३	८	पारिभद्रस्तु	पारिभद्रौ तु
३९९	३	विमदने	विमर्दने
३९९	२४	स्याच्चक्रवालं	स्याच्चक्रवालं
४०३	२२	मातारि	मातरि
४०५	२०	अमेवर्रा०	अमेर्वरा०
४०६	१	०शावानुकर्षो०	शावनुकर्षे०
४०६	८	परिवेषणेः	परिवेषणे
४०८	७	शान्ताः	सान्ताः
४०९	१०	केनेति	फेनेति
४११	३३	०श्वमारके	०श्ववारके
४११	९	विशोषिणाम्	०विशेषिणाम्
४१२	२३	पन्त्यां	पत्न्यां
४२०	२०	स्यादुस्पर्शनं	स्यादुपस्पर्शनं
४२१	६	पद्मलाच्छनो	पद्मलाञ्छनो
४२१	७	पद्मलाच्छना	पद्मलाञ्छना
४२५	१७	॥ ४३ ॥	॥ ४१ ॥
४२७	१	शिरस्त्रक०	शिरः स्रक०
४२७	१०	वान्ताः	वान्तः
४३८	२	पादपूर्णो	पादपूर्णौ
४३८	९	पृच्छत्य०	स्म–पृच्छत्य०
४३८	१३	पादपूर्णौ	विशेषे पादपूर्णौ
४३८	२१	हादी	हादि

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
४३९	३	परिस्प्रने	परिप्रश्ने
४४०	६	स्ततावॱ	स्तुतावॱ
४४०	२१	ॱप्रकाथेॱ	ॱप्रकाशेॱ
४४३	२०	मन्त	हन्त
४४४	८	ॱतोद्ध्वमॱ	ॱतोदूर्ध्वमॱ
४४६	१४	ननुन	ननु
४४७	२०	ॱगाढुंॱ	ॱगाढुॱ
४५१	३–२३	ॱप्रतिॱ	ॱप्रातिॱ
४५२	१८	ॱरम्भैॱ	ॱरम्भैः
४५६	१	ॱविषादपोः	ॱविषादयोः
४५६	१३	पूर्वाज्जहोतेॱ	पूर्वाज्जुहोतेॱ
४५६	१६	ॱबन्धनस्योऽपि	ॱबन्धनस्थोऽपि
४५६	१९	ॱच्छिदा	ॱच्छिदो
४६०	१५	ॱपूर्वाह्नप्रॱ	ॱपूर्वाह्णप्रॱ